अमृतमहोत्सवग्रन्थमाला-26

पाणिनीय-धातुवृत्ति-कोषः



प्रधानसम्पादकः
प्रो. श्रीनिवासः वरखेडी
कुलपतिः

कोषकारौ
देवानन्द शुक्ल
प्रीति शुक्ला

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
नवदेहली-110058

26

पाणिनीय-धातुवृत्ति-कोषः

कोषकारौ
देवानन्द शुक्ल
प्रीति शुक्ला

अमृतमहोत्सवग्रन्थमाला-26

पाणिनीय-धातुवृत्ति-कोषः

प्रधानसम्पादकः
श्रीनिवासः वरखेडी
कुलपतिः

कोषकारौ
देवानन्द शुक्ल
प्रीति शुक्ला

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः)
नवदेहली

प्रकाशक:
कुलसचिव:
केन्द्रीयसंस्कृतविश्वविद्यालय:
संसद: अधिनियमेन स्थापित:
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी,
नवदेहली-110058
ईपीएबीएक्स : 28524993, 28521994, 28524995 (Extn. 250)
ई मेल : sales@csu.co.in
वेबसाईट : www.sanskrit.nic.in

© केन्द्रीयसंस्कृतविश्वविद्यालय:

प्रथमं संस्करणम् : 2024

ISBN : 978-93-85791-78-9

मूल्यम् : ₹ 620.00

मुद्रक:
डी.वी. प्रिंटर्स
97-यू.बी., जवाहर नगर, दिल्ली-110007

शुभाशंसनानि

पदवाक्यप्रमाणशास्त्रेषु पदशास्त्रम् इति प्रथितं व्याकरणम् । पदेन वाचां मलं दूरीकर्तुं शक्यते इति पतञ्जलिः प्रब्रवीत्। सर्वशास्त्रोपकारकस्य अस्य शास्त्रस्य प्रवर्तकः पाणिनिः। अतः पाणिनीयव्याकरणम् इत्यपि व्याकरणं प्रसिद्धम् अस्ति। शब्दशास्त्रम् इत्यपि अस्यैव शास्त्रस्य नामान्तरम्। शब्दशास्त्रम् अपठित्वा यदि कोऽपि जनः सभामुखं भाषते चेत्तर्हि सः सर्वेषाम् उपहासपात्रं भविष्यति। उक्तमपि-

शब्दशास्त्रमनधीत्य यः पुमान्
वक्तुमिच्छति वचः सभान्तरे ।
रोद्धुमिच्छति वने मदोत्कटं
हस्तिनं कमलनालतन्तुना॥ इति।

अरण्ये मदमत्तस्य गजस्य नियन्त्रणं यथा असम्भवं तथा शब्दशास्त्रम् अविज्ञाय सभामुखं भाषणमपि असम्भवम् इति अनेन श्लोकेन ज्ञायते। वस्तुतस्तु मानवव्यवहाराय सुसंस्कृतं व्याकरणम् अनिवार्यमेव। किञ्च मधुरं सुस्पष्टं च भाषितुं वाक्यविभजनकौशलमभिज्ञातुम् उचितस्वरेण वर्णान् अभिव्यञ्जयितुं सधैर्यं सलयं च वक्तुं व्याकरणज्ञः एव समर्थः नान्यः। व्याकरणमन्तरा नैते गुणाः सिध्यन्त्यपि। एतदपि उक्तम् एव-

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः॥ इति।

एवं गुणगणमण्डितस्यास्य व्याकरणस्य पञ्चाङ्गमपि विज्ञेयमेव। यतोऽहि पाणिनीयं शब्दानुशासनं पञ्चाङ्गपूर्णमेव वर्तते ।

सूत्रपाठः गणपाठः धातुपाठः उणादिपाठः लिङ्गानुशासनम् इत्येतेषु पञ्चसु अङ्गेषु धातुपाठः इतीदम् अङ्गम् अन्यतमम्। धातुपाठसूची क्रियावाचकशब्दानां मूलरूपाणि प्रदर्शयति। सैषा धातूनां वस्तुनिष्ठसूची पाणिनीयधातुवृत्तिकोषे नयनपथमवतरति । एतेषां धातूनां उपसर्गप्रत्यययोः संयोजनपुरस्सरम् अनुप्रयोगः लोकव्यवहारे नितान्तम् उपकुरोति। धातुवृत्तिकोषस्य आधारेण शब्दजालनिर्माणं सुकरं सम्भवत्यपि।

अधुना केन्द्रीयसंस्कृतविश्वविद्यालयेन पाणिनीयधातुवृत्तिकोषः इत्येषः ग्रन्थः प्रकाश्यते। अयं ग्रन्थः डा.देवानन्दशुक्लः डा.प्रीतिशुक्ला इत्येताभ्यां जम्पतीभ्यां सुष्ठु सम्पादितः। अतः तयोः शुभाशंसनानि व्याहरामि। कोषस्यास्य प्रकाशनकर्मणि तत्पराय सोत्सुकाय च डा. गणेश ति.पण्डितवर्याय अपि सन्दर्भेऽस्मिन् स्वस्ति। अस्य ग्रन्थस्य अध्ययनेन पाठकाः लाभान्विताः भविष्यन्ति इति आशाभावः अस्माकम्।

आचार्यः श्रीनिवासः वरखेडी ,
कुलपतिः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, दिल्ली

प्रास्ताविकम्

॥ वन्दे महापुरुष ते चरणारविन्दम् ॥
॥ मातृपितृगुरुचरणकमलेभ्यो नमः ॥

विश्वस्य प्राचीनतमः ग्रन्थः ऋग्वेदः। वैदिके वाङ्मये ऋग्वेदः अन्यतमः। वैदिकवाङ्मयं संहिता-ब्राह्मण-आरण्यक-उपनिषदां समष्टिः। वेदाध्ययने उपकारकाणि षडङ्गानि शिक्षा-कल्प-निरुक्त-व्याकरण-छन्दोज्यौतिषाणि प्रथितानि। एतेषु षट्सु अङ्गेषु व्याकरणं प्रधानम् अङ्गं परिगण्यते।

संस्कृतवाङ्मयपरम्परायां व्याकरणशास्त्रपरम्परापि अतीव प्राचीना वर्तते। वैदिकवाङ्मयमिव व्याकरणमपि अतीव पुरातनं विद्यते। वैदिकसाहित्ये ब्राह्मणसंहितारण्यकोपनिषत्सु अपि व्याकरणप्रतिपाद्यविषयाः क्वचित् क्वचित् दृश्यन्ते। विस्तरेण व्याकरणविषयाः तत्सम्बद्धविषयाश्च शिक्षाग्रन्थेषु प्रातिशाख्येषु निरुक्तेषु व्याकरणेषु च समुपबृंहिताः सन्ति। पाणिनेः पूर्ववर्तिनः नैके वैयाकरणाः पाणिनेः प्राक् विविधं व्याकरणं तेनुः। पाणिनिः स्वयमेव दशानां पूर्ववर्तिनां वैयाकरणानां नामानि उल्लिलेख। एते दश वैयाकरणाः आपिशलिः[1] काश्यपः[2] गार्ग्यः[3] गालवः[4] चाक्रवर्मणः[5] भारद्वाजः[6] शाकटायनः[7] शाकल्यः[8] सेनकः[9] स्फोटायन[10]श्च सन्ति। तदतिरिच्य पाणिनिपूर्ववर्तिनां षोडशानाम् अन्येषाम् अपि वैयाकरणानां नामानि अन्यत्र लभ्यन्ते। एते षोडश वैयाकरणाः शिवः महेश्वरः वा बृहस्पतिः इन्द्रः वायुः भरद्वाजः भागुरिः पौस्करसादिः चारायणः काशकृत्स्नः सनातनः व्याघ्रपादः माध्यन्दिनिः रौढिः शौनकः गौतमः व्याडिश्च वर्तन्ते ।[11]

---

[1] वा सुप्यापिशलेः (पा० अ० ६/१/९२)

[2] तृषिमृषिकृषेः काश्यपस्य (पा० अ० १/२/२५)

[3] ओतो गार्ग्यस्य (पा० अ० ८/३/२०)

[4] अङ्गार्ग्यगालवयोः (पा० अ० ७/३/९९)

[5] ई३ चाक्रवर्मणस्य (पा० अ० ६/१/१३०)

[6] ऋतो भारद्वाजस्य (पा० अ० ७/२/६३)

[7] त्रिप्रभृतिषु शाकटायनस्य (पा० अ० ८/४/५०)

[8] लोपः शाकल्यस्य (पा० अ० ८/३/१९)

[9] गिरेश्च सेनकस्य (पा० अ० ५/४/११२)

[10] अवङ् स्फोटायनस्य (पा० अ० ६/१/१२३)

[11] व्याकरण शास्त्र का इतिहास- युधिष्ठिर मीमांसक

धातुपाठाः तेषां प्रवक्तारश्च (संक्षिप्तः उल्लेखः)

व्याकरणशास्त्रे पञ्चानामङ्गानां परम्परा दृश्यते। अत एव पञ्चाङ्गं व्याकरणम् इत्यपि प्रथितम्। पञ्च अङ्गानि इमानि सन्ति - सूत्रपाठः धातुपाठः गणपाठः उणादिपाठः लिङ्गानुशासनञ्चेति।

एतेषु पञ्चसु अङ्गेषु धातुपाठः अतिमहत्वपूर्णं स्थानं भजते। प्रायेण संस्कृतशब्दाः व्युत्पन्नाः इति प्रसिद्धा परम्परा। प्रायेण सर्वेषां शब्दानां व्युत्पत्तिः धातुभिः एव प्रदर्श्यते। उच्यते च - सर्वं च नाम धातुजमाह । अत एव संस्कृतव्याकरणे धातूनां महत्त्वं सर्वथा अतिशेते।

बहवः वैयाकरणाः धातूनां प्रवचनम् अकार्षुः। श्रीमता युधिष्ठिरमीमांसकेन व्याकरणशास्त्रेतिहासग्रन्थे षड्विंशतेः वैयाकरणानाम् उल्लेखः कृतः। तेषां व्याकरणानि सम्प्रति नोपलभ्यन्ते अतः तेषु केन केन धातुप्रवचनं कृतमिति निश्चप्रचं वक्तुमशक्यम्। किञ्च प्रकृतिप्रत्ययविभाग-कल्पनां विना व्याकरणप्रवृत्तिः न सम्भवति इति धिया प्रायेण तैः सर्वैरपि धातुप्रवचनं कृतं स्यादिति ऊहितुं शक्यते। युधिष्ठिरमीमांसकवर्यैः पाणिनिपूर्ववर्तिनां धातुपाठप्रवक्तॄणां येषां धातुपाठविषये काचित् सूचना कुतश्चित् लब्धा तेषां संक्षेपेण विवरणं प्रादायि। एतेषु इन्द्रः वायुः भागुरिः काशकृत्स्नः शाकटायनः आपिशलिः इत्येते प्रमुखाः विद्यन्ते।

संस्कृतवाङ्मये पाणिनेः शब्दानुशासनं पञ्चभिः अवयवैः परिपूर्णं समुपलभ्यते। पाणिनीयव्याकरणसम्प्रदाये यः धातुपाठः पठनपाठनयोः समुपयुज्यते सः पाणिनिप्रोक्तः इति बहुभिः वैयाकरणैः मन्यते। यद्यपि न्यासकारः जिनेन्द्रबुद्धिः पाणिनीयसम्प्रदाये प्रचलितधातुपाठस्य पाणिनि-प्रोक्तत्वं नैव स्वीकरोति। किञ्च व्याकरणशास्त्रेतिहासकाराः अन्ये च विद्वांसः जिनेन्द्रबुद्धेः मतमेतन्नाद्रियन्ते । सम्प्रति पाणिनीयधातुपाठनाम्ना प्रसिद्धः धातुपाठः पाणिनिना प्रोक्तः इत्येव सिद्धान्तः मन्यते।

पाणिनीयधातुपाठः सूत्रपद्धत्या विरचितः। यथा पाणिनीयशब्दानुशासने विधिनिषेधादिप्रकाराणां सूत्रानुसारः निर्देशः वर्तते तथैव पाणिनीयधातुपाठेऽपि वर्तते। यथा-

भू सत्तायाम्	अयं विधिः।
न कम्यमिचमाम्	अयं निषेधः।
राधोऽकर्मकाद्वृद्धावेव	अयं नियमः ।
स्वादयः ओदितः	अयमतिदेशः।
घटादयो मितः	इयं संज्ञा।
अदन्ताः	अयमधिकारः।

सूत्रेषु अनुवृत्त्यनुकर्षणाय चकारः प्रयुक्तः। विकल्पविधानार्थं वा शब्दः प्रयुक्तः यथा आधृषाद्वा।

धात्वर्थनिर्देशकसूत्राणां वर्गत्रयं दृश्यते- प्रथमवर्गे एकस्य अनेकेषां वा धातूनां विभक्तिं विना पाठः कृतः। अर्थनिर्देशस्तु सप्तम्यन्तपदेन कृतः। केचन धातवः सूत्रेषु सविभक्तिकाः निर्दिष्टाः यथा राधोऽकर्मकाद्वृद्धावेव भुवोऽकल्कने, कृपेस्तादर्थ्ये। केषुचित् सूत्रेषु पूर्वमर्थं विचार्य पश्चात्

सविभक्तिकधातुप्रयोगः कृतः यथा मारणतोषणनिशामनेषु ज्ञा कम्पने चलिः जिह्वोन्मथने लडिः। केषुचित् सूत्रेषु पदक्रमः वर्तते तथाहि पूर्वमुपसर्गप्रयोगः पश्चाद्धातुप्रयोगः पश्चादर्थनिर्देशश्च यथा-आङः शासु इच्छायाम्। केचन धातवः नेकेषु गणेषु पठिताः। तत्र इमे हेतवः स्युः। प्रथमः हेतुः धातुः समानार्थकः किञ्च रूपे भेदः यथा पुष पुष्टौ धातुः तत्र भ्वादौ पोषति इति रूपम्। दिवादौ पुष्यति इति क्र्यादौ पुष्णाति इति रूपं भवति। अत्र रूपभेदः वर्तते परञ्च एक एवार्थः। द्वितीयः हेतुः अर्थभेदः रूपभेदश्च । यथा विदधातुः अदादिगणीयः विदधातोः वेत्ति इति रूपम्। तत्र ज्ञानार्थे विदधातुः प्रयुक्तः। तथैव दिवादौ विदधातोः विद्यते इति रूपम्। तत्र सत्तार्थकः विदधातुः रुधादौ विन्ते इति रूपम् तत्र विचारणार्थः विदधातुः। तृतीयो हेतुः स्वरभेदः यथा षद्लृधातुः तस्य भ्वादौ सीदति इति रूपम् तत्राद्युदात्तस्वरः तुदादौ मध्योदात्तस्वरः। इतोऽपि नैकविशिष्ट्यप्रयुक्तः पाणिनीयधातुपाठः दिङ्मात्रमेवात्र उद्धृतः।

काशकृत्स्नधातुपाठः सर्वेभ्यः धातुपाठेभ्यः विशालकायः अस्ति। धातुपाठेऽस्मिन् अनुबन्धनामुपसर्गाणामपि धातुत्वेन प्रयोगो वर्त्तते यथा अति उपसर्गस्य धातुत्वेन क्रमणहिंसयोः अर्थयोः प्रयोगः लभ्यते।

चान्द्रधातुपाठस्य प्रवक्ता चन्द्रगोमी वर्तते। एषः बङ्गदेशीय इति प्रतिपादितं व्याकरणशास्त्रेतिहासकारैः। चन्द्रगोमी देवनन्दिनः परवर्ती । देवनन्दिनः कालः पञ्चमशताब्द्यां मन्यते । अतः चन्द्रगोमिनः कालः पञ्चमशताब्द्याः पूर्ववर्ती स्यात् । वाक्यपदीयस्य द्वितीयकाण्डे चन्द्रगोमिना महाभाष्यस्य प्रचारः कृतः इति प्राप्यते अतः चन्द्रगोमी पतञ्जलेः परवर्ती एवास्ति । पतञ्जलेः कालः १४५ ई०पू० अङ्गीक्रियते । भर्तृहरेः कालः ५०० ई० अस्ति अतः चन्द्रगोमिनः कालोऽपि २५०-३५० ई- मध्ये स्यात्।

धातुपाठोऽयं पाणिनीयधातुपाठापेक्षया लघुः। अत्र १५७५ धातवः सन्ति। चान्द्रधातुपाठे प्रायः समानार्थकाः धातवः सन्ति। सप्तदशसु स्थलेषु अनेकार्थवाचकाः धातवः सन्ति। चान्द्रधातुपाठे अतङाना इत्यनेन पाणिनिप्रयुक्तपरस्मैपदस्य बोधः जायते। तङानिन् इत्यनेन आत्मनेपदबोधो भवति। विभाषिताः इति शब्देनोभयपदस्य बोधो भवति। क्रमदृष्ट्याऽपि पाणिनीयधातुपाठे चान्द्रधातुपाठे चास्ति पार्थक्यम्। धातुपाठेऽस्मिन् भाषार्थकधातुवर्गः लुप्तः। एतदतिरिक्तम् आकुस्मीय आधृषीय इत्यादीनां कथाद्यन्तर्गणानामपि पाठो न विद्यते। चान्द्रधातुपाठे पाणिनिप्रयुक्तस्य ञि इत्यनुबन्धप्रयोगो न दृश्यते।

जैनेन्द्रधातुपाठः देवनन्दिना प्रोक्तः। देवनन्दिना स्वकीयग्रन्थे स्वकालविषये गुरुपरम्पराविषये च न किमपि लिखितम्। व्याकरणशास्त्रेतिहासकारैः एतस्य कालः ४१३-४५३ ईश्वीये निर्णीतः।

एषः धातुपाठः चान्द्रधातुपाठादपि लघुः। पाणिनिप्रयुक्तानां परस्मैपद-आत्मनेपद-उभयपदसंज्ञानां स्थाने जैनेन्द्रधातुपाठे भवन्ता, एदित्, जित् इति संज्ञाः प्रयुक्ताः। भू धातोः पश्चादात्मनेपदि-परस्मैपदि-

उभयपदिधातूनां यथाक्रमं पाठाः वर्तन्ते। अत्र जुहोत्यादिगणः अदादिगणात् प्राग्वर्तते। ऐ औ इत्यनुबन्धद्वयस्य प्रयोगः अन्येभ्यः अस्य धातुपाठेभ्यः वैशिष्ट्यं विद्यते। ऐ अनुबन्धः आत्मनेपदीयधातूनां कृते अस्ति। औ अनुबन्धः अनिट्धातूनां द्योतकः वर्तते । छान्दस-धातूनां प्रयोगः जैनेन्द्रधातुपाठे न विद्यते। जैनेन्द्रधातुपाठे केचन सन्ति एतादृशाः धातवः येषामर्थः पाणिनिनिर्दिष्टधात्वर्थाद्भिन्नः। यथा- क्षुभ सञ्चलने इति पाणिनिधातुपाठे। जैनेन्द्र धातुपाठे क्षुभ संक्षोभे इति पठ्यते। सार कृप श्रथ दौर्बल्ये इति पाणिनीयधातुपाठे लभ्यते जैनेन्द्रधातुपाठे शैथिल्येऽर्थे एते धातवः पठिताः।

कातन्त्रधातुपाठः दुर्गसिंहेन प्रोक्तः। क्षीरस्वामिपुरुषकाराभ्यां स्वकीयग्रन्थेषु कातन्त्रधातुपाठस्योल्लेखः दुर्गः अथवा दौर्गः इति नाम्ना कृतः। कातन्त्रधातुपाठः काशकृत्स्नधातुपाठस्य संक्षेप एव। एषोऽपि जैनेन्द्रात् परवर्ती।

काशकृत्स्नधातुपाठ इव कातन्त्रधातुपाठेऽपि नव गणाः वर्तन्ते। जुहोत्यादिगणः अदादिगणान्तर्गतः। धातुपाठक्रमोऽपि काशकृत्स्नधातुपाठ-वद्वर्तते । घटादिसूत्राणां शब्दानुपूर्व्यामपि काशकृत्स्नकातन्त्रधातुपाठयोः अस्ति साम्यम् यथा-

काशकृत्स्नधातुपाठे-

ज्वलह्वलह्मलनमोऽनुपसर्गाद्वा।

कातन्त्रधातुपाठे -

ज्वलह्वलह्मलनमामप्रमादीनां वा।

काशकृत्स्नकातन्त्रधातुपाठयोः -

ग्लास्नावनुवमश्वनकम्यमिचमः

शाकटायनधातुपाठः पाणिनेः परवर्तिना पाल्यकीर्तिशाकटायनेन प्रोक्तः। पाल्यकीर्तिः यापनीयसम्प्रदायदीक्षितः। यापनीयसम्प्रदाये दिगम्बर-श्वेताम्बरयोः मध्यवर्तिसम्प्रदायः आसीत्। पाल्यकीर्ति-शाकटायनस्य समयविषये नास्ति मतभेदः। एतस्य कालः नवमशताब्द्यामस्ति निर्णीतः।

शाकटायन-धातुपाठः दशसु गणेषु विभक्तः। शाकटायनधातुपाठः जैनेन्द्रधातुपाठस्यैव संवर्धितरूपः। प्रथमे दशमे गणे पठिताः धातवः जैनेन्द्र-धातुपाठ इव वर्तन्ते। छान्दस-धातूनां प्रयोगः जैनेन्द्रधातुपाठवत् अत्रापि नास्ति। धातुपाठेऽस्मिन् अन्येभ्यः धातुपाठेभ्यः किञ्चिद्वैशिष्ट्यं दृश्यते। एषः धातुपाठः भूधातोः न आरभते। अस्मिन् धातुपाठे भूधातुः परस्मैपदिषु धातुषु अन्तः निविष्टः। एष एव धातुपाठः तादृशः लभ्यते यस्य आरम्भः भूधातोः नास्ति।

हैमधातुपाठः हेमचन्द्रसूरिणा प्रोक्तः। एतस्य जन्म गुर्जरप्रान्तस्य अहमदाबादनगरस्य धुन्धकग्रामे कार्तिक-पूर्णिमायां संवत् ११४५ मध्येऽभूत्। मृत्युः १२२९ खीष्ट्राब्दे अभूत्। हेमचन्द्रसूरिणः पितुः नाम चाचिग एवं मातुर्नाम पाहिणी आसीत्। हेमचन्द्रसूरिः मौढ्यवंशीयवैश्यकुले बभूव।

हैमधातुपाठे अकारादिक्रमेण धातुनिरूपणं वर्तते। अन्तर्गणीयधातूनामपि अकारादिक्रमेण काशकृत्स्न-कातन्त्रधातुपाठवत् हैमधातुपाठेऽपि जुहोत्यादिगणस्य अदादिगणेऽन्तर्भावः दृश्यते। क्षवर्णः अत्र स्वतन्त्रवर्णत्वेन परिगणितः अतः हकारान्तधातूत्तरं क्षकारान्तधातूनां पाठः विद्यते। तस्य गणस्य धातुः तदनुबन्धेन युक्तो भवति एतेन कस्य धातोः कस्मिन् गणे पाठ इति ज्ञानं सारल्येन भवति । हैम धातुपाठे अनिट् धातुज्ञापनाय अनुस्वारस्य प्रयोगः विद्यते।

कविकल्पद्रुमधातुपाठः वोपदेवेन प्रोक्तः। एतस्य पितुः नाम केशवः। केशवः देवगिर्याः यादववंशीयः सिद्यणस्य सभापण्डितः आसीत्। यादवनरेश-महादेव-रामचन्द्रयोः धर्माध्यक्षः हेमाद्रेः आश्रये वोपदेवेन नानाशस्त्रसंबन्धिग्रन्थाः निर्मिताः। वोपदेवस्य कालः त्रयोदशशताब्द्याः उत्तरार्द्धे स्थिरीभवति।

पद्यात्मकोऽयं धातुपाठः अनुष्टुप्-छन्दसि विद्यते। धातोः अन्तिमं वर्णमाश्रित्य पद्यं निर्मितम्। प्रथमपद्ये आदित्यनमस्कारः तदनु तेषाम् आचार्याणामुल्लेखः कृतः येषां धातुपाठाः वर्तन्ते। अनुबन्धस्थानं तत्प्रयोजनम् अनिट्धातुबोधनाय औकारानुबन्धस्योल्लेखः अस्य वैशिष्ट्यम्। काशकृत्स्नधातु-पाठानन्तरं कविकल्पद्रुमधातुपाठः एवास्ति यत्र सर्वाधिकसंख्याकाः धातवः सन्ति। कविकल्पद्रुमधातुपाठः क्षीरतरङ्गिण्याः हैमधातुपाठात् प्रभावितोऽस्ति। हैमधातुपाठे पठितानां धातूनामपि तत्रोल्लेखः वर्तते यथा खु रिबु कूणिण् पसुन्। कविकल्पद्रुमधातुपाठे ४३ अनुबन्धाः सन्ति तत्र सप्तदशानुबन्धाः आचार्यपाणिनेरेव। औकारानुबन्धः जैनेन्द्रधातुपाठादृहीतः तदतिरिक्ताः स्वोपज्ञाः वर्तन्ते।

पाणिनीयधातुपाठस्य वृत्तयः

आचार्यपाणिनेः धातुप्रवचनकालादारभ्य अद्यावधि अनैकैः आचार्यैः पाणिनीयं धातुपाठम् आश्रित्य वृत्तयः कृताः। किन्तु तासु काश्चन एव इदानीमुपलभ्यन्ते। अनेकासां नामान्यपि अज्ञातानि। अत्र परिज्ञाताः वृत्तिकाराः वृत्तयश्च उद्ध्रियन्ते-

पाणिनिः स्वयमपि पाणिनीयधातुपाठस्य व्याख्याता वर्तते। सः अष्टाध्यायीसूत्राणां कामपि वृत्तिम् अवश्यमेव विनिर्दिष्टवान्। वृत्तिं विना सूत्रग्रन्थस्य प्रवचनं सर्वथा अशक्यम्। इमां परम्परां मनसि निधाय आचार्यसायणः अलिखत्-

अस्माकं तूभयमपि प्रमाणम् उभयथा शिष्याणां प्रतिपादनात्।

क्षीरस्वामिनापि लिख्यते।

वक्ष्यति च--

पाठमध्येऽनुदात्तनामुदात्तः कथितः क्वचित्।
अनुदात्तेऽप्युदात्तानां पूर्वेषामनुरोधतः।

अत्र वक्ष्यति क्रियायाः कर्ता कः, एतत् क्षीरस्वामिना न स्पष्टीकृतम्। क्षीरस्वामिनः वाक्यविन्यासप्रकारेण अनुमीयते यत् क्षीरस्वामिनः दृष्टौ वक्ष्यति क्रियायाः कर्ता भगवान् पाणिनिरेव। अनेन ज्ञायते यत् पाणिनिः एव धातुपाठस्य प्रवचनम् अकरोत् तस्यार्थावबोधनाय वृत्तिमपि अलिखत्।

आचार्यसुनागः पाणिनीयधातुपाठस्य व्याख्यानम् अकार्षीत् इति कतिपयप्रमाणैः ज्ञायते। यथा काशिकायां 'विभाषा भावादिकर्मणोः' इति सूत्रव्याख्यायाम् आचार्यवामनेन लिख्यते-

सौनागाः कर्मणि निष्ठायां शकेरिटमिच्छन्ति विकल्पेन अस्यतेर्भावे।

एतदेव सौनागमतम् आचार्यसायणेन अनेकेषु स्थलेषु निर्दिष्टम्। क्षीरतरङ्गिण्याम् आदौ अन्ते च धात्वर्थसम्बद्धसौनागमतमुद्धृतमस्ति।

भीमसेनः पाणिनीयधातुपाठोपरि कञ्चिद्वृत्तिग्रन्थं व्यरचयत्। पक्षेऽस्मिन् अनेकानि प्रमाणानि सन्ति-

यथा- अत्र आचार्यहेमचन्द्रः हैमशब्दानुशासनस्य बृहद्वृत्तौ लिखति|

अन्ये त्वद्‌टि पठन्ति।

अस्य स्वोपज्ञबृहन्न्यास-इत्याख्यायां व्याख्यायां आचार्य-हेमचन्द्रेणोद्धृतम्

अन्ये त्विति भीमसेनादयः।

कविकल्पद्रुमटीकायां दुर्गादासः लिखति - स्तम्भ इह क्रियानिरोधः इति भीमसेनः।

दैवग्रन्थव्याख्याता कृष्णलीलाशुकमुनिः उद्धरति

क्षप प्रेरणे भीमसेनेन कथादिष्वपठितोऽप्ययं बहुलमेतन्निदर्शनम् इत्युदाहरणत्वेन धातुवृत्तौ पठ्यते।

उपर्युक्तपाठे 'धातुवृत्तौ पठ्यते' इत्यस्य कर्ता भीमसेनातिरिक्तः अन्यः न भवितुमर्हति । अनेन स्पष्टीभवति यत् भीमसेनः कञ्चन धातुवृत्तिव्याख्यान-ग्रन्थमलिखत्।

पारायणनामकः कश्चन ग्रन्थः धातुपाठमाश्रित्य लिखितः आसीदिति विविधेषु ग्रन्थेषु उद्धरणेन ज्ञायते। तथाहि काशिकायाः आरम्भे-

'नामधातुपारायणादिषु' इति लभ्यते

ज्ञापकसमुच्चये - ततः अभ्र बभ्रेति ------बाबभ्र्यते भवतीति पारायणिकाः।

पुरुषकारे - अनिदित् पारायणेष्वपाठि, गोजति जुगोज।

नन्दिस्वामिनाऽपि धातुपाठमाश्रित्य एका व्याख्या अकारि। क्षीरस्वामिना क्षीरतरङ्गिण्यां नैकेषु स्थलेषु नन्दिधातुपाठः उद्धृतः। क्षीरतरङ्गिण्यां 'नन्दीस्वामिनौ' इति पाठः समुपलभ्यते। अस्य पाठान्तरं 'नन्दीस्वामी' अपि वर्तते। दैवव्याख्यानपुरुषकारे सुधाकरस्य उद्धृतः यः पाठः यत्र 'नन्दीस्वामी' इति निर्देशः विद्यते।

राजश्रीधातुवृत्तेः एकः पाठः सर्वानन्देनाऽपि अमरटीकासर्वस्वे उद्धृतः 'दीर्घत्वे सूक्षणमिति राजश्रीधातुवृत्तिः' संभाव्यते यत् राजश्रीधातुवृत्तेः लेखकः राजश्री एव।

नाथीयधातुवृत्तिः अपि पाणिनीयधातुपाठमाश्रित्य काचन वृत्तिः आसीत्। नाथीयधातुवृत्तेः विवरणं सर्वानन्दकृते अमरटीकासर्वस्वे प्राप्यते -

'नाथीयधातुवृत्तावपिकोषवन्मूर्धन्यषत्वं तालव्यत्वं चोक्तम्।'

नाथीयधातुवृत्तेः लेखकस्य नाम अज्ञातः। पदैकदेशन्यायेन रमानाथविरचितधातुवृत्तिः 'नाथीय' इति नाम्ना व्यवहर्तुं शक्यते परन्तु रमानाथस्य कालः वि०सं० १५९३ अस्ति। अतः अस्याः धातुवृत्तेः सम्बन्धः रमानाथेन सह भवितुं नार्हति। कश्चन अन्यः एव अस्याः वृत्तेः कर्ता स्यात्।

कौशिकः इति नाम्ना कस्यचित् धातुवृत्तिकारस्य मतानि क्षीरस्वामिना क्षीरतरङ्गिण्याम् अनेकेषु स्थलेषु उद्धृतानि। उद्धरणैः प्रतीयते यत् कौशिकस्य वृत्तिः पाणिनीयधातुपाठोपरि एव लिखिता भवेत्।

क्षीरस्वामी पाणिनीयधातुपाठस्य औदीच्यपाठोपरि क्षीरतरङ्गिणी नामकम् एकं वृत्तिग्रन्थम् अलिखत्। अनेन महाभागेन क्षीरतरङ्गिण्याम् अमरकोशोद्घाटने च स्वस्य विषये किमपि न वर्णितम्। क्षीरस्वामी स्वजन्मना भारतस्य कं प्रान्तं, नगरं ग्रामं वा अलञ्चकार, अस्मिन् विषयेऽपि किमपि न समुपलभ्यते। क्षीरतरङ्गिण्याः अमरकोशस्य च आरम्भे वाग्देव्याः श्लाघावर्णनेन क्षीरतरङ्गिण्याः अन्ते दृश्यमानेन श्लोकेन च प्रतीयते यत् सः कश्मीरवासी स्यात्। यद्यपि क्षीरस्वामिनः कालविषये निश्चयेन किमपि वक्तुं न शक्यते तथापि विद्वद्भिः विषयेऽस्मिन् विचारणा कृता। केषाञ्चित् मते अस्य कालः संवत् ११०० इति भवेत्। केचिदन्ये आहुः यत् क्षीरस्वामी १११० विक्रमी संवततः पूर्ववर्ती इति।

मैत्रेयरक्षितनाम्ना बौद्धविदुषा धातुपाठोपरि धातुप्रदीपनाम्नी एका लघुवृत्तिः विरचिता । एतेषां जन्मस्थानकुलदेशकालादिविषये किञ्चित् प्रामाणिकरूपेण न प्राप्यते। अनुमीयते यत् एषः बङ्गदेशनिवासी आसीत् इति अस्य ग्रन्थलेखनकालः ११४०-११६५ ई० स्यादिति।

हरियोगिना विरचिता धातुपाठस्य वृत्तिः शाब्दिकाभरणम् इति नाम्ना प्रसिद्धा। हरियोगी पुरुषकार-लीलाशुकमुनेः प्राग्वर्ती विक्रमस्य 12 शतके आसीदिति व्याकरणशास्त्रेतिहासग्रन्थे प्रतिपादितम्। एषा धातुवृत्तिः प्रकाशितेभ्यः दैव-पुरुषकार-माधवीयाधतुवृत्ति-प्रभृतिग्रन्थेभ्यः प्राचीना। अस्याः वृत्तेरुल्लेखः पुरुषकार-माधवीयाधातुवृत्त्यादिग्रन्थेषु बहुत्र वर्तते तद्यथा

पुरुषकारे शाब्दिकाभरणकर्तुः हरियोगिनः उल्लेखः

१. श्रातेरनुकरणमिति हरियोगी।
२. हरियोगी तु अत्र ‘संज्ञापूर्वो विधिरनित्यः इत्येतदाश्रित्य क्षेणोतीत्युदाहर्षीत्।
३. धनपाल-हरियोगि-पूर्णचान्द्रास्तु दरतीत्येवाहुः।
४. रुट लुट इति हरियोगी।

माधवीयाधातुवृत्तौ शाब्दिकाभरणस्य हरियोगिनश्चोल्लेखः

१. शाब्दिकाभरणे तु गुण एवोदाहृतः।
२. रुट लुट लुठ प्रतीघाते-------हरियोगिनस्तु आद्यावेव।

सिद्धान्तकौमुद्याम् आभरणकारस्योल्लेखः

१. णिसि चुम्बने। आभरणकारस्तु इति तालव्यान्तः इति बभ्राम।

शब्दकौस्तुभे आभरणकारस्योल्लेखः : अत्राभरणकारः - गुपादिसूत्रे गुप्तिज्किन्मानित्युपक्रम्य गुपादिष्वनुबन्धकरणमात्मनेपदार्थमिति भाष्ये वार्तिके चोक्तत्वात्कितिः परस्मैपदिषु पठितोऽप्यात्मनेपदी बोध्यः। न च गुपादिष्विति बहुवचनं वक्ष्यमाणमान्बधाद्यपेक्षमिति वाच्यम्, भाष्ये विशिष्य कितेरप्युपक्रमादित्याह एतदनुसारी वर्तमानोऽपि ‘स्वाश्रयं कश्चिकित्सतु’ इति खण्डनस्य व्याख्यावसरे ‘चिकित्सतामिति तु युक्तम्’ इत्याह।

लीलांशुकमुनिविरचितदैवव्याख्याने पुरुषकारेऽस्य नामोल्लेखः उपलभ्यते। अत एव हरियोगी पुरुषकार-लीलाशुकमुनेः प्राग्वर्ती विक्रमस्य १२ शतके आसीदिति प्रतीयते।

श्रीहरियोगिनो वंशादिवृत्तं न ज्ञायते। मद्रासराजकीयपुस्तकालयस्य भ्वादिप्रकरणस्यान्ते लिखितम्-
‘‘इति हरियोगिनः प्रोल्लनाचार्यस्य कृतौ शाब्दिकाभरणे शब्विकरण भूवादवो धातवः समाप्ताः।।’’

अनेन ज्ञायते यत् हरियोगिनः पितुः नाम प्रोल्लनाचार्यः आसीत्।

परन्तु तस्यैव हस्तलेखस्यान्ते-

''इति हरियोगिनः शैलवाचार्यस्य कृतौ शाब्दिकाभरणे धातुप्रत्ययपञ्जिकायां सौत्रधातवः समाप्ताः॥''

इति पाठः उपलभ्यते। तत्रास्य पितुर्नाम शैलवाचार्य इति लिखितम्।

सरस्वतीभवनपुस्तकालयस्य हस्तलेखे प्रतिप्रकरणम् अन्ते-

''इति हरियोगिनः प्रोल्लनाचार्यस्य कृतौ शाब्दिकाभरणे -----------धातवः समाप्ताः॥''

इत्युल्लेखः प्राप्यते।

पितुः नाम्नः उल्लेखः स्वनाम्नः परं अनेकत्र क्रियते अतः हरियोगिनः पितुः नाम प्रोल्लनाचार्यः इति सरस्वतीभवनहस्तलेखस्य आधारेण वक्तुं शक्यते।

मद्रासहस्तलेखे शाब्दिकाभरणस्य नाम्ना सह धातुप्रत्ययपञ्जिकायाः नामान्तरमप्युपलभ्यते। एषा धातुप्रत्ययपञ्जिका शाब्दिकाभरणस्यैवान्तर्गता इति यस्यां केवलं धातुप्रकरणस्यैव व्याख्या विहिता।

देवनामकः कश्चन विद्वान् पाणिनीयधातुपाठविषये 'दैव' इति नाम्ना एकं श्लोकात्मकं ग्रन्थं व्यरचयत्। एतेषां देशकालविषयेऽपि अधिकं प्रामाणिकं नोपलभ्यते। दैवग्रन्थस्य सम्पादकेन गणपतिशास्त्रिणा एतेषां कालः ख्रीस्ताब्दनवमशताब्द्याः आरभ्य द्वादशशताब्द्याः मध्ये स्यादिति स्वीकृतः। देवः मैत्रेयरक्षितादुत्तरवर्ती। अतः एतेषां कालः ११५० तः १२०० मध्ये स्यात्।

काश्यपेन कापि धातुवृत्तिः रचिता। माधवीया धातुवृत्तौ काश्यपनामवैयाकरणस्य धातुवृत्तिविषयकमतानि उद्धृतानि। अस्य आचार्यस्य कालविषये इदमित्थं किमपि वक्तुं न शक्यते।

आत्रेयेण अपि धातुपाठोपरि कश्चिद्वृत्तिग्रन्थः लिखितः आसीत्। सायणाचार्येण माधवीयाधातुवृत्तौ आत्रेयस्य मतानि बहुधा उद्धृतानि। अस्य साक्षादुल्लेखः सायणेन अथर्वभाष्ये (२/२०/५) कृतः। पाणिनीयधातुपाठस्य व्याख्यात्रा मैत्रेयेण सह आत्रेयस्योल्लेखेन ज्ञायते यत् आत्रेयेण पाणिनीयधातुपाठविषये एका वृत्तिः लिखिता। सायणेन आत्रेयः उद्धृतः। सायणस्य कालः १४०० वि०सं० अस्ति। अतः आत्रेयः १४०० वि०सं० पूर्ववर्ती स्यात्।

हेलाराजेन अपि पाणिनीयधातुपाठविषये विरचिता काऽपि वृत्तिः आसीत्। वृत्तिकारस्य अस्य उल्लेखः माधवीया धातुवृत्तौ लभ्यते -

अत्र स्वामी संहितायां धातुपाठात् 'वा' शब्दमुत्तरधातुशेषं वष्टि। तन्निपातस्य वा शब्दस्य 'च' शब्दादिवत् पूर्वप्रयोगो नेति हेलाराजीयादौ समर्थनादयुक्तम्।

उद्धरणेऽस्मिन् स्मृतः हेलाराजः वाक्यपदीयटीकाकारो तद्भिन्नो वा भवितुमर्हति। यदि अयं वाक्यपदीयटीकाकारः स्यात्तदा अस्य समयः एकादशशताब्द्याः उत्तरार्द्धभागः भवेत्।

आचार्यसायणः संस्कृतवाङ्मये अत्यन्तं प्रसिद्धः। सायणेन ज्येष्ठभ्रातुः माधवस्य नाम्ना पाणिनीयधातुपाठे रचिता धातुवृत्तिः। व्याकरणवाङ्मये एषा माधवीया धातुवृत्तिः, धातुवृत्तिः वा इति नाम्नाऽभिधीयते। सायणेन स्वविरचितग्रन्थेष्वात्मपरिचयः प्रदत्तः। अस्य पितुर्नाम मायणः मातुः नाम श्रीमती आसीत्। अस्य ज्येष्ठभ्राता माधवः कनिष्ठश्च भ्राता भोगनाथः आसीत्। सायणः भारद्वाजगोत्रीयः तैत्तिरीयसंहितेयः बौधायनसूत्रीयश्च आसीत्। अस्य जन्म वि०सं० १३७२ तमे वर्षे अभूत् शरीरत्यागश्च वि०सं० १४४४ तमे वर्षेऽभूत्। सायणः एकत्रिंशे आयुषि विजयनगरस्य महाराजहरिहरप्रथमस्य अनुजकम्पणस्य मन्त्रिपदमलङ्करोत्। ततः कम्पणपुत्रसंगमस्य शिक्षकपदं मन्त्रिपदञ्च अलञ्चकार। तदनन्तरं बुक्कप्रथमस्य हरिहरद्वितीयस्य च आमात्यपदं सुशोभितवान्। धातुवृत्तेः आद्यन्तपाठं दृष्ट्वा ज्ञायते यत् सायणेन राज्ञः संगमस्य राज्यकाले धातुवृत्तिः विरचिता। अनेन सम्भाव्यते यत् धातुवृत्तिः वि०सं० १४१२-१४२० मध्ये लिखिता आसीत्।

पाणिनीयधातुपाठस्य प्रति धातुमाश्रित्य तत्र "हरियोगिविरचितं शाब्दिकाभरणं, मैत्रेयरक्षितरचितः धातुप्रदीपः, क्षीरस्वामिकृता क्षीरतरङ्गिणी, सायणविरचिता माधवीयाधातुवृत्तिः, गुरुनाथविद्यानिधिभट्टाचार्यविरचितः धातुरूपकल्पद्रुमः" इमाः धातुवृत्तीः आश्रित्य "पाणिनिधातुवृत्तिकोशः" अयं ग्रन्थः सज्जीकृतः।

ग्रन्थेऽस्मिन् पाणिनिधातुपाठे प्रयुक्तानां धातूनां वैशिष्ट्यम् वर्णितम्। यथा -

❖ **विद [विद्] ज्ञाने** **(अदा०)**

विद ज्ञाने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

इतश्चत्वारः सेटः परस्मैपदिनश्च। दिवादौ विद सत्तायाम्। तुदादौ विद्लृ लाभे। रुधादौ विद विचारणे। चुरादौ विद चेतनाख्यानविवादेषु। (क्षी.त.)

अयं सत्तायां दिवादौ। विचारणे रुदादौ। चेतनाख्याननिवासेषु चुरादौ। विद्लृ लाभे तुदादौ। (मा.धा.)

विद्, सेट्, सक, प।

वेत्तिरूपं विद ज्ञाने
विन्ते विद विचारणे।
विद्यते विद सत्तायां
लाभे विन्दति विन्दते॥ (धा.क.)

❖ **विद [विद्] सत्तायाम्** **(दिवा०)**

विद् सत्तायाम्। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

सत्ता भावः। अदादौ विद ज्ञाने । तुदादौ विद्लृ लाभे । रुधादौ विद विचारणे । चुरादौ विद चेतनादिषु। (क्षी.त.)

विद्, अनिट्, सक, आ। अदादौ विशेषो द्रष्टव्यः। (धा.क.)

❖ **विद [विद्] विचारणे (रुधा०)**

विद विचारणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

दिवादौ दुर्गमते। (क्षी.त.)

विद्, अनिट्, सक, आ। (धा.क.)

❖ **विद [विद्] चेतनाख्याननिवासेषु(चुरा०)**

विद चेदनाख्याननिवासेषु। (धा.प्र.)
(मा.धा.)(धा.क.)

विद चेतनाख्यानविवादेषु। (क्षी.त.)

विद् चेतन इत्येके। विद चेतनाख्यानपरिवादेषु इत्यपरे।

सत्तायां विद्यते ज्ञाने
वेत्ति विन्ते विचारणे।
विन्दते विन्दति प्राप्तौ
श्यन्लुक्श्नम्शेषु च क्रमात्। (मा.धा.)

विदु चेतन इत्युदनुबन्ध इत्येके, विद चेतनाख्यानपरिवादेष्वित्यपरे। विद, अक, आ। वेदयते। अत्र कारिका -

सत्तायां विद्यते ज्ञाने
वेत्ति विन्ते विचारणे।
विन्दते विन्दति प्राप्तौ
श्यन्लुक्श्नम्शेषु च क्रमात्। (धा.क.)

❖ **विद्लृ [विद्] लाभे (तुदा०)**

विद्लृ लाभे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अयं सेडपि मुचादिकार्यानुरोधार्थमिह पठितः। (मा.धा.)

व्याघ्रभूत्यादिमते विदधातुः अयं सेट्, कलापादिमते अनिट्, मतान्तरे वेट्, विद् (लृ) सक, उ। (धा.क.)

उपर्युक्तविवरणेन ज्ञायते यद् **विद** धातोः प्रयोगः पाणिनिधातुपाठे विभिन्नगणेषु दृश्यते। **विद-**धातुमाश्रित्य वृत्तिकाराणां यः आशयः सोऽत्र प्रदर्शितः इति धिया अयं कोशः व्याकरणाध्ययनदृष्ट्या जिज्ञासूनां कृते महदुपकाराय भवेदिति।

परमादरणीयान् केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिवर्यान् प्रो.श्रीनिवासवरखेडिमहोदयान् सादरं प्रणमामि कार्तज्ञञ्च विज्ञापयामि येषां प्रोत्साहनेन आशिषा च कार्यमिदं रूपमेतत् अवाप्नोत्।

कार्येस्मिन् प्रत्यक्षं परोक्षं वा साहायम् आचारितवन्तः समेपि भूरिशः धन्यतावचनेन भूष्यन्ते इति शम्।

देवानन्द शुक्ल
प्रीति शुक्ला

सङ्केताक्षरसूची

शा.आ. :	हरियोगिविरचितं शाब्दिकाभरणं
धा.प्र. :	मैत्रेयरक्षितरचितः धातुप्रदीपः
क्षी.त. :	क्षीरस्वामिकृता क्षीरतरङ्गिणी
मा.धा. :	सायणविरचिता माधवीयाधातुवृत्तिः
धा.क. :	गुरुनाथविद्यानिधिभट्टाचार्यविरचितः धातुरूपकल्पद्रुमः

पाणिनीय-धातुवृत्ति-कोशः

श्री गणेशाय नमः

॥ वन्दे महापुरुष ते चरणारविन्दम् ॥

❖ **अंश [अंश्] समाघाते** **(चुरा०)**

अंश समाघाते। समाघातो विभाजनम्। चन्द्रो दन्त्यान्तमाह। (क्षी.त.)

❖ **अंस [अंस] समाघाते** **(चुरा०)**

अंस समाघाते। (धा.प्र.)(मा.धा.)(धा.क.)

अंस, अक, प। (धा.क.)

❖ **अक [अक्] कुटिलायां गतौ** **(भ्वा०)**

अक अगि कुटिलायां गतौ। (शा.आ.)

अक अग कुटिलायां गतौ। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

पृषोदरादौ न अनस ओकं गतिहन्तीत्यनोकहो वृक्षः। (क्षी.त.)

मा भवानकीत्। मा भवानचकत्। मा भवानकि। मा भवानकि इत्यादि। (मा.धा.)

अक्, अग्, सेट्, अक, प। मा भवानचिकत्। मा भवानकि, मा भवानाकि। (धा.क.)

❖ **अकि [अङ्क्] लक्षणे** **(भ्वा०)**

अकि लक्षणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

लक्षणं चिह्नम्। (क्षी.त.)

अकि कुटिलायां गतावित्यग्रे। अङ्क लक्षण इति चुरादौ। (मा.धा.)(धा.क.)

❖ **अकि [अङ्क्] लक्षणे** **(चुरा०)**

अकि लक्षणे। (क्षी.त.)

❖ **अक्षू [अक्ष्] व्याप्तौ** **(भ्वा०)**

अक्षू व्याप्तौ सङ्घाते च। (शा.आ.) (धा.प्र.)(क्षी.त.)

अक्षू व्याप्तौ। (धा.क.)(मा.धा.)

अक्ष् (ऊ) वेट्, सक, प। (धा.क.)

❖ **अग [अग्] कुटिलायां गतौ** **(भ्वा०)**

अक **अग** कुटिलायां गतौ। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

पृषोदरादौ न अनस ओकं गतिहन्तीत्यनोकहो वृक्षः। (क्षी.त.)

मा भवानकीत्। मा भवानचकत्। मा भवानकि मा भवानकि इत्यादि। (मा.धा.)

अक्, अग्, सेट्, अक, प। मा भवानचिकत्। मा भवानकि, मा भवानाकि। (धा.क.)

❖ **अगि [अङ्ग्] कुटिलायां गतौ** **(भ्वा०)**

अक **अगि** कुटिलायां गतौ। (शा.आ.)

❖ **अगि [अङ्ग्] गत्यर्थः (भ्वा०)**

उख नख वख मख रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि **अगि** मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि **अगि** वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। चुरादौ लिगि चित्रीकरणे। द्रमिडानां रिखिरपि। त्रगीति च चन्द्रः।(क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि **अगि** वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयान्ताः पञ्चदश। तृतीयान्तास्त्रयोदश यद्यपि मैत्रेयेणादितस्त्रय इदित उखिवखिमखयः मूर्द्धन्यादिर्नखिरनिदित् इखिश्च न पठ्यते। तथापि इतरानेकव्याख्यातॄणां प्रामाण्यादस्माभिः पठितः। एवम् एकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि **अगि** वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि **अगि** वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। यद्यपि मैत्रेयेणादितस्त्रय इदित उखिबखिमखयः, मूर्द्धन्यादिः नखिः अनिदित्, इखिश्च न पठ्यते, तथापि इतरानेकव्याख्यातॄणां प्रामाण्याद् अस्माभिः पठितः। (धा.क.)

❖ **अगे [अग] सङ्गे (भ्वा०)**

अगे ह्रगे ह्लगे सङ्गे। (शा.आ.)

❖ **अघि [अङ्घ्] गत्याक्षेपे (भ्वा०)**

अघि वघि मघि गत्याक्षेपे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

गत्याक्षेपो वेगगतिर्गमनारम्भो वा। (क्षी.त.)

आक्षेपो निन्दा। गतौ गमनारम्भे चेति स्वामी। (मा.धा.) (धा.क.)

अङ्घ् (इ) सेट्, आ। (धा.क.)

❖ **अङ्क [अङ्क] पदे लक्षणे च (चुरा०)**

अङ्क लक्षणे। (धा.प्र.)

अङ्क पदे लक्षणे । (मा.धा.)(धा.क.)

शपि तत्रैव कुटिलायां गतौ। (मा.धा.)

अङ्क, सक, प। अङ्कते इति शपि। तत्रैव कुटिलायां गतौ। (धा.क.)

❖ **अङ्ग [अङ्ग] पदे लक्षणे च (चुरा०)**

अङ्ग पदे लक्षणे च। (धा.प्र.)(क्षी.त.)

अङ्ग च। (मा.धा.)(धा.क.)

चात्, पूर्वोक्तः अर्थः। अङ्ग, सक, प।(धा.क.)

❖ **अचि [अञ्च्] गतौ याचने च (भ्वा०)**

अचि गतौ। अन्चु गतौ। अचु इत्येके।(क्षी.त.)

❖ **अछि [अञ्छ्] आयामे (भ्वा०)**

अछि अयामे। **दोर्दण्डाञ्छितचन्द्रशेखर-**

धनुर्दण्डावभङ्गोद्यतः। (क्षी.त.)

❖ अज [अज्] गतिक्षेपणयोः (भ्वा०)

अज गतिक्षेपणयोः। (धा.प्र.)(शा.आ.)
(क्षी.त.)(मा.धा.)(धा.क.)

अज्, सेट्, सक, प। (धा.क.)

❖ अजि [अञ्ज्] वर्जने (अदा०)

अजि वर्जने। (शा.आ.)

❖ अजि [अञ्ज्] भाषार्थः (चुरा०)

पट पुट रुट लुट तुजि पिजि लजि लुजि **अजि** कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः। एते सकर्मका भासार्था णिचमुत्पादयन्ति। एषां गणान्तरे पाठः सकर्मकत्त्वेऽपि णिज्विकल्पार्थः, इहैव पठितांस्तु न्याय्यविकरणान्प्रत्युदाहरन्ति। पटादयः सकर्मकाः स्वार्थे णिचमुत्पादयन्ति। भासार्थाश्चेति पारायणम् - भासयति दिशः - गणान्तरपाठस्त्वेषां कार्यान्तरार्थः। (क्षी.त.)

रुठ लजि **अजि** दसि भृशि कशि रुसि शीक नट पुटि जुचि रघि अहि रहि महि भाषार्थाः - इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते। (मा.धा.)

रुठ लजि **अजि** दसि भृशि रुशि रुसि शीक नट पुटि जुचि रघि अहि रहि महि इत्येते पञ्चदश स्वामिकाश्यपमतानुसारेण लिख्यन्ते। (धा.क.)

❖ अञ्चु [अञ्च्] गतिपूजनयोः (भ्वा०)

अञ्चु गतिपूजनयोः। (शा.आ.) (मा.धा.)

अञ्चु गतौ याचने च। गतावस्य पूर्वपाठे फलम्। कर्त्रभिप्राये क्रियाफलेऽपि परस्मैपदम्। अचु इत्येके। (धा.प्र.)

मतिरिच्छा। बुद्धिर्ज्ञानम्। पूजा सत्कारः। (मा.धा.)

❖ अञ्चु [अञ्च्] गतौ याचने च (भ्वा०)

अञ्चु गतावित्येके। (शा.आ.)

अञ्चु गतौ याचने च। (मा.धा.)(धा.प्र.)

गतावस्य पूर्वपाठे फलं कर्त्रभिप्राये क्रियाफले अपि परस्मैपदम्। अचु इत्येके। (धा.प्र.)

अञ्चु गतिपूजनयोरित्यत्रैवोदाहृतम्। पूर्वत्र गताविति पाठः। क्रियाफलस्य कर्त्तृगामित्वे परस्मैपदार्थ। अचु इत्येक इति मैत्रेयः। क्षीरस्वामी अञ्चु गतौ अञ्चि गताविति द्वौ धातू पपाठ। तत्र इदित्त्वप्रयोजनम् अञ्चित इत्यादौ नलोपाभावम् आहुः। काश्यपमैत्रेय-सम्मताकाराः तु अस्य इदित्त्वं न अमुमन्यन्ते। अञ्चु इति पठन् शाकटायनोपि उदित्पक्ष एवानुकूलः। तेन तु इदित्स्थान एव उदित्पठ्यते। (मा.धा.)

❖ अञ्चु [अञ्च्] विशेषणे (चुरा०)

अञ्चु विशेषणे। (धा.प्र.)(मा.धा.)(धा.क.)

विशेषणं व्यावर्तनम्। उदित्त्वाद्विभाषितो णिच्। गतिपूजनयोः अञ्चति इति भ्वादौ। गतियाचनयो अञ्चते इत्यपि। (मा.धा.)

विशेषणं व्यावर्त्तनम्। अञ्च्, (उ, वा णिच्) सक, उ। गतिपूजनयोः अञ्चति इति भ्वादौ, गति-

याचनयोः इत्यपि। (धा.क.)

❖ अञ्जू [अञ्ज्] व्यक्तिम्रक्षणकान्तिगतिषु (रुधा०)

अञ्जू व्यक्तिम्लक्षणगतिषु। (शा.आ.)

अञ्जू व्यक्तिम्रक्षणगतिषु। व्यक्तिः प्रकटता, म्रक्षणं घृतादिसेकः। (क्षी.त.)

अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु। अञ्ज्, (ऊ) वेट्, सक, प। (धा.क.)

❖ अट [अट्] गतौ (भ्वा०)

अट पट गतौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

अट पट कट किट इट इ गतौ इति दुर्गः पठति। अट्, सेट्, सक, प। पर्यटन् पृथिवीमिमाम्। तीर्थानि पर्यटस्व इति महाभारतम्। (धा.क.)

❖ अटि [अण्ट्] गतौ (भ्वा०)

अटि गतौ। अण्ट् (इ) सेट्, सक, आ। (धा.क.)

❖ अट्ट [अट्ट्] अतिक्रमणहिंसयोः (भ्वा०)

अट्ट अतिक्रमणसिंहयोः। (शा.आ.)
(धा.प्र.)(मा.धा.)

दोपधोऽयं स्मर्य्यते। ष्टुना ष्टुः इत्यत्र न्यासकारेण तकारोपधोऽयमित्युक्तम्। (धा.प्र.)

दोपधोयं स्मर्यत इति मैत्रेयः। तोपधोयमिति ष्टुना ष्टुः इत्यत्र न्यासवृत्तिप्रदीपकारादयः। स्वाम्यपि क्विपि अदिति तकारश्रवणार्थं तोपधत्वमुक्त्वा दोपधत्वम् अप्याह। मैत्रेयस्तु स्वमते दोपधत्वमुक्त्वा तोपधत्वं मतान्तर आह। अड्ड इति डान्तपाठः प्रकरणविरोधादुपेक्ष्यः। अयम् अनादरे चुरादिः। (मा.धा.)

अट्ट [अत्ट्, अड्ट्, अद्ट्] अतिक्रमहिंसयोः। दोपधोऽयं स्मर्य्यत इति मैत्रेयः। तोपधोऽयमिति ष्टुना ष्टुः इत्यत्र न्यासवृत्तिप्रदीपकारादयः। स्वाम्यपि क्विपि अत् इति तकारश्रवणार्थं तोपधत्वमुक्त्वा दोपधत्वमप्याह। मैत्रेयस्तु स्वमते दोपधत्वम् उक्त्वा तोपधत्वं मतान्तर आह। अयमनादरे चुरादिः। (धा.क.)

❖ अट्ट [अट्ट्] अनादरे (चुरा०)

अट्ट षुट्ट अनादरे। (धा.प्र.)(मा.धा.)(धा.क.)

अट्ट, सुट्ट, सक, उ। दोपधोऽयम्। (धा.क.)

❖ अठ [अठ्] गतौ (भ्वा०)

अठ गतौ । (क्षी.त.)

❖ अठि [अण्ठ्] गतौ (भ्वा०)

अठि गतौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)

❖ अड [अड्] उद्यमे (भ्वा०)

अड उद्यमे । (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

व्यडः। तदपत्यं व्याडिः। (क्षी.त.)

वृश्चिकालाङ्गूलं तेन तैक्ष्ण्यं लक्ष्यते विशिष्टः। अडस्तैक्ष्ण्यमस्य तस्यापत्यं व्याडिः। (मा.धा.)

अड्, सेट्, सक, प। अडो वृश्चिकलाङ्गूलं, तेन तैक्ष्यं लक्ष्यते। विशिष्टः अडस्तैक्ष्ण्यमस्य व्यडः, तस्यापत्यम् - व्याडिः। (धा.क.)

❖ अड्ड [अड्ड्] अभियोगे (भ्वा०)

अड्ड अभियोगे। दोपधावेतौ। (धा.प्र.)

अड्ड अभियोगे। अयमपि दोपध इति क्विपि अत् इति भवति। (मा.धा.)

❖ **अण [अण्] शब्दार्थः (भ्वा०)**

अण रण मण क्वण जण भण शब्दार्थाः। (शा.आ.)

अण रण वण भण मण कण क्वण व्रण भ्रण शब्दार्थाः। (धा.प्र.)

अण रण वण मण कण क्वण व्रण भ्रण ध्वण शब्दार्थाः। एते शब्दनक्रियार्थाः। (क्षी.त.)

अण रण वण मण कण क्वण व्रण व्रण भ्रण ध्वण शब्दार्थाः। (मा.धा.)

❖ **अण [अण्] प्राणने (दिवा०)**

अण प्राणने। (मा.धा.) (धा.क.)

मा भवानणिणत्।

यमिर्ज्रमन्तेष्वनिडेक इष्यते
रमिश्च यश्च श्यनि पठ्यते मनिः।
नमिश्चतुर्थो हनिरेव पञ्चमो
गमिस्तु षष्ठः प्रतिषेधवाचिनाम्।

इति व्याघ्रभूतिवचनादयं सेट्। केचिदनिटां मध्ये पाठस्य प्रयोजनादर्शनाद् अमुं धातुं नाधीयते। शाकटायनस्तु अन इत्याह। एवं च तवर्गीयान्तं काण्डमप्यनुसृतं भवतीति। अणतीति शब्दे शपि अनतीति प्राणने। (मा.धा.)

प्राणनमिह जीवनम्। अण्, सेट्, अक, आ। दन्त्यान्तोऽयमिति दुर्गादयः। (धा.क.)

❖ **अत [अत्] सातत्यगमने (भ्वा०)**

अत सातत्यगमने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

सातत्येन गमनं नित्यगतिः। (क्षी.त.)

सातत्यगमनं सन्ततगमनम्। (मा.धा.) (धा.क.)

निरन्तरं भ्रमणं प्रापणं वा सातत्यगमनमिति रमानाथः। ग्रामम् अतति। अतति सूर्यो ग्रामाय। अत्, सेट्, प। सौत्रो धातुरिति वृत्तौ। बोधिन्यासेऽपि सातिः सुखे वर्त्तते सौत्र इति। जिनेन्द्रहरदत्तौ सातिः हेतुमति ण्यन्त इति। इदिद्बन्धनार्थ उत्तरत्र भविष्यति। (धा.क.)

❖ **अति [अन्त्] बन्धने (भ्वा०)**

अति अदि बन्धने। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

अदि पाठोऽनार्षः। अन्ये अति इति बन्धने इति पेठुः। (क्षी.त.)

अत्र धनपालः। तान्तं द्रविडाः पठन्ति। आर्यास्तु दान्तमिति। उभयमिति मैत्रेयस्वामिकाश्यपसम्मताकारादयः। एताश्चतस्त्रो विभक्तयः सत्त्ववचनेभ्यः प्रातिपादिकार्थ इति वृत्तौ भाष्ये-

दूरादावसथान्मूत्रं दूरात् पादावसेचनम्।
दूराच्च भाव्यं दस्युभ्यो दूराच्च कुपितादुरोः। (मा.धा.)

अत्र धनपालः - तान्तं द्राविडाः पठन्ति। आर्य्यास्तु दान्तमिति। उभयमिति मैत्रेयस्वामिकाश्यपसम्मताकारादयः। अन्त्, (इ) अन्द् (इ) सेट्, सक, प। (धा.क.)

❖ **अट्ट [अट्ट्] अतिक्रमहिंसनयोः (भ्वा०)**

अतिक्रम उल्लङ्घनम्। (क्षी.त.)

❖ **अद [अद्] भक्षणे** (अदा०)

अद भक्षणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

अद्, अनिट्, सक, प। (धा.क.)

❖ **अदि [अन्द्] बन्धने** (भ्वा०)

अति **अदि** बन्धने। (धा.प्र.)(मा.धा.)(धा.क.)

अदि पाठोऽनार्षः। अन्ये अति इति बन्धने इति पेठुः। (क्षी.त.)

अत्र धनपालः। तान्तं द्रविडाः पठन्ति। आर्यास्तु दान्तमिति उभयमिति मैत्रेयस्वामिकाश्यपसम्मताकारादयः। (मा.धा.)

अत्र धनपालः - तान्तं द्राविडाः पठन्ति। आर्य्याः तु दान्तमिति। उभयमिति मैत्रेयस्वामिकाश्यपसम्मताकारादयः। अन्त्, अन्द् सेट्, सक, प। (धा.क.)

❖ **अद्ड [अड्ड्] अभियोगे** (भ्वा०)

अद्ड अभियोगे। (क्षी.त.)(धा.क.)(क्षी.त.)

अड्ड, सेट्, अक, प। अयमपि दोपध इति। (धा.क.)

❖ **अन [अन्] शब्दार्थः** (भ्वा०)

अन रण वण भण मण कण क्वण व्रण भ्रण ध्वण शब्दार्थाः। इतः क्रम्यन्ता उदात्ता उदात्तेतः। **अण रण वण भण मण कण क्वण ष्टण वन ध्वन** शब्दे इति दुर्गः। सर्वे सेटः, अकर्म्मकाः, सकर्म्मकाश्च, परस्मैपदिनः। (धा.क.)

❖ **अन [अन्] प्राणने** (अदा०)

अन च। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

प्राणन इत्यपेक्षते। (धा.प्र.)

चात् प्राणने। प्रपूर्वः-प्राणिति। (क्षी.त.)

अनितेः इत्युपसर्गस्थान्निमित्तात्परस्य अनितेः नकारस्य णत्वम्। अत्र केचित् अन्त इति वक्ष्यमाणम्। अत्र अपि अपकृष्य सम्बद्ध्यसमीपवचनत्वं चाश्रित्य उपसर्गस्थनिमित्तसमीपभूतस्य अनिति नकारस्य णत्वमिति सूत्रार्थं वर्णयन्तो येन नाव्यवधानम् इति न्यायेन प्राणतीत्यादावेव णत्वमिच्छन्ति। (मा.धा.)

अस्यास्ति प्राणनमर्थः। प्रायेणायं प्रपूर्वः। अन्, सेट्, अक, प। (धा.क.)

❖ **अन [अन्] प्राणने** (दिवा०)

अन प्राणने। (धा.प्र.)

❖ **अनु [अनु रुध्] सकामे** (दिवा०)

अनुरुध सकामे च। (शा.आ.)

❖ **अनो रुध [अनु रुध्] कामे** (दिवा०)

अनो रुध कामे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

अनौ उपसर्गे रुधेः कामवृत्तेर्दिवादित्वम् आत्मनेपदित्वञ्च। (धा.प्र.)

अनुपूर्वो रुधिर् इच्छार्थे दिवादिः। (क्षी.त.)

रुधेरनूपसृष्टस्य कामे वृत्तस्य दिवादित्वम् आत्मनेपदित्वं च। (मा.धा.)

अनुपूर्वकस्य रुधधातोः कामार्थे दिवादित्वम् आत्मनेपदित्वञ्च। रुध्, अनिट्, सक, आ। आवरणे रुधादौ। (धा.क.)

❖ **अन्चु [अञ्च्] गतिपूजनयोः** (भ्वा०)

अन्चु गतिपूजनयोः। (क्षी.त.) (धा.क.)

अन्च् (उ) सेट्, सक, प। मतभेदात् अमुमुयङ्, अद्र्यङ्, अमुद्र्यङ् इत्यादयो बहवः प्रयोगा दृश्यन्ते। अत्र कारिका -

अदस्योऽद्रेः पृथङ्मुत्वं
केचिदिच्छन्ति लत्ववत्।
केचिदन्यसदेशस्य
नेत्येकेऽसेर्हि दृश्यते॥ (धा.क.)

❖ अन्चु [अञ्च्] गतौ याचने च (भ्वा०)

अन्चु गतौ याचने। अन्च्, सेट्, सक, उ। पूर्वत्र गताविति पाठः क्रियाफलस्यकर्त्तृगामित्वे परस्मैपदार्थः। (धा.क.)

❖ अन्चु [अञ्च्] विशेषणे (चुरा०)

अन्चु विशेषणे। (धा.प्र.) (क्षी.त.)

विशेषणम् - अतिशयः अञ्चयति अर्थान्, व्यक्तीकरोत्यर्थः। भ्वादौ अन्चु गतौ । (क्षी.त.)

❖ अन्जू [अञ्ज्] व्यक्तिम्रक्षणकान्तिगतिषु (रुधा०)

अन्जू व्यक्तिम्रक्षणकान्तिगतिषु। (धा.प्र.) (मा.धा.)

❖ अन्ध [अन्ध] दृष्ट्युपघाते उपसंहारे च (चुरा०)

अन्ध दृष्ट्युपघाते। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

उपसंहार इत्येके । (मा.धा.)(धा.क.)

अन्ध, अक, प। (धा.क.)

❖ अबि [अम्ब्] शब्दे (भ्वा०)

रबि लबि अबि शब्दे (धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

त्रीण्यम्बकानि चक्षूंषि अस्येति त्र्यम्बकः। त्रयाणां लोकानामम्बः पितेत्यागमविदः। द्यौः भूमिः आपः तिस्रोम्बा अस्येति भारतम्। अम्बः शब्दः, त्रयः शब्दा अकारोकारमकाराः प्रतिपादका अस्यैवेति भट्टभास्करः। स एव सृष्टिस्थितिसंहारविषयाः तिस्रो वा शक्तयः अस्येति च। (मा.धा.)

रम्ब्, लम्ब्, अम्ब् सेट्, अक, आ। त्रीण्यम्बकानि चक्षूंषि अस्येति त्र्यम्बकः, त्रयाणां लोकानाम् अम्बः पितेत्यागमविदः। (धा.क.)

❖ अभ्र [अभ्र्] गत्यर्थः (भ्वा०)

अभ्र वभ्र मभ्र चर गत्यर्थाः। (धा.प्र.) (मा.धा.) (धा.क.)

अभ्र बभ्र मभ्र चर गत्यर्थाः। (क्षी.त.)

सर्वे सेटः सकर्मकाः परस्मैपदिनश्च। (धा.क.)

❖ अम [अम्] गत्यादिषु (भ्वा०)

अम गत्यादिषु। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

सम्भक्तिशब्दयोः अनन्तरयोः ग्रहणार्थम् आदिशब्दम् इच्छन्ति। (धा.प्र.)

कनी दीप्तिकान्तिगतिषु इयं गतिः, स्तन ध्वन शब्दे। अयं शब्दे। वन षण भक्तौ इयं भक्तिः- एते गत्यादयोऽर्थाः। (क्षी.त.)

कनी दीप्तिगतीत्यत्र गतेः परयोः शब्दसम्भक्तयोः आदिशब्देन ग्रहः। (मा.धा.)

कनी दीप्तिगतीत्यत्र गतेः परयोः शब्दसम्भक्त्योः आदिशब्देन ग्रहः। अम्, सेट्, सक, प। (धा.क.)

❖ **अम [अम्] रोगे** **(चुरा०)**

अम रोगे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

घटादौ अम रोगे। (क्षी.त.)

अम्, अक, उ। आमयशब्दस्तु आमपूर्वात् मा धातोर्घञर्थके मीधातोरचि वा सिद्धः। (धा.क.)

❖ **अय [अय्] गतौ** **(भ्वा०)**

अय वय षय मय चय दय तय नय गतौ। (शा.आ.)

अय वय यय मय चय तय णय गतौ। (धा.प्र.)

अय वय पय मय चय तय नय गतौ। (क्षी.त.) (मा.धा.)

अय वय पय मय चय तय णय गतौ - सर्वे सेटः, सकर्मकाः, आत्मनेपदिनश्च। (धा.क.)

❖ **अर्क [अर्क्] स्तवने तपने** **(चुरा०)**

अर्क स्तवने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तपन इत्येके। (क्षी.त.) (मा.धा.)(धा.क.)

अर्चयत्यर्कमर्किणः इति दर्शनात् स्तवनपाठो युक्तः। (मा.धा.)

अर्क्, सक, उ। अर्कः - अर्चयत्यर्कमर्किण इति दर्शनात् स्तवनपाठो युक्तः। (धा.क.)

❖ **अर्च [अर्च्] पूजायाम्** **(भ्वा०)**

अर्च पूजायाम्। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

युजादिष्वप्ययं पठ्यते। ततस्तु कर्त्त्रभिप्राये क्रियाफले विवक्षिते आत्मनेपदमस्ति। परस्मैपदार्थमिह पठ्यते। युजादिषु हि कतिपये धातवः कर्त्त्रभिप्राये क्रियाफले आत्मनेपदिनो वक्ष्यन्ते। तत्र चेदमेव लिङ्गम्। पूर्वे चकारान्ता ह्रस्वोकारयुक्ता इति पृथगस्य निर्द्देशः। (धा.प्र.)

अयं युजादौ स्वरितेत् पठिष्यते। तत एवार्चतीति सिद्धे क्रियाफलस्य कर्तृगामित्वे परस्मैपदार्थ इह पाठः। अयमात्मनेपदीति शाकटायनः, प्रयोजनं तु तन्मते क्रियाफलस्याकर्तृगामित्वे अपि तङ्। यः पूर्णादुदचति, अविरघ्नीम् उदचन्त्वाप इत्यादि दर्शनात् अच इत्येक इत्याभरणोक्तं युक्तम्। (मा.धा.)

अर्च, सेट्, सक, प। अयं युजादौ स्वरितेत् पठिष्यते। (धा.क.)

❖ **अर्च [अर्च्] पूजायाम्** **(चुरा०)**

अर्च पूजायाम्। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

युजादिषु ञितां तावत् कर्त्त्रभिप्राये क्रियाफले आत्मनेपदित्वम्। अत्र च भ्वादौ अर्च पूजायामिति लिङ्गमुक्तम्। (धा.प्र.)

❖ **अर्ज [अर्ज्] अर्जने** **(भ्वा०)**

अर्ज षर्ज अर्जने। (धा.प्र.)(मा.धा.)(धा.क.)

अर्ज सर्ज अर्जने। (क्षी.त.)(शा.आ.)

अर्ज, सर्ज, सेट्, सक, प। अर्ज प्रयत्न इति चुरादौ। (धा.क.)

❖ **अर्च [अर्च्] गतौ याचने च** **(भ्वा०)**

अर्च गतौ याचने च। (शा.आ.)

❖ **अर्ज [अर्ज्] प्रतियत्ने** **(चुरा०)**

अर्ज प्रतियत्ने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

प्रतियत्नः संस्कारः। भ्वादौ अर्ज सर्ज अर्जने। (क्षी.त.)

द्रव्यम् अर्जयति इत्यादिप्रयोगदर्शनाद् अयम् अर्थान्तरे अपि। (मा.धा.)(धा.क.)

अर्ज, सक, उ। (धा.क.)

❖ अर्थ [अर्थ्] उपयाच्ञायाम् (चुरा०)

अर्थ याञ्चायाम्। (धा.प्र.)

अर्थ उपयाञ्चायाम्। (क्षी.त.)
(मा.धा.)(धा.क.)

अर्थ, सक, आ। (धा.क.)

❖ अर्द [अर्द्] गतौ याचने च (भ्वा०)

अर्द गतौ याचने च। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

यातने चेत्येके। चुरादौ अर्द, हिसि हिंसायाम्। याचने द्विकर्मकः। हिंसार्थोऽयं चुरादौ। (मा.धा.)

याचने द्विकर्मकः। अर्द्, सेट्, सक, प। (धा.क.)

❖ अर्द [अर्द्] हिंसायाम् (चुरा०)

अर्द हिसि हिंसायाम्। (धा.प्र.)(क्षी.त.)

अर्द हिंसायाम्। (मा.धा.) (धा.क.)

अयं स्वरितेदिति देवमैत्रेयौ। आत्मनेपदीति शाकटायनः। (मा.धा.)

अर्द्, सक, उ। अयं स्वरितेदिति देवमैत्रेयः। आत्मनेपदीति शाकटायनः। (धा.क.)

❖ अर्ध [अर्ध्] गतौ याचने हिंसायाम् च (भ्वा०)

अर्ध गतौ याचने च। (शा.आ.)

❖ अर्ब [अर्ब्] गतौ (भ्वा०)

पर्प रफ रफि **अर्ब** पर्व वर्ब मर्ब षर्ब कर्ब खर्ब गर्ब शर्ब चर्ब गतौ। (धा.प्र.)

वर्फ रफ रफि **अर्ब** वर्ब कर्ब खर्ब गर्ब घर्ब शर्ब षर्ब सर्ब चर्ब भर्ब नर्ब गतौ। पञ्चदशैते गत्यर्थाः। बर्फ़ादींस्त्रीन् हिंसार्थे कण्ठः पठति। अर्बेत्यादौ रेफस्थाने नकारं कौशिको मन्यते। (क्षी.त.)

पर्प रफ रफि **अर्ब** पर्व लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ। आद्यः प्रथमान्तः। परौ द्वावपि द्वियीयान्तौ एकादश। परे तृतीयान्ताः द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। (मा.धा.)

पर्प रफ रफि **अर्ब** पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ। आद्यः प्रथमान्तः। परौ द्वावपि द्वितीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ अर्व [अर्व्] हिंसायाम् (भ्वा०)

अर्व शर्व षर्व हिंसायाम्। (धा.प्र.)
(मा.धा.)(धा.क.)

अर्व शर्व हिंसायाम्। (क्षी.त.)

अर्व, शर्व्, षर्व्, सेट्, सक, प। सर्वस्मिन् काले सर्वदा। सदा - पक्षे सभावः। सर्वस्मै हितं - सार्वम्, सर्वीयम्। (धा.क.)

❖ अर्ह [अर्ह्] पूजायाम् (भ्वा०)

अर्ह पूजायाम्। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अर्ह पूजने चुरादौ। णिच्-अर्हयति, योग्यत्वादौ

नास्ति। (क्षी.त.)

हकारप्रसङ्गादनिडपीह पठितः। (मा.धा.)

अर्ह्, सेट्, सक, प। (धा.क.)

❖ **अर्ह [अर्ह्] पूजायाम्** **(चुरा०)**

अर्ह पूजायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

अर्ह्, सक, उ। (धा.क.)

❖ **अल [अल्] भूषणपर्याप्तिवारणेषु(भ्वा०)**

अलँ वारणपर्य्याप्तिभूषणेषु। अस्यानुनासिकः स्वरितोऽकार इत्संज्ञक इतीच्छन्ति। अतः अयमुभयपदी। यरलवान्तप्रकरणानुरोधेन अयमत्रोभयतो भाषाऽपि पठितः। तद्योतनायानुनासिक उच्चार्य्यते। (धा.प्र.)

अल भूषणपर्याप्तिवारणेषु। (मा.धा.)(धा.क.)

अलञ्, इति दुर्गो ञानुबन्धं पठति, तन्मते उभयपदी। अल्, सेट्, प। अत्र मैत्रेयोऽकारम् अनुनासिकस्वरितमिच्छतीत्याह। पर्य्याप्तौ अयम् अकर्मकः। (धा.क.)

❖ **अला [अल्] भूषणपर्याप्तिनिवारणेषु** **(भ्वा०)**

अला भूषणपर्याप्तिनिवारणेषु। पचतिवत् सानुनासिक इतीत्सञ्ज्ञार्थः। अलर्को रोगितः श्वा। अलक्तकम् अरक्तकन्तु रलयोरैक्यात्। (क्षी.त.)

❖ **अव [अव्] रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्तिव्याप्त्यालिङ्गनहिंसादानभागवृद्धिषु** **(भ्वा०)**

अव रक्षणे गतिकान्तिप्रीतितृप्त्यवगमनप्रवेशप्रवास्वाम्यार्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसाभाववृद्धिषु। (शा.आ.)

अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्तिव्याप्त्यालिङ्गनहिंसादानभागवृद्धिषु। (धा.प्र.)

अव रक्षणगतिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनाक्रियेच्छादीप्त्यवाप्त्यलिङ्गनहिंसादानभागवृद्धिषु अष्टादशार्थाः। (क्षी.त.)

अव रक्षणगतिकान्तिप्रीतितृत्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनाक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु। (मा.धा.)(धा.क.)

अव रक्ष पालने इति दुर्गः पठति।

अव्, सेट्, प। (धा.क.)

❖ **अश [अश्] भोजने** **(क्र्या०)**

अश भोजने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

स्वादौ अशू व्याप्तौ। (क्षी.त.)

अश्, सेट्, सक, प। (धा.क.)

❖ **अशू [अश्] व्याप्तौ सङ्घाते च** **(स्वा०)**

अशू व्याप्तौ। (क्षी.त.)(शा.आ.)

अशू व्याप्तौ सङ्घाते च। (धा.प्र.) (मा.धा)(धा.क.)

ऊदित्वादिड्विकल्पः आत्मनेभाषः। (शा.आ.)

न्यासकारस्तु अश भोजन इत्यस्य यङ्विधौ ग्रहणमिच्छति। (धा.प्र.)

क्र्यादौ अश भोजने। (क्षी.त.)

अयमक्षतौ च व्युत्पादितः वक्तव्यं चान्यत् तत्रैवोक्तम्। (मा.धा.)

अश् (ऊ) वेट्, सक, आ। (धा.क.)

❖ अस [अस्] गतिदीप्त्यादानेषु (भ्वा०)

अस गतिदीप्त्यादानेषु। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

लावण्य उत्पाद्य इवास यत्नः। अष इत्येके। (धा.प्र.)

लावण्य उत्पाद्य इवास यत्नः। (कु.सं.) इत्यत्र आसेत्यसतेरिति वामनः (काव्या०) अस्तेः इत्येके। अदादौ अस भुवि। अष इत्येके। (क्षी.त.)

अष इत्येके इति क्षीरस्वामिमैत्रेयौ शाकटायनः तु उभावपि। (मा.धा.)(धा.क.)

अस्, सेट्, उ। (धा.क.)

❖ अस [अस्] भुवि (अदा०)

अस भुवि। (शा.आ.) (धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

केचिदनुप्रयोगादन्यत्रापि नेच्छन्ति। (धा.प्र.)

भवनं भूः, सत्ता। (क्षी.त.)

अत एव अस्तिमानित्याद्यकि भवति। (मा.धा.)

अस्, सेट्, अक, प। परलोकोऽस्तीति मतिर्यस्य; सः - आस्तिकः, परलोको नास्तीति मतिर्यस्य, सः - नास्तिकः ढक्, वचनसामर्थ्यात्तिङन्ताद् वाक्याच्चायं प्रत्ययो भवति। अत एवास्तिमान् इत्याद्यपि भवति। (धा.क.)

❖ असु [अस्] क्षेपणे (दिवा०)

असु क्षेपणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

अस्, (उ) सेट्, सक, प। उपसर्गपूर्वकोऽयं विभाषया आत्मनेपदी। (धा.क.)

❖ अस्त [अस्त] सङ्घाते (चुरा०)

अस्त सङ्घाते। (मा.धा.)(धा.क.)

क्वचिदयं वक्ष्यमाणस्य पुंसेरनन्तरं पठ्यते। (मा.धा.)

सङ्घातः राशीकरणम्। अस्त, सक, उ। क्वचिद् अयं वक्ष्यमाणस्य पुसेरनन्तरं पठ्यते। (धा.क.)

❖ अह [अह्] व्याप्तौ (स्वा०)

अह व्याप्तौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अह्, सेट्, अक, प। अयं सर्वैर्नाद्रियते। (धा.क.)

❖ अहि [अंह्] गतौ (भ्वा०)

अहि गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ भासार्थः। (क्षी.त.)

चुरादौ भाषार्थः। (मा.धा.)(धा.क.)

अन्ह् (इ) सेट्, सक - आ। (धा.क.)

❖ अहि [अंह्] भाषार्थः (चुरा०)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि **अहि** बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः। एते सकर्मका भासार्था णिचमुत्पादयन्ति। एषां गणान्तरे पाठः सकर्मकत्त्वेऽपि णिज्विकल्पार्थः, इहैव पठितांस्तुन्याय्यविकरणान्प्रत्युदाहरन्ति। भ्वादौ अहि गतौ। (क्षी.त.)

रुठ लजि अजि दसि भृशि कशि रुसि शीक नट पुटि जुचि रघि **अहि** रहि महि भाषार्थाः। इत्येते

पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते।

(मा.धा.)

रुठ लजि अजि दसि भृशि रुशि रुसि शीक नट पुटि जुचि रघि **अहि** रहि महि इत्येते पञ्चदश स्वामिकाश्यपमतानुसारेण लिख्यन्ते। (धा.क.)

❖ आङः शसि [शंस्] इच्छायाम् (भ्वा०)

आङः शसि इच्छायाम्। (धा.प्र.)(क्षी.त.)

(मा.धा.)(धा.क.)

शन्स स्तुतावित्यस्य। (धा.प्र.)

आङः शसीति प्रयोगादयमाङ्पूर्व एव प्रयोक्तव्यः। तथा च काश्यपः। अयमाङः पर एव प्रयोक्तव्यः इति सम्मतायां न च केवलो न अपि उपसर्गान्तरपूर्व इति। दौर्गस्तु नोपधमनिदितं पठति। स्वामी च तेषां नलोपाभावे विशेषः। शंस स्तुतौ इति अग्रे परस्मैपदिषु। आङः शासु इच्छायाम् शासु अनुशिष्टाविति द्वयमदादौ।

(मा.धा.)

आङ्ग्रहणम् आङ्पूर्वस्यैव प्रयोगो नान्यपूर्वस्य, न वा केवलस्य इति अवधारणार्थम्। आद्यः तालव्यः अन्त्यो दन्त्यः। दौर्गस्तु नोपधमनिदितं पठति स्वामी च। माधवीया लिपिः इयं मनोरमाविरुद्धेति। शन्स् (इ) सेट्, सक, आ। शन्सु स्तुतावित्यग्रे परस्मैपदिषु। आङः शासु इच्छायाम्। शासु अनुशिष्टाविति द्वयमादौ।

(धा.क.)

❖ आङः [आ शास्] शासु इच्छायाम् (अदा०)

आङः शासु इच्छायाम्। (धा.प्र.)(क्षी.त.)

(मा.धा.)(धा.क.)

आशीरिति तु ज्ञापकात् सिद्धम्। (धा.प्र.)

शासु अनुशिष्टौ तु धात्वन्तरं ह्रस्वनिषेधादिविषयम्। आङः, शास इति दौर्गाः। (क्षी.त.)

इष्टार्थाशंसनेऽप्ययं प्रयुज्यते। नित्यमाङ्पूर्वकः अयम्। आङ्पूर्वशास्, (उ) सेट्, सक, आ। पञ्चमस्वरनुबन्धत्वात् न ल्यप् इति गोविन्दभट्टः। उदनुबन्धफलं छन्दस्येव इति धातुप्रदीपः। आशिषा क्षुधावाचावत् आप् इत्यात्रेयः। (धा.क.)

❖ आङः क्रन्द [आक्रन्द्] सातत्ये (चुरा०)

आङ् क्रन्द सातत्ये। (धा.प्र.)(क्षी.त.)

(मा.धा.)(धा.क.)

आङः परः क्रन्दः सातत्ये णिचमुत्पादयति।

(धा.प्र.)

अत्र काश्यपमैत्रेयौ आङःपरः क्रन्दः सातत्ये णिचमुत्पादयतीति। इदञ्च सातत्यं कुस्मयतेः अनन्तरं मैत्रेयेणागणान्तात् धातूननूद्य पुनर्द्वितीयं परस्मैपदप्रकरणम् अधुनोच्यत इत्युक्तत्त्वाद् अयमपि भौवादिकस्यानुवाद इति। तच्च क्रन्देर्योऽर्थ आह्वानादिः तदपेक्षम् इति बोद्धव्यम्। आक्रन्दतीत्याह्वानादौ शपि गतम्।

(मा.धा.)

आक्रन्द्, अक, उ। (धा.क.)

❖ आङः धृषाद्वा (चुरा०)

आधृषाद्वा (धा.प्र.) (क्षी.त.)

(मा.धा.) (धा.क.)

धृषु प्रसहन इति वक्ष्यति। एतस्मात् प्राग् वा णिज् भवतीति मन्तव्यम्। चुरादित्वान्नित्यं प्राप्तस्य णिचो विकल्पः क्रियते। युजादिभ्यः अन्यत्रापि क्वचिद् यथाभिधानं विकल्प इष्यते ज्ञापककरणादित्युक्तम्। (धा.प्र.)

धृष अप्रसहने - इति वक्ष्यति, आ एतस्माद् इत उत्तरेभ्यो णिज् वा भवतीत्यधिक्रियते। पक्षे न्याय्यो विकरणः शप्। इह नियमेन णिचो विकल्पः। अनित्यण्यन्तत्वं तु यथालक्ष्यम्, क्वचिद् विकल्पार्थम्। (क्षी.त.)

धृष प्रसहने इति वक्ष्यमाणसहिता विभाषितणिचः वेदितव्याः। (मा.धा.) (धा.क.)

धृष् (आ) सक, प। (धा.क.)

❖ आङःषद [आ-षद्] पद्यर्थे (चुरा०)

आङः षद पद्यर्थे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

पद्यतेरर्थो गतिः। (क्षी.त.)

पद्यर्थो गतिः। (मा.धा.)(धा.क.)

आ - सद्, सक, उ। (धा.क.)

❖ आ स्वदः सकर्मकात् (चुरा०)

आ स्वदः सकर्मकात्। (धा.प्र.)
(क्षी.त.)(धा.क.)

स्वद आस्वादन इति वक्ष्यति। आ एतस्मात् सम्भाविकर्मकादेव णिज् भवतीति मन्तव्यम्। असम्भावितकर्मत्वे तु व्यावृत्तिः। आङ्पूर्वात् स्वद एव सकर्मकादित्येके। (धा.प्र.)

ष्वद संवरणे - इति वक्ष्यति, आ एतस्मात् इत ऊर्ध्वं सकर्मकाण्णिच् क्रियते। शाकटायनः तु आङ्पूर्वात् स्वादेराह - आस्वादयति दधि, अन्यत्र भ्वादित्वात् स्वदते, स्वादम् अनुभवति इत्यर्थः। (क्षी.त.)

आ - स्वद, सक। आस्वादयति - ते सुखं धनी। अन्यत्र आस्वादते। (धा.क.)

❖ आछि [आञ्छ्] आयामे (भ्वा०)

आछि आयामे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

दोर्दण्डाञ्छितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यतः। (क्षी.त.)

आञ्छ् (इ) सेट्, अक, प। (धा.क.)

❖ आप्लृ [आप्] व्याप्तौ (स्वा०)

आप्लृ व्याप्तौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

चत्वारोऽनिटः। (क्षी.त.)

समुद्रे यद् द्वीपं तत्र भवादि द्वैप्यम्। द्वैपायनो व्यासः। द्वीपशब्देन द्वीपस्थो मुनिरुच्यते। स्वामी आप्यं तु लक्ष्यादिति परिपूर्वोऽयं रक्षणे अपि तथा च भवभूतिः **पर्याप्नोतु सुकृतं महाभाग इति अयं युजादौ च।** (मा.धा.)

अदेशेऽन्वीपम्, समुद्रे यद्दीपं तत्र भवादि - द्वैप्यम्, द्वैपायनो व्यासः। स्वामी - आप्यन्तु लक्ष्यादिति। परिपूर्वोऽयं रक्षणेऽपि, तथा च भवभूतिः - **पर्याप्नोतु सुकृतं महाभाग इति।** (धा.क.)

❖ आप्लृ [आप्] लम्भने (चुरा०)

आप्लृ लम्भने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

लम्भनं प्राप्तिः। (क्षी.त.)

लृदित्त्वादङि आपत् आप्ता। तपिं तिपिम् इति कारिकापाठादनिट्त्वम्। मैत्रेयेणापयत इति आत्मनेपदम् अपि दर्शितम् अन्ये तु न एतत् मृष्यन्ति। (मा.धा.)

आप् (लृ) सक, उ। (धा.क.)

❖ आस [आस्] उपवेशने (अदा०)

आस उपवेशने। (क्षी.त.)(मा.धा.)(धा.क.)

उपसर्गवशात् कालादिव्यतिरिक्तेन अपि सकर्मकत्वम्। **मामुपास्ते हरिः** (भट्टिः) **सन्ध्याम् उपासते ये तु**। इति स्मृतिः। आसः कैलः च असौ आसः च इति कैलासः, लोहित-शाल्यादिवत् समासो नित्यम्। अधि - उपवेशनम्। वासः। अधिष्ठानम्। पीठमध्यास्ते। **पर्णशालामध्यास्ते** (रघु०) **अध्यासयन् आसनम् एकम् इन्द्रः** (भट्टिः) अनु - पश्चाद् उपवेशनम्। उपासना। **नरेन्द्रकन्या स्थाणुम् अन्वास्त** (कुमार०)। (धा.क.)

❖ इ [इ] गतौ (भ्वा०)

इट किट कट **इ** गतौ। (धा.प्र.)(धा.क.)

इकारवत्प्रकरणाद् अयतिः उपदिष्टः। तदनुरोधेन चान्ये। अयतिं दीर्घम् इच्छन्ति चाद्राः। व्यपदेशिवद्भावेन गुरुमत्त्वादाम्प्रत्ययमुदाहरन्ति च। (धा.प्र.)

इट्, सेट्, सक, प। किट्, सेट्, सक, प। कट्, सेट्, सक, प। इ, अनिट्, सक, प। उत् - उदयः। उदयति यदि भानुः पश्चिमे दिग्विभागे उद्भटः। किटेति मैत्रेयमतेन त्रासे गतः। कटिश्च वर्षावरणयोः। (धा.क.)

❖ इक् [अधि इ] स्मरणे (अदा०)

इक स्मरणे (धा.प्र.)(क्षी.त.)
(मा.धा.) (धा.क.)

अयमप्यधिपूर्वः मातुरध्येति मातरमध्येति। यतस्यत्र बोधनशब्देनानुभवरूपं ज्ञानं गृह्यते। न च स्मृरिनुभवः। अत एव वृत्तौ अधिगमयति। इति गम्यादेश उदाहृतः। (मा.धा.)

अयमप्यधिपूर्वः। इ, (क्) अनिट्, सक, प। स्मरणार्थत्वात् कर्मणि षष्ठी वा। **ससीतयोराघवयोरधीयन्** इति भट्टिः। पितुः अध्येति, पितरं वा। (धा.क.)

❖ इक् [इ] स्मरणे (अदा०)

इक स्मरणे। ककारः अधीगर्थदयेशां कर्मणीति विशेषणार्थः अध्येति। (शा.आ.)

❖ इख [इख्] गत्यर्थः (भ्वा०)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि **इख** ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि **इख** इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयन्ताः पञ्चदश। तृतीयान्ताः। त्रयोदश यद्यपि मैत्रेयेणादितस्त्रय इदित उखिवखिमखयः मूर्द्धन्यादिर्नेखिरनिदित्

इखिश्च न पठ्यते। तथापि इतरानेकव्याख्यातृणां प्रामाण्यादस्माभिः पठितः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि **इख** इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। यद्यपि मैत्रेयेणादितस्त्रय इदित उखिबखिमखयः, मूर्द्धन्यादिर्नखिरनिदित्, इखिश्च न पठ्यते, तथापि इतरानेकव्याख्यातृणां प्रामाण्यादस्माभिः पठितः। एवमेकोनविंशतिः खान्ताः। अङ्गवङ्ग-कलिङ्गेषु इत्यादिशास्त्रेण तत्र गमननिषेधात्। न दृश्यतेऽस्मिन् चन्द्र इति हि दर्शशब्दो धूर्त्तस्वामिना व्युत्पादितः। (धा.क.)

❖ इखि [इङ्ख्] गत्यर्थः (भ्वा०)

उख नख वख मख रख लख वखि लखि **इखि** ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख **इखि** ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयन्ताः पञ्चदश। तृतीयान्तास्त्रयोदश यद्यपि मैत्रेयेण आदितस्त्रय इदित उखिवखिमखयः मूर्द्धन्यादिः नखिः अनिदित्। तथापि इतरानेकव्याख्यातृणां प्रामाण्याद् अस्माभिः पठितः। एवम् एकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख **इखि** ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि **इखि** ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। यद्यपि मैत्रेयेणादितस्त्रय इदित उखिबखिमखयः, मूर्द्धन्यादिर्नखिरनिदित्, इखिश्च न पठ्यते, तथापि इतरानेकव्याख्यातृणां प्रामाण्यादस्माभिः पठितः। एवमेकोनविंशतिः खान्ताः। अङ्गवङ्ग- कलिङ्गेषु इत्यादिशास्त्रेण तत्र गमननिषेधात् न दृश्यतेऽस्मिन् चन्द्र इति हि दर्शशब्दो धूर्त्तस्वामिना व्युत्पादितः। (धा.क.)

❖ इगि [इङ्ग्] गत्यर्थः (भ्वा०)

उख नख वख मख रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि **इगि** रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि **इगि**

रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयन्ताः पञ्चदश। तृतीयान्तास्त्रयोदश यद्यपि मैत्रेयेणादितस्त्रय इदित उखिवखिमखयः मूर्द्धन्यादिर्नखिरनिदित। इखिश्च न पठ्यते। तथापि इतरानेकव्याख्यातृणां प्रामाण्यादस्माभिः पठितः। एवमेकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। यद्यपि मैत्रेयेणादितस्त्रय इदित उखिबखिमखयः, मूर्द्धन्यादिर्नखिः अनिदित्, इखिश्च न पठ्यते, तथापि इतरानेकव्याख्यातृणां प्रामाण्याद् अस्माभिः पठितः। एवमेकोनविंशतिः खान्ताः। अङ्गवङ्ग-कलिङ्गेषु इत्यादिशास्त्रेण तत्र गमननिषेधात् न दृश्यतेऽस्मिन् चन्द्र इति हि दर्शशब्दो धूर्त्तस्वामिना व्युत्पादितः। कल्याणानि अङ्गानि अस्याः सन्तीति अङ्गिना अङ्गात् कल्याण इति पामादिपाठात् नः। विशिष्टं विहीनं वा अङ्गमस्य व्यङ्गः, तस्यापत्यं व्याङ्गिः। (धा.क.)

❖ **इङ् [अधि इ] अध्ययने** **(अदा०)**

इङ् अध्ययने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अधीत इति अध्यायकः। अध्यापयतीति अध्यापकः। कठः च असौ अध्यापकश्चेति कठाध्यापकः। ब्राह्मणाध्यापकः। (धा.प्र.)

इङोऽधिनावश्यंभावी योगः। यदाह - कश्चित् तमनुवर्तते। (क्षी.त.)

नित्यमधिपूर्वः अधीते। रामादधीतसन्देश इति भट्टिप्रयोगे पञ्चमी चिन्त्या। नित्यम् अधिपूर्वत्वाद् अस्यैतिग्रहणेन न ग्रहः तथा च भाष्ये अध्येयं व्याकरणम् इति यदन्तो निर्दिश्यते। (मा.धा.)

नित्यमयमधिपूर्वः। इ, (ङ्) अनिट्, सक, आ।
(धा.क.)

❖ **इट [इट्] गतौ** **(भ्वा०)**

इट किट कट इ गतौ। (धा.प्र.)(धा.क.)

इट किट कटी गतौ। (क्षी.त.)(मा.धा.)

कटिमिदितम् एके पठन्ति। अयतिं दीर्घम् इच्छन्ति चान्द्राः। व्यपदेशिवद्भावेन गुरुमत्त्वादाम्प्रत्ययम् उदाहरन्ति च। (धा.प्र.)

कटे वर्षे इत्यर्थभेदार्थः। अन्ये इदितमेनम् ई च प्रशिलष्टमाहुः। (क्षी.त.)

अत्र मैत्रयः कटीति ह्रस्वान्तं पठन्तीति। चतुर्थं

धातुमुक्त्वा मतान्तरेण दीर्घान्तं पठन् ई इति चतुर्थं दीर्घमुक्त्वा फलं च व्यपदेशिवद्भावेन गुरुमत्त्वेजादित्वाभ्यायाञ्चारेत्याम् सिद्धिमाह। धनपालशाटायनौ त्रीनेव धातूनाहतुः। अयं पक्षः समर्थितः पुरुषकारेण यदाह। इ ई इति ह्रस्वः दीर्घौ धातुः प्रस्तुत्य अन्ये पुनरुभावपि न पठन्ति। व्यक्तं चैतत् धनपालशाकटायनवृत्त्योः। अपि च शौटृ गर्व इत्यादिकान् कांश्चन धातून् पठित्वा अन्ते चोदात्ता इति उच्यन्ते तच्चास्मिन् प्रकरणे अयतेपि पाठे सति तस्य अनिड्वरान्तो भवतीति दृश्यताम् इत्यनुदात्तत्वात् प्राचुर्याभिप्रायेण कथं चिन्नेयं स्यात्। यथाह मैत्रेयरक्षितः उदात्तत्वम् अयतिवर्जं भट्टग्रामन्यायेनोदात्ता इत्युच्यन्ते इति। स चायं न्यायः सुनिश्चित एवायतेः पाठे शोभते। विप्रतिपन्ने पुनः उदात्तत्वोक्त्याञ्जस्य-वशादपाठ एव ज्यायान्। उदयतीत्यादि चैवमसाध्वेवास्तु इति हरदत्तस्याभिप्रायमेव पक्षोऽभिमतः। यदाह उपसर्गस्यायतौ इत्यत्र अयतिरनुदात्तेत् कथं तर्हि उदयति विततोर्ध्वरश्मिरज्जाविति परस्मैपदम्। केचित् तु इटकिटकटीत्यत्र इकारमपि धातुं पठन्तीति वृत्तिकारोपि प्रायेणात्रैवानुकूलः। यदाह एतिस्तुशासु इत्यत्र क्यपि इत्युदाहृत्य कथमुपेयमिति। (मा.धा.)

इट्, सेट्, सक, प। किट्, सेट्, सक, प। कट्, सेट्, सक, प। इ, अनिट्, सक, प। (धा.क.)

❖ इण् [इ] गतौ (अदा०)

इण् गतौ (शा.आ.)(धा.प्र.)
(क्षी.त.)(माधा.)(धा.क.)

इति अयं परस्मैभाषः। परस्मैपदी इकारान्तः अयम्। इकः पूर्वेण वा परेण वा निर्दैष्टव्ये पृथगस्य परस्मैपदिनो निर्देश इङिकोर्भेदार्थः। तौ ह्यधिपूर्वकावेव प्रयुज्येते। अयन्तु केवलः अन्योपसर्गपूर्वोऽपि। (धा.प्र.)

ऐति स्म रामं पथि जामदग्न्य इति भट्टिप्रयोगवद् न पुनरेति गतं चतुरं वय इत्यत्राप्यैतीति वृद्धिरेव पठनीया। स चिन्तयत्येव भियस्त्वदेष्यति इति हरत्यघं सम्प्रति हेतुरेष्यत इत्यादयस्तु प्रयोगा भौवादिकस्य अयतीत्यस्येङि पररूपे द्रष्टव्याः। (मा.धा.)

❖ इदि [इन्द्] परमैश्वर्ये (भ्वा०)

इदि परमैश्वर्य्यै। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

परमैश्वर्यं परमेशनक्रिया। (क्षी.त.)

ईश्वरस्य भावः ऐश्वर्य्यम्, ततः परमेण सह कर्मधारयः। इन्द्, (इ) अक, सेट्, प। (धा.क.)

❖ इल [इल्] स्वप्नक्षेपणयोः (तुदा०)

इल स्वप्नक्षेपणयोः। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

इल प्रेरणे चुरादौ। (मा.धा.)

इल्, सेट्, सक [अक] प। (धा.क.)

❖ इल [इल्] प्रेरणे (चुरा०)

इल प्रेरणे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

इल्, सक, उ। (धा.क.)

❖ **इवि [इन्व्] व्याप्तौ (भ्वा०)**

इवि व्याप्तौ। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

इन्व (इ) सेट्, अक, प। इन्वन्तीति इन्वकाः - तारकाविशेषः। (धा.क.)

❖ **इवि [इन्व्] प्रीणनार्थे (भ्वा०)**

इवि धिवि दिवि जिवि प्रीणनार्थे। (शा.आ.)

इवि जिवि दिवि धिवि प्रीणनार्थाः। हिवीति च चान्द्राः। (क्षी.त.)

❖ **इष [इष्] गतौ (दिवा०)**

इष ईष गतौ। (शा.आ.)

इष गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

इष आभीक्ष्ण्ये इति गणान्तरे। (धा.प्र.)

क्र्यादौ इष आभीक्ष्ण्ये। (क्षी.त.)

अयं चुरादावपीति स्वामी। इष इच्छायां तुदादिः इष आभीक्ष्ण्ये क्र्यादिः। (मा.धा.)

इष्, सेट्, सक, प। (धा.क.)

❖ **इष [इष्] इच्छायाम् (तुदा०)**

इष इच्छायाम्। (मा.धा.)(धा.क.)

केचिदुदितं पठन्ति। तस्य च प्रयोजनम् इड्विकल्पे छविधौ चोदितोऽनुवाद इति। (मा.धा.)

केचिदुदितममुं पठन्ति। इष्, सेट्, सक, प। दुर्गमते वेषु सहेत्यादौ विशेषार्थे उदनुबन्धः अयम्। इष्यतीति दिवादौ। (धा.क.)

❖ **इष [इष्] आभीक्ष्ण्ये (क्र्या०)**

इष आभीक्ष्ये। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

आभीक्ष्ण्यं पौनःपुन्यम्। दिवादौ इष गतौ। तुदादौ इषु गतौ। (क्षी.त.)

पौनःपुन्यं भृशार्थो वाऽऽभीक्ष्ण्यम्। तद्विषयायां क्रियायामित्यर्थः सा च यथायोग्यम्। तथा च श्रूयते पुर इष्णाति पुरुहूत इति। अत्र भाष्यम् आसुरीणां पुरो हननादिरर्थो गम्यते इति। (मा.धा.)

आभीक्ष्णं पौनःपुन्यं भृशार्थो वा तद्विषयायां क्रियायामित्यर्थः। सा च यथायोग्यम्। तथा च श्रूयते पुर इष्णाति - पुरुहूत इति, अत्र भाष्यम् - आसुरीणाम् पुरोहननादिरर्थो गम्यते। इष्, सेट्, सक, प। (धा.क.)

❖ **इषु [इष्] इच्छायाम् (तुदा०)**

इषु इच्छायाम्। (शा.आ.)(धा.प्र.)(क्षी.त.)

दिवादौ इष गतौ। क्र्यादौ इष आभीक्ष्ण्ये। (क्षी.त.)

❖ **ईक्ष [ईक्ष्] दर्शने (भ्वा०)**

ईक्ष दर्शने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

❖ **ईख [ईख्] गत्यर्थः (भ्वा०)**

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि **ईख** ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः

इति। यद्यपि मैत्रेयेणादितस्त्रय इदित उखिबखिमखयः, मूर्द्धन्यादिर्नखिरनिदित्, इखिश्च न पठ्यते, तथापि इतरानेकव्याख्यातॄणां प्रामाण्यादस्माभिः पठितः। एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ ईखि [ईङ्ख्] गत्यर्थः (भ्वा०)

उख नख वख मख रख लख वखि लखि इखि **ईखि** वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख **ईखि** वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। उखिरिदन्तोऽनार्षः, न्यूङ्खा ओङ्काराः षोडशेत्याद्यर्थमुन्नीतः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि **ईखि** वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश। तृतीयान्तास्त्रयोदश यद्यपि मैत्रेयेण आदितस्त्रय इदित उखिवखिमखयः मूर्द्धन्यादिः नखिः अनिदित्। इखिश्च न पठ्यते। तथापि इतरानेकव्याख्यातॄणां प्रामाण्यादस्माभिः पठितः। एवमेकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख **ईखि** वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि **ईखि** बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। यद्यपि मैत्रेयेणादितस्त्रय इदित उखिबखिमखयः, मूर्द्धन्यादिर्नखिरनिदित्, इखिश्च न पठ्यते, तथापि इतरानेकव्याख्यातॄणां प्रामाण्यादस्माभिः पठितः। एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ ईङ् [ई] गतौ (दिवा०)

ईङ् गतौ। (शा.आ.)(धा.प्र.)
(क्षी.त.) (मा.धा.)(धा.क.)

इङ्सूयतिर्विभाषितः आत्मनेभाषाः। (शा.आ.)

केचिद् व्यपदेशिवद्भावमनादृत्यामः अभावम् आहुः। (धा.प्र.)

सर्वः स्वार्थ प्रतीयते। (क्षी.त.)

ई (ङ्), अनिट्, सक, आ। (धा.क.)

❖ ईज [ईज्] गतिकुत्सनयोः (भ्वा०)

ईज गतिकुत्सनयोः। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

ईजीति दुर्गः। (क्षी.त.)

ईज्, सेट्, सक, आ। (धा.क.)

❖ ईड [ईड्] स्तुतौ (अदा०)

ईड स्तुतौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अयं चुरादौ च। (मा.धा.)

ईड्, सेट्, सक, आ। अयं चुरादौ च। (धा.क.)

❖ ईड [ईड्] स्तुतौ (चुरा०)

ईड स्तुतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

ईड इत्यदादौ। (मा.धा.)

ईड्, सक, उ। (धा.क.)

❖ ईर [ईर्] गतौ कम्पने च (अदा०)

ईर गतौ। (शा.आ.)(क्षी.त.)

ईर गतौ कम्पने च। (धा.प्र.)(मा.धा.)(धा.क.)

केचिदामभावमिच्छन्ति। (धा.प्र.)

चुरादौ ईर क्षेपे। कम्पने च इत्येके। (क्षी.त.)

ईर क्षेपे इत्याधृषीयः। (मा.धा.)

ईर्, सेट् आ क्षेपे इत्याधृषीयः। (धा.क.)

❖ ईर [ईर्] क्षेपे (चुरा०)

ईर क्षेपे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

लुकीर्ते गतिकम्पनयोः। (मा.धा.)

ईर्, सक, उ। (धा.क.)

❖ ईर्क्ष्य [ईर्क्ष्य्] ईर्ष्यार्थः (भ्वा०)

सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः। (शा.आ.)
(क्षी.त.)(मा.धा.)(धा.क.)

षूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः। (धा.प्र.)

ईर्ष्या कामजमसहनम्। (क्षी.त.)

त्रय एव सेटः, अकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ ईर्ष्य [ईर्ष्य्] ईर्ष्यार्थः (भ्वा०)

सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः। (शा.आ.)
(क्षी.त.)(मा.धा.)(धा.क.)

षूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः॥ (धा.प्र.)

ईर्ष्या कामजमसहनम्। (क्षी.त.)

त्रय एव सेटः, अकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ ईश [ईश्] ऐश्वर्ये (अदा०)

ईश ऐश्वर्ये। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

ईश्, सेट्, सक, आ। (धा.क.)

❖ ईशुचिर् [ईश्] पूतीभावे (दिवा०)

ईशुचिर् पूतीभावे (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अनुबन्धयोर्मध्ये धातुः शुच्यति। (शा.आ.)

शुच शोक इत्यस्य रूपम्। (धा.प्र.)

पूतिभावः क्लेदः। भ्वादौ शुच शोके। शुच्यी अभिषवे। (क्षी.त.)

शुच् (ई, इर्) सेट्, अक उ। (धा.क.)

❖ ईष [ईष्] गतिहिंसादर्शनेषु (भ्वा०)

ईष गतिहिंसादानेषु। (धा.प्र.)

ईष गतिहिंसादर्शनेषु। (क्षी.त.)

ईष उञ्छे इत्यस्य रूपम्। (क्षी.त.)

मनस ईषा मनीषा। पृषोदरादिः समीष्ट आचार्यः। ईष्व इति वनन्तस्य निपातनमस्येति मैत्रेयः। इषु इति ह्रस्वादिः तन्मतेयमुञ्छार्थः परस्मैपदिषु। इषु गताविति दिवादौ। अयम् इच्छार्थः तुदादौ। आभीक्ष्ण्यार्थः क्र्यादौ। (मा.धा.)

ईष्, सेट्, सक, आ। मनस ईषा मनीषा,

पृषोदरादिः। समीष्टः आचार्यः। ईष्व इति वन्नन्तस्य निपातनमस्येति मैत्रेयः। उणादिवृत्तौ तु इषु इच्छायामिति तौदादिकस्य निपातनम् उच्यते, इषु इति ह्रस्वादिः। तन्मते उञ्छार्थः। परस्मैपदिषु इषु गताविति दिवादौ, अयम् इच्छार्थः स्तुदादौ, आभीक्ष्ण्यार्थः क्र्यादौ।
(धा.क.)

❖ **ईष [ईष्] उञ्छे (भ्वा०)**

ईष उञ्छे। (धा.प्र.)(क्षी.त.)
(क्षी.त.)(मा.धा.) (धा.क.)

उछी उञ्छे इति दुर्गः पठति। ईष्, सेट्, अक, प। (धा.क.)

❖ **ईष [ईष्] गतौ (दिवा०)**

इष ईष गतौ। (शा.अ.)

❖ **ईह [ईह्] चेष्टायाम् (भ्वा०)**

ईह चेष्टायाम्। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

ईह्, सेट्, अक, प। (धा.क.)

❖ **उक्ष [उक्ष्] सेचने (भ्वा०)**

उक्ष सेचने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

उक्षां प्रचक्रुर्नगरस्य मार्गान् इति भट्टिप्रयोगम् उपादाय सुधाकरादयः - उक्ष्यत इत्युक्षाः, कर्मण घञ्, उक्षान् प्रचक्रुः इति पाठान्तरं न्यास्थन्। (मा.धा.)

उक्ष्, सेट्, सक, प। (धा.क.)

❖ **उख [उख्] गत्यर्थः (भ्वा०)**

उख नख वख मख रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। उखिः इदन्तोऽनार्षः, न्यूङ्खा ओङ्काराः षोडश इत्याद्यर्थम् उन्नीतः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयन्ताः पञ्चदश। तृतीयान्तास्त्रयोदश। यद्यपि मैत्रेयेण आदितस्त्रय इदित उखिवखिमखयः मूर्द्धन्यादिः नखिः अनिदित्। इखिश्च न पठ्यते। तथापि इतरानेकव्याख्यातृणां प्रामाण्याद् अस्माभिः पठितः। एवमेकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - **उख** णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति - यद्यपि मैत्रेयेणादितस्त्रय इदित्। उखिबखि-मखयः, मूर्द्धन्यादिर्नखिरनिदित्,

इखिश्च न पठ्यते, तथापि इतरानेकव्याख्यातॄणां प्रामाण्याद् अस्माभिः पठितः। (धा.क.)

❖ उखि [उङ्ख्] गत्यर्थः (भ्वा०)

उख **उखि** वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। उखिः इदन्तोऽनार्षः, न्यूङ्खा ओङ्काराः षोडशेत्याद्यर्थम् उन्नीतः। (क्षी.त.)

उख **उखि** वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयन्ताः पञ्चदश। तृतीयान्तास्त्रयोदश यद्यपि मैत्रेयेणादितस्त्रय इदित उखिवखिमखयः मूर्द्धन्यादिः नखिः अनिदित। इखिश्च न पठ्यते। तथापि इतरानेकव्याख्यातॄणां प्रामाण्याद् अस्माभिः पठितः। (मा.धा.)

उख **उखि** वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। यद्यपि मैत्रेयेणादितस्त्रय इदित उखिबखिमखयः, मूर्द्धन्यादिर्नखिरनिदित, इखिश्च न पठ्यते, तथापि इतरानेकव्याख्यातॄणां प्रामाण्यादस्माभिः पठितः। (धा.क.)

❖ उङ् [उ] शब्दे (भ्वा०)

घुङ् कुङ् **उङ्** ङुङ् शब्दे। (धा.प्र.)

घुङ् कुङ् **उङ्** शब्दे। ङुङ् इति च दुर्गः। खुङ् चेत्येके। (क्षी.त.)

कुङ् घुङ् **उङ्** शब्दे। अयमव्यक्तशब्द इति न्यासे तथा देवश्च अव्यक्तशब्दे। अयमार्त्तशब्दे तुदादौ। शब्दमात्रेऽदादौ। (मा.धा.)

कुङ् घुङ् **उङ्** ङुङ् शब्दे। कु, घु, उ, ङु, (ङ्) अनिट्, अक, आ। (धा.क.)

❖ उच [उच्] समवाये (दिवा०)

उच समवाये। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

समवाय ऐक्यम्। (क्षी.त.)

समवायः सङ्गमो मिश्रणम्। उच्यति केशः स्नानेव इति मनोरमा। उच्, सेट्, अक, प। (धा.क.)

❖ उच्छी [उच्छ्] विवासे (भ्वा०)

उच्छी विवासे। (धा.प्र.)(मा.धा.)

अयमपि तुदादौ पठिष्यते। (धा.प्र.)

समाप्तिर्विवास इति तरङ्गिण्याम्। विपूर्वश्चायं प्रायः प्रयुज्यत इति पुरुषकारे। अयमपि तुदादौ पठिष्यते पूर्ववदुभयत्रप्रयोजनम्। (मा.धा.)

❖ उच्छी [उच्छ्] विवासे (तुदा०)

उच्छी विवासे। (मा.धा.)

❖ उछृदिर् [छृद्] दीप्तिदेवनयोः (रुधा०)

उछृदिर् दीप्तिदेवनयोः। (धा.प्र.)(क्षी.त.)

उच्छृदिर् दीप्तिदेवनयोः। (शा.आ.)(मा.धा.)

उकारः क्त्वायामिड्विकल्पार्थः। छृदी सन्दीपने युजादौ। (मा.धा.)

अथ स्वरितौ सेटौ। छृद्, (उ, इर्) सेट्, अक, उ। छृदी सन्दीपने युजादौ। (धा.क.)

❖ **उछि [उञ्छ्] उञ्छे** **(भ्वा०)**

उछि उञ्छे।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

निष्ठा प्रोञ्छितम्। तुदादावप्ययं पठिष्यते। शपोऽनुदात्तत्वार्थमिह पठ्यते। (धा.प्र.)

शिलोञ्छनम्, शिलोच्चयनमित्यर्थः। (क्षी.त.)

उञ्छो धान्यश आदानं कणिशाद्यर्जनं शिलम् इति यादवप्रकाशः। एवं विज्ञानेश्वरोपि उञ्छति सूत्रे उञ्छति उच्चिनोतीत्यर्थ इति। न्यासो बदाराण्युञ्छति बादरिकः। श्यामाकान् उञ्छति श्यामाकिकः इत्युदाहरतो वृत्तिकारस्यापि व्यापित्वेनोच्चय एवार्थः इत्यभिप्रायो लक्ष्यते। (मा.धा.)

उञ्छः कणश आदानम् कणिशाद्यर्जनं शिलमिति यादवप्रकाशः। एवं विज्ञानेश्वरोऽपि उञ्छति सूत्रे उञ्छति उच्चिनोतीत्यर्थः इति। न्यासे - वदराण्युञ्छति - वादरिकः, श्यामाकान् उञ्छति - श्यामकिक इत्युदाहरतो वृत्तिकारस्य अपि व्यापित्वेनोच्चार्थ इत्यभिप्रायो लक्ष्यते। (धा.क.)

❖ **उछि [उञ्छ्] उञ्छे** **(तुदा०)**

उछि उञ्छे। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

भ्वादौ चास्य पाठः स्वरभेदार्थः। (धा.प्र.)

उञ्छ उच्चयः। (क्षी.त.)

उञ्छ् (इ) उच्छ् (ई) सेट्, सक, प। (धा.क.)

❖ **उछी [उच्छ्] विवासे** **(भ्वा०)**

उछी विवासे। विवासो विनाशः समाप्तिः इत्यर्थः। रजन्यां व्युष्टायामुषसि जनयामास तनयम्। एताविह न पाठ्यौ तुदादित्वाद् एवेष्टसिद्धेः। (क्षी.त.)

उछी विवासे विपाशे - समाप्तिर्विवास इति तरङ्गिण्याम्। वोपदेवमते निवासेऽयं धातुः। विपाश इति प्रदीपः। विपूर्वश्चायं प्रायः प्रयुज्यत इति पुरुषकारे। उछ् (ई) सेट्, प। अयमपि तुदादौ पठिष्यते। पूर्ववदुभयत्र प्रयोजनम्। (धा.क.)

❖ **उछी [उच्छ्] विवासे** **(तुदा०)**

उछी विवासे। (धा.प्र.)(क्षी.त.)(धा.क.)

व्युष्टं कल्ये विपाशिते। अयमपि भ्वादौ पठितः। स्वरभेदाय। (धा.प्र.)

विवासोऽतिक्रमः। (क्षी.त.)

उञ्छ् (इ) उच्छ् (ई) सेट्, सक, प। भ्वादौ व्याख्यातौ। (धा.क.)

❖ **उज्झ [उज्झ्] उत्सर्गे** **(तुदा०)**

उज्झ उत्सर्गे। (शा.आ.)(धा.प्र.) (मा.धा.)(धा.क.)

दोपधोऽयम्। (धा.प्र.)

अयमपि दोपधः। जश्त्वं तु लाक्षणिकम्। (मा.धा.)

उत्सर्गस्त्यागः। ह्रस्वादिरयम्। अयम् अपि

दोपधः। जश्त्वन्तु लाक्षणिकम्। उज्झ्, सेट्, सक, प। षानुबन्धोऽयमिति कश्चित्, तन्न, गुरुमत्त्वादेव अङ्क्षिद्धेः। गोविन्दभट्टादिसम्मतम् एतत्। केचिद् जोपधोऽयमिति मन्यमाना औजिज्झदिति उदाहरन्तीति रमानाथः। (धा.क.)

❖ **उठ [उठ्] उपघाते** **(भ्वा०)**

उठ इत्येके। (धा.प्र.)

उठ उपघाते। (क्षी.त.)

रुठ लुठ उठ उपघाते। रुठ्, लुठ्, उठ्, सेट्, सक, प। अत्र मैत्रेयः। उठेत्यप्येक इति। धनपालशाकटायनौ तु रुठलुठेत्येव पेठतुः। क्षीरस्वामी तु उठिं पठित्वा रुठ लुठ इत्यपि दुर्गादय इत्याह। असौ डान्त इत्येक इति मैत्रेयः। (धा.क.)

❖ **उतृदिर् [तृद्] हिंसानादरयोः** **(रुधा०)**

उतृदिर् हिंसानादरयोः। (शा.आ.)(धा.प्र.) (मा.धा.)(धा.क.)

अनुबन्धयोर्मध्ये धातुः। पूर्वानुस्वारेणात्मनेपदेषु रूपनयः। (शा.आ.)

तृद् (उ, इर्) सेट्, सक, उ। (धा.क.)

❖ **उद्झ [उद्झ्] उत्सर्गे** **(तुदा०)**

उद्झ उत्सर्गे। दोपधोऽयम्, लाक्षणिकं चुत्वम्। (क्षी.त.)

❖ **उध्रस [ध्रस्] उञ्छे** **(क्र्या०)**

उध्रस उञ्छे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

केचित्तूत्वपूर्वस्य ध्रसेर्गणपाठम् इच्छन्ति। (धा.प्र.)

अयं चुरादौ अत्र क्षीरस्वाम्युकारं धात्ववयवमाह अनवयवत्वे स्वादिवद् ध्रसु इति ब्रूयादिति। (मा.धा.)

ध्रस, (उ) सेट्, अक, प। अत्र क्षीरस्वाम्युकारं धात्ववयवमाह। (धा.क.)

❖ **उध्रस [ध्रस्] उञ्छे** **(चुरा०)**

उध्रस उञ्छे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

पूर्व एवायं धातुरिह पठ्यते। तेनायमुदिदिति। (धा.प्र.)

क्र्यादिः एवायं स्वार्थणिजर्थः पठित इत्युदित्त्वम् प्रयोगसमवायीत्येके। (क्षी.त.)

क्रैयादिकस्योकार इत्। अस्य तु धातोरवयव इति काश्यपादिः। मैत्रेयस्तु पूर्व एवायं धातुरिह पठ्यते। तेनायमुदिदिति अन्ये तूभयत्रापि धात्ववयव उकार इति। ध्रासयतीति मैत्रेयमते अन्येषामुध्रासयतीति। (मा.धा.)

ध्रस् (उ) सक, उ। क्रैयादिकस्योकार इत्, अस्य तु धातोरवयव इति काश्यपादयः। मैत्रेयस्तु पूर्व एवायं धातुरिह यत् पठ्यते, तेनायमुदिदिति। अन्ये तु उभयत्रापि धात्ववयव उकार इति। ध्रासयतीति मैत्रेयः। अन्येषामुध्रासयतीति। (धा.क.)

❖ **उन्दी [उन्द्] क्लेदने** **(रुधा०)**

उन्दी क्लेदने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)

उन्द्, (ई) सेट्, सक, प। (धा.क.)

❖ उन्भ [उन्भ्] पूरणे **(तुदा०)**

उभ **उन्भ** पूरणे। (धा.प्र.)(क्षी.त.)(धा.क.)

उभ्, उन्भ्, सेट्, सक प। (धा.क.)

❖ उबुन्दिर् [बुन्द्] निशामने **(भ्वा०)**

उबुन्दिर् निशामने। (शा.आ.)(क्षी.त.)
(मा.धा.)(धा.क.)

अनुबन्धयोर्मध्येधातुः। (शा.आ.)

निशामनमालोचनम्। धान्तोऽयमिति नन्दी।

उबेदिर् इत्यन्ये। (क्षी.त.)

निशामनं चक्षुर्विज्ञानम्। (मा.धा.)

बुन्द् (उ, इर्) सेट्, सक, उ। बुन्धिर् इति वोपदेवः। (धा.क.)

❖ उब्ज [उब्ज्] आर्जवे **(तुदा०)**

उब्ज आर्जने। (शा.आ.)

उब्ज आर्जवे। (धा.प्र.) (क्षी.त.)
(मा.धा.) (धा.क.)

आर्जवं स्पष्टता। (क्षी.त.)

अयमुपध्मानीयोपध इति केचित्। तथा च हयवरट् इत्यत्र वार्तिकम् अयोगवाहानाम् अट्सु णत्वं शर्षु जश्भावषत्वे इति। अत्र भाष्यं- शर्षु चोपदेशः कर्तव्यः किं प्रयोजनम्। जश्भावषत्वे उब्जिः अयम् उपध्मानीयोपधः पठ्यते।
(मा.धा.)

आर्जवं सारल्यम्। उब्ज्, सेट्, अक, प। (धा.क.)

❖ उभ [उभ्] पूरणे **(तुदा०)**

उभ उम्भ पूरणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

उभ्, उन्भ्, सेट्, सक प। (धा.क.)

❖ उम्भ [उम्भ्] पूरणे **(तुदा०)**

उभ **उम्भ** पूरणे। (शा.आ.)(मा.धा.)

❖ उवुन्दिर् [वुन्द्] निशामने **(भ्वा०)**

उवुन्दिर् निशामने। निशामनमालोचनम्।
(धा.प्र.)

❖ उर्द [उर्द्] माने क्रीडायाञ्च **(भ्वा)**

उर्द माने क्रीडायाञ्च। (धा.प्र.)(क्षी.त.)
(मा.धा.) (धा.क.)

मितिर्मानमिति मुख्योऽर्थः। चकाराद् आस्वादने अपीति दुर्गः। (क्षी.त.)

क्रीडायामकर्मकः चकारादास्वादने। इह मानं सुखमिति सम्मतायाम्। (मा.धा.) (धा.क.)

मानं परिमाणमिति रमानाथः। ह्रस्वादिरयम्। केचित् तु दीर्घमेवाधीयते। उर्द्, सेट्, आ।
(धा.क.)

❖ उर्वी [उर्व्] हिंसार्थः **(भ्वा०)**

उर्वी तुर्वी थुर्वी दुर्वी धुर्वी हिंसायाम्। (धा.प्र.)

उर्वी तुर्वी दुर्वी धुर्वी हिंसार्थाः। थुर्वी इति चन्द्रः जुर्वी इति दौर्गाः। (क्षी.त.)

उर्वी तुर्वी थुर्वी धुर्वी दुर्वी हिंसार्थाः। (मा.धा.)

उर्वी तुर्वी थुर्वी दुर्वी धुर्वी हिंसायाम्। सर्वे ईदनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनश्च। अक्षेषु धूर्त्तः। (धा.क.)

❖ उष [उष्] दाहे **(भ्वा०)**

उष दाहे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

उष्, सेट्, सक, प। (धा.क.)

❖ उहिर् [उह्] अर्दने (भ्वा०)

तुहिर् उहिर् अर्दने। (शा.आ.)(धा.प्र.)(क्षी.त.)

तुहिर् दुहिर् उहिर् अर्दने। (मा.धा.)(धा.क.)

तुहिर् दुहिर् इति चन्द्रदुर्गौ । (क्षी.त.)

दिहिर्दुहिर्मेहतिरोहती इति अनिड्कारिकायां मैत्रेयादयो नास्य ग्रहणमिच्छन्ति। (मा.धा.)

तुह्, दुह्, उह्, (इर्) सेट्, सक, प। (धा.क.)

❖ ऊन [ऊन] परिहाणे (चुरा०)

ऊन परिहाणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

ऊन, सक, उ। (धा.क.)

❖ ऊयी [ऊय्] तन्तुसन्ताने (भ्वा०)

ऊयी तन्तुसन्ताने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

ऊय् (ई) सेट्, सक, आ। (धा.क.)

❖ ऊर्ज [ऊर्ज्] बलप्राणनयोः (चुरा०)

ऊर्ज बलप्राणधारणयोः। (धा.प्र.)

ऊर्ज बलप्राणनयोः। (क्षी.त.)(मा.धा.)(धा.क.)

प्राणनं जीवनम्। (क्षी.त.)(मा.धा.)

बल प्राणधारणे इति बलप्राणनयोर्धारणं तत्रेति। दीर्घादिरयम्। ऊर्ज्जयति धनी जीवनलोके इति रमानाथः। प्रापनं जीवनम् इति माधवीया। (धा.क.)

❖ ऊर्णुञ् [ऊर्णु] आच्छादने (अदा०)

ऊर्णुञ् आच्छादने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

उदात्त उभयतोभाषः। (मा.धा.)(धा.क.)

ऊर्णु, (ञ्) सेट्, सक, उ। (धा.क.)

❖ ऊष [ऊष्] रुजायाम् (भ्वा०)

ऊष रुजायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

उष दाह इति अग्रे ह्रस्वोपधः। (मा.धा.)

उष दाहे इत्यग्रे। (धा.क.)

❖ ऊह [ऊह्] वितर्के (भ्वा०)

ऊह वितर्के। (शा.आ.)(धा.प्र.) (मा.धा.) (धा.क.)

सोपसर्गत्वे सति उपसर्गादस्यत्यूह्योर्वाचनमिति पक्षे परस्मैपदम्। (शा.आ.)

वितर्कः सम्भावनम्। उपसर्गादस्यत्यूहोर्वा इति उपसृष्टात् परस्मैपदं च। (मा.धा.) (धा.क.)

वितर्कः सम्भावनम्। ऊह्, सेट्, सक, आ। उपसर्गादस्यत्यूहोर्वा वचनमिति सोपसर्गाद् अस्मात् विकल्पेन आत्मनेपदम्। (धा.क.)

ऊह तर्के। तर्क उत्प्रेक्षा। (क्षी.त.)

❖ ऋ [ऋ] हिंसायाम् (भ्वा०)

ऋ हिंसायाम्। (शा.आ.)

❖ ऋ [ऋ] गतिप्रापणयोः (भ्वा०)

ऋ गतिप्रापणयोः। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

ऋ, अनिट्, सक, प। (धा.क.)

❖ ऋ [ऋ] गतौ (जुहो०)

ऋ सृ गतौ। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)(मा.धा.)

ऋ सृ अनिट्, सक, प। सम्पूर्वक आत्मनेपदी। (धा.क.)

❖ **ऋक्षि [ऋङ्क्ष्] हिंसायाम्** **(स्वा०)**

ऋक्षि चिरि जिरि दाश दृ हिंसायाम्। दुर्गस्तु तिक तिघ षघ ऋक्ष क्षिरि चिरि जिरि दाश द्रु हिंसायाम् मित्याह। छान्दसा अमी जिघर्ति आदिवन्नियतविषयाः। (क्षी.त.)

❖ **ऋच [ऋच्] स्तुतौ** **(तुदा०)**

ऋच स्तुतौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

ऋच्, सेट्, सक, प। (धा.क.)

❖ **ऋच्छ [ऋच्छ्] गतीन्द्रियप्रलयमूर्ति-भावेषु** **(तुदा०)**

ऋच्छ गतीन्द्रियप्रलयमूर्त्तिभावेषु। (शा.आ.) (धा.प्र.)(धा.क.)

गतिर्गमनम्, इन्द्रियप्रलयः - इन्द्रियविनाशः, मूर्त्तिभावः - काठिन्यम्। ऋच्छ्, सेट्, अक/सक प। (धा.क.)

❖ **ऋछ [ऋच्छ्] गतीन्द्रियप्रलयमूर्तिभावेषु** **(तुदा०)**

ऋछ इन्द्रियप्रलयमूर्तिभावयोः। इन्द्रियाणां प्रलये मोहे, मूर्तिभावे च। (क्षी.त.)

ऋछ गतीन्द्रियप्रलयमूर्तिभावेषु (मा.धा.)

❖ **ऋज [ऋज्] गतिस्थानार्जनोपार्जनेषु** **(भ्वा०)**

ऋज गतिस्थानार्जनोपार्जनेषु। (धा.प्र.)

ऋज गतिस्थानार्जनोर्जनेषु। (क्षी.त.) (मा.धा.) (धा.क.)

ऊर्जनम् प्राणनम्। अन्ये तूद्रिक्तोद्रेकार्थं हलादिमेनं मन्यन्ते। (क्षी.त.)

अयं पाठो मैत्रेयस्य ऊर्जनेष्विति क्षीरस्वामिधनपालशाकटायनाः। (मा.धा.)(धा.क.)

गतिस्थैर्य्ये अर्जनार्जने इति वोपदेवः। श्वच, श्वचि, ईज, ईजि, बीज, ऋज गतौ इति दुर्गः।

ऋज्, सेट्, सक, आ। (धा.क.)

❖ **ऋजि [ऋञ्ज्] भर्जने** **(भ्वा०)**

ऋजि भृजी भर्जने। (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

भर्जनं पाकप्रकारः। (क्षी.त.)

द्वितीय ईदित् भर्जनं पाकविशेषः। (मा.धा.)

ऋञ्ज्, (इ) भृज्, (ई) सेट्, सक, आ। भर्ज्जनं पाकविशेषः। भ्रस्ज पाक इति तुदादौ। (धा.क.)

❖ **ऋणु [ऋण्] गतौ** **(तना०)**

ऋणु दीप्तौ गमने च। (धा.प्र.)

ऋणु गतौ। (क्षी.त.)(मा.धा.)(धा.क.)

अयमपि तवर्गीयान्तोपदेशः लाक्षणिकं णत्वम्। क्षीरस्वाम्यपि क्षिणिप्रभृतीन् प्रस्तुत्य इमे सार्वधातुके सन्दिग्धगुणा इत्याह। (मा.धा.)

ऋण् (उ) सेट्, सक, उ। अयमपि तवर्गीयान्तोपदेशः, णत्वन्तु लाक्षणिकम्। केषाञ्चिन्मते ऋणति, ऋणुते इत्यादौ विकरणे गुणाभावः। (धा.क.)

❖ **ऋत [ऋत्] तथ्यभाषणे घृणायाञ्च** **(भ्वा०)**

ऋत तथ्यभाषणे घृणायाञ्च। (शा.आ.)

ऋते रीयङ् सौत्रो धातुः। (शा.आ.)

❖ **ऋधु [ऋध्] वृद्धौ** **(दिवा०)**

ऋधु वृद्धौ। (शा.आ.)(धा.प्र.)
(क्षी.त.) (मा.धा.)(धा.क.)

अयमकर्मकः सकर्मकश्च। अत्र तृप प्रीणन इत्यात्रेयादयः पठन्ति। अयं स्वादौ च।
(मा.धा.)

ऋध् (उ) अक, सेट्, प। (धा.क.)

❖ **ऋधु [ऋध्] वृद्धौ** **(स्वा०)**

ऋधु वृद्धौ। (शा.आ.)(धा.प्र.)
(क्षी.त.) (धा.क.)

ऋध्(उ) सेट्, सक प। इत आगणान्तात् छन्दसि। (धा.क.)

❖ **ऋन्फ [ऋन्फ्] हिंसायाम्** **(तुदा०)**

ऋफ **ऋन्फ** हिंसायाम्। (धा.प्र.)
(क्षी.त.)(धा.क.)

ऋप्, **ऋन्फ्** सेट्, सक, प। (धा.क.)

❖ **ऋफ [ऋफ्] हिंसायाम्** **(तुदा०)**

ऋफ ऋन्फ हिंसायाम् । (धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

ऋप्, ऋन्फ् सेट्, सक, प। (धा.क.)

❖ **ऋम्फ [ऋम्फ्] हिंसायाम्** **(तुदा०)**

ऋफ **ऋम्फ** हिंसायाम्। (मा.धा.)

❖ **ऋषी [ऋष्] गतौ** **(तुदा०)**

ऋषी गतौ। उदात्त उदात्तेत्। (क्षी.त.)

❖ **ॠ [ॠ] गतौ** **(क्र्या०)**

ॠ गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

ॠ, सेट्, सक, प। (धा.क.)

❖ **ऋष [ऋष्] हिंसार्थः** **(भ्वा०)**

कष शिष जिष झष वष रुष **ऋष** हिंसार्थाः।
(शा.आ.)

❖ **ऋष [ऋष्] हिंसायाम्** **(तुदा०)**

रुष **ऋष** हिंसायाम्। (शा.आ.)

❖ **ऋषि [ऋंष्] गतौ** **(तुदा०)**

ऋषि गतौ। (शा.आ.)

❖ **ऋषी [ऋष्] गतौ** **(तुदा०)**

ऋषी गतौ (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

पूर्वोत्तरधातुसादृश्यानुरोधेन पृथगयं परस्मैपदी निर्दिश्यते। (धा.प्र.)

उदात्तः उदात्तेत्। (क्षी.त.)

ऋष् (ई) सेट्, अक, प। (धा.क.)

❖ **ऋह [ऋह्] कत्थनयुद्धहिंसादानेषु** **(तुदा०)**

ऋह कत्थनयुद्धहिंसादानेषु। (क्षी.त.)

❖ **एजृ [एज्] दीप्तौ** **(भ्वा०)**

एजृ रेजृ भाजृ दीप्तौ। (शा.आ.)

एजृ भ्रेजृ भाजृ दीप्तौ। (धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अत एव भ्राजभासो ऋदित्करणम् अपाणिनीयमिति वदन्ति, न हि ऋदित्करणस्य शास्त्र उपधाह्रस्वप्रतिषेधात् अन्यत् प्रयोजनं पश्यामः। (शा.आ.)

एज, भ्रेज, भ्राज, (ऋ) सेट्, अक, आ। वर्च्च, कचि, एजृ, भ्रेजृ, भ्राजृ, दीप्ताविति दुर्गकृतः पाठः। पाणिनीयवृत्तौ तु एजृ कम्पन इति परस्मैपदी। (धा.क.)

❖ **एजृ [एज्] कम्पने** **(भ्वा०)**

एजृ कम्पने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

एज् (ऋ) सेट्, अक, प। (धा.क.)

❖ एठ [एठ्] विबाधायाम् (भ्वा०)

एठ च। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

विपूर्वोयमिति स्वामिकाश्यपौ मैत्रेयादयस्तु केवलमेवोदाजह्रुः। (मा.धा.)

चकारेण पूर्वोक्तोऽर्थः परामृश्यते। विपूर्वोऽयम् इति स्वामिकाश्यपौ, मैत्रेयादयः तु, केवलम् एव उदाजह्रुः। एठ्, सेट्, अक, आ। (धा.क.)

❖ एध [एध्] वृद्धौ (भ्वा०)

एध वृद्धौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

वृद्धिशब्दो यद्यपि स्त्रियां क्तिन् इति सिद्धार्थधर्मो व्युत्पादितः। तथापि साध्यरूप एव धात्वर्थस्तेन स्पष्टीक्रियत इति वेदितव्यम्। (शा.आ.)

कत्थन्ता उदात्ता अनुदात्तेतः। एध, सेट्, आत्मनेपदी, अकर्मकः। (धा.क.)

❖ एवृ [एव्] सेवने (भ्वा०)

एवृ शेवृ षेवृ सेवृ केवृ खेवृ ग्लेवृ पेवृ प्लेवृ मेवृ म्लेवृ सेवने। (क्षी.त.)

❖ एषृ [एष्] गतौ (भ्वा०)

जेषृ णेसृ **एषृ** ह्रेषृ गतौ। (धा.प्र.)(क्षी.त.)

जेषृ णेषृ **एषृ** प्रेषृ गतौ। (मा.धा.) (धा.क.)

ह्रेषा वाजिध्वनौ स्त्रियाम् । (धा.प्र.)

दिवादौ इष गतौ, तुदादौ इषु इच्छायाम्। क्र्यादौ इष अभीक्ष्ण्ये। (क्षी.त.)

रेषृ णेषृ **एषृ** प्रेषृ गतौ। सर्वे ऋदनुबन्धाः, सेटः, सकर्मकाः, आत्मनेपदिनः च। एषृधातोः अर्थभेदात् पुनःपाठः। (धा.क.)

❖ एषृ [एष्] प्रयत्ने (भ्वा०)

एषृ प्रयत्ने। (मा.धा.)(धा.क.)

एष् (ऋ) सेट्, अक, आ। (धा.क.)

❖ ओखृ [ओख्] शोषणालमर्थयोः (भ्वा०)

ओखृ राखृ लाखृ द्राखृ ध्राखृ शोषणालमर्थयोः। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

उवोखेति भ्रान्तः। मा भवान् ओचिखत्। ऋदित्त्वादेवौदित्त्वं नास्ति साहचर्यात्। (क्षी.त.)

शोषणं स्नेहराहित्यम्। अलमर्थः - भूषणम्, पर्यप्तिः, वारणं, सामर्थ्यञ्च। पञ्चैव ऋदनुबन्धाः, परस्मैपदिनः, सेटश्च। (धा.क.)

❖ ओणृ [ओण्] अपनयने (भ्वा०)

ओणृ अपनयने (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

ओण् (ऋ) सक, सेट् प। (धा.क.)

❖ ओप्यायी [प्याय्] वृद्धौ (भ्वा०)

स्फायी **ओप्यायी** वृद्धौ। (शा.आ.)
(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

स्फाय् (ई) प्याय् (ई, ओ) अक, सेट् आ। (धा.क.)

❖ ओलजी [लज्] व्रीडायाम् (तुदा०)

ओलजी ओलस्जी व्रीडे। (धा.प्र.)(क्षी.त.)

ओलजी ओलस्जी व्रीडायाम्। (मा.धा.)
(धा.क.)

अयं तवर्गपञ्चमादिरिति चान्द्राः। तन्मतेन

नग्ननग्निकाशब्दव्युत्पत्तौ तवर्गादिरयं स्वामिना पठितो न तु स्वमतेन। यदाह ओलजी ओलस्जी व्रीड इति चान्द्रा इति। आत्रेयमैत्रेयस्वामिसम्मताकारशाकटायनादयः सर्वे यणादिमेवाहुः नग्नशब्दस्तु पृषोदरादित्वाद्व्यत्ययेनेति मैत्रेयः। इति चत्वारः शपि भर्त्सने। (मा.धा.)

लज्, लस्ज् (ओ, ई) सेट्, अक, आ। लाज्जत्यादयश्चत्वारो भ्वादौ गताः। (धा.क.)

❖ **ओलडि [ओलण्ड्] उत्क्षेपणे (चुरा०)**

ओलडि उत्क्षेपणे। (धा.प्र.)(धा.क.)(मा.धा.)

ओलडि उत्क्षेपे। (क्षी.त.)

दौर्गास्तु क्ते लण्डिन इत्युदाजह्रुः, तच्च पापात् पापीयः, अव्यवहितस्य नत्वाद्। अन्यथा विन्नादिवद् विदितादौ नत्वं स्यात्। चान्द्रा लन्दिमप्याहुः-अवलन्दयत्युष्ट्रम्। इत्थं लक्षणम् अलक्षयताम् अन्धकुक्कुटीन्यायेन लक्ष्यम् अनुसरतां कियदिव रुष्यामः, कियदिव तुष्यामः। (क्षी.त.)

अजादित्वाद् द्वितीयस्यैकाचो द्विर्वचनम्। अत्र स्वामिकाश्यपसम्मताकाराः केचिदोदितं पठन्ति। अपरे तूकारादिं पठन्ति। तदा उकारं धात्ववयवमुदाहरतां मैत्रेयादीनाम् इत्संज्ञकत्वम् अभिदधतामन्येषां च सर्वेषामनभिमतम्। (मा.धा.)

ओलण्ड् (इ, वा णिच्) सक, केचिदोदितं पठन्ति। (धा.क.)

❖ **ओलस्जी [लस्ज्] व्रीडायाम् (तुदा०)**

ओलस्जी व्रीडे। (शा.आ.)

ओलजी **ओलस्जी** व्रीडे। (धा.प्र.) (क्षी.त.)

ओलजी **ओलस्जी** व्रीडायाम्। (मा.धा.) (धा.क.)

अत एव ओनजीति चन्द्रः - नग्नः। अनयोः तुदादौ प्रयोजनाभावाद् भ्वादौ युक्तः पाठः। (क्षी.त.)

अयं तवर्गपञ्चमादिरिति चान्द्राः। तन्मतेन नग्ननग्निकाशब्दव्युत्पत्तौ तवर्गादिरयं स्वामिना पठितो न तु स्वमतेन। यदाह ओलजी ओलस्जी व्रीड इति चान्द्रा इति। आत्रेयमैत्रेयस्वामिसम्मताकारशाकटायनादयः सर्वे यणादिम् एवाहुः। नग्नशब्दस्तु पृषोदरादित्वाद्व्यत्ययेनेति मैत्रेयः इति चत्वारः शपि भर्त्सने। (मा.धा.)

लज्, लस्ज् (ओ, ई) सेट्, अक, आ। लाज्जत्यादयश्चत्वारो भ्वादौ गताः। (धा.क.)

❖ **ओविजी [विज्] भयचलनयोः (तुदा०)**

ओविजी भयचलनयोः। (शा.आ.)

(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

प्रायेणायमुत्पूर्वः इति जुहोत्यादौ पृथग्भावे। (मा.धा.)

विज् (ओ, ई) सेट्, अक, आ। प्रायेण अयम् उत् पूर्वः प्रयुज्यते। (धा.क.)

❖ **ओविजी [विज्] भयचलनयोः (रुधा०)**

ओविजी भयचलनयोः। (शा.आ.)

(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

श्नौ गतम् उद्विजत इति शे। (मा.धा.)

विज्, (ओ, ई) सेट्, अक, प। (धा.क.)

❖ **ओवै [वै] शोषणे** **(भ्वा०)**

पै **ओवै** शोषणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अदादौ वा गतिगन्धनयोः वाति। चुरादौ वा गतिसुखसेवनयोः वापयति। (क्षी.त.)

अत्र वा गतिगन्धनयोः इत्यदादिकस्यैव ग्रहणम्। तस्य एव विधूनने वृत्तिसम्भवाद् इति व्याख्यातारः। शाच्छासा इति युक् तु तत्र एव वे इति निर्देशात् वेञ् तन्तुसन्ताने इत्यग्रे पठिष्यमाणस्यैव न त्वस्य प्रसजति। (मा.धा.)

पै, वै (ओ) अनिट्, सक, प। (धा.क.)

❖ **ओव्रश्चू [व्रश्च्] छेदने** **(तुदा०)**

ओव्रश्चू छेदने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

व्रश्च्, (ओ, ऊ) वेट्, सक प। दुर्गमते व्रश्चु च्छेदने इति पाठः। (धा.क.)

❖ **ओहाक् [हा] त्यागे** **(जुहो०)**

ओहाक् त्यागे (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

ककारो हश्च व्रीहिकालयोः इत्यत्रानयोः सामान्यग्रहणार्थः। (शा.आ.)

अनुदात्तः परस्मैपदी। (मा.धा.)

हा, (क्, ओ) अनिट्, सक, प। (धा.क.)

❖ **ओहाङ् [हा] गतौ** **(जुहो०)**

ओहाङ् गतौ (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

भृञामित् इति जिहीते पर्णानि नाभ्युजिहते रत्नानि। हायते ग्रामः। (क्षी.त.)

अनुदात्त आत्मनेभाषः। (मा.धा.)

हा, (ओ, ङ्) अनिट्, सक, आ। (धा.क.)

❖ **कक [कक्] लौल्ये** **(भ्वा०)**

कक लौल्ये। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

लौल्यं सतृष्णत्वं चापल्यञ्च। (क्षी.त.)

लौल्यं गर्वश्चापल्यं च। (मा.धा.)(धा.क.)

कक, सेट्, अक, आ। (धा.क.)

❖ **ककि [कङ्क्] गत्यर्थः** **(भ्वा०)**

ढौकृ त्रौकृ **ककि** श्वकि त्रकि ष्वष्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (शा.आ.)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वक्क वस्क मस्क तिकृ टिकृ टीकृ रघि लघि गत्यर्थाः। (धा.प्र.)

ककि श्वकि त्रकि ढौकृ त्रौकृ ष्वक् वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (क्षी.त.)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः - सम्मतायां दन्त्यादिः पठ्यते। (मा.धा.)

ककि वकि [मकि] श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ [सेकृ श्रेकृ श्रकृ श्लकि] रघि लघि गत्यर्थाः - सम्मतायां दन्त्यादिः पठ्यते। (धा.क.)

❖ **कक्ख [कक्ख्] हसने** **(भ्वा०)**

कक्ख हसने। (धा.प्र.)

❖ **कख [कख्] हसने** **(भ्वा०)**

कख हसने। (मा.धा.) (धा.क.)

कख्, सेट्, अक, प। (धा.क.)

❖ कखे [कख्] हसने (भ्वा०)

कखे हसने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

कख् (ए) सेट्, अक, प। (धा.क.)

❖ कगे [कग्] नोच्यते (भ्वा०)

कगे नोच्यते।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अस्यायमर्थ इति नोच्यते। क्रियासामान्यमस्य अर्थ इति यावत्। इह शास्त्रे नोच्यत इत्येके। (धा.प्र.)

अस्यायमर्थ इति नोच्यतेऽनेकार्थत्वात्। नोच्यत इति योऽर्थस्तत्रार्थे कगिरित्येके। (क्षी.त.)

अत्र मैत्रेयः अस्यायमर्थ इति नोच्यते। क्रियासामान्यमर्थ इत्यर्थः। इह शास्त्र कगे नोच्यते इत्येके। स्वामी तु अस्यायमर्थ इति नोच्यते अनेकार्थत्वात् इति नोच्यत इति। योर्थस्तत्रार्थे कगे इत्येके कगेत्युक्तत्वात् क्रियासामान्यम् अस्यार्थ इत्याहान्ते कगतीत्यादि। कखादयः अष्टावेदितः। (मा.धा.)

अत्र मैत्रेयः - अस्यायमर्थ इति नोच्यते, क्रियासामान्यमर्थ इत्यर्थः। इह शास्त्रे कगे नोच्यते इत्येके। स्वामी तु अस्यायमर्थ इति नोच्यते अनेकार्थत्वात्। कग् (ए) सेट्, प। (धा.क.)

❖ कच [कच्] बन्धने (भ्वा०)

कच बन्धने।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

कच शब्द उदात्तेत्। खच इति लौकिकोऽस्ति। (क्षी.त.)

कच्, सेट्, सक, आ। (धा.क.)

❖ कचि [कञ्च्] बन्धने (भ्वा०)

कचि दीप्तिबन्धनयोः। (धा.प्र.) (क्षी.त.)

कचि काचि दीप्तिबन्धनयोः (मा.धा.)(धा.क.)

दीप्तौ चेति वक्तव्ये बन्धनग्रहणं विस्पष्टार्थम्। (धा.प्र.)

आद्यः कचिरिदित् परस्त्वनिदिदित्येके। (क्षी.त.)

सञ्ज्ञायां कल्कने कन् दीप्तौ चेति वक्तव्ये बन्धनग्रहणं प्रपञ्चार्थम्। (मा.धा.)

कञ्च् (इ) काञ्च् (इ) सेट्, आ। दीप्तौ चेति वक्तव्ये बन्धनग्रहणं प्रपञ्चार्थम्। दुर्गमते कचीति धातुर्दीप्तावेव दृश्यते। काचीति तु नास्त्येव। (धा.क.)

❖ कज [कज्] मदे (भ्वा०)

कज मदे। (क्षी.त.)

❖ कट [कट्] गतौ (भ्वा०)

इट किट **कट** इ गतौ। कटिमिदितमेके पठन्ति। अयतिं दीर्घमिच्छन्ति चाद्राः। व्यपदेशिवद्भावेन गुरुमत्त्वादाम्प्रत्ययमुदाहरन्ति च। (धा.प्र.)

इट किट **कट** इ [कटी] गतौ - इट्, सेट्, सक, प। किट्, सेट्, सक, प। कट्, सेट्, सक, प। इ, अनिट्, सक, प। किटेति मैत्रेय-मतेन त्रासे गतः। कटिश्च वर्षावरणयोः। (धा.क.)

❖ कटी [कट्] गतौ (भ्वा०)

इट किट **कटी** गतौ (क्षी.त.)(मा.धा.)

अन्ये इदितमेनम् ई च प्रशिलष्टमाहुः। (क्षी.त.)

अत्र मैत्रयः कटीति ह्रस्वान्तं पठन्तीति। अन्ये

कटीति धात्वन्तरं प्रश्लिष्टम् आहुरिति चोक्त्वा कण्टति कण्टकः। सम्मतातरङ्गिण्योस्तु कटि इति चत्वारो धातव इति व्याख्यायि। धनपालशाटायनौ त्रीनेव धातूनाहतुः। अयं पक्षः समर्थितः पुरुषकारेण यदाह। इ ई इति ह्रस्वः दीर्घो धातुः प्रस्तुत्य अन्ये पुनरुभावपि न पठन्ति व्यक्तं चैतत् धनपालशाकटायनवृत्त्योः। किटेति मैत्रेयमतेन त्रासे गतः कटिश्च वर्षावरणयोः। (मा.धा.)

इट किट कट [इ] **कटी** गतौ - इट्, सेट्, सक, प। किट्, सेट्, सक, प। कट्, सेट्, सक, प। इ, अनिट्, सक, प। किटेति मैत्रेयमतेन त्रासे गतः। कटिश्च वर्षावरणयोः। (धा.क.)

❖ कटे [कट्] वर्षावरणयोः (भ्वा०)

कटे वर्षावरणयोः। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

कटकं बलयोऽस्त्रियाम्। कटनगरे जातः कटनगरीयः। कटघोषीयः। (धा.प्र.)

वृष्टावावरणे चार्थे। (क्षी.त.)

अयमनिदिदेव। भेदनार्थोयं चुरादौ। (मा.धा.)

वर्षश्च आवरणञ्च तयोः। अयमनेदिदग्रे। कट् (ए) सक, सेट्, प। चट इत्येके इति काश्यपः। भेदनार्थोऽयं चुरादौ। (धा.क.)

❖ कठ [कठ्] मदनिवासयोः (भ्वा०)

मठ **कठ** मदनिवासयोः। (मा.धा.)(धा.क.)

अयं पाठो मैत्रेयस्य। अन्येषां मठ मद निवासयोः कठ कृच्छ्रजीवन इति मठति कठति इत्यादि कठः। (मा.धा.)

अयं पाठो मैत्रेयस्य। अन्येषां मठ मदनिवासयोः। दुर्गस्य तु मठ निवासे, कठ कृच्छ्रजीवने इति पाठः। मठ्, कठ्, सेट्, अक, प। (धा.क.)

❖ कठ [कठ्] कृच्छ्रजीवने (भ्वा०)

कठ कृच्छ्रजीवने। (धा.प्र.) (क्षी.त.)

काठकं छन्दः शाखाविशेषः। (धा.प्र.)

❖ कठि [कण्ठ्] शोके (भ्वा०)

मठि **कठि** शोके। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

शोकोऽत्राध्यानम्। (क्षी.त.)

इह शोक आध्यानम् । कठ कृच्छ्रजीवन इत्यग्रे परस्मैपदिष्वनिदितौ। कठि शोक इतीदित् चुरादौ। (मा.धा.)

मण्ठ् (इ), कण्ठ् (इ) सेट्, सक, आ। इह शोक आध्यानम्। मठ कठ मदनिवासयोः, कठ कृच्छ्रजीवन इत्यग्रे परस्मैपदिष्वनिदितौ कठि शोक इतीदित् चुरादौ। (धा.क.)

❖ कठि [कण्ठ्] शोके (चुरा०)

कठि शोके। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

शपि कठतीति तु कृच्छ्रजीवने। कठिः प्रायेणोत्पूर्व उत्कण्ठायाम्। (मा.धा.)

कण्ठ् (ई) अक, उ। कठतीति कच्छ्रजीवने। कठिः प्रायेण उत्पूर्वः - उत्कण्ठायाम्। (धा.क.)

❖ कड [कड्] मदे (भ्वा०)

कड मदे (धा.प्र.)(मा.धा.)(धा.क.)

कलं त्रायते रक्षतीति कलत्रम्। तुदादावप्ययं पठिष्यते। (धा.प्र.)

क्षीरस्वामी तु कडीति पठित्वा कडेति दुर्गा इत्याह। अयं तुदादौ च उभयत्र पाठफलं तत्रैव वक्ष्यते। कण्डत इति गतः। (मा.धा.)

कड्, सेट्, अक, प। अयं तुदादौ च। (धा.क.)

❖ कड [कड्] घसने (तुदा०)

कड घसने। घसनं भक्षणम्। कलत्रम् भार्या नितम्बश्च। कडित्रं द्यूतं लेखनचर्म च। कुटादौ फलाभावात् यूथभ्रष्टोऽयम्। (क्षी.त.)

❖ कड [कड्] मदे (तुदा०)

कड मदे। (धा.प्र.)(मा.धा.)(धा.क.)

भ्वादिष्वस्य पाठस्तु स्वरभेदार्थः। (धा.प्र.)

अयं भ्वादौ च पुनः पाठ फलम्। (मा.धा.)

कड्, सेट्, अक, प। अस्य डित्कार्याभावादिह पाठो डकारान्तमात्रानुसारेण। अयं भ्वादौ च। (धा.क.)

❖ कडि [कण्ड्] मदे (भ्वा०)

कडि मदे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

कडित्रं लेखनचर्म। (क्षी.त.)

भेदने चुरादिः अनिदिदिहैव अदादौ च परस्मैपदी। (मा.धा.)

मदो हर्षः। कण्ड् (इ) सेट्, अक, आ। भेदने चुरादिः। अनिदिदिहैव। (धा.क.)

❖ कडि [कण्ड्] भेदने (चुरा०)

खड खडि **कडि** भेदने। (धा.प्र.)

(मा.धा.)(धा.क.)

भेदे क्षीरस्वामी तु भूवादौ परस्मैभाषं कडतिम् अनिदितमपि कडीतीदितं पठित्वा कडेति दुर्ग इत्याह। अस्य निर्णयस्तत्र कृतः। (मा.धा.)

खड्, खण्ड, कण्ड, (इ, वा, णिच्) सक, उ। (धा.क.)

❖ कड्ड [कड्ड्] कार्कश्ये (भ्वा०)

कड्ड कार्कश्ये। (धा.प्र.)(क्षी.त.)(मा.धा.)

कद्ड इत्येके। (क्षी.त.)

❖ कण [कण्] शब्दार्थः (भ्वा०)

अण रण वण भण मण **कण** क्वण व्रण भ्रण शब्दार्थाः। (धा.प्र.)

अण रण वण मण **कण** क्वण व्रण भ्रण ध्वण शब्दार्थाः। एते शब्दनक्रियार्थाः। अणिः इति अत्यमरसिंहः। (क्षी.त.)

अण रण वण मण **कण** क्वण व्रण व्रण भ्रण ध्वण शब्दार्थाः। अयं निमीलनार्थश्चुरादौ। (मा.धा.)

अन रण वण भण मण **कण** क्वण व्रण भ्रण ध्वण शब्दार्थाः। इतः क्रम्यन्ता उदात्ता उदात्तेतः। अण रण वण भण मण **कण** क्वण ष्टण वन ध्वन शब्दे इति दुर्गः। सर्वे सेटः, अकर्म्मकाः, सकर्म्मकाश्च, परस्मैपदिनः। अयं निमीलनार्थः चुरादौ। अयं वसादिः क्वचित् पठ्यते। (धा.क.)

❖ कण [कण्] गतौ (भ्वा०)

कणपणौ च। (शा.आ.)

कण रण गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अण रणेत्यादौ कणरणौ शब्दार्थौं। (धा.प्र.)

अनयोर्गत्यर्थयोर्मित्त्वम्। (क्षी.त.)

कणतिरणती शब्दार्थौं गतौ। (मा.धा.)

कण्, रण्, सेट्, सक, प। (धा.क.)

❖ कण [कण्] निमीलने (चुरा०)

कण निमीलने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

स्वभावादयम् एकनेत्रनिमीलनवचनः कणति इति शब्दे। (मा.धा.)

कण्, सक, उ। (धा.क.)

❖ कत्थ [कत्थ्] श्लाघायाम् (भ्वा०)

कत्थ श्लाघायाम्। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

श्लाघा गुणारोपः। (क्षी.त.)

श्लाघा गुणकथनमिति रमानाथः। कत्थ्, सेट्, अक्, आ। (धा.क.)

❖ कत्र [कत्र] शैथिल्ये (चुरा०)

कत्र शैथिल्ये। (धा.प्र.)(मा.धा.)(धा.क.)

अत्र दुर्गः कर्त इत्यपि पठति। (मा.धा.)

कत्र, अक, प। कुत्सितास्त्रयः कत्रयः इति वा कत्रिशब्दव्युत्पत्तिः। अत्र दुर्गः - कर्त्त इत्यपि पठति इति माधवः। वोपदेवमते कर्त्र इति - उपर्य्यधोरेफयुक्तस्तकारः अधोरेफयुक्तस्तकारः ऊर्द्धरेफयुक्तस्तकारश्चेति त्रिविधो धातुरयम्। (धा.क.)

❖ कथ [कथ] हिंसार्थः (भ्वा०)

कथ मथ क्नथ क्लथ हिंसार्थाः। (शा.आ.)

❖ कथ [कथ] वाक्यप्रबन्धे (चुरा०)

कथ वाक्यप्रतिबन्धे। (क्षी.त.)

कथ वाक्यप्रबन्धे। (धा.प्र.)(मा.धा.)(धा.क.)

प्रतिबन्धो विच्छेदोदीरणात्, अत एव वाक्यप्रबन्ध इत्येके पेठुः। (क्षी.त.)

कथ, सक, उ। (धा.क.)

❖ कदि [कन्द्] आह्वाने रोदने च (भ्वा०)

कदि क्रदि क्लदि आह्वाने रोदने च। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

कदि-क्रदि-क्लदि एते त्रयोऽपि वैक्लव्ये इति घटाद्यात्मनेपदिनः। (क्षी.त.)

आह्वाने सकर्मकः। (मा.धा.)

आह्वाने सकर्म्मकः, रोदने तु अकर्म्मकः। कन्द्, क्रन्द्, क्लन्द्, (इ) सेट्, प। (धा.क.)

❖ कदि [कन्द्] वैक्लव्ये वैकल्ये (भ्वा०)

कदि क्रदि क्रद क्लद वैक्लव्ये। (धा.प्र.)

कदि क्रदि क्लदि वैक्लव्ये। (क्षी.त.)(मा.धा.)(धा.क.)

एतावर्थान्तरे परस्मैपदिनावुक्तौ। तयोश्चापि घटादित्वम्। (धा.प्र.)

विक्लवः कातरः। वैकल्य इति चन्द्रः। कद्, क्रद्, इति नन्दी। कदि क्रदि क्लदि आह्वाने रोदने च इति परस्मैपदिनः। (क्षी.त.)

अत्र क्षीरस्वाम्येवं पठित्वाह वक्लव्य इति चन्द्रः। कद क्रद क्लदेति नन्दी अनिदितमाह। मैत्रेयस्तु कदिक्रदी द्वाविदितौ पठित्वा क्रदक्लदेति द्वावनिदितावाह। तत्रेदितोरन्त्यः सरेफ आद्यो नीरेफः। अनिदितोस्त्वाद्यः सरेफः। अपरो लकारवान्। वर्द्धमानः अपि मैत्रेयवल्लकारवन्तमिदितं चापठत्। (मा.धा.)

कन्द्, क्रन्द्, क्लन्द् (इ) सेट्, अक, आ। अत्र क्षीरस्वाम्येवं पठित्वाह - वैक्लव्य इति चन्द्रः। कद क्रद क्लद इति नन्दी अनिदितम् आह। मैत्रेयस्तु कदिक्रदी द्वाविदितौ पठित्वा क्रदक्लदेति द्वावनिदितौ आह। तत्रेदितोरन्त्यः सरेफः आद्यो निरेफः, अनादितोस्त्वाद्यः सरेफः, अपरो लकारवान्। वर्द्धमानः अपि मैत्रेयवल्लकारवन्तम् इदितं चापठत्। (धा.क.)

❖ **कद्ड [कड्ड्] कार्कश्ये** **(भ्वा०)**

कद्ड कार्कश्ये। कड्ड, सेट्, अक, प।(धा.क.)

❖ **कनी [कन्] दीप्तिकान्तिगतिषु** **(भ्वा०)**

कनी दीप्तिकान्तिगतिषु। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

दीप्तिः प्रकाशः। कान्तिः शोभा। (क्षी.त.)

कन् (ई) सेट्, अक, प। (धा.क.)

❖ **कपि [कम्प्] चलने** **(भ्वा०)**

कपि चलने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

कम्प् (इ) सेट्, अक, आ। (धा.क.)

❖ **कबृ [कब्] वर्णे** **(भ्वा०)**

कबृ वर्णे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वर्णनं वर्णः, शुक्लादिश्च। कबरः कृष्णः। कबरी केशवेषः। (क्षी.त.)

कब् (ऋ) सेट्, अक, आ। (धा.क.)

❖ **कमु [कम्] कान्तौ** **(भ्वा०)**

कमु कान्तौ। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

कान्तिरभिलाषः। उत्पत्तिकारितोऽयम्। (क्षी.त.)

कम् (उ) अक, सेट्, आ। (धा.क.)

❖ **कम्पने चलिः** **(भ्वा०)**

कम्पने चलिः। (धा.प्र.)(क्षी.त.)(धा.क.)

चल कम्पने इति ज्वलादौ। स च कम्पनेऽर्थे मित्। कम्पनादन्यत्र चालयति सूत्रम् चालयति शूद्रं सार्थं वा। (धा.प्र.)

ज्वलादौ पठितस्यापि अस्येह मित्त्वार्थः पाठः। इकार उच्चारणार्थः। (क्षी.त.)

चल्, सेट्, अक, प। चल कम्पन इति ज्वलादौ, तस्य मित्त्वार्थमनुवादः। चलयति शाखाम्, कम्पयतीत्यर्थः। अन्यत्र शीलं चलयति - अन्यथा करोतीत्यर्थः। सूत्रं चालयति, क्षिपतीत्यर्थः इति सुधाकरः। चालयन् सकलां पृथ्वीम् इति उद्घाटनार्थे। (धा.क.)

❖ **कर्ज [कर्ज्] व्यथने** **(भ्वा०)**

कर्ज व्यथने। (धा.प्र.)(धा.क.)

कर्ज खर्ज व्यथने। (क्षी.त.)

कर्ज व्यथने। खर्ज पूजने च। (मा.धा.)

कर्ज्, सेट्, सक, प। (धा.क.)

❖ **कर्ण [कर्ण] भेदे** **(चुरा०)**

छिद्र कर्ण भेदने। (धा.प्र.)

छिद्र कर्ण भेदे। द्वौ धातू। करणभेद इति गुप्तः। (क्षी.त.)

❖ **कर्तृ [कर्त्] शैथिल्ये** **(चुरा०)**

कर्तृ शैथिल्ये। कर्तुरगाढत्वेऽपि श्लेष्को वर्तना इत्येके। चन्द्र ऋदितन्धातुं मन्यते अदन्तमध्येऽनार्षोऽयमित्येके। दुर्गः कर्तृ इत्याह। (क्षी.त.)

❖ **कर्द [कर्द्] कुत्सिते शब्दे** **(भ्वा०)**

कर्द कुत्सिते शब्दे। (धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

कुत्सितशब्द इह कौक्षः। यदाह केशवस्वामी कौक्षि कर्दति पर्दते गुदरव इति कर्दतीत्यादि। नर्दतिवत् कर्दमः। (मा.धा.)

कुत्सितशब्द इह कौक्षः। यदाह केशवस्वामी - कौक्षे कर्दति पर्दते गुदरव इत्यादि। कर्द, सेट्, अक, प। कर्दति। (धा.क.)

❖ **कर्ध [कर्ध्] कुत्सिते शब्दे दन्तशूके दन्तसुखे च** **(भ्वा०)**

खर्ध **कर्ध** कुत्सिते शब्दे। दन्तशूके दन्तसुखे च। (शा.आ.)

❖ **कर्ब [कर्ब्] गतौ** **(भ्वा०)**

पर्प रफ रफि अर्ब पर्ब वर्ब मर्ब षर्ब **कर्ब** खर्ब गर्ब शर्ब चर्ब गतौ। (धा.प्र.)

वर्फ रफ रफि अर्ब वर्ब **कर्ब** खर्ब गर्ब घर्ब शर्ब षर्ब सर्ब चर्ब भर्ब नर्ब गतौ। पञ्चदश एते गत्यर्थाः। बर्फादींस्त्रीन् हिंसार्थे कण्ठः पठति। गर्वेत्यनार्षः, ओष्ठ्योऽत्र बः, पवर्गप्रस्तावात्। अर्बेत्यादौ रेफस्थाने नकारं कौशिको मन्यते। एकः शर्बस्तालव्यादिः, अपरः षोपदेशः, अन्यो दन्त्यादिः। (क्षी.त.)

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब **कर्ब** खर्ब गर्ब शर्ब षर्ब चर्ब गतौ। आद्यः प्रथमान्तः परौ द्वावपि द्वियीयान्तौ एकादश परे तृतीयान्ताः द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः अर्वादयो नोपधा इति कौशिकः। (मा.धा.)

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब **कर्ब** खर्ब गर्ब शर्ब षर्ब चर्ब गतौ। आद्यः प्रथमान्तः। परौ द्वावपि द्वितीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ **कर्व [कर्व्] दर्पे** **(भ्वा०)**

कर्व खर्व गर्व दर्पे इति व्याप्तौ। (शा.आ.)

कर्व खर्व गर्व दर्पे। (धा.प्र.)(मा.धा.)(धा.क.)

पूर्वकाः कवर्गादयः स्पर्शान्ताः। अमी तु ईषत्स्पृष्टान्ता इति पुनश्च पठ्यन्ते। (धा.प्र.)

कर्व्, खर्व्, गर्व, सेट्, अक, प। (धा.क.)

❖ **कल [कल्] शब्दसङ्ख्यानयोः** **(भ्वा०)**

कल शब्दसङ्ख्यानयोः। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

कल इत्यादि कालः। अयं क्षेपे चुरादिः। गतिसङ्ख्यानयोः कथादिः। (मा.धा.)

कल्, सेट्, अक, सक, आ। अयं क्षेपे चुरादिः। गतिसङ्ख्यानयोः कथादिः। (धा.क.)

❖ **कल [कल्] क्षेपे** **(चुरा०)**

कल पिल क्षेपे। (धा.प्र.)

कल विल क्षेपे। (मा.धा.)(धा.क.)

कल किल पिल क्षेपे। कथादौ कल संख्याने। भ्वादौ कलते। तुदादौ किल श्वैत्यक्रीडनयोः। (क्षी.त.)

कल्, विल्, सक, उ। (धा.क.)

❖ कल [कल] गतौ सङ्ख्याने च (चुरा०)

कल संख्याने गतौ च। (धा.प्र.)

कल गतौ संख्याने। (क्षी.त.)(मा.धा.)(धा.क.)

भ्वादौ कल शब्दसंख्यानयोः। (क्षी.त.)

कल, सक, उ। (धा.क.)

❖ कल्ल [कल्ल्] अव्यक्ते शब्दे (भ्वा०)

कल्ल अशब्दे। (क्षी.त.)

कल्ल अव्यक्ते शब्दे। (धा.प्र.)
(मा.धा.)(धा.क.)

अशब्दे तूष्णीम्भावे। (क्षी.त.)

अशब्द इति स्वामी अशब्दस्तूष्णीम्भाव इति च। (मा.धा.)

कल्ल्, सेट्, अक, आ। अशब्द इति स्वामी। अशब्दस्तूष्णीम्भाव इति। (धा.क.)

❖ कश [कश्] शब्दे (भ्वा०)

कश शब्दे। कशेति कौशिकः। (क्षी.त.)

❖ कशि [कंश] भाषार्थः (चुरा०)

रुठ लजि अजि दसि भृशि **कशि** रुसि शीक नट पुटि जुचि रघि अहि रहि महि भाषार्थाः इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते रोठयति। भसि पिसि लडि वृहि तुडि नडि इत्यन्ये पठन्तीति। (मा.धा.)

❖ कष [कष्] हिंसार्थः (भ्वा०)

कष शिष जिष झष वष रुष ऋष हिंसार्थाः। (शा.आ.)

कष शिष जष झष शष वष मष रुष रिष हिंसार्थाः। (धा.प्र.)

कष हिंसायाम्। (धा.प्र.)

कष शिष जष झष शष वष मष मुष रुष रिष हिंसार्थाः। (क्षी.त.)

कष खष शिष जष झष शष वष मष रुष रिष हिंसार्थाः। तृतीयषष्ठौ तालव्योष्मादी सप्तमो दन्त्योष्ठ्यादिः। (मा.धा.)

कष खष शिष जष झष शष वष मष रुष रिष हिंसार्थाः। तृतीयषष्ठो तालव्योष्मादी। सप्तमो दन्त्योष्ठादिः। सर्वे सकर्मकाः परस्मैपदिनश्च। कष्, सेट् - खष्, सेट् - शिष्, अनिट्, (वोपदेवप्रभृतीनां मते सेट्) (धा.क.)

❖ कस [कस्] गतौ (भ्वा०)

कस गतौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

पृषोदरादित्वात् सिकताः। नित्यबहुवचनान्तः अयं स्त्रीलिङ्गः। (धा.प्र.)

शब्दकुत्सायाम् इति गतम्। (मा.धा.)

कस, सेट्, सक, प। शब्दकुत्सायां कसत इति गतम्। कुञ्चादय उदात्ता उदात्तेतः। रुहिः तु अनुदात्तः। (धा.क.)

❖ कस [कस्] गतिशासनयोः (भ्वा०)

कस गतिशासनयोः। (धा.प्र.)

❖ **कसि [कंस्] गतिशासनयोः** **(अदा०)**

कसि गतिनिशानयोः। (धा.प्र.)

कसि गतिशासनयोः। (शा.आ.) (क्षी.त.)(मा.धा.)

कस इत्येके। (क्षी.त.)

अयं पाठो मैत्रेयादीनाम्। अन्ये तु व्याख्यान्तरे अमुं तालव्यान्तमनिदितं मन्यन्ते। तथा च प्रतिष्कशश्च कशेः इत्यत्र वृत्तिः - कश गतिशासनयोः इति। सुधाकरश्च - पारायणिकैः अयमिदिद्दन्त्यान्त्य उदाहारि। अन्यैस्तु प्रतिष्कशश्च कशेः इति दर्शनात्तालव्यान्तः समान्मायि। घृतस्य धारा अभिचाकशीमि इत्यत्र भट्टभास्करश्च कशेर्गतिकर्मणो यङ्लुकि रूपम् इति। तथा नाभ्यस्तस्य इत्यत्र वृत्तौ पस्पशाते चाकशीति वावसीतीत्युदाहृत्य छान्दसं ह्रस्वत्वं द्रष्टव्यम्। काशृ दीप्तौ वासृ अदने इत्याद्युक्त्वा प्रकृत्यन्तराणामिति विवृण्वाना आहुः। कशगतिशासनयोः इति कैयटे च - स्पशिवशिकशयः प्रकृत्यन्तराणीति भाष्यमुपादाय स्पश बाधनस्पर्शनयोः कश गतिशासनयोरिति केचित्पठन्ति। अन्ये तु कस गतिशासनयोरिति। तन्मते कशिः सौत्रो धातुर्द्रष्टव्य इत्युक्तम्। अत्र धातौ क्षीरस्वामी कसेत्येक इति दन्त्यान्तमनिदितमपि पपाठ। प्रदेशान्तरे चाह कशि गतिशानयोरितीकारान्तः शकारान्तश्च पठ्यते इति। (मा.धा.)

कसि गतिशासनयोः [शातनयोः] - कन्स्, (इ) सेट्, सक, आ। कश गतिशासनयोरिति केचित् पठन्ति। (धा.क.)

❖ **काक्षि [काङ्क्ष्] काङ्क्षायाम्** **(भ्वा०)**

काक्षि वाक्षि माक्षि द्राक्षि ध्राक्षि ध्वाक्षि काङ्क्षायाम्। (क्षी.त.)

काक्षि वाक्षि माक्षि काङ्क्षायाम्। (शा.आ.) (धा.प्र.)(मा.धा.)(धा.क.)

काङ्क्ष्, वाङ्क्ष्, माङ्क्ष्, (इ) सेट्, सक, प। न काङ्क्षे विजयं कृष्ण गीता। आत्मनेपदम् आर्षम्। (धा.क.)

❖ **काचि [काञ्च्] दीप्तिबन्धनयोः** **(भ्वा०)**

कचि **काचि** दीप्तिबन्धनयोः। (मा.धा.)(धा.क.)

सञ्ज्ञायां कल्कने कन् दीप्तौ चेति वक्तव्ये बन्धनग्रहणं प्रपञ्चार्थम्। (मा.धा.)

कञ्च् (इ) काञ्च् (इ) सेट्, आ। दीप्तौ चेति वक्तव्ये बन्धनग्रहणं प्रपञ्चार्थम्। दुर्गमते कचीति धातुर्दीप्तावेव दृश्यते। काचीति तु नास्त्येव। (धा.क.)

❖ **काडृ [काड्] अनादरे** **(भ्वा०)**

काडृ अनादरे। (मा.धा.) (धा.क.)

काड् (ऋ) सेट्, सक, प। माधवेन एवायमाद्रियते। (धा.क.)

❖ **काशृ [काश्] दीप्तौ** **(भ्वा०)**

काशृ दीप्तौ। (शा.आ.) (धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

आकारोपध ऋदित्प्रकरणादिहायं निर्दिश्यते। (धा.प्र.)

आकारोपधप्रकरणादयमिह पठितोऽयं दिवादौ

च काशृगतिशासनयोः इति अदादौ अन्ये। दन्त्यान्त्यम् इदितं पठन्ति अनिदितम् अपरे। (मा.धा.)

काश्, (ऋ) सेट्, अक, आ। आकारोपधप्रकरणादयमिह पठितः। अयं दिवादौ च काशृ गतिशासनयोरित्यदादौ। दुर्गादय इमं दन्त्यान्तं केचिदनृदितम् पठन्ति। (धा.क.)

❖ काशृ [काश्] दीप्तौ (दिवा०)

काशृ दीप्तौ। (शा.आ.) (धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

काश्, (ऋ) सेट्, अक, आ। (धा.क.)

❖ कासृ [कास्] शब्दकुत्सायाम् (भ्वा०)

कासृ शब्दकुत्सायाम्। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

शब्दस्य कुत्सा रोगित्वात्। (क्षी.त.)

कस इति गतिशासनयोः। अन्ये तु तालव्यान्त पठन्ति। (मा.धा.)

कास् (ऋ) सेट्, अक, आ। कस इति गतिशातनयोः। अन्ये तु तालव्यान्तं पठन्तः। (धा.क.)

❖ कि [कि] ज्ञाने (जुहो०)

कि कित ज्ञाने। (धा.प्र.)

कि ज्ञाने। (क्षी.त.)(मा.धा.)(धा.क.)

कि, अनिट्, सक, प। कि कित ज्ञाने इति दुर्गः पठति। (धा.क.)

❖ किट [किट्] त्रासे (भ्वा०)

किट खिट त्रासे। (धा.प्र.)(मा.धा.)(धा.क.)

किटिर्गत्यर्थोग्रे भविष्यति इहैके न पठन्ति। मैत्रेयादीनामर्थभेदात् पुनः पाठ इत्यभिप्रायः। (मा.धा.)

किट्, खिट्, सेट्, सक, प। इह त्रासो भयोत्पादनम्। किटिर्गत्यर्थोऽग्रे भविष्यति। इहैके न पठन्ति। (धा.क.)

❖ किट [किट्] गतौ (भ्वा०)

इट **किट** कट इ गतौ (धा.प्र.)

इट **किट** कटी गतौ (क्षी.त.)(मा.धा.)

कटिमिदितमेके पठन्ति। अयतिं दीर्घमिच्छन्ति चाद्राः। व्यपदेशिवद्भावेन गुरुमत्त्वादाम्प्रत्ययम् उदाहरन्ति च। (धा.प्र.)

अत्र मैत्रयः कटीति ह्रस्वान्तं पठन्तीति। अन्ये कटीति धात्वन्तरं प्रश्लिष्टमाहुरिति चोक्त्वा कण्टति कण्टकः। सम्मतातरङ्गिण्योस्तु कटि इति चत्वारो धातव इति व्याख्यायि। धनपालशाटायनौ त्रीनेव धातून् आहतुः। अयं पक्षः समर्थितः पुरुषकारेण यदाह। केचित्तु इट किट कटी इत्यत्र इकारमपि धातुं पठन्तीति। वृत्तिकारोपि प्रायेणात्रैवानुकूलः (मा.धा.)

इट किट कट इ [कटी] गतौ - इट्, सेट्, सक, प। किट्, सेट्, सक, प। कट्, सेट्, सक, प। इ, अनिट्, सक, प। किटेति मैत्रेयमतेन त्रासे गतः। कटिश्च वर्षावरणयोः। (धा.क.)

❖ कित [कित्] ज्ञाने (जुहो०)

कि **कित** ज्ञाने। (धा.प्र.)

कित ज्ञाने। भ्वादौ कित निवासादौ। (क्षी.त.)

❖ **कित [कित्] निवासे रोगापनयने च** **(भ्वा०)**

कित निवासे रोगापनयने च। (धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

कित निवासे। अयं गणे परस्मैपदिषु पठ्यते। वृत्तिन्यासकारव्याख्यानपर्यालोचनयास्माभिः आत्मनेपदस्य उदाहरणं प्रदर्श्यते। (शा.आ.)

चकरात् संशये च। निवासे नास्ति। चुरादौ केत निश्रावणे संकेतयति। (क्षी.त.)

अयमुदात्तेत्, गुपिवदयमपि नित्यसन्नन्तः। कित्, सेट्, सक, प। (धा.क.)

❖ **किल [किल्] श्वैत्यक्रीडनयोः** **(तुदा०)**

किल शैत्यक्रीडनयोः। (शा.आ.)

किल श्वैत्यक्रीडनयोः। (धा.प्र.) (क्षी.त.)

किल श्वैत्ये। (मा.धा.)(धा.क.)

किलकिला रवः, अव्यक्तानुकरणं वा। किलासं सिध्मम्। (क्षी.त.)

श्वैत्यक्रीडनयोरिति मैत्रेयः। (मा.धा.)

किल्, सेट्, अक, प। (धा.क.)

❖ **किल [किल्] क्षेपे** **(चुरा०)**

कल **किल** पिल क्षेपे। कथादौ कल संख्याने तुदादौ किल श्वैत्यक्रीडनयोः। पेलृ गतौ इत्यस्मात् पेल्यते इति चन्द्रः। (क्षी.त.)

❖ **किष्क [किष्क्] हिंसायाम्** **(चुरा०)**

किष्क हिंसायाम्। हिष्क इति दुर्गः। (क्षी.त.)

❖ **कीट [कीट्] बन्धने** **(चुरा०)**

कीट बन्धने। (धा.प्र.)

❖ **कीट [कीट्] वर्णे** **(चुरा०)**

कीट वरणे। (क्षी.त.)

कीट वर्णे। (मा.धा.)

कीट वर्णे [बन्धे]। कीट्, अक, उ। (धा.क.)

❖ **कील [कील्] बन्धने** **(भ्वा०)**

कील बन्धे। (धा.प्र.)(क्षी.त.)

कील बन्धने। (धा.क.)

❖ **कु [कु] शब्दे** **(अदा०)**

कु शब्दे। (शा.आ.) (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

अनिडयमिति रौतिना सह नोपदिश्यते।(धा.प्र.)

शब्दत्वेऽर्थेऽप्येषां कौतिः शब्दमात्रे, कुवतिः आर्तस्वरे, कवतिरव्यक्ते शब्दे। (क्षी.त.)

अयमप्यनुदात्त उदात्तेत्। ब्राह्मणादिषु दर्शनात् ष्यञ्। अव्यक्ते शब्दे कवते इति गतं शपि अयम् अनिट् चेति रौतेरनन्तरं नोक्तः। (मा.धा.)

अयमनुदात्त उदात्तेत्। कु अनिट् अक प। (धा.क.)

❖ **कुक [कुक्] आदाने** **(भ्वा०)**

कुक वृक आदाने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

आदानं ग्रहणम्। कुक्, सक, सेट्, आ। वृक्, सेट्, अक, आ। (धा.क.)

❖ **कुङ् [कु] शब्दे** **(भ्वा०)**

घुङ् **कुङ्** उङ् ङुङ् शब्दे। (धा.प्र.)

घुङ् **कुङ्** उङ् शब्दे। ङुङ् इति च दुर्गः। खुङ् चेत्येके। (क्षी.त.)

कुङ् घुङ् उङ् शब्दे। अयमव्यक्तशब्द इति

न्यासे तथा देवश्च अव्यक्तशब्दे। अयमार्त्तशब्दे तुदादौ। शब्दमात्रेऽदादौ। (मा.धा.)

कुङ् घुङ् उङ् ङुङ् शब्दे। कु, घु, उ, ङु, (ङ्) अनिट्, अक, आ। (धा.क.)

❖ कुङ् [कु] शब्दे (तुदा०)

कुङ शब्दे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

कुटादीनां पूर्णोविधिः। (शा.आ.)

कूङिति दीर्घान्तोऽयमित्येके इच्छन्ति।(धा.प्र.)

कूङ् इत्येके। (क्षी.त.)

केचिद्दीर्घान्तम् इमं पठन्ति इति। आत्रेयमैत्रेयौ एवं स्वामिकाश्यपसुधाकरधनपालसम्मताकारा अपि शाकटायनस्तु कुङ् कूङ् शब्दे इत्युभयं पपाठ। तत्र ह्रस्वान्तो न्यासकारस्यापीष्टः। (मा.धा.)

केचिद्दीर्घान्तमिमं पठन्ति इति आत्रेयमैत्रेयौ। शाकटायनः तु कुङ् कूङ् शब्दे इति उभयम् इच्छति। कु (ङ्) अनिट्, अक, आ। (धा.क.)

❖ कुच [कुच्] शब्दे तारे (भ्वा०)

कुच शब्दे तारे च। (धा.प्र.)(क्षी.त.)(मा.धा.)

सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु इति ज्वलादौ पठिष्यते। पुनरिहार्थभेदेन पठ्यते। (धा.प्र.)

कुच सम्पर्चने इत्यर्थभेदार्थं ज्वलादौ पठिष्यते। (क्षी.त.)

कुच गतौ इति स्वामी। अयं सम्पर्चनार्थे ज्वलादौ। पुनः पाठे प्रयोजनं तत्रैव वक्ष्यते। सङ्कोचनार्थस्तुदादौ। (मा.धा.)

कुच शब्दे तारे [च]। तारे उच्चे इत्यर्थः, शब्द इत्यस्य विशेषणम्। प्राचीनास्तु शब्दे तारे च इति पठित्वा तारश्चिक्कणता इत्याहुः। शब्दे तारे सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु च इत्यपि केचित् पठन्ति। केचति काञ्चीं वणिक् - चिक्कणयतीत्यर्थः केचिद् उक्तसमुच्चयार्थं चकारमाहुः। कुच, सेट्, अक, प। कुच गतौ इति स्वामी। अयं सम्पर्चनार्थे ज्वलादौ, पुनः पाठे प्रयोजनं तत्रैव वक्ष्यते। सङ्कोचनार्थस्तु तुदादौ। (धा.क.)

❖ कुच [कुच्] सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु (भ्वा०)

कुच सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु।
(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

सम्पर्चनं मिश्रता, प्रतिष्टम्भो रोधनम्, विलेखनं कर्षणम्। (क्षी.त.)(मा.धा.)(धा.क.)

एतदादयः कसन्ता उदात्ता अनुदात्तेतः। कुच शब्दे तार इति पठितस्य अपि इह पाठः सम्पर्चनादादेव। कोच इति ज्वालादिसम्बन्धेन णो यथा स्यादिति। (मा.धा.)

एतदादयः कसन्ता उदात्ता अनुदात्तेतः। कुच, सेट्, प। (धा.क.)

❖ कुच [कुच्] सङ्कोचने (तुदा०)

कुच सङ्कोचे। (धा.प्र.)

कुच सङ्कोचने। (शा.आ.)
(क्षी.त.) (मा.धा.) (धा.क.)

सङ्कुचति, अर्थे सङ्ग्रहणात् तदुपसर्गत्वम्। भ्वादौ सम्पर्चनादौ। (क्षी.त.)

अत एव निर्देशात् ल्युटि गुण इति काश्यपः। (मा.धा.)(धा.क.)

कुच्, सेट्, सक, प। (धा.क.)

❖ **कुजु [कुज्] स्तेयकरणे (भ्वा०)**

ग्रुचु ग्लुचु **कुजु** खुजु स्तेयकरणे। (धा.प्र.) (मा.धा.) (धा.क.)

ग्रुचिमपि केचित्पठन्ति। (मा.धा.)।

स्तेयकरणं चौर्यम्। सर्वेऽप्युदनुबन्धाः, सेटः, सकर्मकाश्च। ग्रुचिमपि केचित् पठन्ति। (धा.क.)

❖ **कुञ् [कु] शब्दे (क्र्या०)**

कुञ् शब्दे। (शा.आ.)

❖ **कुञ्च [कुञ्च्] कौटिल्याल्पीभावयोः (भ्वा०)**

कुञ्च क्रुञ्च कौटिल्याल्पीभावयोः। दन्त्योपधौ गतिकौटिल्याल्पीभावयोः। गतौ कौटिल्ये द्रव्याल्पत्वे चेति क्षीरस्वामी। (मा.धा.)

❖ **कुञ्चु [कुञ्च्] कौटिल्याल्पीभावयोः (भ्वा०)**

कुञ्चु गतिकौटिल्याल्पीभावयोः। (शा.आ.)

❖ **कुन्च [कुञ्च्] कौटिल्याल्पीभावयोः (भ्वा०)**

कुन्च क्रुन्च कौटिल्याल्पीभावयोः। (धा.प्र.)

कुन्च गतिकौटिल्याल्पीभावयोः। गतेः कौटिल्ये द्रव्याल्पत्वे च। यदि च अयम् उदित् स्यात्, इडागमः अत्र न स्यात्। (क्षी.त.)

कुन्च् क्रुन्च् कौटिल्याल्पीभावयोः। दन्त्योपधौ गतिकौटिल्याल्पीभावयोः, गतौ कौटिल्ये द्रव्याल्पत्वे च इति क्षीरस्वामी। कुन्च्, क्रुन्च्, सेट्, अक, प। (धा.क.)

❖ **कुट [कुट्] कौटिल्ये (तुदा०)**

कुट कौटिल्ये। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)

कुट प्रतापने इत्याकुस्मीयः। कूट परितापे इति कथादिः। दीर्घोपधोऽयमपि ह्रस्वोपध इति आत्रेयः। उभावपि दीर्घोपधाविति मैत्रेयः। (मा.धा.)

कुट्, सेट्, अक, प। कुट प्रतापने चुरादिः। कूट परितापे कथादिः। (धा.क.)

❖ **कुट [कुट्] शब्दे (तुदा०)**

कुट शब्दे। (शा.आ.)

❖ **कुट [कुट्] घटने (दिवा०)**

कुट घटने। (शा.आ.)

❖ **कुट [कुट्] प्रतापने (चुरा०)**

कुट प्रतापने। कुट आप्रदान इति दुर्गः। (क्षी.त.)

❖ **कुट्ट [कुट्ट्] छेदनभर्त्सनयोः (चुरा०)**

कुट्ट छेदनभर्त्सनयोः। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

छेदपूरणयोरिति स्वामी। छेदन इत्येवं जिनेन्द्रदुर्गौ (मा.धा.) (धा.क.)

कुट्ट, सक, उ। (धा.क.)

❖ **कुट्ट [कुट्ट्] प्रतापने (चुरा०)**

कुट्ट प्रतापने। (मा.धा.)(धा.क.)

क्षीरस्वामी अयं कथादावपि। (मा.धा.)

कुट्ट, सक, आ। कथादावप्ययम्। (धा.क.)

❖ **कुठि [कुण्ठ्] वैकल्ये (भ्वा०)**

कुठि कुडि वैकल्ये। (धा.प्र.)

❖ **कुठि [कुण्ठ्] गतिप्रतिघाते (भ्वा०)**

कुठि च। (धा.प्र.)(क्षी.त.)(धा.क.)

कुठि गतिप्रतिघाते च। (मा.धा.)

कुण्ठ् (इ) सेट्, अक, प। (धा.क.)

❖ **कुड [कुड्] बाल्ये (तुदा०)**

कुड बाल्ये। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

कुड्, सेट्, अक, प। (धा.क.)

❖ **कुड [कुड्] मदे (तुदा०)**

कुड मदे। (शा.आ.)

❖ **कुडि [कुण्ड्] दाहे (भ्वा०)**

कुडि दाहे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ कुडि रक्षणे। (क्षी.त.)

रक्षणार्थश्चुरादौ। (मा.धा.)

कुण्ड् (इ) सेट्, सक, आ। वैकल्यार्थः अत्र एव पठिष्यते, रक्षाणार्थश्चुरादौ। (धा.क.)

❖ **कुडि [कुण्ड्] वैकल्ये (भ्वा०)**

कुठि **कुडि** वैकल्ये। (धा.प्र.)

कुडि वैकल्ये। (क्षी.त.) (मा.धा.)(धा.क.)

कुटि इति कौशिकदुर्गौ। (क्षी.त.)

कुण्डतीत्यादि कुण्डत इति दाहे गतमत्र स्वामी कुटीति कौशिकदुर्गाविति। शाकटायनः पुनः प्रकरणानुरोधेन डान्तमेवाध्यगीष्ट। (मा.धा.)

कुण्ड् (इ), सेट्, अक, प। अत्र स्वामी - कुटीति कौशिकदुर्गाविति। (धा.क.)

❖ **कुडि [कुण्ड्] रक्षणे (चुरा०)**

कुडि रक्षणे। (धा.प्र.)(मा.धा.)(धा.क.)

शाकटायनः टान्तमेक इति स्वामी इमावपि पाठभेदौ तत्रापि दर्शितौ। (मा.धा.)

कुण्ड्, (इ, वा णिच्) उ, सक। (धा.क.)

❖ **कुण [कुण्] शब्दोपकरणयोः (तुदा०)**

कुण शब्दोपकरणयोः। (धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

आमन्त्रणे अयं कथादिः दीर्घोपधः सङ्कोचने आकुस्मीयः। (मा.धा.)

कुण्, सेट्, सक, प। कूण इति चुरादौ। (धा.क.)

❖ **कुण [कुण] आमन्त्रणे (चुरा०)**

सङ्केत ग्राम **कुण** गुण चामन्त्रणे। (मा.धा.)
(धा.क.)

केत ग्राम **कुण** गुण चामन्त्रणे। चकारेण कूट इत्यपेक्षते। (धा.प्र.)

कुण **गुण** चामन्त्रणे। चकारात् केतः अपि। आमन्त्रणं गूढोक्तिः। कूण सङ्कोचने। (क्षी.त.)

चकारेण कूट इत्यपेक्षत इति मैत्रेयः । अपरे तु पठन्ति केत श्रावणे निमन्त्रणे च। कुण गुण चामन्त्रणे चकारात् केत चेति। कूण सङ्कोचन इति वा तत्र पठन्ति। (मा.धा.)

चकारेण कूट इत्यपीति मैत्रेयः। कूट, सङ्केत, ग्राम, गुण - सक, उ। केत श्रावणे निमन्त्रणे च इति केचित्। (धा.क.)

❖ **कुत्स [कुत्स्] अवक्षेपणे (चुरा०)**

कुत्स अवक्षेपणे। (धा.प्र.)(क्षी.त.)
(मा.धा.) (धा.क.)

कुत्स्, सक, आ। (धा.क.)

❖ **कुथ [कुथ्] पूतीभावे (दिवा०)**

कुथ पूतीभावे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

पूतीभावो दुर्गन्धिः, क्लेदः। (क्षी.त.)

पूतीभावो दुर्गन्धः। (मा.धा.)

कुथ, सेट्, अक, प। (धा.क.)

❖ **कुथ [कुथ्] संश्लेषणे (क्र्या०)**

कुथ संक्लेशने। (शा.आ.)

❖ **कुथि [कुन्थ्] हिंसासङ्क्लेशनयोः (भ्वा०)**

कुथि पुथि नुथि लुथि मथ मथि हिंसासंक्लेशनयोः। (शा.आ.)

कुथि पुथि लुथि मथि हिंसासंक्लेशनयोः।
(धा.प्र.)(मा.धा.)(धा.क.)

कुथि पुथि लुथि मन्थ हिंसासंक्लेशयोः। हिंसा प्राण्युपघातः, सङ्क्लेशो बाधा। क्र्यादौ कुन्थ संश्लेषणे। (क्षी.त.)

कुन्थ संक्लेश इति क्र्यादौ। (धा.प्र.)

कुन्थ संश्लेषण इति क्र्यादौ। कुथ पूतीभावे पुथ हिंसायाम् इति दिवादौ। (मा.धा.)

प्राणवियोगफलकव्यापारो हिंसा। दुःखं क्लेशः। सर्वे इदनुबन्धाः। कुन्थ्, पुन्थ्, लुन्थ्, मुन्थ (इ) सेट्, प। (धा.क.)

❖ **कुद्रि [कुन्द्र्] अनृतभाषणे (चुरा०)**

कुद्रि अनृतभाषणे। (धा.प्र.)(क्षी.त.)
(मा.धा.) (धा.क.)

गादिः पारायणे - गुन्द्रा भद्रमुस्ता। ऋदित् इत्येके। (क्षी.त.)

अत्र स्वामी ऋदिदित्येके। (मा.धा.) (धा.क.)

कुन्द्र, (इ, वा, णिच्) उ, अ णिच् - प, अक। (धा.क.)

❖ **कुन्थ [कुन्थ्] संश्लेषणे, संक्लेशे (क्र्या०)**

कुन्थ संश्लेषणे। (धा.प्र.)(मा.धा.)(धा.क.)

कुथि इति दुर्गः। (क्षी.त.)

सङ्क्लेशे इत्येके। तथा च देवः कुन्थ सङ्क्लेशे इति कुथ्नाति चुकन्थ। कुथेति दुर्गः। (मा.धा.)

सङ्क्लेशने इति दुर्गः। कुन्थ् सेट् सक प। (धा.क.)

❖ **कुप [कुप्] क्रोधे (दिवा०)**

कुप क्रोधे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

अयं भाषार्थश्चुरादौ। (मा.धा.) (धा.क.)

कुप्, सेट्, अक, प। (धा.क.)

❖ **कुप [कुप्] भाषार्थः (चुरा०)**

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद **कुप** तर्क वृतु वृधु भाषार्थाः। भासार्था इत्येके। भासार्था दीप्त्यर्थाः। ते अपि अत्र इत्येके। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि

बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद **कुप** तर्क वृतु वृधु भासार्थाः। एते सकर्मका भासार्था णिचम् उत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद **कुप** तर्क वृतु वृधु भाषार्थाः। मैत्रेयानुरोधेनायं पाठो दण्डकस्य भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थों येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुप् धूप विच्छ ची पुथ लोकृ लोचृ णद **कुप** तर्क वृतु वृधु भासार्थाः [भाषार्थाः]। मैत्रेयानुरोधेन अयं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थों येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ **कुपि [कुम्प्] छादने** **(चुरा०)**

कुपि छादने। कुबि इति कौशिकः। कुम्बा सुगहनावृतिः (अमर०)। (क्षी.त.)।

❖ **कुबि [कुम्ब्] अर्दने** **(भ्वा०)**

लुबि **कुबि** अर्दने। (धा.प्र.)

❖ **कुबि [कुम्ब्] आच्छादने** **(भ्वा०)**

कुबि आच्छादने। (धा.प्र.)

कुबि छादने। (मा.धा.)(धा.क.)

कुम्ब् (इ) सेट्, सक, प। (धा.क.)

❖ **कुबि [कुम्ब्] आच्छादने** **(चुरा०)**

कुबि आच्छादने। (धा.प्र.)

कुबि छादने। (मा.धा.)(धा.क.)

स्वामिकाश्यपमैत्रेयादयो बशन्तं पठन्ति। अपरे तु भकारान्तं पठन्ति। (मा.धा.)

कुम्ब् (इ, णिच् वा) सक, उ। अपरे तु भकारान्तं पठन्ति। (धा.क.)

❖ **कुमार [कुमार] क्रीडायाम्** **(चुरा०)**

कुमार क्रीडायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

कुमार, अक, उ। (धा.क.)

❖ **कुर [कुर्] शब्दे** **(तुदा०)**

कुर शब्दे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

कुर्, सेट्, अक, प। (धा.क.)

❖ **कुर्द [कुर्द्] क्रीडायामेव** **(भ्वा०)**

कुर्द खुर्द गुर्द गुद क्रीडायामेव। (मा.धा.) (धा.क.)

कुर्द खुर्द गुद क्रीडायामेव। क्रीडायामेव इति एवकाराद् अन्यत्र अर्थनिर्देशेषु अनियमः अनुमीयते। (धा.प्र.)

कुर्द गुर्द गुद क्रीडायामेव। क्रीडानियमोऽत्र धातूनामनेकार्थत्वे लिङ्गम्। (क्षी.त.)

अत्र एवकारो धातूनामनेकार्थत्वे ज्ञापक इत्युक्तम्। स्फुर्जेः दीर्घोपदेशादुपधायां चेति

नैषां दीर्घ इति चन्द्रः। मैत्रेयसम्मतामोघाविस्तारकारादयस्तु दीर्घत्वम् इच्छन्ति। दुर्गसिंहोऽपि कूर्दते खूर्दते इति दीर्घं विदधाति। कुर्द, सेट्, आ। गुद्द्, सेट्, आ। (धा.क.)

❖ **कुल [कुल्] संस्त्याने बन्धुषु च (भ्वा०)**

कुल संस्थाने बन्धषु च। (शा.आ.) (धा.क.)

कुल सन्ताने बन्धुषु च। (धा.प्र.)

कुल संस्त्याने बन्धुषु च। (क्षी.त.)(मा.धा.)

संस्त्यानं सङ्घातः। कोलं बदरम्। (क्षी.त.)

संस्त्यानं सङ्घात इति स्वामी क्वचित्तन्तुसन्ताने इति पठ्यते। (मा.धा.)

संस्थानं सङ्घात इति स्वामी। क्वचित्तु सन्ताने इति पठ्यते। सन्तानो विजातीयैरनवच्छिन्नः प्रवाहः। बन्धुशब्देन तद्व्यापारः सम्बन्धः अभिधीयते। कुल्, सेट्, अक, प। (धा.क.)

❖ **कुशि [कुंश्] भाषार्थः (चुरा०)**

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि **कुशि** दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुपतर्क वृतु वृधु भाषार्थाः। भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि **कुशि** त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः। एते सकर्मका भासार्था णिचम् उत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि **कुशि** घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः। मैत्रेयानुरोधेनायं पाठो दण्डकस्य भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुस दशि **कुशि** घट घटि वृहि बर्ह बल्ह गुप् धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क बृतु वृधृ भासार्थाः [भाषार्थाः]। (धा.क.)

❖ **कुशूल [कुशूल] क्रीडायाम् (चुरा०)**

कुशूल इत्येके। (धा.प्र.)

❖ **कुष [कुष्] निष्कर्षे (क्र्या०)**

कुष निष्कर्षे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

निष्कर्षो बहिष्करणम्। (क्षी.त.)

निष्कर्षो बहिर्निःसारणम्। (मा.धा.)

निष्कर्षः अन्तःप्रकाशनम् इति गोविन्दभट्टः। बहिष्करणमिति कश्चित्। कुष्, सेट्, अक, प। मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र णिच्पक्षे परस्मैपदम्। (धा.क.)

❖ **कुस [कुस्] संश्लेषणे (दिवा०)**

कुस श्लेषणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

कुश इति दुर्गः। कोशो भाण्डागारादि। (क्षी.त.)

दुर्गस्तालव्यान्तं पपाठ। कुशशब्दस्य दर्शनात् स तु भौवादिकादपि सिद्धः। (मा.धा.)

कुस्, वेट्, सक, प। दुर्गस्तालव्यान्तं पपाठ, कुशशब्दस्य दर्शनात् स तु भौवादिकादपि सिद्धः। मनोरमाव्याख्यामते दुर्गस्य अपि दन्त्यान्तः पाठः सम्मतः। (धा.क.)

❖ **कुसि [कुंस्] भाषार्थः (चुरा०)**

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि **कुसि** दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः। मैत्रेयानुरोधेनायं पाठो दण्डकस्य भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि **कुसि** दशि कुशि घट घटि वृहि बर्ह बल्ह गुप् धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः]। (धा.क.)

❖ **कुस्म [कुस्म्] कुस्मयने नाम्नो वा (चुरा०)**

कुस्म कुस्मयने। कुत्सितस्मयने अस्य वृत्तिः इष्यते। (धा.प्र.)

कुस्म नाम्नो वा। (धा.प्र.)(क्षी.त.)
(मा.धा.) (धा.क.)

कुस्ममिति दृष्टम्। कुस्मेति धातुर्मतिदृष्टं बुध्योत्पादितमर्थम् आह इति च। (क्षी.त.)

कुस्ममिति दृष्टम्। कुत्सितस्मयनेऽस्य वृत्तिरिति मैत्रेयदुर्गादयः कुस्मयते। (मा.धा.)

कुस्म्, आ। (धा.क.)

❖ **कुह [कुह] विस्मापने (चुरा०)**

कुह विस्मापने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

कुहूशब्दमाह मैत्रेयः। (मा.धा.) (धा.क.)

कुह्, सक, आ। (धा.क.)

❖ **कूज [कूज्] अव्यक्ते शब्दे (भ्वा०)**

कूज अव्यक्ते शब्दे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

कूज्, सेट्, अक, प। (धा.क.)

❖ **कूट [कूट्] आप्रदाने अवसादने (चुरा०)**

कूट अप्रमादे। कुट प्रतापन इत्येके। (धा.प्र.)

कूट अप्रदाने। अवसादन इत्येके। अत्र पुरुषकारे कुट प्रतापन इत्यपि एके। मैत्रेयरक्षितयोः स एव तु पाठः प्रायेण दृश्यते। (मा.धा.)

कूट आप्रदाने। अवसादन इत्येके, आप्रवणे इति च केचित्। कूट, सक, आ। क्वचित् कुट प्रतापन इति पठ्यते। (धा.क.)

❖ **कूट [कूट] परितापे (चुरा०)**

कूट परिदाहे। (धा.प्र.)

कूट दाहे। (क्षी.त.)

कूट परितापे। (मा.धा.)(धा.क.)

परिदाह इत्यन्ये कूटयति। कुटयतीत्यप्रसादे आकुस्मीयः अर्थभेदाः पाठभेदाश्च तत्रैव दर्शिताः। (मा.धा.)

परिदाह इत्यन्ये। कूट, सक, उ। (धा.क.)

❖ कूण [कूण्] सङ्कोचे (चुरा०)

कूण सङ्कोचने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

कूणयते कूणिः। कुणिति ह्रस्वोपधं पठन्ति। वयं तु कूणेत्यादिदर्शनात् मैत्रेयाद्युक्तं दीर्घोपधत्त्वम् बहुमन्यामहे ह्रस्वोपधस्तु कथादौ भविष्यति। (मा.धा.)

कूण्, सक, आ। अन्ये तु कुणिति ह्रस्वोपधं पठन्ति। वयन्तु दीर्घोपधमिति बहुमन्यामहे। ह्रस्वोपधस्तु कथादौ भविष्यति। (धा.क.)

❖ कूरी [कूर्] त्वरणहिंसयोः (दिवा०)

कूरी त्वरणहिंसयोः। (शा.आ.)

❖ कूल [कूल्] आवरणे (भ्वा०)

कूल आवरणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

कूल्, सेट, सक, प। (धा.क.)

❖ कृ [कृ] करणे (भ्वा०)

कृ करणे। (शा.आ.)

❖ कृञ् [कृ] करणे (भ्वा०)

कृञ् करणे। स्वादौ कृञ् हिंसायाम्। तनादौ डुकृञ् करणे। (क्षी.त.)

❖ कृञ् [कृ] हिंसायाम् (क्र्या०)

कृञ् हिसायाम्। (शा.आ.)

❖ कृञ् [कृ] हिंसायाम् (स्वा०)

कृञ् हिंसायाम्। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

क्रादिसूत्रे तु कृग्रहणेनास्यापि ग्रहोऽङ्गीकृत आत्रेयादिभिः। (मा.धा.)

कृ (ञ्) अनिट्, सक, उ। तनादौ चुरादौ अप्ययम्। (धा.क.)

❖ कृड [कृड्] घनत्वे (तुदा०)

कृड घनत्वे। (क्षी.त.)(मा.धा.)(धा.क.)

घनत्वं सान्द्रता। (क्षी.त.)

घनत्वं सान्द्रता घसन इत्येके। (मा.धा.) (धा.क.)

कृड्, सेट्, अक, प। (धा.क.)

❖ कृत [कृत्] संशब्दने (चुरा०)

कृत संशब्दने। संशब्दनमुद्घोषः। (क्षी.त.)

❖ कृती [कृत्] छेदने (तुदा०)

कृती छेदने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

रुधादौ कृती वेष्टने। (क्षी.त.)

कृत् (ई) सेट्, सक, प। (धा.क.)

❖ कृती [कृत्] वेष्टने (रुधा०)

कृती वेष्टने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

तुदादौ कृती छेदने। (क्षी.त.)

कृत् (ई) सेट्, सक, प। (धा.क.)

❖ कृप [कृप्] कृपायाम् (भ्वा०)

कृप कृपायाम्। (शा.आ.)

❖ कृप [कृप्] तादर्थ्ये (चुरा०)

कृपेस्तादर्थ्ये। तादर्थ्यम् उद्देशविषयम्। भ्वादौ कृपू सामर्थ्ये । तादर्थ्ये अवकल्कन इत्येके। अत एव भू कृप अवकल्कने इति दुर्गः।

चन्द्रो द्वौ अपि अवकल्कने चिन्तन इति व्याख्यत् सम्भावयति। (क्षी.त.)

❖ कृप [कृप] दौर्बल्ये (चुरा०)

सार **कृप** श्रथ दौर्बल्ये। (धा.प्र.) (मा.धा.) (धा.क.)

शार **कृप** श्रथ दौर्बल्ये। (क्षी.त.)

सार, कृप, श्रथ। अक, उ। (धा.क.)

❖ कृपू [कृप्] सामर्थ्ये (भ्वा०)

कृपू सामर्थ्ये। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

चुरादौ कृपेस्तादर्थ्ये आगर्वीयः। (क्षी.त.)

कृप् (ऊ) वेट्, अक, आ। (धा.क.)

❖ क्लृपेश्च (चुरा०)

क्लृप च। (धा.प्र.)(मा.धा.)(धा.क.)

क्षीरस्वामी तु कृपेस्तार्थ्ये। ये इति पठित्त्वा तादर्थ्ये प्रस्तुतस्य भुवोऽर्थे मिश्रीकरणे। अथ वा तच्छब्देन कृपिः परामृश्यते। तस्य योऽर्थः सामर्थ्यलक्षणः। (मा.धा.)

क्लृप् (ऌ) सक, उ। क्षीरस्वामी तु कृपेस्तादर्थ्ये इति पठित्वा तादर्थ्ये प्रस्तुतस्य भुवोऽर्थे मिश्रीकरणे। अथवा तच्छब्देन कृपिः परामृश्यते, तस्य योऽर्थः सामर्थ्यलक्षणः। (धा.क.)

❖ कृवि [कृण्व्] हिंसाकरणयोश्च (भ्वा०)

कृवि हिंसाकरणयोः। (धा.प्र.)(क्षी.त.)

कृवि हिंसाकरणयोश्च। (शा.आ.) (मा.धा.) (धा.क.)

चकाराद्गतौ। अयं स्वादौ च। (मा.धा.)

चकाराद्गतौ। दुर्गस्तु कृवि चिरि जिरि दास द्रु[ह] जिघांसायामिति स्वादौ पठति। कृन्व्, (इ) सेट्, सक, प। अयं स्वादौ च। (धा.क.)

❖ कृश [कृश्] तनूकरणे (दिवा०)

कृश तनूकरणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

तनूकरणमिहं क्षीणीकरणम्। कृश्, अनिट्, सक, प। (धा.क.)

❖ कृष [कृष्] विलेखने (भ्वा०)

कृष विलेखने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

विलेखनं हलोत्किरणम्। (क्षी.त.)

विलेखनमिहाकर्षणम्। तथा च पुरुषकारे कर्षतिश्चाकर्षणे प्रसिद्ध इति द्विकर्मकोऽयम्। अयं तुदादावपि। (मा.धा.) (धा.क.)

अनिट्, सक, प। (धा.क.)

❖ कृष [कृष्] विलेखने (तुदा०)

कृष विलेखने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

कृश तनूकरणे तु दिवादिः तालव्यान्तः। (क्षी.त.)

कृष, अनिट्, सक, उ। भ्वादौ विशेषो द्रष्टव्यः। (धा.क.)

❖ कॄ [कॄ] विक्षेपे (तुदा०)

कॄ विक्षेपे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

कॄ, सेट्, सक, प। (धा.क.)

❖ कॄ [कॄ] हिंसायाम् (क्र्या०)

कॄ हिंसायाम्। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

कॄञित्यनेनैव सिद्धे कॄ इत्येतस्य ल्वादिवद् द्विष्पाठफलं कर्त्त्रभिप्राये क्रियाफलेऽपि परस्मैपदार्थम्। (धा.प्र.)

तुदादौ कॄ विक्षेपे। (क्षी.त.)

कॄ, सेट्, सक प। कॄञ्वत्। तेनैव सिद्धे पुनः पाठः कर्त्रभिप्राये क्रियाफलेऽपि वृणातिवत् परस्मैपदार्थः। (धा.क.)

❖ कॄञ् [कॄ] हिंसायाम् (क्र्या०)

कॄञ् हिंसायाम् (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

कॄञ् इत्येके। (क्षी.त.)

कॄ (ञ्) सेट्, सक, उ। (धा.क.)

❖ कॄत [कॄत्] संशब्दने (चुरा०)

कॄत संशब्दने। (धा.प्र.)(मा.धा.)(धा.क.)

कीर्त्तनेति। युजपि कालापैरिष्यते। (धा.प्र.)

कॄत्, अक, उ। (धा.क.)

❖ केत [केत] श्रावणे निमन्त्रणे च (चुरा०)

केत ग्राम कुण गुण चामन्त्रणे। चकारेण कूट इत्यपेक्षते। (धा.प्र.)

केत विश्रावणे। निमन्त्रण इत्येके। भ्वादौ कित निवासे। (क्षी.त.)

❖ केपृ [केप्] गतौ (भ्वा०)

केपृ गेपृ ग्लेपृ च। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

ग्लेपृ धातुः पुनः पठ्यते। दैन्यादर्थान्तरार्थम्। (धा.प्र.)

चकारात् कम्पने, गतौ सूत्रविभागात्। (क्षी.त.)

चकारात् कम्पने गतौ च सूत्रविभागादिति स्वामी। मैत्रेयस्तु चकारम् अन्तरेण पठित्वा कम्पन इत्यपेक्षत इत्याह। (मा.धा.) (धा.क.)

केप्, गेप्, ग्लेप् (ऋ), सेट्, सक, आ। (धा.क.)

❖ केलृ [केल्] चलने (भ्वा०)

वेलृ चेलृ **केलृ** खेलृ क्ष्वेलृ वेल्ल चेल्ल चलने। (धा.प्र.)

वेल्लृ चेलृ **केलृ** खेलृ क्ष्वेलृ चलने। (क्षी.त.)

वेलृ चेलृ **केलृ** खेलृ क्ष्वेलृ वेल्ल चलने। (मा.धा.)

वेलृ चेलृ **केलृ** खेलृ क्ष्वेलृ वेल्ल चलने। दुर्गादयस्त्वन्यथा पठन्ति। सर्वे सेटः, अकर्मकाः, परस्मैपदिनश्च। वेलादीनां पञ्चानाम् ऋदित्वात् ह्रस्वाभावादविवेलदित्यादि भवति। (धा.क.)

❖ केवृ [केव्] सेवने (भ्वा०)

एवृ शेवृ षेवृ सेवृ **केवृ** खेवृ ग्लेवृ पेवृ प्लेवृ मेवृ म्लेवृ सेवने। (क्षी.त.)

❖ कै [कै] शब्दे (भ्वा०)

कै गै रै शब्दे। (शा.आ.)

कै गै शब्दे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वैचित्र्यार्थो वास्य पृथङ् निर्देशः। (धा.प्र.)

एतौ शब्दविशेषरूढौ। (क्षी.त.)

इह शब्दः शब्दविशेषः उक्तं ह्येवं स्वामिना। (मा.धा.)

कै गै रै शब्दे इति दुर्गः पठति। इह शब्दः शब्दविशेषः। कै, गै, रै, अनिट्, अक, प। (धा.क.)

❖ क्नथ [क्नथ्] हिंसार्थः (भ्वा०)

कथ मथ **क्नथ** क्लथ हिंसार्थाः। (शा.आ.)

❖ क्नसु [क्नस्] ध्वरणदीप्त्योः (दिवा०)

क्नसु क्षरणदीप्तयोः। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

ह्वरणं कौटिल्यम्। (क्षी.त.)(मा.धा.)

क्नस्, (उ) सेट्, अक, प। (धा.क.)

❖ क्नूञ् [क्नू] शब्दे (क्र्या०)

क्नूञ् शब्दे (क्षी.त.)(मा.धा.)(धा.क.)

सर्वस्वे तु क्नुञ् शब्द इति। (धा.प्र.)

क्नू (ञ्) सेट्, अक, उ। (धा.क.)

❖ क्नूयी [क्नूय्] शब्दे उन्दे च (भ्वा०)

क्नूयी शब्दे। (शा.आ.)

क्नूयी शब्दे उन्दे। (धा.प्र.)(धा.क.)

क्नूयी शब्दे उन्दने च। (क्षी.त.)(मा.धा.)

उन्दनं क्लेदनम्। (क्षी.त.)

दुर्ग उन्दे चेति न पठति। क्नूय् (ई) सेट्, अक, आ। (धा.क.)

❖ क्मर [क्मर्] हूर्च्छने (भ्वा०)

क्मर हूर्च्छने। (धा.प्र.)(मा.धा.)(धा.क.)

क्मर्, सेट्, अक, प। (धा.क.)

❖ क्रथ [क्रथ्] हिंसार्थः (भ्वा०)

श्रथ **क्रथ** क्लथ हिंसार्थाः। (क्षी.त.) (मा.धा.) (धा.क.)

श्रथ श्लथ क्लथ **क्रथ** हिंसार्थाः। अन्ये तु क्रथ हिंसायामिति चुरादौ पठित्वा तस्य एतद्रूपमिति वर्णयन्ति। (धा.प्र.)

क्रथ हिंसायामिति युजादौ स्वरितेदिति देवः। अयमात्मनेपदीति शाकटायनः। जासिनि इत्यत्र क्राथीति निपातनाद्वृद्धिरिति वदतां वृत्तिकारादीनां नायं धातुरेवास्ति। (मा.धा.)

श्रथ्, क्रथ्, क्लथ्, सेट्, सक, प। (धा.क.)

❖ क्रथ [क्रथ्] हिंसायाम् (चुरा०)

क्रथ हिंसायाम्। (धा.प्र.)(क्षी.त.)

भ्वादौ मित्। (क्षी.त.)

❖ क्रद [क्रद्] वैक्लव्ये (भ्वा०)

कदि क्रदि **क्रद** क्लद वैक्लव्ये। एतावर्थान्तरे परस्मैपदिनावुक्तौ। तयोः च अपि घटादित्वम्। (धा.प्र.)

❖ क्रदि [क्रन्द्] आह्वाने रोदने च (भ्वा०)

कदि **क्रदि** क्लदि आह्वाने रोदने च (धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

कदि क्रदि क्लदि एते त्रयोऽपि वैक्लव्ये इति घटाद्यात्मनेपदिनः। (क्षी.त.)

आह्वाने सकर्मकः। एते घटादयोऽपि आद्यौ एव इति अपरे। (मा.धा.)

आह्वाने सकर्म्मकः, रोदने तु अकर्म्मकः। कन्द्, क्रन्द्, क्लन्द्, (इ) सेट्, प। (धा.क.)

❖ क्रदि [क्रन्द्] वैक्लव्ये वैकल्ये (भ्वा०)

कदि **क्रदि** क्लदि वैक्लव्ये। (क्षी.त.) (मा.धा.) (धा.क.)

कदि **क्रदि** क्रद क्लद वैक्लव्ये। एतावर्थान्तरे परस्मैपदिनावुक्तौ। (धा.प्र.)

विक्लवः कातरः। वैकल्य इति चन्द्रः। कद, क्रद, इति नन्दी । कदि क्रदि क्लदि आह्वाने रोदने च इति परस्मैपदिनः। (क्षी.त.)

अत्र क्षीरस्वाम्येवं पठित्वाह वैक्लव्य इति चन्द्रः। कद क्रद क्लदेति नन्दी अनिदितमाह। मैत्रेयस्तु कदिक्रदी द्वाविदितौ पठित्वा क्रदक्लदेति द्वावनिदितावाह। तत्रेदितोरन्त्यः सरेफ आद्यो नीरेफः। अनिदितोस्त्वाद्यः सरेफः। अपरो लकारवान् वर्द्धमानोपि मैत्रेयवल्लकारवन्तम् इदितं चापठत्। प्रथिक्रन्दिक्लन्दिस्यन्दीनां घटादौ पाठः। चिण्णमुलोर्वृद्ध्यर्थ इति अत्र कदिक्रदिक्लदीनामाह्वानरोदनयोः परस्मैपदिषु गतानां पुनरिहापि पाठो न केवलमित्त्वार्थः। किं त्वात्मनेपदिषु पाठसामर्थ्यात्तदर्थमपि। (मा.धा.)

कन्द्, क्रन्द्, क्लन्द् (इ) सेट्, अक, आ। अत्र क्षीरस्वाम्येवं पठित्वाह। वैक्लव्य इति चन्द्रः। कद क्रद क्लद इति नन्दी अनिदितमाह। मैत्रेयस्तु कदिक्रदी द्वाविदितौ पठित्वा क्रदक्लदेति द्वावनिदितावाह। तत्रेदितोरन्त्यः सरेफः। आद्यो निरेफः, अनीदितोस्त्वाद्यः सरेफः, अपरो लकारवान्। वर्द्धमानोऽपि मैत्रेयवल्लकारवन्तम् इदितं चापठत्। (धा.क.)

❖ क्रप [क्रप्] कृपायां गतौ च (भ्वा०)

क्रप कृपायां गतौ। (धा.प्र.)(मा.धा.)(धा.क.)

क्रप कृपायाम्। (क्षी.त.)

क्रप कृपेत्येके पठन्ति। (धा.प्र.)

क्रप्, सेट्, सक, आ। (धा.क.)

❖ क्रमु [क्रम्] पादविक्षेपे (भ्वा०)

क्रमु पादविक्षेपे (धा.प्र.)(क्षी.त.)(शा.आ.)(मा.धा.)(धा.क.)

पादन्यासेऽर्थे। (क्षी.त.)

क्रम् (उ) सेट्, सक, प। केचिदत्र वा इति अनुवर्त्तयन्ति, सा च व्यवस्थितविभाषेत्युक्त्वा सङ्क्रामयतीति उदाहरन्ति। अविगीतस्तु सङ्क्रमयतीति। अत्रैव रसातले सङ्क्रमित इत्यादि प्रयोगोऽनुकूलः। **जरामन्यस्मिन् सङ्क्रामय** इति महाभारतम्। प्र - आरम्भः - प्रक्रमते। पर- पराक्रमः। अप - अपक्रमः, अपसरणम्। सम्- सङ्क्रमणम्, प्रवेशः, प्राप्तिः। अनु - अनुक्रमणम्, अनुसरणम्। अति- अतिक्रमः, लङ्घनम्। आ - आक्रमणम्। उत् - उत्क्रमः, उद्गमनम्। व्यति- व्यतिक्रमः। व्युत् - व्युत्क्रमः। उप - उपक्रमः, आरम्भः। निः- निष्क्रमः, निर्गमनम्। परि - परिक्रमः। वि - विक्रमः। (धा.क.)

❖ क्रीडृ [क्रीड्] विहारे (भ्वा०)

क्रीडृ विहारे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अनु-परि-आङ्पूर्वात् कूजनादन्यत्र सम्पूर्वात् क्रीडोऽनुसंपरिभ्यश्च इत्यात्मनेपदम्। (शा.आ.)

क्रीड् (ऋ) सेट्, अक, प। (धा.क.)

❖ क्रुचि [क्रुञ्च्] सम्पर्चनकौटिल्यप्रतिष्टम्भनविलेखनेषु (भ्वा०)

क्रुचि सम्पर्चनकौटिल्यप्रतिष्टम्भनविलेखनेषु। (शा.आ.)

❖ **क्रुञ्च [क्रुञ्च्] कौटिल्याल्पीभावयोः (भ्वा०)**

कुञ्च **क्रुञ्च** कौटिल्याल्पीभावयोः। दन्त्योपधौ गतिकौटिल्याल्पीभावयोः। गतौ कौटिल्ये द्रव्याल्पत्वे चेति क्षीरस्वामी। (मा.धा.)

❖ **क्रुड [क्रुड्] निमज्जने (तुदा०)**

क्रुड निमज्जने। (धा.प्र.)

❖ **क्रुध [क्रुध्] क्रोधे (दिवा०)**

क्रुध कोपे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

क्रुध्, अनिट्, अक, प। (धा.क.)

❖ **क्रुन्च [कुञ्च्] कौटिल्याल्पीभावयोः (भ्वा०)**

कुन्च **क्रुन्च** कौटिल्याल्पीभावयोः। (धा.प्र.) (धा.क.)

कुन्च गतिकौटिल्याल्पीभावयोः। गतेः कौटिल्ये द्रव्याल्पत्वे च। (क्षी.त.)

दन्त्योपधौ गतिकौटिल्याल्पीभावयोः, गतौ कौटिल्ये द्रव्याल्पत्वे चेति क्षीरस्वामी। कुन्च्, क्रुन्च्, सेट्, अक, प। (धा.क.)

❖ **क्रुन्च [कुञ्च्] गतौ (भ्वा०)**

क्रुन्च गतौ। (क्षी.त.)

❖ **क्रुश [क्रुश्] आह्वाने रोदने च (भ्वा०)**

क्रुश आह्वाने रोदने च। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

क्रुश्, अनिट्, प। (धा.क.)

❖ **क्लथ [क्लथ्] हिंसार्थः (भ्वा०)**

कथ मथ क्रथ **क्लथ** हिंसार्थाः। (शा.आ.)

श्रथ क्रथ **क्लथ** हिंसार्थाः। (क्षी.त.) (मा.धा.)(धा.क.)

श्रथ श्लथ **क्लथ** क्रथ हिंसार्थाः। (धा.प्र.)

श्रथ्, क्रथ्, क्लथ्, सेट्, सक, प। (धा.क.)

❖ **क्लद [क्लद्] वैक्लव्ये (भ्वा०)**

कदि क्रदि क्रद **क्लद** वैक्लव्ये। एतावर्थान्तरे परस्मैपदिनावुक्तौ। (धा.प्र.)

❖ **क्लदि [क्लन्द्] आह्वाने रोदने च (भ्वा०)**

कदि क्रदि **क्लदि** आह्वाने रोदने च। (धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

कदि क्रदि क्लदि एते त्रयोऽपि वैक्लव्ये। इति घटाद्यात्मनेपदिनः। (क्षी.त.)

आह्वाने सकर्मकः। एते घटादयोऽपि आद्यौ एव इत्यपरे। (मा.धा.)

आह्वाने सकर्म्मकः, रोदने तु अकर्म्मकः। कन्द्, क्रन्द्, क्लन्द्, (इ) सेट्, प। (धा.क.)

❖ **क्लदि [क्लन्द्] वैक्लव्ये वैकल्ये (भ्वा०)**

कदि क्रदि **क्लदि** वैक्लव्ये। (क्षी.त.) (मा.धा.) (धा.क.)

विक्लवः कातरः। वैकल्य इति चन्द्रः। कद, क्रद, इति नन्दी । कदि क्रदि क्लदि आह्वाने रोदने च इति परस्मैपदिनः। (क्षी.त.)

अत्र क्षीरस्वाम्येवं पठित्वाह वक्लव्ये इति चन्द्रः। कद क्रद क्लदेति नन्दी अनिदितमाह। मैत्रेयस्तु कदिक्रदी द्वाविदितौ पठित्वा क्रदक्लदेति द्वावनिदितावाह। तत्रेदितोरन्त्यः सरेफ आद्यो नीरेफः। अनिदितोस्त्वाद्यः सरेफः। अपरो

लकारवान् वर्द्धमानोपि। मैत्रेयवल्लकारवन्तम् इदितं चापठत्। प्रथिक्रन्दिक्लन्दिस्यन्दीनां घटादौ पाठः चिण्णमुलोर्वृद्ध्यर्थ इति। अत्र कदिक्रदिक्लदीनामाह्वानरोदनयोः परस्मैपदिषु गतानां पुनरिहापि पाठो न केवलमित्त्वार्थः। किं त्वात्मनेपदिषु पाठसामर्थ्यात्तदर्थमपि (मा.धा.)

कन्द्, क्रन्द्, क्लन्द् (इ) सेट्, अक, आ। अत्र क्षीरस्वाम्येवं पठित्वाह। वैक्लव्य इति चन्द्रः। कद क्रद क्लद इति नन्दी अनिदितमाह। मैत्रेयस्तु कदिक्रदी द्वाविदितौ पठित्वा क्रदक्लदेति द्वावनिदितावाह। तत्रेदितोरन्त्यः सरेफः आद्यो निरेफः, अनादितोस्त्वाद्यः सरेफः, अपरो लकारवान्। वर्द्धमानोऽपि मैत्रेयवल्लकारवन्तम् इदितं चापठत्। (धा.क.)

❖ **क्लमु [क्लम्] ग्लानौ (दिवा०)**

क्लमु ग्लाने। (शा.आ.)

क्लमु ग्लानौ। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

क्लम्, (उ) सेट्, अक, प। अस्य शमादिपाठो घिनुणर्थः। (धा.क.)

❖ **क्लसु [क्लस्] ह्वरणदीप्त्योः (दिवा०)**

क्लसु ह्वरणदीस्योः। (शा.आ.)

❖ **क्लिदि [क्लिन्द्] परिदेवने (भ्वा०)**

क्लिदि परिदेवने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

उभयपदिषु अयं न पठ्यते। कर्त्रभिप्राये क्रियाफले अपि परस्मैपदम् अकर्त्रभिप्राये चात्मनेपदं यथा स्यात्। क्लिन्न इति तु क्लिदू अर्द्रीभाव इत्यस्य क्लिद्यते रूपम्। (धा.प्र.)

परिदेवनं शोचनम्। स्वरितेत्सु नोक्तः, कर्त्रभिप्राये अपि परस्मैपदार्थः। दिवादौ क्लिदू आर्द्रभावे। (क्षी.त.)

परिदेवनं शोचनम्। सकर्मकः। अयं परस्मैपदादिष्वपि पठिष्यते। ऊदिदार्द्रीभावे दिवादौ। अस्य अनुदात्तेत्सु पठितस्येह पाठः परस्मैपदार्थ स्वरितेत्सु पाठः। क्रियाफलस्य कर्तृगामित्वेऽपि परस्मैपदं यथा स्यात्। (मा.धा.)

परिदेवनं शोचनम्। सकर्मकः। क्लिन्दते जननी सुतम्। क्लिन्द्, (इ) सेट्, सक, आ। अयं परस्मैपदिष्वपि पठिष्यते। क्लिदू आर्द्रीभावे इति दिवादौ। अस्यानुदात्तेत्सु पठितस्येह पाठः परस्मैपदार्थः। (धा.क.)

❖ **क्लिदू [क्लिद्] आर्द्रीभावे (दिवा०)**

क्लिदू आर्द्रभावे। (शा.आ.)

क्लिदू आर्द्रीभावे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

क्लिद् (ऊ) वेट्, सक, प। (धा.क.)

❖ **क्लिश [क्लिश्] उपतापे (दिवा०)**

क्लिश उपतापे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

क्लिशू विबाधन इति क्र्यादिपठितस्य। (धा.प्र.)

क्र्यादौ क्लिशू विबाधने भ्वादौ क्लेश व्यक्तायां वाचि। (क्षी.त.)

क्लिशू विबाधने इति क्र्यादौ। (मा.धा.)

क्लिश्, सेट्, सक, आ। क्लिशू विबाधने इति क्र्यादौ। (धा.क.)

❖ **क्लिशू [क्लिश्] विबाधाने (क्र्या०)**

क्लिशू विबाधने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

क्लिश्, (ऊ) वेट्, सक, प। (धा.क.)

❖ **क्लीबृ [क्लीब्] अधार्ष्ट्ये (भ्वा०)**

क्लीबृ अधार्ष्ट्ये। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

क्लीब् (ऋ) सेट्, अक, आ। (धा.क.)

❖ **क्लुङ् [क्लु] गतौ (भ्वा०)**

क्लुङ् इत्येके। (धा.प्र.)

❖ **क्लेश [क्लेश्] अव्यक्तायां वाचि बाधने (भ्वा०)**

क्लेश व्यक्तायां वाचि।(धा.प्र.)
(मा.धा.) (धा.क.)

बाधन इति दुर्गः। अत्र स्वामी क्लेश व्यक्तायां वाचि चेति पठन्निमावपि पूर्वधात्वर्थौ एव आह। चन्द्र-दौर्ग-मैत्रेय-सम्मताकार-देव-आदयः तु धात्वन्तरम् एवाहुः। (मा.धा.)

क्लेश बाधने इति दुर्गः पठति। अत्र स्वामी क्लेश व्यक्तायां वाचि चेति पठन्निमावपि पूर्वधातोरर्थावेवाह। चन्द्रदुर्गमैत्रेयसम्मताकारादयः तु धात्वान्तरमेवाहुः। उभयपदीति वोपदेवः। क्लेश, सेट्, अक, आ। अयं क्र्यादावपि।(धा.क.)

❖ **क्वण [क्वण्] शब्दार्थः (भ्वा०)**

अण रण मण **क्वण** जण भण शब्दार्थाः। (शा.आ.)

अण रण वण भण मण कण **क्वण** व्रण भ्रण शब्दार्थाः। (धा.प्र.)

अण रण वण मण कण **क्वण** व्रण भ्रण ध्वण शब्दार्थाः। (क्षी.त.)(मा.धा.)

एते शब्दनक्रियार्थाः। (क्षी.त.)

अयं निमीलनार्थश्चुरादौ । अयं बशादिः क्वचित्पठ्यते दन्तोष्ठयादिरेव सर्वत्र। तथा च यादवः। (मा.धा.)

अन रण वण भण मण कण **क्वण** व्रण भ्रण ध्वण शब्दार्थाः। इतः क्रम्यन्ता उदात्ता उदात्तेतः। अण, रण, वण, भण, मण, कण, क्वण, ष्टण, वन, ध्वन, शब्दे, इति दुर्गः। सर्वे सेटः, अकर्म्मकाः, सकर्म्मकाश्च, परस्मैपदिनः। अयं निमीलनार्थश्चुरादौ। अयं वसादिः क्वचित् पठ्यते। दन्त्योष्ठ्यादिरेव सर्वत्र। (धा.क.)

❖ **क्वथे [क्वथ्] निष्पाके (भ्वा०)**

क्वथे निष्पाके। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

क्वथ्, (ए) सेट्, अक, प। क्वाथः - सरसनिर्य्यासः। (धा.क.)

❖ **क्वर [क्वर्] चलने (भ्वा०)**

क्वर चलने। (शा.आ.)

❖ **क्षजि [क्षञ्ज्] गतिदानयोः (भ्वा०)**

क्षजि गतिदानयोः। (धा.प्र.)(क्षी.त.)
(मा.धा.) (धा.क.)

क्षञ्जेर्घटादौ मित्त्वार्थः पाठः। (धा.प्र.)

क्षजेति कौशिकः। चुरादौ क्षजि कृच्छ्रजीवने। (क्षी.त.)

क्षज इति कौशिकः। मैत्रेयसुधाकरादयः क्षञ्जेति गुरुमत्त्वादङि सिध्यति एवम् अन्येषाम् अपि संयोगान्तानां दक्षादीनां मित्त्वसामर्थ्यात् दीर्घविकल्पः। (मा.धा.)

क्षज इति कौशिकः। क्षञ्ज् (इ) सेट्, सक, आ। (धा.क.)

❖ **क्षजि [क्षञ्ज्] कृच्छ्रजीवने (चुरा०)**

क्षजि कृच्छ्रजीवने। (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

क्षजि गतिदानयोः। (क्षी.त.)

गतिदानयोर्घटादौ। (मा.धा.)

क्षञ्ज (इ, वा णिच्) अक, उ। इति गतिदानयोः घटादौ। (धा.क.)

❖ **क्षण [क्षण्] गतौ दाने (भ्वा०)**

क्षण शण श्रण दाने च। शणगतावित्यन्ये अन्त्यौ तालव्यादी। (मा.धा.)

❖ **क्षणु [क्षण्] हिंसायाम् (तना०)**

क्षणु हिंसायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

अस्योपदेशे दन्त्यनकार इति धातुपारायणे व्याख्यातम्। (धा.प्र.)

क्षिणु इति दुर्गः। (क्षी.त.)

क्षण्(उ) सेट्, सक, उ। (धा.क.)

❖ **क्षप [क्षप] प्रेरणे (चुरा०)**

क्षप प्रेरणे (धा.प्र.)(मा.धा.)(धा.क.)

क्षप, सक, प। (धा.क.)

❖ **क्षपि [क्षम्प्] क्षान्त्याम् (चुरा०)**

क्षपि क्षान्त्याम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

❖ **क्षमू [क्षम्] सहने (दिवा०)**

क्षमू सहने। (धा.प्र.)(मा.धा.)(धा.क.)

क्षमूष् सहन इति भौवादिकस्य। (धा.प्र.)

षितो भौवादिकस्य अमुमपि केचित् षितं पठन्ति। तदसत् तथा च स्वामी केचिदत्रापि क्षमूषिति षितं पठन्ति। तदसत् क्षमू सहन इति सभ्या इति वर्धमानोऽपि क्षमेर्दैवादिकस्य अननुबन्धस्य क्षान्तिः स्यादेव इति अषितः क्षाम्यतेः क्षान्तिः क्षमूषः क्षमतेः क्षमा इति देवपुरुषकारयोरपि। (मा.धा.)

सहनं मर्षणं, क्षमा शक्तिः। क्षम्, (ऊ) वेट्, सक प। क्षमेति षितो भौवादिकस्य। (धा.क.)

❖ **क्षमूष् [क्षम्] सहने (भ्वा०)**

क्षमूष् सहने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

अयमपि दिवादौ। (मा.धा.)

क्षम् (ऊ, ष) सक, वेट्, आ। सहनं मर्षणं क्षमा। अयं दिवादौ च। (धा.क.)

❖ **क्षमूष् [क्षम्] सहने (दिवा०)**

क्षमूष् सहने। अत एव क्षमू सहन इति सभ्याः। (क्षी.त.)

❖ **क्षर [क्षर्] सञ्चलने (भ्वा०)**

क्षर सञ्चलने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

सकर्मकोऽकर्मकश्च। (शा.आ.)

अत्र क्षल सञ्चलने इति क्वचित्पठ्यते। (मा.धा.) (धा.क.)

क्षर्, सेट्, अक, प। (धा.क.)

❖ **क्षल [क्षल्] सञ्चये सञ्चलने च (भ्वा०)**

क्षल सञ्चये सञ्चलने च। चुरादौ क्षल शौचे। (क्षी.त.)

❖ **क्षल [क्षल्] शौचकर्मणि (चुरा०)**

क्षल शौचकर्मणि। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

क्षल, सक, प। (धा.क.)

❖ **क्षि [क्षि] ऐश्वर्ये (भ्वा०)**

क्षि ऐश्वर्ये। (क्षी.त.)

❖ **क्षि [क्षि] क्षये (भ्वा०)**

क्षि क्षये। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

क्षि निवासगत्योः क्षिष् हिंसायाम् इति च गणान्तरे पठ्यते। उत्तरधातुसाधर्म्यानुरोधेन च अजन्तः अपि अयम् अत्र निर्दिश्यते। (धा.प्र.)

तुदादौ क्षि निवासगत्योः। क्र्यादौ क्षिष् हिंसायाम्। स्वादौ ऋ क्षि चिरि जिरि दाश दृ हिंसायाम्। (क्षी.त.)

अनिट् स्वरान्त इत्ययमनिट्। इह पाठस्तु उत्तरधातुसादृश्यादिति मैत्रेयेण प्रतिपादितम्। क्षि निवासगत्योरिति तुदादौ। क्षिष हिसायामिति क्र्यादौ। क्षिणु हिंसायामिति तनादौ। (मा.धा.)

क्षि, अनिट्, अक, प। क्षि निवासगत्योरिति तुदादौ। क्षिष् हिंसायामिति क्र्यादौ। क्षिणु हिंसायामिति तनादौ। (धा.क.)

❖ **क्षि [क्षि] हिंसायाम् (स्वा०)**

रि क्षि चिरि जिरि दाश दृ हिंसायाम्। (धा.प्र.) (मा.धा.)(धा.क.)

अयं भाषायामपीत्यात्रेयमैत्रेयादयः। प्रयुज्यते च - **इमां हृदि व्यायतपातमक्षिणोत्, न तद्यशः शस्त्रभृतां क्षिणोति, पञ्चबाणः क्षिणोतीति।** शाकटायनादयस्तु छान्दसत्वमेवाहुः। केचित्तु ऋक्षि इत्येकमजादिं च मन्यते। दुर्गः तिक तिग षघ रि क्षि चिरि जिरि दाश् दृ दुङ् हिंसायां। छान्दसाश्चामी परस्मैभाषा उदात्ता इति। (मा.धा.)

रि, क्षि, चिरि, जिरि, दाश्, दृ, सेट्, अनिट्, सक, प। अयं भाषायामपि। **न तद्यशः शस्त्रभृतां क्षिणोति।** दुर्गः तु तिक तिग षघ रिक्षि चिरि जिरि दाश् दृ दुङ् जिघांसायाम् इति पठतीति माधवः। (धा.क.)

❖ **क्षि [क्षि] क्षये (स्वा०)**

क्षि क्षये। (शा.आ.)

❖ **क्षि [क्षि] निवासगत्योः (तुदा०)**

क्षि निवासगत्योः। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

क्षि, अनिट्, सक, प। (धा.क.)

❖ **क्षिणु [क्षिण्] हिंसायाम् (तना०)**

क्षिणु च। (धा.प्र.) (मा.धा.) (धा.क.)

हिंसायामित्यपेक्षते। (धा.प्र.)

हिंसायामित्यर्थः। शाकटायनक्षीरस्वामिभ्याम्

अयं धातुर्न पठ्यते। अत एवात्रेयमैत्रेयाभ्याम् अपि स्वादेः छान्दसेषु पठितस्य क्षेर्धातोः भाषायामपि प्रयोगाङ्गीकारेण क्षिणोतीति साधितम्। शाकटायनः पुनस्तत्र छान्दसम् एवाह। इहापि क्षिणुं न पपाठेति। तन्मते क्षिणोतिप्रयोगो भाषायामसाधुरेव। (मा.धा.)

चात् हिंसायामिति। क्षिण् (उ) सेट्, सक, उ। अयमपि तवर्गीयोपदेशः, णत्वन्तु लाक्षणिकम् इतीह क्षणिकवदनुस्वारीभूतो णत्वम् अतिक्रामति इति। (धा.क.)

❖ **क्षिप [क्षिप्] प्रेरणे (दिवा०)**

क्षिप प्रेरणे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

पारायणिकैः क्षिपेरिह पाठोऽयुक्त इति भूसूत्रे सुधाकरेण प्रतिपादितम्। कृतस्तौदादिकस्यापि समानः स्वरेण नीचेन शपिं छुपि क्षिपिम् इति पाठादयमनिट्। अयं चुरादावदन्त इत्यात्रेयः। (मा.धा.)

क्षिप्, अनिट्, सक, प। (धा.क.)

❖ **क्षिप [क्षिप्] प्रेरणे (तुदा०)**

क्षिप प्रेरणे। (शा.आ.)(धा.प्र.)(क्षी.त.)(धा.क.)

क्षिप्, अनिट्, सक उ। (धा.क.)

❖ **क्षिवु [क्षिव्] निरसने (भ्वा०)**

क्षिवु निरसने। (शा.आ.)(धा.प्र.)

❖ **क्षिष [क्षिष्] हिंसायाम् (क्र्या०)**

क्षिष् हिंसायाम्। (शा.आ.)(क्षी.त.)

❖ **क्षीज [क्षीज्] अव्यक्ते शब्दे (भ्वा०)**

क्षीज अव्यक्ते शब्दे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अन्यस्त्वाह क्षीजकूजोः पृथक् करणाद् अर्थभेदः अनुसन्धेयः। क्षीजति दासीत्युक्ते सखेदं स्वनतीति गम्यते। एवमन्यत्रापि धातुभेदे अर्थभेदः अवगन्तव्यः। (धा.प्र.)

क्षीज कुज गुजि अव्यक्ते शब्दे इति दुर्गः पठति।

क्षीज्, सेट्, अक, प। (धा.क.)

❖ **क्षीबृ [क्षीब्] मदे (भ्वा०)**

क्षीबृ मदे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

दिवादौ क्षीवु निरसने। (क्षी.त.)

क्षीब् (ऋ) सेट्, अक, आ। (धा.क.)

❖ **क्षीवु [क्षीव्] निरसने (भ्वा०)**

क्षीव निरसने। क्षिवु इति चन्द्रः। (क्षी.त.)

क्षीवु निरसने। (मा.धा.) (धा.क.)

क्षेवु निरसन इति चन्द्रः। (मा.धा.) (धा.क.)

क्षीव्, (उ) सेट्, सक, प। (धा.क.)

❖ **क्षीष् [क्षी] हिंसायाम् (क्र्या०)**

क्षीष् हिंसायाम्। (धा.प्र.)(मा.धा.)(धा.क.)

क्षी(ष्) अनिट्, सक, प। क्षिष् इति तृतीयस्वरोपधं केचित् क्र्यादौ पठन्ति। केचिच्च चतुर्थस्वरोपधं प्वादौ निर्दिशन्ति। क्षिणधातुः तनादौ। (धा.क.)

❖ **क्षुदिर् [क्षुद्] सम्पेषणे (रुधा०)**

क्षुदिर् सम्पेषणे। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

क्षुदिर् सम्पेषे। (क्षी.त.)

क्षुद्, (इर्) अनिट्, सक, उ। (धा.क.)

❖ क्षुध [क्षुध्] बुभुक्षायाम् (दिवा०)

क्षुध बुभुक्षायाम्। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

क्षुध्, अनिट्, अक, प। (धा.क.)

❖ क्षुभ [क्षुभ्] सञ्चलने (भ्वा०)

क्षुभ सञ्चलने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

सञ्चलनं रूपान्यथात्वम्। (क्षी.त.)

सञ्चलनं प्रकृतिविपर्यासो मथनं च। पूर्ववत् क्षुब्धो मन्थः। अयं दिवादिः क्र्यादिश्च।(मा.धा.)

सञ्चलनं प्रकृतिविपर्य्यासो गमनञ्च। क्षुभ्, सेट्, अक, आ। अयं दिवादिः, क्र्यादिश्च। (धा.क.)

❖ क्षुभ [क्षुभ्] सञ्चलने (दिवा०)

क्षुभ सञ्चलने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

पुषादेः पूर्वमस्य पाठेऽपि न दोषः। (धा.प्र.)

सञ्चलनं रूपान्यथात्वम्। (क्षी.त.)

क्षुभ्, सेट्, सक, प। भ्वादावप्ययम्। (धा.क.)

❖ क्षुभ [क्षुभ्] सञ्चलने (क्र्या०)

क्षुभ सञ्चलने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

क्षुभ्, सेट्, सक, प। (धा.क.)

❖ क्षुर [क्षुर्] विलेखने (तुदा०)

खुर **क्षुर** विलेखने। (शा.आ.)

क्षुर खुर विलेखने। (क्षी.त.)

क्षुर विलेखने। (धा.प्र.)(मा.धा.)(धा.क.)

विलेखनं छेदः। (क्षी.त.)

क्षुर्, सेट्, सक, प। (धा.क.)

❖ क्षै [क्षै] क्षये (भ्वा०)

क्षै क्षये। (शा.आ.)

क्षै जै सै क्षये। (क्षी.त.)

क्षै जै षै क्षये। (धा.प्र.)(मा.धा.)(धा.क.)

केचिदमुं दन्त्यादिं पठन्ति तत् षोपदेशलक्षणविरोधादुपेक्ष्यम्। (मा.धा.)

क्षै, जै, सै, अनिट्, अक, प। (धा.क.)

❖ क्षै [क्षै] वेष्टने (भ्वा०)

क्षै वेष्टने। (शा.आ.)

❖ क्षोट [क्षोट] क्षेपे (चुरा०)

क्षोट क्षेपे। (धा.प्र.)(मा.धा.)

क्षोट, सक, उ। (धा.क.)

❖ क्ष्णु [क्ष्णु] तेजने (अदा०)

क्ष्णु तेजने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

क्ष्णु, सेट्, अक, प। (धा.क.)

❖ क्ष्मायी [क्ष्माय्] विधूनने (भ्वा०)

क्ष्मायी विधूनने। (धा.प्र.)(क्षी.त.)(मा.धा.)

क्ष्मायी शब्दे विधूनने। दुर्गमते शब्द इति अधिकम्। क्ष्माय् (ई) सेट्, सक, आ। (धा.क.)

❖ क्ष्मील [क्ष्मील्] निमेषणे (भ्वा०)

मील श्मील **क्ष्मील** निमेषणे।(मा.धा.)(धा.क.)

मील स्मील **क्ष्मील** निमेषणे। श्मील इत्येके। (धा.प्र.)

निमेषणं सङ्कोचः। द्वितीयः तालव्यादिः।

तृतीयो दन्त्यादिः। मिल श्लेषण इति ह्रस्वोपधः तुदादौ। (मा.धा.)

सर्वे सेटः, अकर्मकाः, परस्मैपदिनश्च। मिल श्लेषणे ह्रस्वोपधो रुधादौ। (धा.क.)

❖ **क्ष्वेलृ [क्ष्वेल्] चलने** **(भ्वा०)**

वेलृ चेलृ केलृ खेलृ क्ष्वेलृ वेल्ल चेल्ल चलने। (धा.प्र.)

वेल्लृ चेलृ केलृ खेलृ **क्ष्वेलृ** चलने। (क्षी.त.)

वेलृ चेलृ खेलृ **क्ष्वेलृ** वेल्ल चलने। (मा.धा.)

वेलृ चेलृ केलृ खेलृ **क्ष्वेलृ** वेल्ल चलने। दुर्गादयः तु अन्यथा पठन्ति। सर्वे सेटः, अकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ **खच [खच्] भूतप्रादुर्भावे** **(क्र्या०)**

खच भूतप्रादुर्भावे। (धा.प्र.) (मा.धा.)(धा.क.)

भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः । खव इत्येक इति मैत्रेयः। स्वाम्यपि खज्ञातीत्युक्त्वा खौनातिरिति सभ्या इत्यत्र क्वचिद्वेट् चेति पठ्यते। (मा.धा.)

भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः, भूतिप्रादुर्भाव इति दुर्गः सम्पदाविर्भाव इति तत्रार्थः। दुर्गमते खव इति अन्तस्था चतुर्थान्तो धातुः। खच्, सेट्, अक्, प। खवभूतिप्रादुर्भाव इत्येक इति मैत्रेयः। स्वाम्यपि खज्ञातीत्युक्त्वा खौनातिरिति सभ्या इति। धातुपारायणे तु खच्नातीत्यादि। (धा.क.)

❖ **खज [खज्] गतिदानयोः** **(भ्वा०)**

खज गतिदानयोः। (शा.आ.)

❖ **खज [खज्] मन्थे** **(भ्वा०)**

खज मन्थे च। (धा.प्र.)

खज मन्थे। (क्षी.त.)(मा.धा.)(धा.क.)

मन्थो विलोडनम्। (क्षी.त.)

अत्र केचित् कज मद इत्यपि पठन्ति। (मा.धा.)

खज्, सेट्, सक, प। अत्र केचित् कज मदे इत्यपि पठन्ति। विलोडने इत्यपरे।(धा.क.)

❖ **खजि [खञ्ज्] गतिवैकल्ये** **(भ्वा०)**

खजि गतिवैकल्ये। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

खञ्ज्, (इ) सेट्, अक, प। खोटन इति केचित्। (धा.क.)

❖ **खट [खट्] काङ्क्षायाम्** **(भ्वा०)**

खट काङ्क्षायाम्। (धा.प्र.)(मा.धा.)(धा.क.)

खट काङ्क्षे। काङ्क्षास्त्यस्येति काङ्क्षः। काङ्क्षाविशिष्टे धात्वर्थे। (क्षी.त.)

खट्, सेट्, सक, प। (धा.क.)

❖ **खट्ट [खट्ट्] संवरणे** **(चुरा०)**

खट्ट संवरणे। (धा.प्र.)(क्षी.त.) (धा.क.)

खट्ट, सक, प। (धा.क.)

❖ **खड [खड्] भेदने** **(चुरा०)**

खड खडि कडि भेदने। (धा.प्र.) (मा.धा.)(धा.क.)

खड खडि भेदे। कडि इत्येके। (क्षी.त.)

क्षीरस्वामी तु भूवादौ परस्मैभाषं कडतिम् अनिदितमपि कडीतीदितं पठित्वा कडेति दुर्ग इत्याह। अस्य निर्णयस्तत्र कृतः। (मा.धा.)

खड्, खण्ड, कण्ड, (इ, वा, णिच्) सक, उ। (धा.क.)

❖ खडि [खण्ड्] मन्थे (भ्वा०)

खडि मन्थे (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

खड **खडि** कडि भेद इति चुरादौ पठ्यते। (धा.प्र.)

चुरादौ खड **खडि** भेदे। (क्षी.त.)

खुडीत्यप्येके पठन्ति । खडि भेदने चुरादिः। (मा.धा.) (धा.क.)

खण्ड् (इ) सेट्, सक, आ। (धा.क.)

❖ खडि [खण्ड्] भेदने (चुरा०)

खड **खडि** कडि भेदने (धा.प्र.)(मा.धा.)

खड **खडि** भेदे। कडि इत्येके। (क्षी.त.)

क्षीरस्वामी तु भूवादौ परस्मैभाषं कडतिम् अनिदितमपि कडीतीदितं पठित्वा कडेति दुर्ग इत्याह। अस्य निर्णयस्तत्र कृतः। (मा.धा.)

खड **खडि** कडि भेदे। खड्, खण्ड, कण्ड, (इ, वा, णिच्) सक, उ। (धा.क.)

❖ खद [खद्] स्थैर्ये हिंसायां च (भ्वा०)

खद स्थैर्य्ये हिंसायाञ्च। (धा.प्र.)(क्षी.त.) (धा.क.)(मा.धा.)

वद **खद** स्थैर्ये। हिंसायां च वर्तते। (शा.आ.)

चकाराद्भक्षणे च स्थैर्येऽकर्मकः। (मा.धा.)(धा.क.)

खद् सेट् प। स्थैर्ये प्रयोज्यं कर्म भवति। किरच्- खदिरः। यवखदा, यवस्य सारः, स्वभावात् स्त्रीविषयः अयम्। इन् - यवखदी। (धा.क.)

❖ खनु [खन्] अवदारणे (भ्वा०)

खनु अवदारणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

खन् (उ) सेट्, सक, उ। (धा.क.)

❖ खर्ख [खर्ख्] हसने (भ्वा०)

खर्ख हसने। खक्खेति दुर्गः। (क्षी.त.)

❖ खर्ज [खर्ज्] व्यथने पूजने च (भ्वा०)

खर्ज मार्जने च। (धा.प्र.)

कर्ज **खर्ज** व्यथने मार्जने च। (क्षी.त.)

खर्ज पूजने च। (मा.धा.)

खर्ज व्यथने पूजने च। खर्ज्, सेट्, अक, प। खर्ज व्यथने इति दुर्गः पठति। (धा.क.)

❖ खर्द [खर्द्] दन्दशूके (भ्वा०)

खर्द दन्दशूके। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

दन्दशूको दंशनशीलः स्वभावभूतगर्हितदंशनक्रियाकर्त्ता। अनेन तत्समवेता स्वभावभूतगर्हितदंशनक्रिया लक्ष्यते। धातोः क्रियावचनत्वात्। एवमन्यत्रापि द्रव्यनिर्द्देशे क्रिया लक्ष्यते। दन्दंशन इत्येतन्नोक्तम्। ताच्छील्यार्थस्य सङ्ग्रहो न स्यादिति । (धा.प्र.)

दन्दशूके गर्हितदशनयुक्तायां क्रियायाम्, दशनमात्रे वाच्ये साधननिर्देशः साधनप्रधानप्रयोगसमवायार्थः। दन्तशूकपाठेऽपि दन्ताः शूका अस्येति स एवार्थः पर्यवस्यति। (क्षी.त.)

दन्दशूक इति दन्दशूककर्तृका क्रियाऽभिधीयते। साधनप्रधानप्रयोगित्वस्थापनार्थं दन्तशूकग्रहणमिति सम्मतातरङ्गिण्योः। दन्दशूको गर्हितो दंशनशीलः। इह तु तत्स्था क्रिया, दंश

इत्यनुक्तिस्ताच्छील्यादिप्रतिपत्त्यर्थैति मैत्रेयेण प्रतिपादितम्। दन्तशूक इति केशवस्वामी दकारस्य स्थाने तकारमाह। तन्महान्तो न सहन्ते। यदाह दन्दशूको बिलेशय इत्यत्र सुभूतिवन्द्रः दंशेर्यङन्तान्नुक्यूप्रपत्यये अल्लोपयलोपयोः इति। तथा इषुमति रघुसिंहे दन्दशूकान् जिघांसौ इति भट्टिश्लोकव्याख्याने दन्दशूकान् हिंस्रान् दंशेः लुपसद इत्याद्युक्तं शङ्कराचार्येण। हिंस्रमात्रे प्रयुञ्जानो भट्टिकारो दन्दशूकशब्दस्य नैघण्टुकप्रसिद्धिं नाद्रियते। (मा.धा.)

दन्दशूक इति दन्दशूककर्त्तृका क्रियाऽभिधीयते। खर्द्, सेट्, सक, प। (धा.क.)

❖ **खर्ध [खर्ध्] कुत्सिते शब्दे दन्तशूके दन्तसुखे च (भ्वा०)**

खर्ध कर्ध कुत्सिते शब्दे। दन्तशूके दन्तसुखे च। (शा.आ.)

❖ **खर्ब [खर्ब्] गतौ (भ्वा०)**

पर्प रफ रफि अर्ब पर्ब वर्ब मर्ब षर्ब कर्ब **खर्ब** गर्ब शर्ब चर्ब गतौ। (धा.प्र.)

वर्फ रफ रफि अर्ब वर्ब कर्ब **खर्ब** गर्ब घर्ब शर्ब षर्ब सर्ब चर्ब भर्ब नर्ब गतौ। पञ्चदशैते गत्यर्थाः। बर्फादींस्त्रीन् हिंसार्थे कण्ठः पठति। (क्षी.त.)

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब **खर्ब** गर्ब शर्ब षर्ब चर्ब गतौ। (मा.धा.)(धा.क.)

आद्यः प्रथमान्तः। परौ द्वावपि द्वियीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। अर्वादयो नोपधा इति कौशिकः। (मा.धा.)

आद्यः प्रथमान्तः। परौ द्वावपि द्वितीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ **खर्व [खर्व्] दर्पे (भ्वा०)**

कर्व **खर्व** गर्व दर्पे। (शा.आ.) (धा.प्र.) (मा.धा.)(धा.क.)

पूर्वकाः कवर्गादयः स्पर्शान्ताः। अमी तु ईषत्स्पृष्टान्ता इति पुनश्च पठ्यन्ते। (धा.प्र.)

गर्व **खर्व** दर्पे। चर्वादिनां षष्णां पुनः पाठः अर्थभेदार्थ इत्येके। (क्षी.त.)

कर्व्, खर्व्, गर्व, सेट्, अक, प। (धा.क.)

❖ **खल [खल्] सञ्चये (भ्वा०)**

खल सञ्चये (मा.धा.)(धा.क.)

खल स्खल सञ्चलने। खल संशये च (धा.प्र.)

खल सञ्चये च। चकाराच्चलने। (क्षी.त.)

खल्, सेट्, सक, प। (धा.क.)

❖ **खव [खव्] भूतप्रादुर्भावे (क्र्या०)**

खव इत्येके। खु इति केचित्। (धा.प्र.)

खव भूतप्रादुर्भावे। अतिक्रान्तोत्पत्तौ। खच इति दौर्गाः। (क्षी.त.)

❖ **खष [खष्] हिंसार्थः (भ्वा०)**

कष **खष** शिष जष झष शष वष मष रुष रिष हिंसार्थाः। हिंसार्थत्वे यदि दृश्यते तदा धातूनाम् अनेकार्थत्वाद्भविष्यति। (मा.धा.)

कष **खष** शिष जष झष शष वष मष रुष रिष हिंसार्थाः। सर्वे सकर्मकाः परस्मैपदिनश्च। कष्, सेट्। खष्, सेट्। शिष्, अनिट्, (वोपदेवप्रभृतीनां मते सेट्)। हिंसार्थत्वं यदि दृश्यते, तदा धातुनाम् अनेकार्थत्वात् भविष्यति। (धा.क.)

❖ खादृ [खाद्] भक्षणे (भ्वा०)

खादृ भक्षणे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

खाद् (ऋ) सेट्, सक, प। (धा.क.)

❖ खिट [खिट्] त्रासे (भ्वा०)

किट **खिट** त्रासे। (धा.प्र.)(मा.धा.)(धा.क.)

खिट उत्त्रासे। उत्त्रासो भयोद्गतिः। (क्षी.त.)

किट्, खिट्, सेट्, सक, प। इह त्रासो भयोत्पादनम्। (धा.क.)

❖ खिद [खिद्] दैन्ये (दिवा०)

खिद दैन्ये। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

अयं रुधादावपि परिघाते तुदादिः। (मा.धा.)

खिद्, अनिट्, अक, आ। अयं कथादौ च। परिघाते तुदादिः। (धा.क.)

❖ खिद [खिद्] परिघाते (तुदा०)

खिद् परिघाते। (शा.आ.) (मा.धा.)(धा.क.)

खिद परीघाते। (धा.प्र.)

खिद परितापे। रुधादौ खिद दैन्ये। (क्षी.त.)

अनुदात्त उदात्तेत्। खिद इति दैन्ये दिवादिपाठाद् अयं कर्मकर्तरीति वदन् वामनो दिवादावस्य पाठं नेच्छति। खिद दैन्य इति रुधादौ गतः। (मा.धा.)

खिद्, अनिट्, अक, प। (धा.क.)

❖ खिद [खिद्] दैन्ये (रुधा०)

खिद दैन्ये। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

खिद दैन्ये। दिवादौ (दुर्गमते) खिद्यते। (क्षी.त.)

खिद्, अनिट्, अक, आ। (धा.क.)

❖ खुजु [खुज्] स्तेयकरणे (भ्वा०)

ग्रुचु ग्लुचु कुजु **खुजु** स्तेयकरणे। (धा.प्र.)(मा.धा.)(धा.क.)

स्तेयकरणं चौर्यम्। सर्वेऽप्युदनुबन्धाः, सेटः, सकर्मकाश्च। ग्रुचिमपि केचित् पठन्ति। (धा.क.)

❖ खुड [खुड्] संवरणे (तुदा०)

खुड छुड इत्येके। (धा.प्र.)

❖ खुडि [खुण्ड्] गतिवैकल्ये (भ्वा०)

खुडि गतिवैकल्ये। चुरादौ खुडि खण्डने। (क्षी.त.)

❖ खुडि [खुण्ड्] खण्डने (चुरा०)

खुडि खण्डने। (क्षी.त.)(मा.धा.) (धा.क.)

खुण्ड् (इ, वा णिच्) सक, उ। (धा.क.)

❖ खुर [खुर्] छेदने (तुदा०)

खुर छेदने। (शा.आ.)(मा.धा.) (धा.क.)

खुर च्छेदने खण्डने च। (धा.प्र.)

क्षुर **खुर** विलेखने। विलेखनं छेदः। (क्षी.त.)

खण्डने चेति मैत्रेयः। (मा.धा.)

खुर्, सेट्, सक, प। (धा.क.)

❖ **खुर [खुर्] छेदने** **(तुदा०)**

खुर क्षुर विलेखने। (शा.आ.)

❖ **खुर्द [खुर्द्] क्रीडायामेव** **(भ्वा०)**

कुर्द **खुर्द** गुर्द गुद क्रीडायामेव। (क्षी.त.)

(मा.धा.)(धा.क.)

कुर्द **खुर्द** गुद क्रीडायामेव। क्रीडायामेव इति एवकाराद् अन्यत्रार्थनिर्द्देशेषु यमः अनुमीयते। (धा.प्र.)

क्रीडानियमोऽत्र धातूनामनेकार्थत्वे लिङ्गम्। (क्षी.त.)

सम्मतामोघाविस्तारचान्द्रेषु तु त्रयोपि पठ्यन्ते। अत्रैवकारो धातूनामनेकार्थत्वे ज्ञापक इत्युक्तम् स्फूर्जेर्दीर्घोपदेशात् उपधायां च इति दीर्घ एषां न इति चन्द्रः। मैत्रेयसम्मतामोघाविस्तार-कारादयस्तु दीर्घत्वम् इच्छन्ति। (मा.धा.)

सम्मतामोघाविस्तारचान्द्रेषु तु त्रयः अपि पठ्यन्ते। अत्रैवकारो धातूनामनेकार्थत्वे ज्ञापक इत्युक्तम्। स्फुर्जेः दीर्घोपदेशादुपधायां चेति नैषां दीर्घ इति चन्द्रः। मैत्रेयसम्मतामोघाविस्तारकारादयस्तु दीर्घत्वम् इच्छन्ति। दुर्गसिंहोऽपि कूर्दते खूर्दते इति दीर्घं विदधाति। वररुचिस्तु पूर्वसूत्रे यदुपधाग्रहणं तदिहार्थम्, तेन नामिनोर्वोः इत्यादिना प्रकृतिव्यञ्जने दीर्घो न स्यात् - कुर्दते इत्याह। कुर्द, सेट्, आ। गुद्, सेट्, आ। गोद इति पचादजिति मैत्रेयः। (धा.क.)

❖ **खेट [खेट] भक्षणे** **(चुरा०)**

खेट भक्षणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

खोट इत्येके। (धा.प्र.)(धा.क.)(मा.धा.)

भ्वादौ खिट उत्रासे। खेड इति दौर्गाः। (क्षी.त.)

तृतीयान्त इति दुर्गः। मैत्रेयः खेटतीत्यपि शपि। (मा.धा.)

तृतीयान्त इति दुर्गः। खेट, सक, उ। (धा.क.)

❖ **खेलृ [खेल्] चलने** **(भ्वा०)**

वेलृ चेलृ केलृ **खेलृ** क्ष्वेलृ वेल्ल चेल्ल चलने। (धा.प्र.)

वेल्लृ चेलृ केलृ **खेलृ** क्ष्वेलृ चलने। (क्षी.त.)

वेलृ चेलृ **खेलृ** क्ष्वेलृ वेल्ल चलने। (मा.धा.)

वेलृ चेलृ केलृ **खेलृ** क्ष्वेलृ वेल्ल चलने। दुर्गादयः तु अन्यथा पठन्ति। सर्वे सेटः, अकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ **खेवृ [खेव्] सेवने** **(भ्वा०)**

एवृ शेवृ षेवृ सेवृ केवृ **खेवृ** ग्लेवृ पेवृ प्लेवृ मेवृ म्लेवृ सेवने। (क्षी.त.)

❖ **खै [खै] खदने** **(भ्वा०)**

खै खनने। (शा.आ.)

खै खदने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

खदनं स्थैर्यं हिंसा च। (मा.धा.)(धा.क.)

खै, अनिट्, सक, प। (धा.क.)

❖ **खै [खै] क्षये** **(भ्वा०)**

खै जै क्षये। (शा.आ.)

❖ **खोट [खोट्] भक्षणे** **(चुरा०)**

खोट इति च (धा.प्र.)

❖ **खोड [खोड] क्षेपे** **(चुरा०)**

खोड क्षेपे। खोट खोडेति पाठभेदः। (क्षी.त.)

❖ खोर्ऋ [खोर्] गतिप्रतिघाते (भ्वा०)

खोर्ऋ गतिप्रतिघाते। (धा.प्र.)

खोलृ **खोर्ऋ** गतिप्रतिघाते। (मा.धा.)(धा.क.)

खोर्ऋ खोलृ गतिप्रतिघाते। खोडृ इति दुर्गः। (क्षी.त.)

खोल्, खोर् (ऋ), सेट्, अक, प। (धा.क.)

❖ खोलृ [खोल्] गतिप्रतिघाते (भ्वा०)

खोलृ इत्यप्येके। (धा.प्र.)

खोलृ खोर्ऋ गतिप्रतिघाते। (मा.धा.)(धा.क.)

खोर्ऋ **खोलृ** गतिप्रतिघाते। खोडृ इति दुर्गः। (क्षी.त.)

खोल्, खोर् (ऋ), सेट्, अक, प। डलयोः अभेदः। (धा.क.)

❖ ख्या [ख्या] प्रकथने (अदा०)

ख्या प्रकथने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

ख्या, अनिट्, सक, प। (धा.क.)

❖ गज [गज्] शब्दार्थः (भ्वा०)

गज गजि गृज गजि मुज मुजि शब्दार्थाः। गज मदने च। (धा.प्र.)(मा.धा.)(धा.क.)

गज गजि गृज गृजि मज मुजि शब्दार्थाः। (क्षी.त.)

मृजमृजीति स्वामिचन्द्रौ। (मा.धा.)

गज गृजि मृज मुजि गर्ज शब्दार्थां इति दुर्गः पठति। सर्वे सेटः, अकर्म्मकाः, परस्मैपदिनश्च। गज मदने च। अयं चुरादौ शब्दार्थः। गज शब्द इत्यग्रे। (धा.क.)

❖ गज [गज्] मदने (भ्वा०)

गज मदने च। (क्षी.त.)(मा.धा.)

मदनं मदोत्पत्तिः। चुरादौ गज मर्च मार्ज शब्दार्थाः। (क्षी.त.)

अयं चुरादावपि शब्दार्थः गर्ज शब्द इत्यग्रे। (मा.धा.)

❖ गज [गज्] शब्दार्थे (चुरा०)

गज मार्ज शब्दे। (धा.प्र.)

गज मर्च मार्ज शब्दार्थाः। (क्षी.त.)

गज मार्ज शब्दार्थे। (मा.धा.)

गज मार्ज शब्दार्थौ। गज्, मार्ज्ज, अक, उ। केचिच्च गजस्थाने गर्ज्ज इति। (धा.क.)

❖ गजि [गञ्ज्] शब्दार्थः (भ्वा०)

गज गजि गृज **गजि** मुज मुजि शब्दार्थाः। (धा.प्र.)

गज **गजि** गृज गृजि मज मुजि शब्दार्थाः। (क्षी.त.)(मा.धा.)(धा.क.)

गज गृजि मृज मुजि गर्ज शब्दार्थां इति दुर्गः पठति। सर्वे सेटः, अकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ गड [गड्] सेचने (भ्वा०)

गड सेचने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वदनैकदेशे गतम्। (मा.धा.)

गड्, सेट्, सक, प। (धा.क.)

❖ गडि [गण्ड्] वदनैकदेशे (भ्वा०)

गडि वदनैकदेशे। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

गण्डगतसंहननक्रियायामित्यर्थः। (क्षी.त.)

इह वदनैकदेशारम्भलक्षणा क्रिया वदनैकदेशशब्देनोच्यते । (मा.धा.) (धा.क.)

गण्ड्, (इ) अक, सेट्, प। (धा.क.)

❖ गण [गण] सङ्ख्याने (चुरा०)

गण संख्याने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

गण, सक, उ। (धा.क.)

❖ गद [गद्] व्यक्तायां वाचि (भ्वा०)

गद व्यक्तायां वाचि। (धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

चुरादौ स्तनगदी देवशब्दे इत्यदन्तः। (क्षी.त.)

वचनं शब्दप्रकाशनफलत्वकर्मस्थमिति न्यासपदमञ्जरीकैयटेषु। स्तनगदी देवशब्द इति चुरादौ। (मा.धा.)

गद्, सेट्, सक, प। (धा.क.)

❖ गदी [गद्] देवशब्दे (चुरा०)

स्तन **गदी** देवशब्दे। (धा.प्र.)(क्षी.त.)(धा.क.)

देवो मेघे सुरे राज्ञि इति मननाद् देवशब्दे मेघध्वनावित्यर्थः। प्रथमा-द्विवचन-निर्देशो वैचित्र्यार्थः। (धा.प्र.)

देवोऽभ्रम्। स्तन गद शब्दे इति चन्द्रः।(क्षी.त.)

स्तन, गद्, (ई) अक, उ। स्तन गदी इति द्विवचननिर्देशो वैचित्र्यार्थ इति मैत्रेयः।(धा.क.)

❖ गन्ध [गन्ध्] अर्दने (चुरा०)

बस्त **गन्ध** अर्दने। (धा.प्र.)(क्षी.त.)(मा.धा.)

अर्दने गतौ हिंसायां याचने वेत्यर्थः। (धा.प्र.)

वस्त **गन्ध** अर्दने। वस्त्, गन्ध, सक, आ। (धा.क.)

❖ गम्लृ [गम्] गतौ (भ्वा०)

गम्लृ गतौ। (शा.आ.)

गमॢ सृपॢ गतौ। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

गम्, सृप् (ऌ) अनिट्, सक, प। (धा.क.)

❖ गर्ज [गर्ज्] शब्दे (भ्वा०)

गर्ज शब्दे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

❖ गर्द [गर्द्] शब्दे (भ्वा०)

नर्द **गर्द** शब्दे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

गर्द्, सेट्, अक, प। (धा.क.)

❖ गर्द [गर्द्] हिंसायाम् (भ्वा०)

नर्द **गर्द** हिंसायाम्। (शा.आ.)

❖ गर्द [गर्द्] शब्दे (चुरा०)

गर्द शब्दे। गर्ज इत्येके। (क्षी.त.)

❖ गर्ध [गर्ध्] अभिकाङ्क्षायाम् (चुरा०)

गर्ध अभिकाङ्क्षायाम्। (धा.प्र.)(क्षी.त.)

❖ गर्ब [गर्ब्] गतौ (भ्वा०)

पर्प रफ रफि अर्ब पर्ब वर्ब मर्ब षर्ब कर्ब खर्ब **गर्ब** शर्ब चर्ब गतौ। (धा.प्र.)

वर्फ रफ रफि अर्ब वर्ब कर्ब खर्ब **गर्ब** घर्ब शर्ब षर्ब सर्ब चर्ब भर्ब नर्ब गतौ। पञ्चदशैते गत्यर्थाः। बर्फादींस्त्रीन् हिंसार्थे कण्ठः पठति। गर्वेत्यनार्षः, ओष्ठ्योऽत्र बः, पवर्गप्रस्तावात्। (क्षी.त.)

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब **गर्ब** शर्ब षर्ब चर्ब गतौ। (मा.धा.)(धा.क.)

सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च।(धा.क.)

❖ गर्व [गर्व्] दर्पे (भ्वा०)

कर्व खर्व **गर्व** दर्पे। (शा.आ.)(धा.प्र.) (मा.धा.)(धा.क.)

कवर्गादयः स्पर्शान्ताः। अमी त्वीषत्स्पृष्टान्ता इति पुनश्च पठ्यन्ते। (धा.प्र.)

गर्व खर्व दर्पे। (क्षी.त.)

कर्व्, खर्व्, गर्व, सेट्, अक, प। (धा.क.)

❖ गर्व [गर्व] माने (चुरा०)

गर्व माने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

गर्वप्रभृतिष्वदन्तत्वप्रयोजनं न दृश्यते। णिचः अनित्यत्वेन यङः अभावार्थमिति केचित् इति पदादिः। (धा.प्र.)

भ्वादौ गर्व दर्पे। (क्षी.त.)

गर्व, अक, आ। (धा.क.)

❖ गर्ह [गर्ह्] कुत्सायाम् (भ्वा०)

गर्ह गर्त कुत्सने। (शा.आ.)

गर्ह गल्ह कुत्सायाम्। (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

गर्ह विनिन्दने चुरादौ। (क्षी.त.)

गर्ह्, गल्ह्, सेट्, अक, आ। (धा.क.)

❖ गर्त [गर्त्] कुत्सने (भ्वा०)

गर्ह **गर्त** कुत्सने। (शा.आ.)

❖ गर्ह [गर्ह्] विनिन्दने (चुरा०)

गर्ह निन्दने। (धा.प्र.) (मा.धा.)

गर्ह विनिन्दने। (क्षी.त.)

गर्ह निन्दायाम्। गर्ह्, सक, उ। (धा.क.)

❖ गल [गल्] गरणे (भ्वा०)

गल गरणे। (धा.प्र.)

❖ गल [गल्] सेचने (भ्वा०)

गल सेचने। (शा.आ.)

❖ गल[गल्] अदने (भ्वा०)

गल अदने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ गल स्रावणे। (क्षी.त.)

गल्, सेट्, सक, प। (धा.क.)

❖ गल [गल्] स्रवणे (चुरा०)

गल स्रावणे। (क्षी.त.)

गल श्रवणे। (मा.धा.)

गल स्रवणे। गल्, अक, आ। (धा.क.)

❖ गल्भ [गल्भ्] धार्ष्ट्ये (भ्वा०)

गल्भ धार्ष्ट्ये। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

धार्ष्ट्यं प्रगल्भता। गल्भ्, सेट्, अक, आ। (धा.क.)

❖ गल्ह [गल्ह्] कुत्सायाम् (भ्वा०)

गर्ह **गल्ह** कुत्सायाम्। (धा.प्र.) (मा.धा.)(धा.क.)

गर्ह **गल्ह** कुत्सने। (क्षी.त.)

गर्ह्, गल्ह्, सेट्, अक, आ। (धा.क.)

❖ गवेष [गवेष] मार्गणे (चुरा०)

गवेष मार्गणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

मार्गणमन्वेषणम्। गवेष, सक, उ। (धा.क.)

❖ गा [गा] स्तुतौ (जुहो०)

गा स्तुतौ। (धा.प्र.)(मा.धा.) (धा.क.)

गा स्तुतौ च। छन्दसि। जनने च। भ्वादौ गाङ् गतौ। कै गै शब्दे। (क्षी.त.)।

गा, अनिट्, सक, प। अयञ्च छान्दस इत्येके। (धा.क.)

❖ गाङ् [गा] गतौ (भ्वा०)

गाङ् गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

इह गै शब्दे। (क्षी.त.)

न्यासपदमञ्जर्योरयं धातुरादादिक इति स्थिते शपि पाठे चास्य प्रयोजनं नास्ति। अस्माभिस्तु क्वापि पठितव्य इति मैत्रेयाद्यनुसारेणेह पठितः। (मा.धा.)

गा (ङ्), अनिट्, सक, आ। (धा.क.)

❖ गाधृ [गाध्] प्रतिष्ठालिप्सयोर्ग्रन्थे च (भ्वा०)

गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च। (शा.आ.) (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

प्रतिष्ठा आस्पदम्। लब्धुमिच्छा लिप्सा। ग्रन्थनं ग्रन्थः। अस्य पृथक्पाठो विरलप्रयोगार्थः। (क्षी.त.)

सङ्घर्षे प्रतिष्ठा। लिप्सयोः। ग्रन्थे च। स्थापना तत्स्थापनं वा प्रतिष्ठा। लब्धुमिच्छा लिप्सा। एकत्र स्थापनं सन्दर्भो वा ग्रन्थः तत्र आद्ये अकर्मकः। इतरयोः सकर्मकः। (मा.धा.)

स्थापना तत्स्थापनं वा प्रतिष्ठा। लब्धुमिच्छा लिप्सा। एकत्र स्थापनं सन्दर्भो वा ग्रन्थः। तत्राद्येऽकर्मकः, इतरयोः सकर्मकः। प्रतिष्ठा - प्रशंसा, लिप्सा - वाञ्छा इति रमानाथः। ऋदित्। गाध्, (ऋ) सेट्, आ। (धा.क.)

❖ गाहू [गाह्] विलोडने (भ्वा०)

गाहू विलोडने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

विलोडनं परिमलनम्। गाहतेऽम्भः। (क्षी.त.)

गाह् (ऊ), वेट्, सक, आ। (धा.क.)

❖ गु [गु] पुरीषोत्सर्गे (तुदा०)

गु पुरीषोत्सर्गे। (धा.प्र.)(मा.धा.)(धा.क.)

गु, अनिट्, अक, प। (धा.क.)

❖ गुङ् [गु] अव्यक्ते शब्दे (भ्वा०)

गुङ् अव्यक्ते शब्दे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

गू पुरीषोत्सर्गे इत्येके। (क्षी.त.)

अत्र निरनुबन्धस्य तौदादिकस्य गु पुरीषोत्सर्ग इत्यस्य ग्रहणमिति। नात्र निष्ठानत्वदीर्घत्वे भवतः गोत्रम्। उभयमिति अस्माभिः तु मैत्रेयाद्यनुसारेण करणे प्रत्यये हरतेरनन्तरं पठित्वायमुदाहृतः। (मा.धा.)

गु (ङ्), अनिट्, अक, आ। (धा.क.)

❖ गुज [गुज्] शब्दे (तुदा०)

गुज शब्दे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अव्यक्ते शब्दे इत्यात्रेयः। (मा.धा.)

गुज्, सेट्, अक, प। नायं सर्वैराद्रियते। अव्यक्ते शब्दे इत्यात्रेयः। (धा.क.)

❖ गुजि [गुञ्ज्] अव्यक्ते शब्दे (भ्वा०)

गुजि अव्यक्ते शब्दे। (धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

अनिदिदित्येके। (क्षी.त.)

अत्र स्वामी अनिदिदित्येक इति स्वसूत्रे सुधाकरः तु अनिदित्पारायणेषु अपाठीत्। लक्ष्ये पुनरिदमविगीतमिति शाकटायनस्तु द्वावपि पपाठ। गुञ्जशब्द इति तुदादौ। (मा.धा.)

गुन्ज् (इ) सेट्, अक, प। गुन्ज शब्दे इति तुदादौ। (धा.क.)

❖ **गुठि [गुण्ठ्] वेष्टने रक्षणे च** **(चुरा०)**

गुठि वेष्टने। (क्षी.त.)

❖ **गुड [गुड्] रक्षायाम्** **(तुदा०)**

गुड रक्षायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

गुड्, सेट, सक, प। (धा.क.)

❖ **गुड [गुड्] प्रतिघाते** **(तुदा०)**

गुड प्रतिघाते। घुट इति दुर्गः। (क्षी.त.)

❖ **गुड [गुड्] घनत्वे बाल्ये च** **(तुदा०)**

गुड घनत्वे बाल्ये च। (शा.आ.)

❖ **गुड [गुड्] उत्सर्गे** **(तुदा०)**

गुड उत्सर्गे। (शा.आ.)

❖ **गुड [गुड्] माने** **(तुदा०)**

गुड माने। (शा.आ.)

❖ **गुडि [गुण्ड्] वेष्टने रक्षणे च** **(चुरा०)**

गुडि वेष्टने। (धा.प्र.)(मा.धा.)(धा.क.)

गुडि रक्षणे। (क्षी.त.)

रक्षण इत्येके प्रथमादिं द्वितीयान्तमेके पठन्ति। (मा.धा.)

गुण्ड् (इ, वा, णिच्) सक, उ। रक्षण इत्येके। प्रथमादिं द्वितीयान्तमेके पठन्ति। (धा.क.)

❖ **गुण [गुण] आमन्त्रणे** **(चुरा०)**

केत ग्राम कुण **गुण** चामन्त्रणे। चकारेण कूट इत्यपेक्षते। (धा.प्र.)

कुण **गुण** चामन्त्रणे। चकारात् केतः अपि। आमन्त्रणं गूढोक्तिः। (क्षी.त.)

सङ्केत ग्राम कुण **गुण** चामन्त्रणे। चकारेण कूट इत्यपेक्षत इति मैत्रेयः। कुणतीति शब्दोपकरणयोश्शे गुणयति। कुण गुण चामन्त्रणे चकारात्केत चेति। (मा.धा.)

सङ्केत ग्राम कुण **गुण** चामन्त्रणे। चकारेण कूट इत्यपीति मैत्रेयः। कूट, सङ्केत, ग्राम, गुण - सक, उ। केत श्रावणे निमन्त्रणे चेति केचित्। (धा.क.)

❖ **गुद [गुद्] क्रीडायामेव** **(भ्वा०)**

कुर्द खुर्द **गुद** क्रीडायामेव। क्रीडायामेव इति एवकाराद् अन्यत्र अर्थनिर्देशेषु अनियमः अनुमीयते। (धा.प्र.)

कुर्द गुर्द **गुद** क्रीडायामेव। क्रीडानियमोऽत्र धातूनाम् अनेकार्थत्वे लिङ्गम्। गुदस्थाने गुधेत्येके। उपाध्यायास्तु गुदक्रीडायां पायुविहार एव द्वौ धातू इति व्याख्यानात्, तन्नेति सभ्याः। (क्षी.त.)

कुर्द खुर्द गुर्द **गुद** क्रीडायामेव। गुदक्रीडा गुदविहार इति चरके मैत्रेयकाश्यपौ। गुद इत्यपि पृथक् धातुरिति अत्रैवकारो धातूनामनेकार्थत्वे ज्ञापक इत्युक्तम्। (मा.धा.)

कुर्द खुर्द गुर्द **गुद** क्रीडायामेव। गुदक्रीडा गुदविहार इति चरके। मैत्रेयकाश्यपौ गुद

इत्यपि पृथक् धातुरिति। अत्रैवकारो धातूनामनेकार्थत्वे ज्ञापक इत्युक्तम्। गुद्, सेट्, आ। गोद इति पचादजिति मैत्रेयः। (धा.क.)

❖ गुद [गुद्] सङ्क्लेदे (तुदा०)

गुद सङ्क्लेदे। (शा.आ.)

❖ गुद [गुद्] रोषे (क्र्या०)

गुद रोषे। (शा.आ.)

❖ गुध [गुध्] परिवेष्टने (दिवा०)

गुध परिवेष्टने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

अयं चतुर्थान्तः। रोषे अयं क्र्यादिः। (मा.धा.)

गुध्, सेट्, सक, प। (धा.क.)

❖ गुध [गुध्] रोषे (क्र्या०)

गुध रोषे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

दिवादौ गुध परिवेष्टने। (क्षी.त.)

परिवेष्टने दिवादौ। (मा.धा.)

गुध् सेट्, अक, प। (धा.क.)

❖ गुन्फ [गुन्फ्] ग्रन्थे (तुदा०)

गुफ **गुन्फ** ग्रन्थे। (धा.प्र.)(क्षी.त.)(धा.क.)

गुफ्, गुन्फ्, सेट्, सक, प। (धा.क.)

❖ गुप [गुप्] गोपने (भ्वा०)

गुप गोपकुत्सनयोः। (शा.आ.)

गुप गोपनकुत्सनयोः। (धा.प्र.)

गुप गोपने। (क्षी.त.)

गुप गोपने। गुप गोपनकुत्सनयोरिति मैत्रेयः। गुपेर्निन्दायाम्। (मा.धा.)

गुप गोपने। गुप्, सेट्, स, आ। (धा.क.)

❖ गुप [गुप्] व्याकुलत्वे (दिवा०)

गुप व्याकुलत्वे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

भ्वादौ गुप गोपने। गुपू रक्षणे गोपायति। चुरादौ भासार्थः। (क्षी.त.)

गुप, सेट्, अक, (धा.क.)

❖ गुप [गुप्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह **गुप** धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह **गुप** धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः। मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

❖ गुपू [गुप्] रक्षणे (भ्वा०)

गुपू रक्षणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

चुरादौ गुपू भासार्थः। (क्षी.त.)

अयं भाषार्थो रक्षणार्थः चुरादो गुप गोपन इति इहैवाग्रे गुप व्याकुलत्व इति दिवादौ। (मा.धा.)

गुप्(ऊ) वेट्, सक, प। अयं भाषार्थो रक्षणार्थस्य चुरादौ। गुप गोपनेऽग्रे। व्याकुलत्वे दिवादौ। (धा.क.)

❖ गुपू [गुप्] भासार्थः (चुरा०)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि **गुपू** धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः। एते सकर्मका भासार्था णिचम् उत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह **गुपू** धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः]। मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थौ येषां ते भासार्थाः। सर्वे अकर्मकाः। (धा.क.)

❖ गुफ [गुफ्] ग्रन्थे (तुदा०)

गुफ गुम्फ ग्रन्थे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

गुफ्, गुन्फ्, सेट्, सक, प। (धा.क.)

❖ गुम्फ [गुम्फ्] ग्रन्थे (तुदा०)

गुफ गुम्फ ग्रन्थे। (शा.आ.)(मा.धा.)

❖ गुरी [गुर्] उद्यमने (तुदा०)

गुरी उद्यमने। (शा.आ.)(मा.धा.)

गुरी उद्यमे। (धा.प्र.)(क्षी.त.)(धा.क.)

दीर्घोपधः अयं चुरादौ। हिंसागत्योः दिवादौ। (मा.धा.) (धा.क.)

गुर्, (ई) सेट्, अक, आ। (धा.क.)

❖ गुरी [गुर्] उद्यमे (चुरा०)

गूरी उद्यमे। उद्गूरयते। आगूरणः। तुदादौ गुरी उद्यमे। (क्षी.त.)

❖ गुर्द [गुर्द्] अव्यक्ते शब्दे (भ्वा०)

गुर्द अव्यक्ते शब्दे। (शा.आ.)

❖ गुर्द [गुर्द्] क्रीडायामेव (भ्वा०)

कुर्द **गुर्द** गुद क्रीडायामेव - क्रीडानियमोऽत्र धातूनामनेकार्थत्वे लिङ्गम्। गुर्दस्थाने दौर्गाः खुर्दं पेठुः। (क्षी.त.)

कुर्द खुर्द **गुर्द** गुद क्रीडायामेव। अत्र कैयटपुरुषकारमैत्रेयादिषु तृतीयो न पठ्यते सम्मतामोघाविस्तारचान्द्रेषु तु त्रयोपि पठन्ति। अत्रैवकारो धातूनाम् अनेकार्थत्वे ज्ञापक इत्युक्तम्। मैत्रेयसम्मतामोघाविस्तारकारादयः तु दीर्घत्वमिच्छन्ति। (मा.धा.)

कुर्द खुर्द **गुर्द** गुद क्रीडायामेव। अत्र कैयटपुरुषकारमैत्रेयादिषु तृतीयो न पठ्यते। सम्मतामोघाविस्तारचान्द्रेषु तु त्रयोऽपि पठ्यन्ते। अत्रैवकारो धातूनाम् अनेकार्थत्वे ज्ञापक इत्युक्तम्।गुर्द्, सेट्, आ। (धा.क.)

❖ गुर्द [गुर्द्] पूर्वनिकेतने (चुरा०)

गुर्द पूर्वनिकेतने। (क्षी.त.)(मा.धा.)(धा.क.)

पूर्वनिकेतनम् आद्यनिवासः। पारायणे द्वौ धातू! भ्वादौ पूर्व पूरणे। (क्षी.त.)

अत्र क्षीरस्वामी पूर्वनिकेतनमासाद्याभ्यवहारः। पारायणे द्वौ धातू इति पुरुषकारे तु पूर्वनिकेतन इति दीर्घ उक्तः। पूर्वतिस्तु शपि गुर्दस्तु कुर्दखुर्देत्यत्र प्रपञ्चितः। (मा.धा.)

गुर्द्, पुर्व, अक, उ। अत्र क्षीरस्वामी, पूर्वनिकेतनमासाद्य अभ्यवहारः। पारायणे द्वौ धातू इति। (धा.क.)

❖ **गुर्वी [गुर्व्] उद्यमने (भ्वा०)**

गुर्वी उद्यमने। (धा.प्र.) (क्षी.त.)

चुरादौ गूरी उद्यमे। (क्षी.त.) (मा.धा.) (धा.क.)

गुर्व् (ई) सेट्, अक, प। (धा.क.)

❖ **गुहू [गुह्] संवरणे (भ्वा०)**

गुहू संवरणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

अत्र संवरणं गोपनम्, आच्छादनम्, अपह्नवः।

गुह् (ऊ) वेट्, सक, उ। (धा.क.)

❖ **गू [गू] पुरीषोत्सर्गे (चुरा०)**

गू पुरिषोत्सर्गे। (क्षी.त.)

❖ **गूर [गूर्] उद्यमने (चुरा०)**

गूर उद्यमने। (धा.प्र.)(मा.धा.)(धा.क.)

क्वचिदयं लघूपध ईदिच्चेह पठ्यते। तद् आत्रेयमैत्रेयविरोधादुपेक्ष्यम्। चुरादौ दीर्घोपध इति आत्रेयः। दिवादौ च तेनायमर्थः स्फोरितः। मैत्रेयस्तु चुरादौ दीर्घोपधमनीदितं पठित्वा गूरयत इति एव उदाजहार। तथा च दैवपुरुषकारयोरयमनीदिद्दीर्घोपधः। (मा.धा.)

गूर्, अक, आ। क्वचिदयं लघूपध ईदिच्चेह पठ्यते। मैत्रेयस्तु चुरादौ दीर्घोपधम् अनीदितं पठित्वा गूरयत इत्येवोदाजहार। (धा.क.)

❖ **गूरी [गूर्] हिंसागत्योः (दिवा०)**

धूरी **गूरी** हिंसागत्योः। (धा.प्र.) (मा.धा.)(धा.क.)

गूरी उद्यमे इत्याकुस्मीयः। गुरी इति लघूपधः तुदादौ। (मा.धा.)

सर्वे ईदनुबन्धाः, सेटः, सकर्मकाः। (धा.क.)

❖ **गूर्द [गूर्द्] पूर्वनिकेतने (दिवा०)**

गूर्द पूर्वनिकेतने। गूर्द्, पुर्व, अक, उ। अत्र क्षीरस्वामी, पूर्वनिकेतनमासाद्य अभ्यवहारः। पारायणे द्वौ धातू इति। (धा.क.)

❖ **गृ [गृ] सेचने (भ्वा०)**

गृ घृ सेचने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

अन्यत्रानभिधानमित्येके। (धा.प्र.)

अमुं नियतविषयमाहुः। (क्षी.त.)

भाष्ये गृ इति दीर्घान्तस्तुदादौ निगरणार्थः। क्र्यादौ शब्दार्थः। ज्ञानार्थश्चुरादौ। (मा.धा.)

गृ, घृ, अनिट्, सक, प। गृ इति दीर्घान्तः तुदादौ निगारणार्थः, क्र्यादौ शब्दार्थः, ज्ञानार्थश्चुरादौ। (धा.क.)

❖ **गृ [गृ] क्षरणदीप्त्योः (जुहो०)**

गृ घृ क्षरणदीप्त्योः। (धा.प्र.)

❖ **गृ [गृ] विज्ञाने (चुरा०)**

गृ विज्ञाने। (मा.धा.)(धा.क.)

गृ, सक, आ। गारयते। निगरणार्थस्य। शब्दार्थस्य सेवनार्थस्य च गरतीति। (धा.क.)

❖ **गृज [गृज्] शब्दार्थः (भ्वा०)**

गज गजि **गृज** गृजि मुज मुजि शब्दार्थाः। (धा.प्र.)(मा.धा.)(धा.क.)

गज गजि **गृज** गृजि मज मुजि, शब्दार्थाः। (क्षी.त.)

गज गृजि मृज मुजि गर्ज शब्दार्थां इति दुर्गः पठति। सर्वे सेटः, अकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ **गृजि [गृञ्ज्] शब्दार्थः** **(भ्वा०)**

गज गजि गृज **गृजि** मुज मुजि शब्दार्थाः। (धा.प्र.)(मा.धा.)(धा.क.)

गज गजि गृज **गृजि** मज मुजि शब्दार्थाः। (क्षी.त.)

गज गृजि मृज मुजि गर्ज शब्दार्थां इति दुर्गः पठति। सर्वे सेटः, अकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ **गृधु [गृध्] अभिकाङ्क्षायाम्** **(दिवा०)**

गृधु अभिकाङ्क्षायाम्। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ गृधिवञ्च्योः प्रलम्भने। (क्षी.त.)

गृध् (उ) सेट्, सक, प। (धा.क.)

❖ **गृधु [गृध्] अभिकाङ्क्षायाम्** **(स्वा०)**

गृधु अभिकाङ्क्षायाम्। (शा.आ.)

❖ **गृह [गृह] ग्रहणे** **(चुरा०)**

गृह ग्रहणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

गर्हेराधृषीयस्य निन्दार्थस्य। (मा.धा.)

गृह, सक, आ। इत्युपादानार्थः क्र्यादौ। गर्हतीति निन्दार्थस्य। (धा.क.)

❖ **गृहू [गृह्] ग्रहणे** **(भ्वा०)**

गृहू ग्रहणे। (धा.प्र.)(मा.धा.)(धा.क.)

अयं क्वचित्कोषे ग्रह अदुपधः पठ्यते तदनार्षः। यदाह देवः -

ण्यन्तस्य ग्रहणे ग्रहेर्ग्रहयते तत्राऽनदन्ताद्गृहेः।
भूवादेः शपि गर्हते श्नि तु पदे गृह्णात्यगृहीत च।

अत्र पुरुषकारे गृहेः इत्यनेनैव पूर्वस्माद् अदन्तत्वमात्रं विशेषः, गृहित्वं चाविशिष्टमिति दर्शयतां मन्दानां ग्रहपाठाशङ्का निरवकाशतां नीता। ग्लहू इति स्वामिकाश्यपसम्मताकारादयः पठन्ति तदपि ग्राह्यम्। (मा.धा.)

गृह् (ऊ) वेट्, सक, आ। (धा.क.)

❖ **गॄ [गॄ] निगरणे** **(तुदा०)**

गॄ निगरणे। (शा.आ.)(धा.प्र.) (क्षी. त.) (मा.धा.) (धा.क.)

निगरतीत्यादि समवपूर्ववत्। (शा.आ.)

निगरणं गिलनम्। (क्षी.त.)

अयं शब्दार्थः क्र्यादौ ज्ञानार्थश्चुरादौ। (मा.धा.)

गॄ, सेट्, सक, प। शब्दार्थः क्र्यादौ। ज्ञानार्थः चुरादौ। (धा.क.)

❖ **गॄ [गॄ] शब्दे** **(क्र्या०)**

गॄ शब्दे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

तुदादौ गॄ निगरणे। (क्षी.त.)

गॄ, सेट्, अक, प। (धा.क.)

❖ **गॄ [गॄ] विज्ञाने** **(चुरा०)**

गॄ विज्ञाने। (धा.प्र.) (क्षी.त.)

तुदादौ निगरणे। क्र्यादौ शब्दे । (क्षी.त.)

❖ **गेपृ [गेप्] गतौ** **(भ्वा०)**

केपृ **गेपृ** ग्लेपृ च। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

ग्लेपृ धातुः पुनः पठ्यते। दैन्यादर्थान्तरार्थम्। (धा.प्र.)

चकारात्कम्पने, गतौ च सूत्रविभागात्। (क्षी.त.)

चकारात् कम्पने गतौ च सूत्रविभागादिति स्वामी। मैत्रेयस्तु चकारम् अन्तरेण पठित्वा कम्पन इत्यपेक्षत इत्याह। (मा.धा.)

चकारात् कम्पने गतौ च। सूत्रविभागादिति स्वामी। मैत्रेयस्तु चकारमन्तरेण पठित्वा कम्पन इत्यपेक्षत इत्याह। केप्, गेप्, ग्लेप् (ऋ), सेट्, सक, आ। (धा.क.)

❖ गेवृ [गेव्] सेवने (भ्वा०)

शेवृ षेवृ **गेवृ** ग्लेवृ पेवृ मेवृ म्लेवृ सेचने। सेवृ खेवृ म्लेवृ इत्येके। (धा.प्र.)

षेवृ **गेवृ** ग्लेवृ म्लेवृ सेचने। (मा.धा.)

षेवृ **गेवृ** ग्लेवृ पेवृ म्लेवृ सेवने। सेव्, गेव्, ग्लेव्, पेव्, म्लेव्, (ऋ) सेट्, सक, आ। (धा.क.)

❖ गेषृ [गेष्] अन्विच्छायाम् (भ्वा०)

गेषृ अन्विच्छायाम्। (क्षी.त.)(मा.धा.)(धा.क.)

अन्विच्छा गवेषणा। (क्षी.त.)

ग्लेषृ इति मैत्रेयः। अन्विच्छान्वेषणम्। ऋदित्त्वान्नोपधाह्रस्वः। (मा.धा.)(धा.क.)

गेष् (ऋ) सेट्, सक, आ। (धा.क.)

❖ गै [गै] शब्दे (भ्वा०)

कै **गै** रै शब्दे। (शा.आ.)

कै **गै** शब्दे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वैचित्र्यार्थो वास्य पृथङ् निर्देशः। (धा.प्र.)

एतौ शब्दविशेषरूढौ। (क्षी.त.)

इह शब्दः शब्दविशेषः उक्तं ह्येवं स्वामिना। (मा.धा.)

कै गै रै शब्दे इति दुर्गः पठति। इह शब्दः शब्दविशेषः। कै, गै, रै, अनिट्, अक, प। (धा.क.)

❖ गोम [गोम] उपलेपने (चुरा०)

गोम उपलेपने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

गोम, सक, उ। (धा.क.)

❖ गोष्ट [गोष्ट्] सङ्घाते (भ्वा०)

गोष्ट लोष्ट सङ्घाते। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

गोष्ट्, लोष्ट्, सेट्, अक, आ। गोष्ट, लोष्ट, हुडि, पिढि, सङ्घाते इति दुर्गः पठति। (धा.क.)

❖ ग्रञ्चु [ग्रुञ्च्]गत्यर्थः (भ्वा०)

वञ्चु चञ्चु तञ्चु त्वञ्चु **ग्रञ्चु** ग्लञ्चु म्रञ्चु म्रुचु म्लुचु गत्यर्थाः। (शा.आ.)

❖ ग्रथ [ग्रथ] कौटिल्ये (भ्वा०)

ग्रथ ग्रन्थ कौटिल्ये। (शा.आ.)

❖ ग्रथि [ग्रन्थ्] कौटिल्ये (भ्वा०)

ग्रथि कौटिल्ये। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

कौटिल्यं कुसृतिर्बन्धश्च। (क्षी.त.)

कौटिल्यं शाठ्यं वक्रता वा ग्रन्थते। केचिद् इमावनिदितौ सानुषङ्गौ षठन्तः। तथा सानुषङ्गापाठः कशिकावृत्तिकारस्य अपि अनभिमतः यतः [श्रन्थिग्रन्थिदम्भिस्वञ्जीनाम्]

इति लिटः कित्त्वविधौ श्रथतुर्ग्रथतुरिति परस्मैपदिनौ एव उदाजहार। ग्रन्थ सन्दर्भे इति क्र्यादौ युजादौ च। ग्रन्थ बन्धन इति च युजादौ। (मा.धा.)

कौटिल्यं शाठ्यं, वक्रता वा। ग्रन्थ्, (इ) [वङ्क (इ) दुर्गः] सेट्, अक, आ। अत्र तरङ्गिणी इदनुबन्धादनुनासिकलोपाभावात् श्रथे, ग्रेथे इति उदाहरन्, वृत्तिकारो भ्रान्त इति, अत्र वृत्तिकार इति धातुवृत्तिकृदुच्यते। तथा सानुषङ्गपाठः काशिकावृत्तिकारस्य अपि अनभिमतः। यतः श्रन्थिग्रन्थिदम्भिस्वञ्जीनाम् इति लिटः कित्त्वविधौ श्रथतुर्ग्रथतुरिति परस्मैपदिनौ एव उदाजहार। ग्रन्थ सन्दर्भे इति क्र्यादौ युजादौ च। ग्रन्थ बन्धन इति च युजादौ। चन्द्रगोमी तु ग्रथ ग्रथि कौटिल्ये इति पठित्वा ग्रथते, ग्रन्थते; अनेकार्थत्वात् सन्निहितार्थत्वात् च अनयोरिति ग्रथितं ग्रन्थितमिति उदाहृतवान् इति सुभूतिरेवं व्याचकार। दुर्गोऽत्र ग्रथिना सह वकिं पठति। (धा.क.)

❖ ग्रन्थ [ग्रन्थ्] सन्दर्भे (क्र्या०)

श्रन्थ ग्रन्थ सन्दर्भे। (शा.आ.)(धा.प्र.)

ग्रन्थ सन्दर्भे (क्षी.त.)(मा.धा.) (धा.क.)

सन्दर्भो बन्धनम्। (क्षी.त.)

न्यासे ग्रन्थ सन्दर्भे इति चुरादावित्युक्त्वा क्र्यादावपीत्युक्तम्। अन्ये तु श्रन्थ ग्रन्थ सन्दर्भे इति क्र्यादौ पठन्ति तथा च सन्दर्भे ग्रन्थनक्रियायां श्रन्थिग्रन्थिधातू वर्तेते इति क्षीरस्वामीत्युक्तम् ग्रन्थिः। (मा.धा.)

ग्रन्थ, सेट्, सक, प। (धा.क.)

❖ ग्रन्थ [ग्रन्थ्] बन्धने (चुरा०)

ग्रन्थ बन्धने (धा.प्र.)(मा.धा.)(धा.क.)

ग्रन्थ्, सक, उ। (धा.क.)

❖ ग्रन्थ [ग्रन्थ्] सन्दर्भे (चुरा०)

श्रन्थ ग्रन्थ सन्दर्भे (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

सन्दर्भो बन्धनम्। भ्वादौ ग्रथि कौटिल्ये। (क्षी.त.)

इति शैथिल्यकौटिल्ययोः शपि। (मा.धा.)

श्रन्थ्, ग्रन्थ् सक, उ। (धा.क.)

❖ ग्रस [ग्रस्] ग्रहणे (चुरा०)

ग्रस ग्रहणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

ग्रस्, सक, उ। (धा.क.)

❖ ग्रसु [ग्रस्] अदने (भ्वा०)

ग्रसु ग्लसु अदने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

निगरणार्थत्वान्नित्यं परस्मैपदम् प्रयोज्यस्य कर्मत्वञ्च। (मा.धा.)

ग्रस्, ग्लस् (उ) सेट्, सक, प। (धा.क.)

❖ ग्रह [ग्रह्] उपादाने (क्र्या०)

ग्रह उपादाने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

उदात्तः स्वरितेत्। उपादानं स्वीकारः। (क्षी.त.)

उदात्तः स्वरितेत्। (मा.धा.)

उपादानं ग्रहणम्। ग्रह्, सेट्, सक, उ। आ - आग्रहः। अति - अतिक्रम्य ग्रहणम्। अनु -

अनुग्रहः। अव - अनादरः। नि - निग्रहः, पीडनम्। निगृहीतः। अव - अवग्रहः। अभि - अपचिकीर्षा। उद् - उद्यमः, उद्ग्रहः। परि - परिग्रहः, पत्नी, परिकरः, आदानम्, स्वीकारः। प्रति - प्रतिग्रहः, स्वीकारः, लाभः। वि - विग्रहः, सम्प्रहारः, व्यासः। सम् - सङ्ग्रहः। (धा.क.)

❖ ग्राम [ग्राम] आमन्त्रणे (चुरा०)

केत **ग्राम** कुण गुण चामन्त्रणे। चकारेण कूट इत्यपेक्षते। (धा.प्र.)

सङ्केत **ग्राम** कुण गुण चामन्त्रणे। चकारेण कूट इत्यपेक्षत इति मैत्रेयः। (मा.धा.)

सङ्केत **ग्राम** कुण गुण चामन्त्रणे। ग्राम सक, उ। (धा.क.)

❖ ग्रुचु [ग्रुच्] स्तेयकरणे (भ्वा०)

ग्रुचु ग्लुचु कुजु खुजु स्तेयकरणे। (धा.प्र.) (मा.धा.) (धा.क.)

ग्रुचिमपि केचित्पठन्ति। (मा.धा.) (धा.क.)

स्तेयकरणं चौर्यम्। सर्वेऽप्युदनुबन्धाः, सेटः। (धा.क.)

❖ ग्रुन्चु [ग्रुञ्च्] गत्यर्थः (भ्वा०)

वन्चु चन्चु तन्चु त्वन्चु म्रन्चु म्लुन्चु **ग्रुन्चु** ग्लुन्चु म्रुचु म्लुचु गत्यर्थाः। सर्वे उदनुबन्धाः, सेटः, सकर्म्मकाश्च। गत्यर्था इत्यत्र गतौ इति दुर्गः पठति। (धा.क.)

❖ ग्लञ्चु [ग्लुञ्च्]गत्यर्थः (भ्वा०)

वञ्चु चञ्चु तञ्चु त्वञ्चु ग्रञ्चु **ग्लञ्चु** स्रञ्चु म्रुचु म्लुचु गत्यर्थाः। (शा.आ.)

❖ ग्लुन्च [ग्लुञ्च्] गत्यर्थः (भ्वा०)

ग्लुन्च षस्ज गतौ। ग्लुन्च् सेट् सक, प। (धा.क.)

❖ ग्लुन्चु [ग्लुञ्च्] गत्यर्थः (भ्वा०)

ग्लुञ्चु षस्ज गतौ। भाष्यकारवचनादस्य आत्मनेपदम्। (धा.प्र.)

ग्लुन्चु षस्ज गतौ। (क्षी.त.)

वन्चु चन्चु तन्चु त्वन्चु म्रन्चु म्लुन्चु ग्रुन्चु **ग्लुन्चु** म्रुचु म्लुचु गत्यर्थाः। सर्वे उदनुबन्धाः, सेटः, सकर्म्मकाश्च। गत्यर्था इत्यत्र गतौ इति दुर्गः पठति। (धा.क.)

❖ ग्लसु [ग्लस्] अदने (भ्वा०)

ग्रसु **ग्लसु** अदने (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

ग्रस्, ग्लस् (उ) सेट्, सक, प। (धा.क.)

❖ ग्लहू [ग्लह्] ग्रहणे (भ्वा०)

ग्लह इत्यप्येके। (धा.प्र.)

ग्लहू ग्रहणे। गृहू इति चन्द्रदुर्गौ। (चा.धा.) (क्षी.त.)

❖ ग्लास्नावनुमवश्च (भ्वा०)

ग्लास्नावनुवमाञ्च। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

एषाञ्चानुपसर्गाणां मित्सञ्ज्ञा वा स्यात्। उभयत्र विभाषेयम्। ग्ला स्ना इत्येतयोरप्राप्ते वनुवम्योः प्राप्ते। तत्र वनतेर्वनु च नोच्यते इत्यनेन प्राप्ता वमेश्चामन्तत्वात्। (धा.प्र.)

आद्ययोरप्राप्तौ विकल्पः, अन्त्ययोः प्राप्तौ। एषामनुपसर्गात् मित्त्वं वा। (क्षी.त.)

अनुपसर्गाद्वेति वर्त्तते। अत्रापि पूर्ववत् क्वचित् ग्लास्नावनुवमश्चेति प्रथमान्तं पठ्यते। ग्लै हर्षक्षये। अत्र स्नेति ष्णै शौचवेष्टनयोरिति वक्ष्यमाणस्य ष्णा शौचे इत्यादादिकस्य च। श्रा पाक इत्यत्रोक्तन्यायेन वनु च नोच्यत इति इह पठितो वनतिः अनन्तरस्य विधिरिति न्यायादनूद्यते। न तु तानादिको वनोतिः डुवम उद्गिरणे अमन्तः तदयं वन्वमोः प्राप्ते ग्लास्नोरप्राप्ते इत्युभयत्र विभाषेयम्। (मा.धा.)

अनुपसर्गाद्वेति वर्त्तते, पूर्ववद्व्याख्यानमत्रापि। ग्लै हर्षक्षये। अत्र स्नेति ष्णै शौचवेष्टनयोरिति वक्ष्यमाणस्य ष्णा शौच इत्यादादिकस्य च, श्रा पाक इत्यत्रोक्तन्यायेन, वनु च नोच्यत इति इह पठितो वनितः, अनन्तरस्य विधिरिति न्यायाद् अनूद्यते, न तु तानादिको वनोतिः। (धा.क.)

❖ **ग्लुचु [ग्लुच्] स्तेयकरणे** **(भ्वा०)**

ग्रुचु **ग्लुचु** कुजु खुजु स्तेयकरणे। (धा.प्र.) (मा.धा.) (धा.क.)

ग्रुचिमपि केचित्पठन्ति। (मा.धा.) (धा.क.)

स्तेयकरणं चौर्यम्। सर्वेऽप्युदनुबन्धाः, सेटः, सकर्मकाश्च। (धा.क.)

❖ **ग्रुञ्चु [ग्रुञ्च्]गत्यर्थः** **(भ्वा०)**

वञ्चु चञ्चु तञ्चु त्वञ्चु **ग्रञ्चु** ग्लञ्चु स्रञ्चु म्रुचु म्लुचु गत्यर्थाः। (शा.आ.)

❖ **ग्लुञ्चु [ग्लुञ्च्] गतौ** **(भ्वा०)**

ग्लुञ्चु षस्ज गतौ। (धा.प्र.)(धा.क.)(मा.धा.)

भाष्यकारवचनादस्य आत्मनेपदम्। (धा.प्र.)

भाष्यप्रयोगाद् अयमात्मनेपद्यपि। अतः अस्य आत्मनेपदं दूषयन्तो वर्द्धमानक्षीरस्वाम्यादय एव दुष्टाः। (मा.धा.)

ग्लुन्च्, सेट्, सक, प। (धा.क.)

❖ **ग्लेपृ [ग्लेप्] दैन्ये** **(भ्वा०)**

ग्लेपृ दैन्ये। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

ग्लेप् (ऋ) सेट्, अक, आ। (धा.क.)

❖ **ग्लेपृ [ग्लेप्] कम्पने गतौ** **(भ्वा०)**

केपृ गेपृ **ग्लेपृ** च। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

ग्लेपृ धातुः पुनः पठ्यते। दैन्यादर्थान्तरार्थम्। (धा.प्र.)

चकारात् कम्पने, गतौ च सूत्रविभागात्। (क्षी.त.)

चकारात् कम्पने गतौ च सूत्रविभागादिति स्वामी। मैत्रेयस्तु चकारम् अन्तरेण पठित्वा कम्पन इत्यपेक्षत इत्याह। (मा.धा.)

चकारात् कम्पने गतौ च सूत्रविभागादिति स्वामी। मैत्रेयस्तु चकारम् अन्तरेण पठित्वा कम्पन इत्यपेक्षत इत्याह। वेपतिना सहैषाम् अपाठः अप्रसिद्धत्वज्ञापनाय इति तस्य अभिप्रायः। ग्लेपेर्थभेदात् पुनः पाठः। केप्, गेप्, ग्लेप् (ऋ), सेट्, सक, आ। युचि वेपन इति। (धा.क.)

❖ **ग्लेवृ [ग्लेव्] सेवने** **(भ्वा०)**

शेवृ षेवृ गेवृ **ग्लेवृ** पेवृ मेवृ म्लेवृ सेचने। सेवृ खेवृ प्लेवृ इत्येके। (धा.प्र.)

एवृ शेवृ षेवृ सेवृ केवृ खेवृ **ग्लेवृ** पेवृ प्लेवृ मेवृ म्लेवृ सेवने। (क्षी.त.)

षेवृ गेवृ **ग्लेवृ** म्लेवृ सेचने। शेवृ खेवृ मेवृ इत्यप्येक इति मैत्रेयः। (मा.धा.)

षेवृ गेवृ **ग्लेवृ** पेवृ म्लेवृ सेवने। सेव्, गेव्, ग्लेव्, पेव्, म्लेव्, (ऋ) सेट्, सक, आ। (धा.क.)

❖ **ग्लेषृ [ग्लेष्] अन्विच्छायाम् (भ्वा०)**

ग्लेषृ अन्विच्छायाम्। (धा.प्र.)

❖ **ग्लै [ग्लै] हर्षक्षये (भ्वा०)**

ग्लै हर्षक्षये। (शा.आ.)(धा.प्र.)(क्षी.त.)

ग्लै म्लै हर्षक्षये। (मा.धा.) (धा.क.)

हर्षक्षयोऽत्र धात्वपचयः। (क्षी.त.)

हर्षक्षयो धातुक्षयः। (मा.धा.)

ग्लै (ग्ला) म्लै (म्ला) अनिट्, अक, प। (धा.क.)

❖ **घग्घ [घग्घ्] हसने (भ्वा०)**

घग्घ हसने। (क्षी.त.)

❖ **घघ [घघ्] हसने (भ्वा०)**

घघ हसने। (धा.प्र.)(मा.धा.)

घघ्, सेट्, अक, प। घग्घ, हसने इति दुर्गः। (धा.क.)

❖ **घट [घट्] चेष्टायाम् (भ्वा०)**

घट चेष्टायाम्। (शा.आ.)(धा.प्र.) (मा.धा.) (धा.क.)

घट सङ्घात इत्यस्य चौरादिकस्य रूपम्। (धा.प्र.)

इह येऽन्यत्र पठितास्तेषां योऽर्थ उपात्तस्तत्रैव मित्त्वम्, येऽत्रैव पठ्यन्ते तेषां सामान्येन, अनेकार्थत्वात्। **कमलवनोद्घाटनं कुर्वते ये।** (सूर्यशतकम्) **प्रविघातयिता ससुत्पतन् हरिदश्वः कमलाकरानि।** (किरात) चुरादौ चट स्फुट घट च हन्त्यर्थाश्च इति। (क्षी.त.)

एतदादयस्त्वकारान्ता उदात्ता अनुदात्तेतः षितश्च। घटादयः फणान्ता मितः। (मा.धा.)

एतदादयस्तकारान्ता उदात्ता अनुदात्तेतः षितश्च। तत्फलं घटेत्यादौ षिद्भिदादिभ्योऽङ् इत्यङ्। घटादयः फणान्ता मितः, तत्फलं तत्र तत्र दर्शयिष्यते। घट्, सेट्, अक, आ। घट सङ्घात इति चौरादिकस्य, तस्य हि मित्त्वं निषिध्यते। (धा.क.)

❖ **घट [घट्] सङ्घाते (चुरा०)**

घट सङ्घाते। (धा.प्र.)(मा.धा.)(धा.क.)

उद्घाटनम्। (धा.प्र.)

घट चेष्टायाम् अग्रे भाषार्थे भविष्यति। (मा.धा.)

घट्, अक, उ। (धा.क.)

❖ **घट [घट्] भाषार्थः (चुरा०)**

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि **घट** घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः। भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि **घट** घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः। मैत्रेयानुरोधेनायं

पाठो दण्डकस्य भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थौ येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि **घट** घटि वृहि बर्ह बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः]। मैत्रेयानुरोधेन अयं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थौ येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ **घटि [घण्ट्] भाषार्थः** **(चुरा०)**

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट **घटि** वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि **घटि** रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट **घटि** वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः। मैत्रेयानुरोधेनायं पाठो दण्डकस्य भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थौ येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट **घटि** वृहि बर्ह बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येके इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थौ येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ **घट्ट [घट्ट्] चलने** **(भ्वा०)**

घट्ट चलने। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

अयं चुरादावपि। (मा.धा.)(धा.क.)

घट्ट, सेट्, अक, आ। **घट्टं तरन्ति न शठा महदाख्यया किम्।** (धा.क.)

❖ **घट्ट [घट्ट्] चलने** **(चुरा०)**

घट्ट चलने। (धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

घट्टो नद्यवतरणस्थानम्। (क्षी.त.)

घट्ट, सक, प। (धा.क.)

❖ **घर्ब [घर्ब्] गतौ** **(भ्वा०)**

वर्फ रफ रफि अर्ब वर्ब कर्ब खर्ब गर्ब **घर्ब** शर्ब षर्ब सर्ब चर्ब भर्ब नर्ब गतौ। पञ्चदशैते गत्यर्थाः। बर्फादींस्त्रीन् हिंसार्थे कण्ठः पठति। गर्वेत्यनार्षः, ओष्ठ्योऽत्र बः, पवर्गप्रस्तावात्। अर्बेत्यादौ

रेफस्थाने नकारं कौशिको मन्यते। एकः शर्बस्तालव्यादिः, अपरः षोपदेशः, अन्यो दन्त्यादिः। (क्षी.त.)

❖ घसि [घंस्] करणे (भ्वा०)

घसि करणे। चन्द्रो घषि इत्याह। घुषि कान्तिकरण इति दुर्गः। (क्षी.त.)

❖ घस्लृ [घस्] अदने (भ्वा०)

घस्लृ अदने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

इति केचित् घञ् घासः। (क्षी.त.)

अयं न सार्वत्रिकः। (मा.धा.)(धा.क.)

घस् (लृ) अनिट्, सक, प। (धा.क.)

❖ घिणि [घिण्ण्] ग्रहणे (भ्वा०)

घिणि घुणि घृणि ग्रहणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

घिण्, घुण्, घृण् सेट, सक, आ। (धा.क.)

❖ घुङ् [घु] शब्दे (भ्वा०)

घुङ् कुङ् उङ् ङुङ् शब्दे। (धा.प्र.) (धा.क.)

घुङ् कुङ् उङ् शब्दे। (क्षी.त.) (मा.धा.)

ङुङ् इति च दुर्गः। खुङ् चेत्येके। (क्षी.त.)

अयमव्यक्तशब्द इति न्यासे तथा देवः च अव्यक्तशब्दे। अयम् आर्त्तशब्दे तुदादौ। शब्दमात्रे अदादौ। (मा.धा.)

कु, घु, उ, ङु, (ङ्) अनिट्, अक, आ। (धा.क.)

❖ घुट [घुट्] परिवर्तने (भ्वा०)

घुट पुट परिवर्तने। (शा.आ.)

घुट परिवर्तने। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

अयं तुदादौ च। (मा.धा.)

अयं चुरादौ च। (धा.क.)

❖ घुट [घुट्] प्रतिघाते (तुदा०)

घुट प्रतीघाते। (शा.आ.)

घुट प्रतिघाते। (धा.प्र.)(मा.धा.)(धा.क.)

अयं द्युतादावात्मनेपदी गतः। (मा.धा.)(धा.क.)

घुट्, सेट्, सक, प। (धा.क.)

❖ घुण [घुण्] भ्रमणे (भ्वा०)

घुण घूर्ण भ्रमणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

तुदादौ परस्मैपदिनौ स्तः। (क्षी.त.)

इमौ तुदादौ परस्मैपदिनौ। (मा.धा.)

घुण्, घूर्ण, सेट्, सक, आ। (धा.क.)

घूर्णते शात्रवस्यापि यद्गुणश्रवणाच्छिरः।
मित्रोदासीनभूतानां घूर्णतीति किमद्भुतम्॥

(कवि०) इमौ तुदादौ परस्मैपदिनौ। (धा.क.)

❖ घुण [घुण्] भ्रमणे (तुदा०)

घुण घूर्ण भ्रमणे। (धा.प्र.)(शा.आ.) (क्षी.त.)(मा.धा.)(धा.क.)

घुण्, घुर्ण्, सेट्, अक, प। (धा.क.)

❖ घुणि [घुण्ण्] ग्रहणे (भ्वा०)

घिणि **घुणि** घृणि ग्रहणे। (धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

घिण्, घुण्, घृण् सेट, सक, आ। (धा.क.)

❖ घुर [घुर्] भीमार्थशब्दयोः (तुदा०)

घुर भीमार्थशब्दयोः। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

भीमार्त्तशब्दयोरिति कातन्त्रगणपाठः। घुर्, सेट्, अक, प। (धा.क.)

❖ **घुषि [घुंष्] कान्तिकरणे (भ्वा०)**

उत्तरधातुसाधर्म्यानुरोधेनायमिह निर्दिश्यते। (धा.प्र.)(मा.धा.)(धा.क.)

घषीत्यदुपधं पेठतुः चन्द्रकाश्यपौ। स्वामी घसेति दन्त्यान्तम् अदुपधं पपाठ। यथा वयं तथा दैवमैत्रेयदुर्गाः षकारान्तोप्ययम् घुषिः अविशब्दने इत्युत्तरधातुसाम्यादिह पठितः। (मा.धा.)

घुन्ष्, सेट्, सक, आ। (धा.क.)

❖ **घुषिर् [घुष्] अविशब्दने (भ्वा०)**

घुषिर् शब्दार्थः। (धा.प्र.) (क्षी.त.)

घुषिर् शब्दार्थे। (शा.आ.)

घुषिर् अविशब्दने। (मा.धा.)(धा.क.)

घुषिर् अविशब्दन इति चुरादौ। (धा.प्र.)

चुरादौ घुषिर् विशब्दने। (क्षी.त.)

उदात्तधातुसाम्याद् इह पठितः। घुषिः अविशब्दनार्थः। विशब्दनं प्रतिज्ञानम्। तच्च शब्देन स्वाभिप्रायप्रकाशनम् इति न्यासे। अस्मादन्यस्मिन्नर्थे यथाप्रयोगमयं धातुर्वर्त्तत इति पुरुषकारे। सर्वत्र क्षीरस्वामिधनपालभागवृत्तिकारा घुषिं शब्दार्थं पेठुः। चन्द्रदुर्गौ त्वर्थशब्दम् अपहायशब्द इत्येवं पठेतुः। घुष शब्द इति पठन् शाकटायनः अपि अत्रैव अनुकूलः। घुषिरविशब्दार्थ इति मैत्रेयादिपाठो ज्यायान्। घुषिरविशब्दन इति चुरादौ। (मा.धा.)

उदात्तधातुसाम्यादिह पठितः। घुषाद्यन्ता उदात्ता अनुदात्तेतः। घुषिर् अविशब्दनार्थः। इतः अर्हत्यन्ता उदात्ता उदात्तेतः। विशब्दनं प्रतिज्ञानं तच्च शब्देन स्वाभिप्रायप्रकाशनमिति न्यासे। अस्मादन्यस्मिन्नर्थे यथाप्रयोगमयं धातुर्वर्त्तत इति पुरुषकारे। सर्वत्र क्षीस्वामिधनपालभागवृत्तिकारा घुषि शब्दार्थं पेठुः। चन्द्रदुर्गौ त्वर्थशब्दपहाय शब्द इत्येवं पेठतुः। घुष शब्द इति पठन् शाकटायनः अपि अत्र एवानुकूलः। यदि शब्द इत्यर्थः। स्यात्, तर्हि घुषिरविशब्दन इति इड्प्रतिषेधेति। लघु घुषिरविशब्द इत्येवं वाच्यं स्यादिति घुषिरविशब्दार्थ इति मैत्रेयादिपाठो ज्यायान्। घुष्(इर्) सेट्, अक, प। चुरादौ चायम्। (धा.क.)

❖ **घुषिर् [घुष्] विशब्दने (चुरा०)**

घुषिर् अविशब्दने। (धा.प्र.)

घुषिर् विशब्दने। (क्षी.त.)(मा.धा.)(धा.क.)

विशब्दनं विशिष्टशब्दकरणम्। अविशब्दन इत्येके। अपघोषयति पापम्, अपह्नुत इत्यर्थः।

घुष विशब्दने इति कौशिकः। (क्षी.त.)

विशब्दनं प्रतिज्ञा। (मा.धा.) (धा.क.)

❖ **घूरी [घूर्] हिंसावयोहान्योः (दिवा०)**

घूरी जूरी हिंसावयोहान्योः। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

सर्वे ईदनुबन्धाः, सेटः, सकर्मकाः; वयोहानौ अर्थे घूरी जूरी इमौ अकर्मकौ। (धा.क.)

❖ घूर्ण [घूर्ण्] भ्रमणे (भ्वा०)

घुण घूर्ण भ्रमणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

तुदादौ परस्मैपदिनौ स्तः। (क्षी.त.)

इमौ तुदादौ परस्मैपदिनौ। (मा.धा.)

घुण्, घूर्ण्, सेट्, सक, आ।
घूर्णते शात्रवस्यापि यद्गुणश्रवणाच्छिरः।
मित्रोदासीनभूतानां घूर्णतीति किमद्भुतम्॥
(कवि०) इमौ तुदादौ परस्मैपदिनौ। (धा.क.)

❖ घुर्ण [घुर्ण्] भ्रमणे (तुदा०)

घुण घुर्ण भ्रमणे। घुण्, घुर्ण्, सेट्, अक, प। (धा.क.)

❖ घूर्ण [घूर्ण्] भ्रमणे (तुदा०)

घुण घूर्ण भ्रमणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)

❖ घृ [घृ] सेचने (भ्वा०)

गृ घृ सेचने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अभिघरतीत्याद्यूह्यम्। (शा.आ.)

अन्यत्रानभिधानमित्येके। (धा.प्र.)

अमुं नियतविषयमाहुः। चुरादौ घृ स्रावणे । ह्वादौ घृ क्षरणदीप्त्योः। (क्षी.त.)

गृ इति दीर्घान्तस्तुदादौ निगरणार्थः। क्र्यादौ शब्दार्थः ज्ञानार्थश्चुरादौ। घृ क्षरणदीप्त्योरिति जुहोत्यादौ। घृ प्रस्रवण इति चुरादौ। (मा.धा.)

गृ, घृ, अनिट्, सक, प। गृ इति दीर्घान्तः तुदादौ निगारणार्थः, क्र्यादौ शब्दार्थः, ज्ञानार्थः चुरादौ। घृ क्षरणदीप्त्योः इति जुहोत्यादौ। प्रस्रवणार्थः चुरादौ। (धा.क.)

❖ घृ [घृ] क्षरणदीप्त्योः (जुहो०)

गृ घृ क्षरणदीप्त्योः। (धा.प्र.)

घृ क्षरणदीप्त्योः। (क्षी.त.)(मा.धा.)(धा.क.)

क्षरणं स्रवणम्। (क्षी.त.)

गणान्ते छन्दसीति वक्ष्यते। तदेतदादीनां सर्वेषां शेषः। यदाह न्यासकारः ये निजादिभ्यः परे पठ्यन्ते ते सर्वे छान्दसाः। तथा हि तान्पठित्वा छन्दसीत्युक्तम् इति स्वामिकाश्यपाभ्यामपि छान्दसत्वमेवोक्तम्। भाषायामप्यस्य प्रयोगः अस्तीति ज्ञापनार्थमिति वदता भाष्यकारेण अप्ययमर्थः स्फोरितः। अत एव भाष्यविरोधात् कातन्त्रोक्तमेषां भाषाविषयत्वम् उपेक्ष्यम्। अत एव पुरुषकारेऽपि घृप्रभृतयोऽपि छान्दसा इति केचिदिति। मैत्रेयग्रन्थमुपादाय केचिच्छब्दो भाष्यानुसारिण इति व्याख्येयम् इत्युक्तम् जिघर्ति। जिघर्म्यग्निं मनसा घृतेन इत्यादि। सेचने शपि। (मा.धा.)

घृ, अनिट्, अक, प। छान्दसोऽयमिति केचित्। घृतेनाभिघारयेदित्यादि। माधवीयधातुवृत्तौ तु जिघर्त्तीति प्रदर्शितम्। (धा.क.)

❖ घृ [घृ] प्रस्रवणे (चुरा०)

घृ सम्प्रस्रवणे। (धा.प्र.)

घृ स्रावणे। घृ सृ आवरणे इति पूर्वे पेठुः, घर स्रवणे इति दुर्गः। (क्षी.त.)

घृ प्रस्रवणे। अत्र क्षीरस्वामी स्रावण इति पठित्वा अभिघारयतीत्युदाजहार। (मा.धा.)

घृ सम्प्रसवणे। घृ, अक, उ। अत्र क्षीरस्वामी स्रावण इति पठित्वा अभिघारयतीत्युदाजहार। छान्दसौ चैतावित्युक्तम्। (धा.क.)

❖ घृणि [घृण्ण्] ग्रहणे (भ्वा०)

घिणि घुणि **घृणि** ग्रहणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)(मा.धा.)

घिण्, धुण्, धृण् (इ) सेट, सक, आ। (धा.क.)

❖ घृणु [घृण्] दीप्तौ (तना०)

घृणु दीप्तौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भिदादेराकृतिगणत्वाद् अङ् शिवस्वामी वकारोपधं पपाठ। (मा.धा.)

घृण्, (उ) सेट्, अक, उ। शिवस्वामी धृवु इति वकारोपधं पपाठ। तनादय उदात्ताः स्वरितेतः। (धा.क.)

❖ घृषु [घृष्] सङ्घर्षे (भ्वा०)

घृषु सङ्घर्षे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

घर्षति संघर्षणम् घृष्टम्। (मा.धा.)

घृष् (उ) सेट्, अक, प। (धा.क.)

❖ घ्रा [घ्रा] गन्धोपादाने (भ्वा०)

घ्रा गन्धोपादाने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

घ्रा, अनिट्, सक, प। (धा.क.)

❖ ङुङ् [ङु] शब्दे (भ्वा०)

घुङ् कुङ् उङ् ङुङ् शब्दे। (धा.प्र.)

कुङ्, घुङ्, उङ्, ङुङ् शब्दे। कु, घु, उ, ङु, (ङ्) अनिट्, अक, आ। (धा.क.)

❖ चक [चक्] तृप्तौ प्रतिघाते च (भ्वा०)

चक तृप्तौ प्रतीघाते च। (धा.प्र.)

चक तृप्तौ। (क्षी.त.)(धा.क.)

चक तृप्तौ प्रतिघाते च इति घटादौ मित्। (क्षी.त.)

चक तृप्तौ प्रतिघाते च इति धनपालमैत्रेयादयः। चक तृप्तावित्येव क्षीरस्वामिशाकटायनौ। (मा.धा.)

उभयपदीति वोपदेवादयः। चक्, सेट्, अक, उ। (धा.क.)

❖ चक [चक्] तृप्तौ (भ्वा०)

चक तृप्तौ। (धा.प्र.)(मा.धा.)(धा.क.)

चक तृप्तिप्रतीघातयोः। (धा.प्र.)

चक तृप्तौ प्रतिघाते च। (क्षी.त.)

अत्र स्वामी अयं तृप्तिप्रतिघातयोः पूर्वं पठितः। तृप्तिमात्र इत्यर्थपाठं व्याख्यास्यत्। शाकटायनः तूभयत्रोभयार्थत्वमाह। घनपालस्तु पुनः यथास्वामि पठित्वा पूर्वं पठितस्यायमनुवाद इति आत्मनेपदमुदाजहार। तन्मते परस्मैपदिषु अनुवादौ व्यर्थः स्यात्। (मा.धा.)

चक तृप्तौ प्रतिघाते चेति धनपालमैत्रेयादयः। चक तृप्तावित्येव क्षीरस्वामिशाकटायनौ। चक्, सेट्, सक, आ। अयं घटादावपि। (धा.क.)

❖ चकासृ [चकास्] दीप्तौ (अदा०)

चकासृ दीप्तौ। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

चकास्, सेट्, अक, प। (धा.क.)

❖ चक्क [चक्क्] व्यथने (चुरा०)

चक्क चुक्क व्यथने। (धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

चिक्क इति च कौशिकः। चिक्कसं यवपिष्टम्, चिक्कणं सस्नेहम्। (क्षी.त.)

चिक्क इत्यपि क्वचित्पठ्यते। (मा.धा.) (धा.क.)

चक्क्, चुक्क्, सक, उ, सेट्। (धा.क.)

❖ **चक्षिङ् [चक्ष्] व्यक्तायां वाचि, दर्शने (अदा०)**

चक्षिङ् व्यक्तायां वाचि। (क्षी.त.) (मा.धा.)(धा.क.)

अयं दर्शनकर्म्मा च। यथा- विश्वारूपाभिवष्टे शवाभिः इति प्रायेणायमाङ्पूर्वः चष्टे। (मा.धा.)

अयं दर्शनकर्मा च यथा विश्वारूपाभिचष्टे शचीभिरिति प्रायेणायमाङ् पूर्वः। चक्ष्, अनिट्, सक, आ। (धा.क.)

❖ **चञ्चु [चञ्च्] गत्यर्थः (भ्वा०)**

वञ्चु **चञ्चु** तञ्चु त्वञ्चु म्रुञ्चु म्लुञ्चु म्रुचु म्लुचु गत्यर्थाः। (धा.प्र.)

वञ्चु **चञ्चु** तञ्चु त्वञ्चु ग्रञ्चु ग्लञ्चु स्रञ्चु म्रुचु म्लुचु गत्यर्थाः। ग्लुचु स्तेये। ग्लुञ्चु गतौ। (शा.आ.)

वञ्चु **चञ्चु** तञ्चु त्वञ्चु म्रुञ्चु म्लुञ्चु म्रुचु म्लुचु गत्यर्थाः। वच प्रलम्भन इति चुरादौ। तञ्चू सङ्कोचन इति रुधादौ। (मा.धा.)

❖ **चट [चट्] भेदने (चुरा०)**

चट स्फुट भेदने। (धा.प्र.)(मा.धा.) (धा.क.)

चट स्फुट भेदे। (क्षी.त.)

अन्ये तु चट इति आस्फोटने चुरादिः। केचित्तु हन्त्यर्थाः स्वार्थे चेत्याहुः। तुदादौ हिंसार्थपाठ आत्मनेपदार्थः। घट सङ्घाते इति दुर्गः। घटेर्भ्वादौ द्युतार्थस्तङर्थौ मित्सञ्ज्ञार्थश्च पाठः। चट स्फुट घट च हन्त्यर्थाः। एते हन्त्यर्थे णिचमुत्पादयन्ति। अन्ये तु चट इति आस्फोटने चुरादिरिति व्याख्यन्, अन्यत्र भ्वादिः।(क्षी.त.)

चट्, स्फुट्, सक, उ। (धा.क.)

❖ **चडि [चण्ड्] कोपे (भ्वा०)**

चडि कोपे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अयं चुरादौ च। (मा.धा.) (धा.क.)

चण्ड् (इ) सेट्, अक, आ। (धा.क.)

❖ **चडि [चण्ड्] कोपे (चुरा०)**

चडि कोपे। (धा.प्र.)(क्षी.त.)

❖ **चण [चण्] दाने (भ्वा०)**

चण शण श्रण दाने। (धा.प्र.) (धा.क.)

गताविल्येके। (धा.प्र.)

चण श्रण दाने। विश्राणनादन्यपयस्विनीनाम्। (रघु.)। (क्षी.त.)

चण्, शण्, श्रण्, सेट्, सक, प। (धा.क.)

❖ **चण [चण्] नोच्यते (भ्वा०)**

चण वन च नोच्यते। (शा.आ.)

❖ **चते [चत्] याचने (भ्वा०)**

चते चदे याचने। (शा.आ.) (धा.प्र.)

चते चदे याचने च। (मा.धा.)(धा.क.)

चते चदे च याचने। (क्षी.त.)

चकारात् परिभाषणे च। चत्, चद् (ए) सेट्, सक, उ। (धा.क.)

❖ **चदि [चन्द्] आह्लादे दीप्तौ च (भ्वा०)**

चदि आह्लादने दीप्तौ च। (धा.प्र.) (मा.धा.)(धा.क.)

चदि ह्लादने दीप्तौ च। (क्षी.त.)

चन्द्(इ) सेट्, अक, प। (धा.क.)

❖ **चदे [चद्] याचने** (भ्वा०)

चते **चदे** याचने। (शा.आ.) (धा.प्र.)

चते **चदे** याचने च। (मा.धा.)(धा.क.)

चते **चदे** च याचने। (क्षी.त.)

चकारात् परिभाषणे च। चत्, चद् (ए) सेट्, सक, उ। (धा.क.)

❖ **चन [चन्] हिंसार्थाः** (भ्वा०)

चन च। (धा.प्र.)(मा.धा.)(धा.क.)

चकारेण हिंसायामित्यपेक्षते। (धा.प्र.)

हिंसायामिति शेषः । (मा.धा.)

दन्त्यान्तोऽयम्। चकारेण पूर्वोक्तोऽर्थः हिंसा परामृश्यते। चन्, सेट्, सक, प। (धा.क.)

❖ **चनु [चन्] हिंसार्थः** (भ्वा०)

चनु च। चकाराद् हिंसार्थः। (क्षी.त.)

❖ **चन्चु [चञ्च्] गत्यर्थः** (भ्वा०)

वन्चु **चन्चु** तन्चु त्वन्चु म्रुचु म्लुचु गत्यर्थाः। (क्षी.त.)

वन्चु **चन्चु** तन्चु त्वन्चु म्रन्चु म्लुन्चु ग्रुन्चु ग्लुन्चु म्रुचु म्लुचु गत्यर्थाः। सर्वे उदनुबन्धाः, सेटः, सकर्म्मकाश्च। गत्यर्था इत्यत्र गतौ इति दुर्गः पठति। वच प्रलम्भन इति चुरादौ। तन्च् सङ्कोचन इति रुधादौ। (धा.क.)

❖ **चप [चप्] सान्त्वने** (भ्वा०)

चप सान्त्वने। (क्षी.त.)(मा.धा.) (धा.क.)

चप्, सेट्, सक, प। चपो वृक्ष इति मैत्रेयः। वेणुविशेष इति दण्डनाथः। (धा.क.)

❖ **चप [चप्] परिकल्कने** (चुरा०)

चप कल्कने। अत्रापि मिदिति वर्तते। (धा.प्र.)

❖ **चपि [चम्प्] गत्याम्** (चुरा०)

चपि गत्याम्। (धा.प्र.)(मा.धा.)(धा.क.)

चम्प् (इ, वा णिच्) सक, उ। (धा.क.)

❖ **चमु [चम्] अदने** (भ्वा०)

चमु छमु जमु झमु अदने। (धा.प्र.) (क्षी.त.)(धा.क.)

इदुपधः अयम् इत्येके। (क्षी.त.)

सर्वे उदनुबन्धाः, सेट, सकर्मकाः, परस्मैपदिनः च। (धा.क.)

❖ **चमु [चम्] भक्षणे** (स्वा०)

चमु भक्षणे।(धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

चम्, (उ) सक, सेट्, प। (धा.क.)

❖ **चय [चय्] गतौ** (भ्वा०)

अय वय षय मय **चय** दय तय नय गतौ। (शा.आ.)

अय वय यय मय **चय** तय णय गतौ। णय रक्षणे च। (धा.प्र.)

अय वय पय मय **चय** तय नय गतौ। इतो रेवृ पर्यन्ता एकोनचत्वारिशत् सेटः आत्मनेपदिनः च। (क्षी.त.)

अय वय पय मय **चय** तय णय गतौ। मैत्रेयादिभिस्तु न पठ्यते। (मा.धा.)

सर्वे सेटः, सकर्मकाः, आत्मनेपदिनश्च। (धा.क.)

❖ चर [चर्] गत्यर्थः भक्षणे च (भ्वा०)

चर गतिभक्षणयोः। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

अभ्र बभ्र मभ्र **चर** गत्यर्थाः। (क्षी.त.)

चरतिर्भक्षणेऽपि पठ्यते। (धा.प्र.)

चरतिर्भक्षणार्थोऽपि। चर सञ्चयन इति चुरादौ। (मा.धा.)

सर्वे सेटः सकर्मकाः परस्मैपदिनश्च। चरतिः मषणार्थोऽपि। चर सञ्जयन इति चुरादौ। (धा.क.)

❖ चर [चर्] संशये (चुरा०)

चर संशये। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चर असंशय इति दुर्गः। (क्षी.त.)

चर्, सक, उ। संशयो हिंसा। केचित् चर असंशये इति पठन्ति। (धा.क.)

❖ चर्करीतं (चर्करीतं च) च (अदा०)

चर्करीतञ्च। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)

परस्मैपदमदादिवच्च द्रष्टव्यम्। चर्करीतं इति यङ्लुक् पूर्वाचार्यसञ्ज्ञा। (शा.आ.)

यङ्लुगन्तस्येयं पूर्वाचार्य्यसञ्ज्ञा। यङ्लुगन्ताः चादादिकाः परस्मैपदिनो विज्ञेया इत्यर्थः। (धा.प्र.)

चर्करीतं परस्मैपदम्। (क्षी.त.)

यङ्लुगन्तमप्यदादिकं परस्मैपदि चेत्यर्थः तत्र तत्रोदाहरणेषु तथैवोदाहृतम्। (मा.धा.)

❖ चर्च [चर्च्] परिभाषणहिंसातर्जनेषु (भ्वा०)

जर्ज **चर्च** झर्झ परिभाषणसन्तर्जनयोः। चर्च झर्झ इत्येतौ तुदादावपि पठ्येते। इह तु स्वरार्थं पठितौ। अर्थानुरोधाच्चोष्मान्तवर्गेऽपि एते पठ्यन्ते। (धा.प्र.)

चर्च झर्छ झर्झ परिभाषणे। र्जत्स इति चन्द्रदुर्गौ। चर्च इत्येके। तुदादौ अप्येवम्। (क्षी.त.)

जर्ज **चर्च** झर्झ परिभाषणहिंसातर्जनेषु। बाहुलकादरः चर्चझर्झयोः तुदादौ पठिष्यमाणयोः इह पाठः स्वरार्थ इति। देवमैत्रेयपुरुषकारेषु उष्मान्तेषु पाठः अर्थानुरोधादिति च मैत्रेयः। चर्च अध्ययन इति चुरादौ। (मा.धा.)

जर्ज **चर्च** झर्झ परिभाषणहिंसातर्जनेषु। जर्ज्, चर्च्, झर्झ्, सेट्, सक, प। चर्चझर्झयोस्तुदादौ पठिष्यमाणयोरिह पाठः स्वरार्थ इति दैवमैत्रेयपुरुषकारेषु। उष्मान्तेषु पाठः अर्थानुरोधाद् इति च मैत्रेयः। चर्च अध्ययने इति चुरादौ। (धा.क.)

❖ चर्च [चर्च्] परिभाषणे (तुदा०)

जर्च **चर्च** झर्च परिभाषणसन्तर्जनयोः। (धा.प्र.)

जर्ज **चर्च** झर्झ परिभाषणभर्त्सनयोः। बाहुलकाद् रन्नन्तौ आद्यन्तावपि चान्तावित्येके। चर्चतिझर्झत्योः शपि पाठः स्वरार्थ इत्युक्तम्। (मा.धा.)

जर्ज **चर्च** झर्झ परिभाषणभर्त्सनयोः। जर्ज्, चर्च्, झर्झ् सेट्, सक, प। (धा.क.)

❖ चर्च्च [चर्च्च्] परिभाषणे (तुदा०)

जर्ज **चर्च्च**, झर्झ, परिभाषणभर्त्सनयोः। जर्ज्,

चर्च, झर्झ सेट्, सक, प। (धा.क.)

❖ चर्च [चर्च्] अध्ययने (चुरा०)

चर्च अध्ययने। (धा.प्र.)(क्षी.त.)(मा.धा.)

चर्चतीति हिंसादौ गतम्। (मा.धा.)

चर्च, सक, उ। (धा.क.)

❖ चर्छ [चर्छ्] परिभाषणे (तुदा०)

जर्ज झर्झ **चर्छ** परिभाषणे। चर्च इति च दुर्गः। (क्षी.त.)

❖ चर्ब [चर्ब्] गतौ अदने च (भ्वा०)

पर्प रफ रफि अर्ब पर्ब वर्ब मर्ब षर्ब कर्ब खर्ब गर्ब शर्ब **चर्ब** गतौ। (धा.प्र.)

वर्फ रफ रफि अर्ब वर्ब कर्ब खर्ब गर्ब घर्ब शर्ब षर्ब सर्ब **चर्ब** भर्ब नर्ब गतौ। पञ्चदशैते गत्यर्थाः। बर्फादींस्त्रीन् हिंसार्थे कण्ठः पठति। गर्वेत्यनार्षः, ओष्ठ्योऽत्र बः, पवर्गप्रस्तावात्। अर्बेत्यादौ रेफस्थाने नकारं कौशिको मन्यते। एकः शर्बस्तालव्यादिः, अपरः षोपदेशः, अन्यो दन्त्यादिः। (क्षी.त.)

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब **चर्ब** गतौ। आद्यः प्रथमान्तः। परौ द्वावपि द्वियीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। अर्वादयो नोपधा इति कौशिकः। (मा.धा.)

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब **चर्ब** गतौ। आद्यः प्रथमान्तः। परौ द्वावपि द्वितीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ चर्व [चर्व्] अदने (भ्वा०)

चर्व अदने हिंसायां च। (शा.आ.)

चर्व अदने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ चर्वयति। (क्षी.त.)

चर्व्, सेट्, सक, प। (धा.क.)

❖ चल [चल्] कम्पने (भ्वा०)

कम्पने चलिर्मित्संज्ञो भवति। (शा.आ.)

कम्पने चलिः। (धा.प्र.)(मा.धा.)

चल कम्पने। (धा.प्र.) (क्षी.त.) (धा.क.)

चल कम्पने इति ज्वलादौ। स च कम्पनेऽर्थे मित्। चलयति वातः शाखाम्। कम्पनादन्यत्र चालयति सूत्रम्। चालयति शूद्रं सार्थं वा। (धा.प्र.)

चुरादौ चल भृतौ चालयति। (क्षी.त.)

चल कम्पन इति ज्वलादौ तस्य मित्वार्थ एवानुवादः चलयति शाखाम्। कम्पयतीत्यर्थः अन्यत्र शीलं चालयति। अन्यथा करोतीत्यर्थ इति स्वामी सूत्रं चालयति। क्षिपतीत्यर्थ इति सुधाकरः। चल विसलन इति तुदादौ। चल गताविति चुरादौ। (मा.धा.)

चल्, सेट्, अक, प। अयं कम्पनार्थे घटादिः। चल विकसन इति तुदादौ। चल गताविति चुरादौ। (धा.क.)

❖ चल [चल्] विलसने (तुदा०)

चल विकसने। (धा.प्र.)

चल विलसने। (क्षी.त.)(मा.धा.)(धा.क.)

कम्पने चलिः मित्। चुरादौ चल भृतौ। (क्षी.त.)

कम्पने घटादित्वात् ज्वलादिपठितस्य अपि इह पाठे प्रयोजनमुञ्छतीत्यादिवत्स्वरः। आत्रेयस्तु तिलादित्रयमिह न पठति। (मा.धा.)

चल्, सेट्, अक, प। कम्पने घटादिः। आत्रेयस्तु तिलादित्रयमिह न पठति, ज्वलादिपठितस्य अपि इह पाठे प्रयोजनमुञ्छतीत्यादिवत् स्वरः। (धा.क.)

❖ **चल [चल्] भृतौ (चुरा०)**

चल भृतौ। (क्षी.त.)(मा.धा.)(धा.क.)

कम्पने मित्। तुदादौ चल विलसने। (क्षी.त.)

❖ **चष [चष्] भक्षणे (भ्वा०)**

चष भक्षणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

चष्, सेट्, सक, उ। (धा.क.)

❖ **चह [चह्] परिकल्कने (भ्वा०)**

चह परिकल्कने। (धा.प्र.)(मा.धा.) (धा.क.)

चह कल्कने। कल्कनं शाठ्यम्। चुरादौ मित्। (क्षी.त.)

परिकल्कलनं शाठ्यम् अयं चुरादौ मित्प्रकरणे। कथादौ च मित्सु पान्तं मैत्रेयः पठिष्यति। (मा.धा.)

परिकल्कनं शाठ्यम्। चह्, सेट्, अक, प। (धा.क.)

❖ **चह [चह्] परिकल्कने (चुरा०)**

चह परिकल्कने। (धा.प्र.)(मा.धा.)(धा.क.)

चह कल्कने। कल्कनं दम्भनम्। चप इति चन्द्रः। (क्षी.त.)

परिकल्कनं दम्भः। मित्प्रकरणे इह च पाठस्य तत्रैव प्रयोजनमुक्तम् चहतीति शपि। मैत्रेयस्तु चपेति पठित्वा चपयति इत्युदाजहार चहेत्यूष्मान्तम् एव। चन्द्रोऽपि अयं कथादावपि पठिष्यते। (मा.धा.)

परिकल्कनं दम्भः। चह, सक, उ। मित्प्रकरणे इह च पाठस्य प्रयोजनं तत्रैवोक्तम्। चहतीति भ्वादौ। चह्, अक, उ, मित्। (धा.क.)

❖ **चायृ [चाय्] पूजानिशामनयोः (भ्वा०)**

चायृ पूजानिशामनयोः। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

चाय् (ऋ) सेट्, उ। (धा.क.)

❖ **चिञ् [चि] चयने (स्वा०)**

चिञ् चयने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

चि (ञ्) अनिट्, सक, उ। अपचितिः - पूजा नमस्यापचितिः इत्यमरः। व्या-व्याप्तिः, सङ्ग्रहः, आच्छादनम्। उद्-उच्चयः सङ्ग्रहः समवायः। उप-उपचयः, वृद्धिः। नि-निचयः, व्याप्तिः। निर्-निश्चयः। परि - परिचयः, अभ्यासः, संस्तवः। प्र - प्रचयः, व्याप्तिः। वि - सञ्चयः, चन्ता, अन्वेषणम्। सम - सञ्चयः। (धा.क.)

❖ **चिञ् [चि] चयने (चुरा०)**

चिञ् चये। (क्षी.त.)(मा.धा.) (धा.क.)

चि (ञ्, णिच् वा) सक, उ, मित्। (धा.क.)

❖ चिट [चिट्] परप्रेष्ये (भ्वा०)

चिट परप्रेष्ये। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

परप्रैष्यं दासत्वम्। (क्षी.त.)

चिट्, अक, सेट्, प। (धा.क.)

❖ चित [चित्] सञ्चेतने (चुरा०)

चित सञ्चेतने। (धा.प्र.)(क्षी.त.)(मा.धा.)

भ्वादौ चिती सञ्ज्ञाने । (क्षी.त.)

सञ्चेतनं सञ्ज्ञानम् । (मा.धा.)

सञ्चेतनं सञ्ज्ञानम्। चि, अक, आ। । (धा.क.)

❖ चिति [चिन्त्] स्मृत्याम् (चुरा०)

चिति स्मृत्याम् (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

चिन्त् (इ) सक, वा णिच्, उ। (धा.क.)

❖ चिती [चित्] सञ्ज्ञाने (भ्वा०)

चिती सञ्ज्ञाने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

सञ्ज्ञानं संवित्तिः। चुरादौ चित सञ्चेतने इत्यात्मनेपदी। (क्षी.त.)

सञ्ज्ञानं चैतन्यम्। चुरादौ चित सञ्चेतन इति तत्रैवात्मनेपदी। (मा.धा.)

सञ्ज्ञानं चैतन्यम्। निद्राविगमो वा। चित्, (ई) सेट्, प। (धा.क.)

❖ चित्र [चित्र्] चित्रीकरणे कदाचिद्दर्शने (चुरा०)

चित्र चित्रीकरणे। चित्रयति आलेख्यं करोति इत्यर्थः। चित्रं करोति चित्रीयत इत्याश्चर्य्यं करोतीत्यर्थः। कदाचिद्दर्शने च। चित्रयति चक्षुः। चित्रयति वक्षः। (धा.प्र.)

चित्र चैत्रस्य करणे। चित्रयति, वैचित्र्यं सम्पादयतीत्यर्थः। विचित्रितम्, विचित्रणा चित्रस्य आलेख्यस्य करण इति दौर्गाः। कदाचिद्दर्शने। स एव चित्रशब्दः कदाचिद्दर्शने आकस्मिकोत्पत्तौ चुरादिः। चित्रयति, अद्भुतं पश्यतीत्यर्थः। चन्द्रः कदाचिदिति धातुं मत्त्वा अनदन्तत्त्वात् नापाठीत्। (क्षी.त.)

चित्र चित्रकरणे। चित्रकरणमालेख्यकरणम् इत्यात्रेयः। चित्र आलेख्यकरण इत्येव दुर्गः। कदाचिद्दर्शने। चित्र इत्ययं कदाचिद्दर्शने अद्भुतदर्शने णिचमुत्पादयति। (मा.धा.)

चित्र चित्रीकरणे - (कदाच्चिद्दर्शने, अद्भुतदर्शने च।) चित्रकरणमालेख्यकरणमिति मैत्रेयः, चित्र आलेख्यकरण इति दुर्ग इति माधवः। चित्र, सक, प। (धा.क.)

❖ चिरि [चिरि] हिंसायाम् (स्वा०)

रि क्षि **चिरि** जिरि दाश दृ हिंसायाम्। (धा.प्र.)

ऋक्षि **चिरि** जिरि दाश दृ हिंसायाम्। दुर्गस्तु तिक तिघ षघ ऋक्ष क्षिरि चिरि जिरि दाश दृ हिंसायाम् मित्याह। छान्दसा अमी। (क्षी.त.)

रि क्षि **चिरि** जिरि दाश दृ हिंसायाम्। अयं भाषायामपि इति आत्रेयमैत्रेयादयः। शाकटायनादयः तु छान्दसत्वमेवाहुः। दुर्गः तिक तिग षघ रि क्षि चिरि जिरि दाश् दृ दुङ् हिंसायाम्। छान्दसाश्चामी परस्मैभाषा उदात्ता इति। (मा.धा.)

रि क्षि **चिरि** जिरि दाशृ दृ हिंसायाम्। रि, क्षि, चिरि, जिरि, दाश्, दृ, सेट्, अनिट्, सक, प। अयं भाषायामपि। दुर्गस्तु - तिक, तिग, षघ रिक्षि चिरि जिरि दाश् दृ दुङ् जिघांसायामिति पठतीति माधवः। (धा.क.)

❖ चिल [चिल्] वसने (तुदा०)

चिल वसने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चिल्, सेट्, अक, प। (धा.क.)

❖ चिल्ल [चिल्ल्] शैथिल्ये भावकरणे च (भ्वा०)

चिल्ल शैथिल्ये भावकरणे च। (धा.प्र.)(मा.धा.) (धा.क.)

चिल्ल शैथिल्ये। (क्षी.त.)

चिल्ल्, सेट्, अक, प। (धा.क.)

❖ ची [ची] भाषार्थः (चुरा०)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुप् धूप विच्छ **ची** पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः]। मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ चीक [चीक्] मर्षणे (चुरा०)

चीक च। (धा.प्र.)(मा.धा.)(धा.क.)

चकारात् पूर्व्वोक्तोऽर्थ उक्तः। चीक्, सक, उ। (धा.क.)

❖ चीभृ [चीभ्] कत्थने (भ्वा०)

चीभृ च। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चात् कत्थने। (क्षी.त.)

चीभ् (ऋ) सेट्, अक, आ। (धा.क.)

❖ चीव [चीव्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ **चीव** पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः। भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ **चीव** बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ **चीव** पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः। मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

❖ चीवृ [चीव्] आदानसंवरणयोः (भ्वा०)

चीवृ आदानसंवरणयोः। (धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

चीवृ इति दुर्गः। चीवरं मुनिवासः। (क्षी.त.)

परिधाने चेति वृत्तिः अयं चुरादौ च। (मा.धा.)

चीव् (ऋ) सेट्, सक, उ। अयं चुरादौ च। (धा.क.)

❖ **चुक्क [चुक्क्] व्यथने** **(चुरा०)**

चक्क **चुक्क** व्यथने। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

कौशिकः चिक्कसं यवपिष्टम्, चिक्कणं सस्नेहम्। (क्षी.त.)

चिक्क इत्यपि क्वचित्पठ्यते। (मा.धा.) (धा.क.)

चक्क्, चुक्क्, सक, उ, सेट्। (धा.क.)

❖ **चुट [चुट्] छेदने** **(तुदा०)**

चुट छेदने। (शा.आ.)

चुट छुट छेदने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

चुट्, छुट्, सेट्, सक, प। (धा.क.)

❖ **चुट [चुट्] छेदने** **(चुरा०)**

चुट छेदने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तुदादौ चुटति। चुटि इति नन्दी- चुडि इति दुर्गः। (क्षी.त.)

चुट्, सक, उ। (धा.क.)

❖ **चुटि [चुण्ट्] अल्पीभावे** **(भ्वा०)**

चुटि अल्पीभावे। चुट इत्येके। (धा.प्र.)

❖ **चुटि [चुण्ट्] छेदने** **(चुरा०)**

चुटि छेदने। (धा.प्र.) (मा.धा.) (धा.क.)

चुडि इत्येके। (धा.प्र.)

चुण्ट, (इ, वा णिच) सक, उ। (धा.क.)

❖ **चुट्ट [चुट्ट्] अल्पीभावे** **(चुरा०)**

पुट्ट **चुट्ट** अल्पीभावे। (धा.प्र.)(मा.धा.)(धा.क.)

चुट्ट अल्पीभावे। पुट्ट इत्येके। दौर्गा द्वावपि पेठुः, चन्द्रो नैकमपि। (क्षी.त.)

पुट्ट, चुट्ट, अक, उ। (धा.क.)

❖ **चुड [चुड्] संवरणे** **(तुदा०)**

स्फुड **चुड** ब्रुड संवरणे। (मा.धा.) (धा.क.)

मैत्रेयेणैते न पठ्यन्ते आत्रेयादयस्तु पठन्ति। अत्र क्रुड भृड निमज्जन इत्येके इत्यात्रेयः। (मा.धा.)

स्फुड्, चुड्, ब्रुड्, सेट्, सक, प। अत्र क्रुड भृड निमज्जन इत्येक इत्यात्रेयः। (धा.क.)

❖ **चुडि [चुण्ड्] अल्पीभावे** **(भ्वा०)**

चुडि अल्पीभावे (क्षी.त.)(मा.धा.)(धा.क.)

चुटि इत्येके। चुट इति दुर्गः। उच्चोटनम्। (क्षी.त.)

चुण्डतीत्यादि चुटेति दुर्गः। चुटच्छेदन इति तुदादौ। चुटचुटी द्वावपि चुरादौ। (मा.धा.)

चुण्ड् (इ) सेट्, अक, प। चुटेति दुर्गः। (धा.क.)

❖ **चुड्ड [चुड्ड्] भावकरणे** **(भ्वा०)**

चुड्ड भावकरणे। (धा.प्र.)(मा.धा.)

भावकरणमभिप्रायसूचनम्। (मा.धा.)

❖ **चुद [चुद्] सञ्चोदने** **(चुरा०)**

चुद सञ्चोदने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

सञ्चोदनं प्रेरणम्। (क्षी.त.)

सञ्चोदनं प्रश्नः प्रेरणा च तत्र प्रश्ने द्विकर्मकत्वम्। (मा.धा.) (धा.क.)

देवदत्तमर्थं चोदयति। चुद्, सक, उ। (धा.क.)

❖ चुद्ड [चुड्ड] भावकरणे (भ्वा०)

चुद्ड हावकरणे। (क्षी.त.) (धा.क.)

हावो भावसूचनम्। (क्षी.त.)

दोपधोऽयम्। भावकरणम् अभिप्रायसूचनम्, हावकरणे इति दुर्गः। चुड्ड् सेट् अक, प। अयं दोपध इति। (धा.क.)

❖ चुप [चुप्] मन्दायां गतौ (भ्वा०)

चुप मन्दायां गतौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

इत्थं चात्र विपरीतार्थावगमादिममभिप्रायं न विद्मः, यथाकथञ्चित् नाम्नां व्युत्पत्तिः कार्येति चेत् तर्हि चपेः एवाप्रयासेन साध्यताम्। (क्षी.त.)

चुप्, सेट्, अक, प। (धा.क.)

❖ चुप [चुप्] स्पर्शे (भ्वा०)

चुप स्पर्शे। (शा.आ.)

❖ चुबि [चुम्ब्] वक्त्रसंयोगे (भ्वा०)

चुबि वक्त्रसंयोगे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)

चुम्ब् (इ) सेट्, सक, प। (धा.क.)

❖ चुबि [चुम्ब्] हिंसायाम् (चुरा०)

षट्ट स्फिट **चुबि** हिंसायाम्। चुभि इत्येके। (धा.प्र.)

षट्ट स्फिट्ट **चुबि** हिंसायाम्। (मा.धा.)(धा.क.)

वक्त्रसंयोगे शपि। (मा.धा.)

सट्ट, स्फिट्ट, चुम्ब (इ, वा णिच्) सक, उ(धा.क.)

❖ चुर [चुर्] स्तेये (चुरा०)

चुर स्तेये। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

अकार उच्चारणार्थः प्रयोजनान्तराभावात्। (मा.धा.)

ण्यन्ताः प्रायेणोभयपदिनः, सेटश्च। चुर्, सक। (धा.क.)

❖ चुल [चुल्] समुच्छ्राये (चुरा०)

चुल समुच्छ्राये। (धा.प्र.)(क्षी.त.)(धा.क.)

चोलस्यापत्यमपि चोलः। (क्षी.त.)

चुल्, अक, उ। चोलः अण्। चोलस्य अपत्यम् अपि - चोलः। (धा.क.)

❖ चुल्ल [चुल्ल्] भावकरणे (भ्वा०)

चुल्ल हावकरणे। (धा.प्र.) (क्षी.त.)

चुल्ल भावकरणे। (मा.धा.)(धा.क.)

अभिप्रायसूचनेऽर्थे। (क्षी.त.)

भावकरणमभिप्रायाविष्कारः। (मा.धा.)(धा.क.)

हावकरण इति दुर्गादयः, तच्च विलासः। चुल्ल्, सेट्, अक, प। चुल्लन्ति चारुनयनाश्च सह प्रियेण इति कविः। (धा.क.)

❖ चुवि [चुंव्] हिंसायाम् (चुरा०)

षट्ट स्फिट चुवि हिंसायाम्। चुभि इत्येके। (धा.प्र.)

❖ चूरी [चूर्] दाहे (दिवा०)

चूरी दाहे। (धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

गूरी उद्यमे इत्याकुस्मीयः गुरी इति लघूपधः तुदादौ। (मा.धा.)

सर्वे ईदनुबन्धाः, सेटः, सकर्मकाः; वयोहानावर्थे घूरी जूरी इमावकर्मकौ। (धा.क.)

❖ **चूर्ण [चूर्ण्] प्रेरणे (चुरा०)**

वर्ण **चूर्ण** प्रेरणे। (धा.प्र.)(मा.धा.)(धा.क.)

चूर्ण प्रेरणे। प्रेरणं दलनम्। चूर्ण पेषण इति चन्द्रः। (क्षी.त.)

एवं मैत्रेयः। अन्ये तु वर्ण वर्णने चूर्ण प्रेरण इति। (मा.धा.) (धा.क.)

वर्ण, सक, उ। (धा.क.)

❖ **चूण [चूण] सङ्कोचने (चुरा०)**

चूण सङ्कोचने। चूर्ण इत्येके, तूण इति चन्द्रः तूणीरः। (क्षी.त.)

❖ **चूर्ण [चूर्ण्] सङ्कोचने (चुरा०)**

चूर्ण सङ्कोचने। (धा.प्र.)(मा.धा.)(धा.क.)

पुनः पाठोऽर्थभेदकृतः। (मा.धा.) (धा.क.)

चूर्ण, सक, प। (धा.क.)

❖ **चूष [चूष्] पाने (भ्वा०)**

चूष पाने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

चूष्, सेट्, सक, प। (धा.क.)

❖ **चृती [चृत्] हिंसाश्रन्थनयोः (तुदा०)**

चृती हिंसायाम्। (शा.आ.)

चृती हिंसाग्रन्थयोः। (धा.प्र.)

चृती हिंसाग्रन्थनयोः। (क्षी.त.) (मा.धा.)(धा.क.)

चृत्, (ई) सेट्, सक, प। (धा.क.)

❖ **चॄ [चॄ] वयोहानौ (क्र्या०)**

चॄ इत्येके। (धा.प्र.)

❖ **चेलृ [चेल्] चलने (भ्वा०)**

वेलृ **चेलृ** केलृ खेलृ क्ष्वेलृ वेल्ल चेल्ल चलने। (धा.प्र.)

वेल्लृ **चेलृ** केलृ खेलृ क्ष्वेलृ चलने। (क्षी.त.)

वेलृ **चेलृ** खेलृ क्ष्वेलृ वेल्ल चलने। (मा.धा.)

वेलृ **चेलृ** केलृ खेलृ क्ष्वेलृ वेल्ल चलने। दुर्गादयः तु अन्यथा पठन्ति। सर्वे सेटः, अकर्मकाः, परस्मैपदिनश्च। वेलादीनां पञ्चानामृदित्वात् ह्रस्वाभावाद् अविवेलदित्यादि भवति। (धा.क.)

❖ **चेल्ल [चेल्ल्] चलने (भ्वा०)**

वेलृ चेलृ केलृ खेलृ क्ष्वेलृ वेल्ल **चेल्ल** चलने। (धा.प्र.)

❖ **चेष्ट [चेष्ट्] चेष्टायाम् (भ्वा०)**

चेष्ट चेष्टायाम्। (धा.प्र.)(शा.आ.) (क्षी.त.)(मा.धा.)(धा.क.)

अकर्मकस्त्वयम्। (मा.धा.)

चेष्ट्, सेट्, अक, आ। (धा.क.)

❖ **च्यु [च्यु] सहने हसने च (चुरा०)**

च्यु हसने। (धा.प्र.) (मा.धा.) (धा.क.)

च्यु सहने। (क्षी.त.)

च्युस सहन इत्येके, हसने च इत्येके। (क्षी.त.)

सहने चेत्येके। च्युस इत्येक इति स्वामी। (मा.धा.) (धा.क.)

च्यु, अक, उ। (धा.क.)

❖ **च्युङ् [च्यु] गतौ (भ्वा०)**

च्युङ् प्रुङ् प्लुङ् गतौ। (शा.आ.)

च्युङ् छ्युङ् ज्युङ् झ्युङ् प्रुङ् प्लुङ् गतौ। (धा.प्र.)

च्युङ् छ्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ। (क्षी.त.)

च्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ। (मा.धा.)(धा.क.)

अत्र नन्दी जु इत्युकारं पठति। तत् जु इति सौत्रो धातुरिति वृत्तिन्यासपदमञ्जर्यादिषु अभिधानाद् अनार्षमिव प्रतीयते। (मा.धा.)

च्यु, ज्यु, प्रु, प्लु (ङ्) अनिट्, सक, आ। अव - अधःपतनम्। आ-अवगाहनम्। उत् - उल्लम्फः। उप - उत्पीडनम्। परि - व्याप्तिः। विप्लवः। (धा.क.)

❖ **च्युतिर् [च्युत्] आसेचने (भ्वा०)**

च्युतिर् आसेचने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

आसेचनम् ईषत्सेकः। (क्षी.त.)

च्युतिर् क्षरणे। श्च्युतिर् क्षरण इति केचिद्रूपं तथैव। (शा.आ.)

सेचनमार्द्रीभावनम्। यदाह हरदत्तः - सिचिः कर्मस्थक्रियः आर्द्रभावनं ह्यत्र प्रधानं तदर्थत्वात् कारकव्यापारस्येति। आङीषदर्थे अभिव्याप्तौ वा। च्युत् (इर्) सेट्, सक, प। (धा.क.)

❖ **छद [छद्] अपवारणे (चुरा०)**

छद अपवारणे। (धा.प्र.)(क्षी.त.)(मा.धा.)

छद आवरणे। (धा.क.)

स्वरितेदिति मैत्रेयदेवौ। परस्मैपदी इति शाकटायनः। छदयतीत्यूर्ज्जने घटादौ छन्दयतीतीहैव संवरणे गतः। (मा.धा.)

स्वरितेदिति मैत्रेयदेवौ। परस्मैपदी इति शाकटायनः। छद, सक, उ। छदयतीत्यूर्ज्जने घटादौ। छन्दयतीतीहैव संवरणे गतः। (धा.क.)

❖ **छद [छद] संवरणे (चुरा०)**

छद संवरणे। छादयति मुखम्। छदिर् ऊर्जने मित्। आ धृषाद् वा इति। (क्षी.त.)

❖ **छदि [छन्द्] संवरणे (चुरा०)**

छदि संवरणे। (धा.प्र.)(मा.धा.)(धा.क.)

शाकटायनः तु आत्मनेपदिषु अपि अमुं पपाठ। स्वाम्यादयः छद इत्यनिदितं पठित्वा छादयति इत्युदाजह्रुः। तथा छादयतीति रूपस्य छद अपवारण इत्याधृषीयेणैव सिद्धत्वादिह पाठो व्यर्थः स्यात्। इदित्त्वाभावे छन्दः शाब्दोऽपि न स्यादिति। मैत्रेयाद्युक्त इदित्पाठ एव न्याय्यः। (मा.धा.)

छन्द् (इ, वा णिच्) सक, उ। (धा.क.)

❖ **छदिर् [छद्] ऊर्जने (भ्वा०)**

छदिरूर्जने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

छद अपवारण इति चुरादिः। तस्योर्जने बले प्राणने च मित्सञ्ज्ञार्थमिह पाठः। स्वार्थिको वा णिच्। छदन्तं प्रयुङ्क्ते इति वा। अपवारणे छादयति। ऊर्जनादन्यत्र हि छादयति। (धा.प्र.)

छद संवरणे इत्ययं चुरादिरूजने प्राणने मित् छदयत्यग्निः, स्वार्थे णिच्, छादयन्तं प्रयुङ्क्ते इति हेतौ वा। अन्यत्र छादयति गृहम्। (क्षी.त.)

ऊर्जनं प्राणनं बलनं वा। ऊर्ज बलप्राणनयोरिति

हि धातुः छदि अपवारणे इति यौजादिकस्य स्वार्थे णिजभावे ञित्वार्थोयमनुवादः। धातूनाम् अनेकार्थत्वात् ऊर्जने वृत्तिः अपवारयतीत्यर्थः। अत्र बलप्राणनयोरपि । अत्र स्वाम्यादयः छदि संवरण इति चौरादिकं छदेत्यनिदितं पठन्तः। तस्यायमूर्जने मित्वार्थोऽनुवाद इत्याहुः तदयुक्तम्। अत्र देवः छर्दि धात्वन्तरं मन्यते। यदाह -

यौ वा णावपवारणे छदत
इत्येकं द्वितीयं छदेद्
अन्यच्छादयतिच्छदेदिति पुनः
स्यादूर्जनेऽर्थे मितः। (मा.धा.)

उर्जनं प्राणनम् बलनं वा, ऊर्ज बलप्राणनयोरिति हि धातुः। छद अपवाण इति यौजादिकस्य स्वार्थे णिजभावे मित्त्वार्थः अयम् अनुवादः। धातूनामनेकार्थत्वाद् ऊर्जने वृत्तिः। छद्, अनिट्, सक, प। (धा.क.)

❖ छपि [छम्प्] गत्याम् **(चुरा०)**

छपि गत्याम्। (क्षी.त.)

❖ छमु [छम्] अदने **(भ्वा०)**

वमु छमु जमु झमु अदने। (शा.आ.)
(क्षी.त.)(धा.प्र.) (मा.धा.) (धा.क.)

इदुपधः अयम् इत्येके। (क्षी.त.)

सर्वे उदनुबन्धाः, सेट, सकर्मकाः, परस्मैपदिनः च। अत्र मैत्रेयः जिमिं केचिदिच्छन्ति। (धा.क.)

❖ छर्द [छर्द्] वमने **(चुरा०)**

छर्द वमने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

छर्दिः, इदन्तोऽपि। (क्षी.त.)

छर्द्, अ, उ। (धा.क.)

❖ छष [छष्] हिंसायाम् **(भ्वा०)**

छष हिंसायाम्। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

छष्, सेट्, सक, उ। (धा.क.)

❖ छिदिर् [छिद्] द्वैधीकरणे **(रुधा०)**

छिदिर् द्वैधीकरणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

भिदादौ (गणसूत्रम्) - छिदा द्वैधीभावे, विच्छित्तिः। (क्षी.त.)

छिदा द्वैधीकरण इति। छेद द्वैधीकरणे चुरादौ। (मा.धा.)

द्विधाकरण इति दुर्गः। छिद् (इर्) अनिट्, सक, उ। छेद द्वैधीकरणे चुरादौ। (धा.क.)

❖ छिद्र [छिद्र] कर्णभेदने **(चुरा०)**

छिद्र कर्ण भेदने। (धा.प्र.)

छिद्र कर्णभेदने। (मा.धा.) (धा.क.)

छिद कर्ण भेदे। द्वौ धातू। करणभेद इति गुप्तः। (क्षी.त.)

करणभेदन इति गुप्तः। मैत्रेयस्तु छिद्रयति कर्णयतीति कर्णमपि पृथग्धातुमुक्त्वा कर्णेन भाषयति कर्णयतीति व्याचक्षतेत्याह। (मा.धा.)

करणभेदन इति गुप्तः। छिद्र, सक, प। मैत्रेयस्तु छिद्रयतीति कर्णयतीति कर्णमपि पृथग् धातुमुक्त्वा कर्णेन भाषयति कर्णयति इति व्याचक्षत इत्याह। छिद्र कर्णभेद इति वोपदेवः।

भेद इह रन्ध्रकरणमिति। पक्षे छिद्रापयति भाण्डं बालक इति दुर्गादासः। (धा.क.)

❖ छुट [छुट्] छेदने (तुदा०)

चुट छुट छेदने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चुट्, छुट्, सेट्, सक, प। (धा.क.)

❖ छुट [छुट्] छेदने (चुरा०)

छुट छेदने। चुट इति चन्द्रः। मुट इति दुर्गः। (क्षी.त.)

❖ छुड [छुड्] संवरणे (तुदा०)

खुड छुड इत्येके। (धा.प्र.)

❖ छुप [छुप्] स्पर्शे (तुदा०)

छुप स्पर्शे। (धा.प्र.)(मा.धा.)(धा.क.)

छुप संस्पर्शे। (क्षी.त.)

द्वितीयादिरयम् केचित्प्रथमादिं पठन्ति ते भाष्यविरोधादुपेक्ष्याः। (मा.धा.)

छुप्, अनिट्, सक, प। (धा.क.)

❖ छुर [छुर्] छेदने (तुदा०)

छुर छेदने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

छुर्, सेट्, सक, प। (धा.क.)

❖ छृदी [छृद्] सन्दीपने (चुरा०)

छृदी सन्दीपने। (धा.प्र.)(मा.धा.)(धा.क.)

धनपालशाकटायनौ तु छृद इति अनिदितं पेठतुः। तत्र निष्ठायां छर्दितम् इति फले भेदः। क्षीरस्वामिनस्तु पान्तोऽयं यदाहुः। चृप छृप तृप दृप सन्दीपने सन्दीपनक्रियायाम्। चृपादयः चत्त्वारो वर्तन्त इति। (मा.धा.) (धा.क.)

छृद्, (ई) सक, उ। (धा.क.)

❖ छेद [छेद] द्वैधीकरणे (चुरा०)

छेद द्वैधीकरणे (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

छद अपवारण इति पठ्यते। (मा.धा.)

छेद, सक, प। छिनत्तीति रुधादौ। क्वचिदिह छद अपवारण इति पठ्यते। (धा.क.)

❖ छो [छो] छेदने (दिवा०)

छो छेदने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

छो, अनिट्, सक, प। (धा.क.)

❖ छयुङ् [छयु] गतौ (भ्वा०)

च्युङ् छयुङ् ज्युङ् भ्युङ् प्रुङ् प्लुङ् गतौ। (शा.आ.)

च्युङ् छयुङ् ज्युङ् झ्युङ् प्रुङ् प्लुङ् गतौ। (धा.प्र.)

च्युङ् छयुङ् ज्युङ् प्रुङ् प्लुङ् गतौ। जुङ् इति नन्दी। (क्षी.त.)

❖ जक्ष [जक्ष्] भक्षहसनयोः (अदा०)

जक्ष भक्ष हसनयोः। (शा.आ.)(मा.धा.)

जक्ष भक्षहसनयोः। (धा.प्र.)(क्षी.त.)(धा.क.)

अत्र आत्रेयः केचिद् रामायणे यक्षशब्दस्य भक्षणार्थत्वेन व्युत्पादनाद् अन्तस्थादिमाहुः। तत् चिन्त्यम् इत्युक्तम्। रामायणोक्तिस्तु यक्ष पूजायाम् इत्यस्यानेकार्थत्वाश्रयेण निर्वाह्या। (मा.धा.)

जक्ष, सेट्, प। (धा.क.)

❖ जज [जज्] युद्धे (भ्वा०)

जज जजि युद्धे। (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

जज्, जञ्ज् (इ) सेट्, अक, प। (धा.क.)

❖ जजि [जञ्ज्] युद्धे (भ्वा०)

जज **जजि** युद्धे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

जज्, जञ्ज् (इ) सेट्, अक, प। (धा.क.)

❖ जट [जट्] सङ्घाते (भ्वा०)

जट झट सङ्घाते। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

जट्, झट्, सेट्, अक, प। (धा.क.)

❖ जण [जण्] शब्दार्थः (भ्वा०)

अण रण मण क्वण **जण** भण शब्दार्थाः। (शा.आ.)

❖ जन [जन्] जनने (जुहो०)

जन जनने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

जनी प्रादुर्भावे च। (क्षी.त.)

जन्, सेट्, अ, प। छान्दसः अयम् इति परः। ऋसृवर्जं घृप्रभृतयश्छान्दसा इत्येके। (धा.क.)

❖ जनी [जन्] प्रादुर्भावे (दिवा०)

जनी प्रादुर्भावे। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

प्रादुर्भाव उत्पत्तिः। (क्षी.त.)

प्रादुर्भाव उत्पत्तिरभिव्यञ्जनायां अत्र अयम् अकर्मकः। (मा.धा.)

प्रादुर्भावो ह्यसदुत्पत्तिः। जन् (ई) सेट्, अक, आ। (धा.क.)

❖ जप [जप्] व्यक्तायां वाचि मानसे च (भ्वा०)

जप जल्प व्यक्तायां वाचि। (शा.आ.)

जप जल्प व्यक्तायां वाचि। जप मानसे च। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

मनोनिर्वर्त्ये वचने। (क्षी.त.)

रप, लप, जल्प, व्यक्तायां वाचि, जप, मानसे च इति पाठद्वयं दुर्गसम्मतम्। रप्, लप्, जल्प्, सेट्, सक, प। धात्वर्थः - कथनं मानसञ्च। मानसन्तु मनसोच्चारणम्, जिह्वोष्ठादिव्यापाररहितं शब्दार्थयोश्चिन्तनम्। (धा.क.)

❖ जभ [जभ्] गात्रविनामे (भ्वा०)

जभ जृभि गात्रविनामे। (धा.प्र.) (क्षी.त.)

जभी इत्येके। (धा.प्र.)(मा.धा.)

जब्ध्मिति मैत्रेयः। अयमेव पाठः प्रायेण वृत्तिकारस्य सम्मतः। जृभिति विनाशनार्थे चुरादौ भाषार्थोऽयं परस्मैपदिष्वपि इति केचित्। (मा.धा.)

❖ जभि [जम्भ्] नाशने (चुरा०)

जभि नाशने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

भ्वादौ जभ जभि जम्भने। चन्द्रो जभ इत्याह। (क्षी.त.)

चन्द्रस्तु जम्भेति पठित्त्वा जम्भयतीत्युदाजहार। (मा.धा.) (धा.क.)

जम्भ् (इ, वा णिच्) सक, उ। (धा.क.)

❖ जभी [जभ्] गात्रविनामे (भ्वा०)

जभी, जृभि गात्रविनामे। जभ, जृभी

गात्रविनामे इति दुर्गः पठति। गात्रविनामो गात्रशैथिल्यम्। जृम्भणम्। इति गोविन्दभट्टः। जभीत्येके, जब्धमिति मैत्रेयः। अयमेव पाठः प्रायेण वृत्तिकारस्य सम्मतः। जभ् (ई) जृन्भ् (इ) सेट्, अक, आ। जभि इति विनाशनार्थे चुरादौ। भाषार्थोऽयं परस्मैपदिषु अपि इति केचित्। रमणार्थे भ्वादौ परस्मैपदीति वोपदेवः। (धा.क.)

❖ जमु [जम्] अदने (भ्वा०)

वमु छमु **जमु** झमु अदने। (शा.आ.) (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

जिमिं केचित् पठन्ति। (धा.प्र.)

इदुपधोऽयमित्येके। (क्षी.त.)

सर्वे उदनुबन्धाः, सेट, सकर्मकाः, परस्मैपदिनः च। अत्र मैत्रेयः जिमिं केचिदिच्छन्ति।(धा.क.)

❖ जर्च [जर्च्] परिभाषणसन्तर्जनयोः (तुदा०)

जर्च चर्च झर्च परिभाषणसन्तर्जनयोः।(धा.प्र.)

❖ जर्ज [जर्ज्] परिभाषणहिंसातर्जनेषु (भ्वा०)

जर्ज चर्च झर्झ परिभाषणसन्तर्जनयोः। चर्च झर्झ इत्येतौ तुदादावपि पठ्येते। इह तु स्वरार्थं पठितौ। अर्थानुरोधाच्चोष्मान्तवर्गेऽपि एते पठ्यन्ते। (धा.प्र.)

जर्ज झर्झ चर्छ परिभाषणे। चर्च इति च दुर्गः। (क्षी.त.)

जर्ज चर्च झर्झ परिभाषणहिंसातर्जनेषु। चर्चझर्झयोः तुदादौ पठिष्यमाणयोरिह पाठः स्वरार्थ इति दैवमैत्रेयपुरुषकारेषु। उष्मान्तेषु पाठोऽर्थानुरोधादिति च मैत्रेयः। (मा.धा.) (धा.क.)

❖ जर्ज [जर्ज्] परिभाषणे (तुदा०)

जर्ज चर्च झर्झ परिभाषणभर्त्सनयोः।(मा.धा.) (धा.क.)

चर्चतिझर्झत्योः शपि पाठः स्वरार्थ इत्युक्तम्। (मा.धा.)

जर्ज्, चर्च्, झर्झ् सेट्, सक, प। (धा.क.)

जर्ज झर्झ चर्छ परिभाषणे। चर्च इति च दुर्गः। (क्षी.त.)

❖ जल [जल्] घातने (भ्वा०)

जल घातने। (मा.धा.) (धा.क.)

जल घात्ये। घात्यं जडत्वम्, अतैक्ष्ण्यमित्यर्थः। जलति। जालम्, जलम्। व्यवस्थितविकल्पत्वाद् भिन्नेऽर्थे प्रत्ययौ। चुरादौ जल अपवारणे जालयति। लडयोरेकत्वात् जडः। (क्षी.त.)

घातनं तैक्ष्ण्यमिति स्वामी। जल अपवारण इति चुरादौ। (मा.धा.)

घातनं तैक्ष्ण्यमिति स्वामी। जल् सेट्, अक, प। लडयोरेकत्वमिति जडः। जल अपवारणे इति चुरादौ। (धा.क.)

❖ जल [जल्] धान्ये (भ्वा०)

जल धान्ये। (शा.आ.)(धा.प्र.)

❖ जल [जल्] अपवारणे (चुरा०)

जल अपवारणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

लज इति नन्दी। लाजयति, लाजाः। चान्द्रा उभयमप्येतन्नेषुः, जल घात्ये, लज लाजि इत्याभ्यां सिद्धेः। ज्वलादौ जल घात्ये।(क्षी.त.)

नन्दिसम्मताकारावाद्यन्तौ विपर्यस्य पठतः - लज इति। तन्माभूदिति मैत्रेयो जालम् इत्युदाजहार। (मा.धा.)

जल, सक, उ। नन्दिसम्मताकारौ लज इति विपरीतं पठतः। (धा.क.)

❖ जल्प [जल्प्] व्यक्तायां वाचि (भ्वा०)

जप **जल्प** व्यक्तायां वाचि। (शा.आ.)

जप **जल्प** व्यक्तायां वाचि। जप मानसे च। (धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

रप लप जल्प व्यक्तायां वाचि। जप मानसे च इति पाठद्वयं दुर्गसम्मतम्। रप्, लप्, जल्प्, सेट्, सक, प। धात्वर्थः कथनं मानसञ्च। मानसन्तु मनसोच्चारणम्, जिह्वोष्ठादिव्यापाररहितं शब्दार्थयोः चिन्तनम्। (धा.क.)

❖ जष [जष्] हिंसार्थः (भ्वा०)

कष शिष **जष** झष शष वष मष रुष रिष हिंसार्थाः। (धा.प्र.)

कष शिष **जष** झष शष वष मष मुष रुष रिष हिंसार्थाः। (क्षी.त.)

कष खष शिष **जष** झष शष वष मष रुष रिष हिंसार्थाः। तृतीयषष्ठौ तालव्योष्मादी सप्तमो दन्त्योष्ठ्यादिः शिषि पिषि श्लिष्यतिपुष्पती त्विषिम् इति व्याघ्रभूतिवचनात्। हिंसार्थत्वे यदि दृश्यते तदा धातूनाम् अनेकार्थत्वाद्भविष्यति। (मा.धा.)

कष खष शिष **जष** झष शष वष मष रुष रिष हिंसार्थाः। तृतीयषष्ठो तालव्योष्मादी। सप्तमो दन्त्योष्ठादिः। सर्वे सकर्मकाः परस्मैपदिनश्च। जष् (सेट्)। हिंसार्थत्वं यदि दृश्यते, तदा धातुनामनेकार्थत्वात् भविष्यति। (धा.क.)

❖ जस [जस्] ताडने (चुरा०)

जस ताडने। जासिनिप्रहण इति चौरस्य उज्जासयति। दिवादौ जस्यति। जसि इत्युक्तम्-जंसयति। (क्षी.त.)

❖ जसि [जंस्] रक्षणे, मोक्षणे (चुरा०)

जसि रक्षणे। (धा.प्र.) (मा.धा.) (धा.क.)

जसि रक्षणे, दहि च। (क्षी.त.)

मोक्षण इति देवः। (मा.धा.)(धा.क.)

जन्स् (इ, णिच् वा) सक, उ। (धा.क.)

❖ जसु [जस्] मोक्षणे (दिवा०)

जसु मोक्षणे। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

चुरादौ जस हिंसायाम् । (क्षी.त.)

जसि रक्षणे। जसु हिंसायाम्। जसु ताडने। इति त्रयं चुरादौ। (मा.धा.)

जस् (उ) सेट्, सक, प। (धा.क.)

❖ जसु [जस्] हिंसायाम् (चुरा०)

जसु हिंसायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

जस् (उ, वा णिच्) सक, उ। (धा.क.)

❖ जसु [जस्] ताडने (चुरा०)

जसु ताडने। (धा.प्र.)(मा.धा.)(धा.क.)

अर्थभेदात् पुनः पठ्यते। दिवादेर्जसु मोक्षण इत्यस्य। (धा.प्र.)

जस् (उ) सक, प। हिंसायां पठितस्य अस्य पुनः पाठः अर्थभेदात्। नहि ताडनं हिंसा, तज्जन्यत्वात्। (धा.क.)

❖ जागृ [जागृ] निद्राक्षये (अदा०)

जागृ निद्राक्षये। (शा.आ.) (धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

निद्राक्षयो जागरणम्। जागृ, सेट्, अक, प। (धा.क.)

❖ जि [जि] जये (भ्वा०)

जि जये। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

उत्तरधातुसादृश्यानुरोधेन अजन्तः अपि अयम् अत्र निर्दिश्यते। (धा.प्र.)

जयविशेषोऽभिभव इति विशेषार्थोऽयं पुनः जयतिः पठ्यते। (धा.प्र.)

जयोऽत्रोत्कर्षः। कौशिकोऽमुं नाध्यैष्ट, जि ज्रि अभिभवे इत्यनेनैव सिद्धत्वात्। (क्षी.त.)

अत्र मैत्रेय उत्तरधातुसादृश्यानुरोधेन अजन्तः अपि अत्र निर्दिश्यत इति। इह जय उत्कर्षप्राप्तिः इति अकर्मकोयम् यस्त्वग्रेऽभिभवार्थः स सकर्मकः यदाह देवः -

जयिर्जयाभिभवयोराद्येर्थेऽसावकर्मकः।
उत्कर्षप्राप्तिराद्योर्थोऽद्वितीयेऽर्थे सकर्मकः।

इति। (मा.धा.)(धा.क.)

जि, अनिट्, प। अस्य अकर्मकत्वात् सर्वे कृती न सन्तीति तन्त्रेण अभिभवार्थे प्रदर्शयिष्यन्ते। (धा.क.)

❖ जि [जि] अभिभवे (भ्वा०)

जि ज्रि अभिभवे। (धा.प्र.)(मा.धा.)(धा.क.)

जयविशेषः अभिभव इति विशेषार्थः अयं पुनः जयतिः पठ्यते। (धा.प्र.)

जि जृ अभिभवे। ज्रि इति दुर्गः। (क्षी.त.)

अभिभवो न्यूनीकरणम्। जि जय इतिवत् पुनः पाठे फलं तत्रवोक्तम् अध्ययनात्पराजयते। पराजिरत्र न्यूनीभावे वर्त्तते। अत्रायमकर्मकः अध्येतुं ग्लायतीत्यर्थः। (मा.धा.)

अभिभवो न्यूनीकरणम्, न्यूनीभवनं च। जि, ज्रि, अनिट्, प। (धा.क.)

❖ जिरि [जिरि] हिंसायाम् (स्वा०)

रि क्षि चिरि **जिरि** दाश दृ हिंसायाम्। (धा.प्र.)

ऋक्षि चिरि **जिरि** दाश दृ हिंसायाम्। दुर्गस्तु तिक तिघ षघ ऋक्ष क्षिरि चिरि जिरि दाश दृ हिंसायाम् मित्याह। छान्दसा अमी जिघत्यादिवन्नियतविषयाः। (क्षी.त.)

रि क्षि चिरि **जिरि** दाश दृ हिंसायाम्। अयं भाषायामपीत्यात्रेयमैत्रेयादयः प्रयुज्यते च। दुर्गः तिक तिग षघ रि क्षि चिरि जिरि दाश् दृ दुङ् हिंसायाम्। छान्दसाश्चामी परस्मैभाषा उदात्ता इति। (मा.धा.)

रि क्षि चिरि **जिरि** दाशृ दृ हिंसायाम्। रि, क्षि,

चिरि, जिरि, दाश, दृ, सेट्, अनिट्, सक, प। अयं भाषायामपि। दुर्गस्तु - तिक, तिग, षघ रिक्षि चिरि जिरि दाश दृ दुङ् जिघांसायाम् इति पठतीति माधवः। (धा.क.)

❖ जिवि [जिन्व्] प्रीणनार्थः (भ्वा०)

इवि धिवि दिवि **जिवि** प्रीणनार्थे। (शा.आ.)

हिवि दिवि धिवि **जिवि** प्रीणनार्थाः (धा.प्र.) (मा.धा.)(धा.क.)

इवि **जिवि** दिवि धिवि प्रीणनार्थाः। (क्षी.त.)

अत्र केचिदाद्यमिकारादिं पठित्वा, पुनः पाठोऽर्थभेदादिति धातूनामनेकार्थत्वे तु न प्रयोजनमस्तीति आहुः। तस्मान्मैत्रेयोक्त एव हिवीति पाठो ज्यायान्। (मा.धा.)(धा.क.)

सर्वे इदनुबन्धाः, सेटः, सकर्मकाः परस्मैपदिनः च। (धा.क.)

❖ जिष [जिष्] हिंसार्थः (भ्वा०)

कष शिष **जिष** झष वष रुष ऋष हिंसार्थाः। (शा.आ.)

❖ जिषु [जिष्] सेचने (भ्वा०)

जिषु विषु मिषु सेवने (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

ह्वादौ विष्लृ व्याप्तौ। (क्षी.त.)

अयं स्पर्द्धायां तुदादौ। (मा.धा.)

सर्वे उदनुबन्धाः, सकर्मकाः परस्मैपदिनश्च। अयं स्पर्द्धायां तुदादौ। (धा.क.)

❖ जिह्वोन्मथने लडिः (भ्वा०)

जिह्वोन्मथने **लडिः**- लड विलासे इत्ययं जिह्वयोन्मथने मित्। जिह्वोन्मथनाद् अन्यत्र लाडयति बालकम्। उन्मथनम् उत्क्षेपणम्। डलयोः ऐक्याद् लालयेत् पञ्चवर्षाणि इत्यादि साधु। (धा.प्र.)

जिह्वोन्मन्थनयो**र्लडिः** - लड विलासे इत्ययं भ्वादिर्जिह्वाविषयायां क्रियायामुन्मथने च मित्। लडयति जिह्वाम्, ललयति दधि। अन्यत्र लाडयति चित्रम्, लालयति बालम्। चुरादौ लड उपसेवायाम् लाडयति। (क्षी.त.)

जिह्वोन्मथने **लडिः** - लड विलास इति पठितस्य लडधातोः मित्त्वार्थोऽयमनुवादः। जिह्वोन्मन्थने इति दुर्गः पठति। उन्मन्थनम् उत्क्षेपणम्। लड्, सेट्, सक, प। लडयति जिह्वां सर्पः। अन्यत्र डलयोरेकत्वे - लालयेत् पञ्च वर्षाणि पालयेदित्यर्थः इति मनेरमा। उन्मथनं ज्ञापनम्, अत्र मैत्रेयस्य जिह्वाया उन्मथते इति मतम्। अयमेव पक्षो गुप्तस्यापि। पुरुषकारे तु जिह्वया उन्मथने लडयति जिह्वया इति उक्तं भवति। अपरे तु जिह्वा चोन्मथनमिति समाहारद्वन्द्वं व्याचक्षते, जिह्वाशब्देन तद्विषयो व्यापार उच्यते। (धा.क.)

❖ जीव [जीव्] प्राणधारणे (भ्वा०)

जीव प्राणधारणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

प्राणलक्षणस्य कर्मणो धात्वर्थेन उपसङ्ग्रहणाद् अकर्मकोऽयम्। (मा.धा.)(धा.क.)

जीव बलप्राणधारणे इति दुर्गः पठति। जीव्,

सेट्, अक, प। (धा.क.)

❖ जुगि [जुङ्ग्] वर्जने (भ्वा०)

युगि **जुगि** रुगि वर्जने (धा.प्र.) (मा.धा.)

युगि **जुगि** वुगि वर्जने। भुगि भर्जन इत्येके। (क्षी.त.)

युगि **जुगि** वुगि [रुगि] वर्ज्जने - युङ्ग्, जुङ्ग्, वुङ्ग्, (इ) सेट्, सक, प। (धा.क.)

❖ जुचि [जुञ्च्] भाषार्थः (चुरा०)

रुठ लजि अजि दसि भृशि कशि रुसि शीक नट पुटि **जुचि** रघि अहि रहि महि भाषार्थाः - इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते। भसिपिसिलडिवृहितुडिनडि इत्यन्ये पठन्तीति स्वामी। (मा.धा.)

रुठ लजि अजि दसि भृशि रुशि रुसि शीक नट पुटि **जुचि** रघि अहि रहि महि इत्येते पञ्चदश स्वामिकाश्यपमतानुसारेण, लिख्यन्ते - भसि, पिसि, लडि, वृडि, तुडि, नडि इत्यन्ये पठन्तीति स्वामी। (धा.क.)

❖ जुड [जुड्] गतौ (तुदा०)

जुड गतौ। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

तवर्गपञ्चमान्तमेके पठन्ति दृश्यते च। दृष्टियों विश्वे मरुतो जुनन्ति इति। अयं बन्धने ङित्त्वार्थं कुटादौ पठिष्यते प्रेरणे चुरादौ। (मा.धा.)

जुड्, शुन गताविति दुर्गः। जुन इति तवर्गपञ्चमान्त इत्येके। प्रयोगश्च दृश्यते - दृष्टियों विश्वे मरुतो जुनन्तीति। जुड्, सेट्, सक, प। अयं बन्धने ङित्वार्थं कुटादौ पठिष्यते। प्रेरणे चुरादौ। (धा.क.)

❖ जुड [जुड्] बन्धने (तुदा०)

जुड बन्धने। (शा.आ.)(धा.प्र.) (मा.धा.)(धा.क.)

जुड बन्धे। जुड गतौ (दुर्गमते)। (क्षी.त.)

प्रेरणे चुरादिः । (मा.धा.)(धा.क.)

जुड्, सेट्, सक, प। (धा.क.)

❖ जुड [जुड्] निमार्जने (तुदा०)

जुड हुड निमार्जने। (शा.आ.)

❖ जुड [जुड्] प्रेरणे (चुरा०)

जुड प्रेरणे। (धा.प्र.)(मा.धा.) (धा.क.)

जुड, सक, उ। (धा.क.)

❖ जुतृ [जुत्] भासने (भ्वा०)

युतृ **जुतृ** भासने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

कौशिकस्तु ज्योतिः सिद्ध्यै जुतिं ज्युतिं मन्यते, जुतिरिति दुर्गः। (क्षी.त.)

युत्, जुत् (ऋ) सेट्, अक, आ। (धा.क.)

❖ जुन [जुन्] गतौ (तुदा०)

जुन गतौ। जुड इति दुर्गः। (क्षी.त.)

❖ जुष [जुष्] परितर्कणे परितर्पणे (चुरा०)

जुष परितर्पणे। (धा.प्र.)(क्षी.त.)

जुष परितर्कणे। (मा.धा.) (धा.क.)

तुदादौ जुषी प्रीतिसेवनयोः। (क्षी.त.)

परितर्कणमूहो हिंसा वा। परीतर्पणे परितृप्तिक्रियायाम् इति क्षीरस्वामी। प्रीतिसेवनयोर्जुषत इति तुदादौ। (मा.धा.)

परितर्कणम् ऊहः, हिंसा वा। परितर्पणे परितृप्तिक्रियायामिति क्षीरस्वामी। जुष्, सक, उ। प्रीतिसेवनयोर्जुषत इति तुदादौ। (धा.क.)

❖ **जुषी [जुष्] प्रीतिसेवनयोः** **(तुदा०)**

जुषी प्रीतिसेवनयोः। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

जुष् (ई) सेट्, सक, आ। (धा.क.)

❖ **जूरी [जूर्] हिंसावयोहान्योः** **(दिवा०)**

पूरी जूरी हिंसावयोहान्योः। (शा.आ.)

घूरी जूरी हिंसावयोहान्योः (धा.प्र.)
(क्षी.त.) (मा.धा.) (धा.क.)

सर्वे ईदनुबन्धाः, सेटः, सकर्मकाः; वयोहानावर्थे घूरी जूरी इमावकर्मकौ। जूर् जूर्यते। (धा.क.)

❖ **जूरी [जूर्] हिंसागत्योः** **(दिवा०)**

मारी जूरी हिंसागत्योः। (शा.आ.)

❖ **जूष [जूष्] हिंसायाम्** **(भ्वा०)**

जूष च। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

जुषी प्रीतिसेवनयोरिति चुरादौ। जुष परिभाषण इति युजादौ ह्रस्वोपधौ। (मा.धा.)

चकारेण पूर्वोक्तोऽर्थः परामृश्यते। जूष, सेट्, सक, प। जुषी प्रीतिसेवनयोरिति चुरादौ। जुष परिभाषण इति युजादौ ह्रस्वोपधौ। (धा.क.)

❖ **जृ [जॄ] अभिभवे** **(भ्वा०)**

जि **जृ** अभिभवे। ज्रि इति दुर्गः ज्रयति। (क्षी.त.)

❖ **जृभि [जृम्भ्] गात्रविनामे** **(भ्वा०)**

जभ **जृभि** गात्रविनामे। (शा.आ.)

जभि **जृभि** गात्रविनामे - जभीत्येके। जब्धमिति मैत्रेयः अयमेव पाठः। प्रायेण वृत्तिकारस्य सम्मतः। जृभिति विनाशनार्थे चुरादौभाषार्थोयं परस्मैपदिष्वपि इति केचित्। (मा.धा.)

जभी, **जृभि** गात्रविनामे - जभ, जृभी गात्रविनामे इति दुर्गः पठति। गात्रविनामो गात्रशैथिल्यम्। जृम्भणम्। इति गोविन्दभट्टः। जभीत्येके, जब्धमिति मैत्रेयः। अयमेव पाठः प्रायेण वृत्तिकारस्य सम्मतः। जभ् (ई) जृम्भ् (इ) सेट्, अक, आ। जभि इति विनाशनार्थे चुरादौ। भाषार्थोऽयं परस्मैपदिष्वपि इति केचित्। रमणार्थे भ्वादौ परस्मैपदीति वोपदेवः। (धा.क.)

❖ **जृष् [जृ] वयोहानौ** **(दिवा०)**

जृष् जृष् वयोहानौ। (शा आ)

❖ **जॄ [जॄ] वयोहानौ** **(क्र्या०)**

जॄ वयोहानौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

धॄ इति त्वेके इति मैत्रेयः धृणाति। (मा.धा.)

जॄ, सेट्, अक, प। (धा.क.)

❖ **जॄ [जॄ] वयोहानौ** **(चुरा०)**

जॄ वयोहानौ (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

ज्रि इति च नन्दी। (क्षी.त.)

ज्रि इति नन्दी क्रैयादिकोऽप्येवमिति। (मा.धा.)

जॄ, अक, उ। ज्वि इति नन्दी। क्र्यादिकोऽप्येष इति नन्दी। (धा.क.)

❖ **जृष् [जृ] वयोहानौ** **(दिवा०)**

जृष् **जृष्** वयोहानौ। (शा.आ.)

जॄष् झॄष् वयोहानौ। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

अयमषित् क्र्यादौ युजादौ चेति मैत्रेयादयः। (मा.धा.)

जॄ, झॄ (ष्), सेट्, अक, प। (धा.क.)

❖ जेषृ [जेष्] गतौ (भ्वा०)

जेषृ णेषृ एषृ प्रेषृ गतौ (मा.धा.)

जेषृ णेसृ एषृ ह्रेषृ गतौ। ह्रेषा वाजिध्वनौ स्त्रियाम्। (धा.प्र.)

जेषृ णेषृ एषृ ह्रेषृ गतौ। (क्षी.त.)

❖ जेहृ [जेह्] प्रयत्ने गतौ च (भ्वा०)

वेहृ **जेहृ** वाहृ प्रयत्ने। (शा.आ.)(धा.प्र.)

वेहृ **जेहृ** बाहृ प्रयत्ने। (क्षी.त.)(मा.धा.)(धा.क.)

आद्यो दन्त्यौष्ठ्यादी। अन्त्यः केवलोष्ठ्यादिः। उभावपि केवलौष्ठ्यादी इत्येके। दन्त्यौष्ठ्यादी इत्यन्ये। जेहतिर्गत्यर्थोऽपि, उक्तं च - अरेणुभिर्जेहमानम् इत्यत्र क्षुरभट्टभास्करीययोः। (मा.धा.)

वेह्, जेह्, बाह्, (ऋ) सेट्, अक, आ। (धा.क.)

❖ जै [जै] क्षये (भ्वा०)

क्षै **जै** षै क्षये। (धा.प्र.)(मा.धा.)(धा.क.)

क्षै **जै** सै क्षये। (क्षी.त.)

केचिदमुं दन्त्यादिं पठन्ति तत् षोपदेशलक्षणविरोधादुपेक्ष्यम्। (मा.धा.)

क्षै, जै, सै, अनिट्, अक, प। (धा.क.)

❖ ज्ञप [ज्ञप्] ज्ञाने ज्ञापने च (चुरा०)

ज्ञप मिच्च। (धा.प्र.)(मा.धा.)(धा.क.)

ज्ञापने मारणादिषु चाभिधानमस्यैव। तत्र घटादित्वात् सिद्ध्यति। कर्त्त्रभिप्राये अपि क्रियाफले परस्मैपदार्थं तत्राप्यस्य वृत्तिरिष्यते। (धा.प्र.)

ज्ञप मारणतोषणनिशामनेषु मिच्च। कर्त्रभिप्राय-क्रियाफले इति परस्मैपदं यथा स्यात्, ज्ञपेस्तु सौकर्यार्थम् अनुवाद इत्येके। बोधने अप्यनेकार्थत्वात् मित्वम् इत्येके। ज्ञप्तिज्ञानयोः एकार्थत्वात्। (क्षी.त.)

ज्ञापने मारणादिषु चाभिधानमस्यैवेति मैत्रेयादयः। अन्ये तु शाकटायनानुसारिणो ज्ञप मारणतोषणनिशामनेषु मिच्चेति पठन्ति। यदिति कर्त्रभिप्राये अपि मारणादौ परस्मैपदसिद्धिः। पुनः पाठफलमिति यद्देवेनोक्तं तदपि मतं - जानातीति ज्ञः सिध्येत्। ज्ञपयति तु पुनर्मारणादौ घटादेः। च मित्वेऽपीदमेव ज्ञपमिदिति पदं ज्ञापने मारणादौ। तेनार्थात् ज्ञापनार्थे ज्ञपयतिपदवत् ज्ञापयेदित्यपि स्यादिति। स्वेनैव ज्ञपमित् इत्यर्थ-विशेषोपादानरहितं पाठमङ्गीकृत्य तस्य च प्रयोजनं मारणादिव्यतिरिक्ते ज्ञपयत्यर्थे ज्ञपयतीति सिद्धिः इत्युक्तत्वाद् उक्तस्य उक्त्यसम्भवात् निराकृतम्। (मा.धा.)

ज्ञप्, सक, मित्। स्वभावान्मारणादावप्यस्य वृत्तिरित्युक्तम्, तत्र कौमारमतेन सोपसर्गः प्रयोगः प्रदर्शित इति माधवः। (धा.क.)

❖ ज्ञा [ज्ञा] मारणतोषणनिशामनेषु (भ्वा०)

मारणतोषणनिशामनेषु ज्ञा। (शा.आ.)
(धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

मारणादिष्वर्थेषु जानातेर्मित्वम्। (शा.आ.)

निशामनं चक्षुःसाधनं ज्ञानम्। शम लक्ष आलोचन इत्यस्य चौरादिकस्य रूपमेतत्।

मारणादिष्वर्थेषु जानातिर्मिद् भवति। (धा.प्र.)

निशानमुत्तेजनम्। निशामन इत्येके पेठुः। ज्ञा अवबोधन इत्ययं क्र्यादिर्मारणादौ मित् सञ्ज्ञपयति पशुम्, विष्णुं विज्ञपयाम्यहम्, प्रज्ञपयति शास्त्रम्। (क्षी.त.)

एषु जानातिर्मिद्भवति परं सञ्ज्ञपयति। मारयति इत्यर्थः विष्णुं विज्ञपयति। । सन्तोषयतीत्यर्थः प्रज्ञपयति रूपं। दर्शयतीत्यर्थः कौमाराणां मतेनात्र सोपसर्गाः प्रदशिताः। अन्यत्र ज्ञापयति बोधयतीत्यर्थः। नेह निशामनं ज्ञापनमात्रम्। ज्ञा नियोग इति चौरादिकस्य धातूनाम् अनेकार्थत्वात् इति। अनेकार्थताङ्गीकारे ज्ञान इव मारणतोषणयोः अपि ज्ञापयतीति स्यात्। (मा.धा.)

ज्ञा, अनिट्, सक, प। एषु जानातिर्मिद्भवति। रिपु संज्ञपयति मारयतीत्यर्थः। अत्र चन्द्रः – मारणतोषणनिशामनेषु इति वर्द्धमानश्चैवं पठित्वा निशानं तीक्ष्णीकरणमिति चाभिधाय निशामन इति केचित्। निशामनं दर्शनमिति। स्वामिशाकटायनौ वर्द्धमानवदेव, अत्र प्रज्ञपयति शरमित्युदाहरणम्, तीक्ष्णीकरोतीत्यर्थः। अत्र मित्त्वं बोधिन्यासकारो न सहते। यदाह प्राचीनास्तु निशानं नेच्छन्तीति। एवं काश्यपसम्मताकारादयः अपि, इति मैत्रेयाद्यङ्गीकृतः निशामनपाठ एव ज्यायान्। (धा.क.)

❖ ज्ञा [ज्ञा] अवबोधने (क्र्या०)

ज्ञा अवबोधने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अनुपूर्वात्सनन्तात् नानोर्ज्ञ इति तन्निसिध्यात्।
सङ्ग्रहश्लोकौ-

क्रियाफले कर्तृगतेनुसृष्टादपह्नवे सोपसर्गाः।
अकर्मकस्थात् सम्प्रतिभ्यां चयः परः।।
सनन्तादपि जानीयात् जानातेरात्मनेपदम्।
नानुपूर्वात् सनन्तात् प्रत्याभ्यां श्रव एव च॥
(शा.आ.)

ज्ञानं ज्ञातिरिति नास्ति, प्रसिद्धेनापहृतत्वात्। (क्षी.त.)

अवबोधनं ज्ञानम्। ज्ञा, अनिट्, सक, प। (धा.क.)

❖ ज्ञा [ज्ञा] नियोगे (चुरा०)

ज्ञा नियोजने। (धा.प्र.)(क्षी.त.)

ज्ञा नियोगे। (मा.धा.) (धा.क.)

अत्र नियोगः प्रेरणम् स्वभावादयमाङ्पूर्वः। (मा.धा.) (धा.क.)

ज्ञा, सक, उ। मारणादौ ज्ञपयति इति गतम्। बोधने तु ज्ञपयति, विज्ञापयतीति उभयम्। घटादौ ज्ञप मिच्चेत्यत्र च विशेषो द्रष्टव्यः। नियोजनादन्यत्र जानातीति रमानाथव्याख्या। (धा.क.)

❖ ज्या [ज्या] वयोहानौ (क्र्या०)

ज्या वयोहानौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

ज्या, अनिट्, अक, प। (धा.क.)

❖ ज्युङ् [ज्यु] गतौ (भ्वा०)

च्युङ् छ्युङ् ज्युङ् झ्युङ् प्रुङ् प्लुङ् गतौ। (धा.प्र.)

च्युङ् छ्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ- जुङ् इति नन्दी। (क्षी.त.)

च्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ - अत्र नन्दी जु इत्युकारं पठति। तत् जु इति सौत्रो धातुरिति वृत्तिन्यासपदमञ्जर्यादिषु अभिधानादनार्षम् इव प्रतीयते। (मा.धा.)

च्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ - च्यु, ज्यु, प्रु, प्लु (ङ्) अनिट्, सक, आ। अव - अधःपतनम्। आ - अवगाहनम्। उत् - उल्लम्फः। उप - उत्पीडनम्। परि - व्याप्तिः। विप्लवः। (धा.क.)

❖ ज्रि [ज्रि] अभिभवे (भ्वा०)

जि ज्रि अभिभवे। (धा.प्र.) (मा.धा.) (धा.क.)

जयविशेषः अभिभवः इति विशेषार्थः अयं पुनर्जयतिः पठ्यते। (धा.प्र.)

अभिभवो न्यूनीकरणम्। (मा.धा.)

अभिभवो न्यूनीकरणम्, न्यूनीभवनञ्च। जि, ज्रि, अनिट्, प। जु इति सौत्रो धातुः। अयं गत्यर्थः, वेगार्थ इत्यपरे। (धा.क.)

❖ ज्वर [ज्वर्] रोगे (भ्वा०)

ज्वर रोगे। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

ज्वर्, सेट्, अक, प। (धा.क.)

❖ ज्वल [ज्वल्] दीप्तौ (भ्वा०)

ज्वल दीप्तौ। (शा.आ.) (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

घटादावुदाहृतः। (शा.आ.)

उत्तरत्रास्य पाठो ज्वलादिकार्य्यार्थः। (धा.प्र.)

अग्रे ज्वलादिकार्यार्थः पाठः। (क्षी.त.)

ज्वल दीप्ताविति पठिष्यते। तस्य मित्वार्थोऽयं अनुवादः इदमपि मित्त्वं सोपसर्गविषयम्। ज्वलह्वलह्मलमामनुपसर्गाद्वा इति अनुपसृष्टानां विकल्पस्य वक्ष्यमाणत्वात्। (मा.धा.)(धा.क.)

❖ ज्वल [ज्वल्] दीप्तौ (भ्वा०)

ज्वल दीप्तौ। (धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

ज्वल्, सेट्, अक, प। (धा.क.)

❖ ज्वल [ज्वल्] चलने (भ्वा०)

ज्वल ह्वल ह्मल चलने। (शा.आ.)

❖ झट [झट्] सङ्घाते (भ्वा०)

जट झट सङ्घाते। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

जट्, झट्, सेट्, अक, प। (धा.क.)

❖ झमु [झम्] अदने (भ्वा०)

वमु छमु जमु झमु अदने। (शा.आ.)

चमु छमु जमु झमु अदन। (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

जिमिं केचित् पठन्ति। (धा.प्र.)

इदुपधोऽयमित्येके। (क्षी.त.)

सर्वे उदनुबन्धाः, सेट, सकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ **झर्च [झर्च्] परिभाषणसन्तर्जनयोः (तुदा०)**

जर्च चर्च **झर्च** परिभाषणसन्तर्जनयोः (धा.प्र.)

❖ **झर्छ [झर्छ्] परिभाषणे (भ्वा०)**

चर्च **झर्छ** झर्झ परिभाषणे- र्जत्स इति चन्द्रदुर्गौ। चर्च इत्येके। जर्ज इत्यन्ये, झर्च इत्यपरे। किमत्र सत्यम् ? देवा ज्ञास्यन्ति। तुदादौ अप्येवम्। (क्षी.त.)

❖ **झर्झ [झर्झ्] परिभाषणहिंसातर्जनेषु (भ्वा०)**

जर्ज चर्च **झर्झ** परिभाषणहिंसातर्जनेषु (मा.धा.) (धा.क.)

जर्ज चर्च **झर्झ** परिभाषणसन्तर्जनयोः। चर्च झर्झ इत्येतौ तुदादावपि पठ्येते। इह तु स्वरार्थं पठितौ। अर्थानुरोधाच्चोष्मान्तवर्गेऽपि एते पठ्यन्ते। (धा.प्र.)

चर्च झर्छ **झर्झ** परिभाषणे- र्जत्स इति चन्द्रदुर्गौ। चर्च इत्येके। जर्ज इत्यन्ये, झर्च इत्यपरे। किमत्र सत्यम् ? देवा ज्ञास्यन्ति। तुदादौ अप्येवम्। (क्षी.त.)

तुदादौ पठिष्यमाणयोः इह पाठः स्वरार्थ इति देवमैत्रेयपुरुषकारेषु उष्मान्तेषु पाठः अर्थानुरोधादिति च मैत्रेयः। (मा.धा.) (धा.क.)

जर्ज्, चर्च्, झर्झ्, सेट्, सक, प। (धा.क.)

❖ **झर्झ [झर्झ्] परिभाषणभर्त्सनयोः (तुदा०)**

जर्ज चर्च **झर्झ** परिभाषणभर्त्सनयोः। (मा.धा.) (धा.क.)

जर्ज **झर्झ** चर्छ परिभाषणे - चर्च इति च दुर्गः। (क्षी.त.)

बाहुलकाद् रन्नन्तौ आद्यन्तावपि चान्तावित्येके चर्चतिझर्झत्योः शपि पाठः स्वरार्थ इत्युक्तम्। (मा.धा.)

जर्ज्, चर्च्, झर्झ् सेट्, सक, प। (धा.क.)

❖ **झष [झष्] हिंसार्थः (भ्वा०)**

कष शिष जिष **झष** वष रुष ऋष हिंसार्थाः। (शा.आ.)

कष शिष जष **झष** शष वष मष रुष रिष हिंसार्थाः। (धा.प्र.)

कष शिष जष **झष** शष वष मष मुष रुष रिष हिंसार्थाः:- रुधादौ शिष्लृ विशेषणे। (क्षी.त.)

कष खष शिष जष **झष** शष वष मष रुष रिष हिंसार्थाः - तृतीयषष्ठौ तालव्योष्मादी। सप्तमो दन्त्योष्ठ्यादि। हिंसार्थत्वे यदि दृश्यते तदा धातूनामनेकार्थत्वाद् भविष्यति। (मा.धा.)

कष खष शिष जष **झष** शष वष मष रुष रिष हिंसार्थाः - तृतीयषष्ठो तालव्योष्मादी। सप्तमो दन्त्योष्ठादिः। सर्वे सकर्मकाः परस्मैपदिनश्च। हिंसार्थत्वं यदि दृश्यते, तदा धातुनामनेकार्थत्वात् भविष्यति। (धा.क.)

❖ **झष [झष्] आदानसंवरणयोः (भ्वा०)**

झष आदानसंवरणयोः। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

अयं हिंसार्थः परस्मैपदिषु गतः। (मा.धा.)

झष्, सेट्, सक, उ। अयं हिसार्थः परस्मैपदिषु गतः। (धा.क.)

❖ झॄ [झॄ] भये (क्र्या०)

झॄ भये। (शा.आ.)

❖ झॄष् [झॄ] वयोहानौ (दिवा०)

जॄष् झॄष् वयोहानौ। (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

क्र्यादौ जॄ वयोहानौ। (क्षी.त.)

जॄ, झॄ (ष्), सेट्, अक, प। (धा.क.)

❖ ञिइन्धी [इन्ध्] दीप्तौ (रुधा०)

ञिइन्धी दीप्तौ। (शा.आ.)(क्षी.त.) (मा.धा.) (धा.प्र.) (धा.क.)

उदात्तोऽनुदात्तेत्। (क्षी.त.)(मा.धा.)

इन्ध् (ञ्, ई) सेट्, अक, आ। (धा.क.)

❖ ञिक्ष्विदा [क्ष्विद्] अव्यक्ते शब्दे (भ्वा०)

ञिक्ष्विदा अव्यक्ते शब्दे। (शा.आ.) (धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

ञिक्ष्विदा स्नेहनमोचनयोरित्यस्य दैवादिकस्य। (धा.प्र.)

अयमुदात्त उदात्तेत्। ञिक्ष्विदा स्नेहनमोहनयोः इति दिवादौ। (मा.धा.) (धा.क.)

क्ष्विद्, (ञि, आ) सेट्, अक, प। (धा.क.)

❖ ञिक्ष्विदा[क्ष्विद्]स्नेहनमोहनयोः(भ्वा०)

ञिक्ष्विदा स्नेहनमोहनयोः। (क्षी.त.)

❖ ञिक्ष्विदा [क्ष्विद्] स्नहेनमोचनयोः (दिवा०)

ञिक्ष्विदा स्नेहनमोहनयोः। (शा.आ.)(क्षी.त.)

ञिक्ष्विदा स्नेहनमोचनयोः। (धा.प्र.) (मा.धा.)(धा.क.)

भ्वादौ अव्यक्ते शब्दे। (क्षी.त.)

क्ष्वेदतीत्यव्यक्तशब्दे। (मा.धा.) (धा.क.)

क्ष्विद्, (ञि, आ,) सक, सेट्, प। (धा.क.)

❖ ञितृष [तृष्] पिपासायाम् (दिवा०)

ञितृषा पिपासायाम्। (शा.आ.)

ञितृष पिपासायाम्। (क्षी.त.)(मा.धा.)(धा.क.)

तृष्(ञि) सक, सेट्, प। (धा.क.)

❖ ञित्वरा [त्वर्] सम्भ्रमे (भ्वा०)

ञित्वरा सम्भ्रमे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

सम्भ्रमोऽत्राशुकारिता। (क्षी.त.)

त्वर् (ञि, आ) सेट्, अक, आ। (धा.क.)

❖ ञिधृषा [धृष्] प्रागल्भे (स्वा०)

ञिधृषा प्रागल्भ्ये। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ धृष अप्रसहने। (क्षी.त.)

धृष प्रसहन इति युजादौ। (मा.धा.)

धृष्, (ञि आ) सेट्, अक, प। (धा.क.)

❖ ञिफला [फल्] विशरणे (भ्वा०)

ञिफला विशरणे। (शा.आ.) (क्षी.त.) (मा.धा.) (धा.क.)

फल्, (ञि, आ) सेट्, अक, प। (धा.क.)

❖ ञिभी [भी] भये (जुहो०)

ञिभी भये। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

भी, (ञि) अनिट्, अक, प। (धा.क.)

❖ **ञिमिदा [मिद्] स्नेहने (भ्वा०)**

ञिमिदा स्नेहने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

स्नेहनं स्नेहयोगः। चुरादौ मिद स्नेहने।(क्षी.त.)

अयं दिवादिश्चुरादिश्च। मिद मेधार्हिंसनयोरिति क्र्यादौ ञिमिदा स्नेहने मोचने च स्नेहनमोचनयोः इति क्वचित्पठ्यते। (मा.धा.) (धा.क.)

मिद् (ञि, आ) सेट्, सक, आ। (धा.क.)

❖ **ञिमिदा [मिद्] स्नेहने (दिवा०)**

ञिमिदा स्नेहने (शा.आ.)(धा.प्र.)
(क्षी.त.) (मा.धा.)(धा.क.)

चुरादौ मिद स्नेहने। (क्षी.त.)

मिदिना सहचर्यात् इति एवं वदतोऽस्य मिदेः भूवादौ पाठो नास्तीति प्रतीयते धातुपाठव्याख्यानेषु उभयत्र अविगीतं पठन्ति।(मा.धा.)

मिद्, (ञि, आ) अक, सेट्, प। (धा.क.)

❖ **ञिष्वप [स्वप्] शये (अदा०)**

ञिष्वप् शये। (शा.आ.) (धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अनुदात्तोऽप्ययं रुदादिकार्य्यानुरोधेन चात्र पठ्यते। (धा.प्र.)

उदात्तेदनुदात्तः। अनुदात्तोऽप्ययं रुदादिकार्यानुरोधाद् उदात्तमध्ये पठितः। (मा.धा.)

स्वप्, (ञि) अनिट्, अक, प। (धा.क.)

❖ **ञिष्विदा [स्विद्] स्नेहनमोचनयोः मोहनयोः (भ्वा०)**

ञिष्विदा स्नेहनमोहनमोचनयोः। (शा.आ.)

ञिष्विदा स्नेहनमोचनयोः। ञिष्विदा गात्रप्रक्षरण इत्यस्य दैवादिकस्य। (धा.प्र.)

ञिष्विदा स्नेहस्य मोचने च - अत्र स्वामी ञिक्ष्विदेति क्ष्वकारं पठित्वा ञिष्विदेति। क्ष्वेदति इत्यव्यक्ते शब्दे भविष्यति। स्विद्यतीति स्नेहनसेकयोः दिवादौ स्विद्यतीति गात्रप्रक्षरणे। (मा.धा.)

❖ **ञिष्विदा [स्विद्] गात्रप्रक्षरणे (दिवा०)**

ञिष्विदा गात्रप्रक्षरणे। ञिष्विदा स्नेहनमोचनयोः इत्यस्य रूपम्। (धा.प्र.)

❖ **ञिस्विदा [स्विद्] गात्रक्षरणे (भ्वा०)**

ञिस्विदा गात्रक्षरणे। (शा.आ.)

ञिष्विदा गात्रप्रस्रवणे -स्विद् (ञि, आ) सेट्, सक, आ। (धा.क.)

❖ **टकि [टङ्क्] बन्धने (चुरा०)**

टकि बन्धने (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

टङ्क् (इ, णिच् वा) सक, उ। (धा.क.)

❖ **टल [टल्] वैक्लव्ये (भ्वा०)**

टल ट्वल वैक्लव्ये (धा.प्र.)(मा.धा.)(धा.क.)

टल ट्वल वैप्लव्ये। विप्लव एव वैप्लव्यम्। (क्षी.त.)

टल्, ट्वल्, सेट्, अक, प। (धा.क.)

❖ **टिकृ [टिक्] गत्यर्थः (भ्वा०)**

ढौकृ त्रौकृ ककि श्वकि त्रकि ष्वष्क मस्क **टिकृ** टीकृ रघि लघि गत्यर्थाः। (शा.आ.)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वक्क वस्क मस्क तिकृ **टिकृ** टीकृ रघि लघि गत्यर्थाः। (धा.प्र.)

ककि श्वकि त्रकि ढौकृ त्रौकृ ष्वक्क वस्क मस्क **टिकृ** टीकृ रघि लघि गत्यर्थाः। टौकृ इति दुर्गः। (क्षी.त.)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क **टिकृ** टीकृ रघि लघि गत्यर्थाः - सम्मतायां दन्त्यादिः पठ्यते। (मा.धा.)

ककि वकि [मकि] श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क **टिकृ** टीकृ [सेकृ श्रेकृ श्रकृ श्लकि] रघि लघि गत्यर्थाः - सम्मतायां दन्त्यादिः पठ्यते। (धा.क.)

❖ **टिप [टिप्] क्षेपे** (चुरा०)

दभ दिभि तिप **टिप** डिप स्तिप क्षेपे- दभि इति नन्दी। (क्षी.त.)

❖ **टीकृ [टीक्] गत्यर्थः** (भ्वा०)

ढौकृ त्रौकृ ककि श्वकि त्रकि ष्वष्क मस्क टिकृ **टीकृ** रघि लघि गत्यर्थाः। (शा.आ.)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वक्क वस्क मस्क तिकृ टिकृ **टीकृ** रघि लघि गत्यर्थाः। (धा.प्र.)

ककि श्वकि त्रकि ढौकृ त्रौकृ ष्वक्क वस्क मस्क टिकृ **टीकृ** रघि लघि गत्यर्थाः - टौकृ इति दुर्गः। (क्षी.त.)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ **टीकृ** रघि लघि गत्यर्थाः - सम्मतायां दन्त्यादिः पठ्यते। (मा.धा.)

ककि वकि [मकि] श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ **टीकृ** [सेकृ श्रेकृ श्रकृ श्लकि] रघि लघि गत्यर्थाः - सम्मतायां दन्त्यादिः पठ्यते। (धा.क.)

❖ **टुओश्वि [श्वि] गतिवृद्ध्योः** (भ्वा०)

टुओश्वि गतिवृद्ध्योः।(शा.आ.)(धा.प्र.)(क्षी.त.)

श्वि (टु ओ) सेट्, प। (धा.क.)

❖ **टुओस्फूर्जा [स्फूर्ज्] वज्रनिर्घोषे** (भ्वा०)

टुओस्फूर्जा वज्रनिर्घोषे। (शा.आ.) (धा.प्र.)(मा.धा.)(धा.क.)

टुशब्दः ट्वितोऽथुजित्यथुजर्थः। (शा.आ.)

टुओस्फूर्जा वज्रनिष्पेषे - वज्रनिष्पेषः अशनिनिर्घोषः। (क्षी.त.)

स्फुर्ज् (टु, ओ, आ) सेट्, अक, प। वज्रनिष्पेषे इति दुर्गः पठति। वज्रनिष्पेषो वज्रसङ्घट्टजध्वनिः इति रमानाथः। धातुरयं ह्रस्वमध्यः। (धा.क.)

❖ **टुक्षु [क्षु] शब्दे** (अदा०)

टुक्षु शब्दे। (शा.आ.) (धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

टु क्षु रु कु शब्द इति दुर्गः पठति। क्षु (टु) सेट्, अक, प। (धा.क.)

❖ **टुदु [दु] उपतापे** (स्वा०)

टुदु उपतापे। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

यदुक्तं न्यासे टुदु उपतापे इति तदसत्। यदाह हरदत्तः दु द्रु गतावित्यस्य दोर्ग्रहणं न टुदु उपताप इत्यस्य सानुबन्धकत्वात्। तथा च माघः - मृदुतया दुतयेतीति। (मा.धा.)

दु, (टु) अनिट्, अक, प। (धा.क.)

❖ **टुनदि [नन्द्] समृद्धौ** **(भ्वा०)**

टुनदि समृद्धौ। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

अयं तवर्गीयोपदेशः, नृतिनन्दी इति णोपदेशपर्य्युदासात्। नन्द (इ, टु,) अक, सेट्, प। (धा.क.)

❖ **टुभ्राजृ [भ्राज्] दीप्तौ** **(भ्वा०)**

टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ। (शा.आ.) (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

अत्र स्वामी आद्यावधिकृत्य दुरुभयस्येत्येके इत्याह। त्रयोपि क्वित इति मैत्रेयः वृत्तिकारोप्यत्रैवानुकूलः। (मा.धा.)

भ्राज्, भ्राश्, भ्लाश् (टु, ऋ) सेट्, अक, आ। (धा.क.)

❖ **टुभ्राशृ [भ्राश्] दीप्तौ** **(भ्वा०)**

टुभ्राजृ **टुभ्राशृ** टुभ्लाशृ दीप्तौ। (शा.आ.) (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

अत्र स्वामी आद्यावधिकृत्य दुरुभयस्येत्येके इत्याह त्रयोपि क्वित इति मैत्रेयः वृत्तिकारोप्यत्रैवानुकूलः। (मा.धा.)

भ्राज्, भ्राश्, भ्लाश् (टु, ऋ) सेट्, अक, आ। (धा.क.)

❖ **टुभ्लाशृ [भ्लाश्] दीप्तौ** **(भ्वा०)**

टुभ्राजृ टुभ्राशृ **टुभ्लाशृ** दीप्तौ। (शा.आ.) (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

उदात्ता अनुदात्तेतः। अत्र स्वामी आद्यावधिकृत्य दुरुभयस्येत्येके इत्याह त्रयोपि क्वित इति मैत्रेयः वृत्तिकारोप्यत्रैवानुकूलः। (मा.धा.)

भ्राज्, भ्राश्, भ्लाश् (टु, ऋ) सेट्, अक, आ। (धा.क.)

❖ **टुमस्जो [मस्ज्] शुद्धौ** **(तुदा०)**

टुमस्जो शुद्धौ (शा.आ.)(क्षी.त.) (मा.धा.) (धा.क.)

मस्ज्, (टु, ओ) अनिट्, अक प। (धा.क.)

❖ **टुयाचृ [याच्] याच्ञायाम्** **(भ्वा०)**

टुयाचृ याच्ञायाम्। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

याच् (टु, ऋ) सेट्, सक, उ। (धा.क.)

❖ **टुवप [वप्] बीजतन्तुसन्ताने** **(भ्वा०)**

टुवप बीजतन्तुसन्ताने। (शा.आ.)

❖ **टुवम [वम्] उद्गिरणे** **(भ्वा०)**

टुवम् उद्गिरणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

उद्गिरणं भुक्तस्योर्ध्वगतिः। उदित्येके (क्षी.त.)

उद्गिरणम् अन्तर्गतस्य मुखान्निसारणम्। अत्र सुधाकर उद्गिरण इति पठन्निपानात् तत्र इद्धातोरित्याह। (मा.धा.)

उद्गिरणम् अन्तर्गतस्य मुखान्निःसारणम्। वम् (टु) सेट्, सक, प। (धा.क.)

❖ **टुवेपृ [वेप्] कम्पने** **(भ्वा०)**

टुवेपृ कम्पने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

वेप् (टु, ऋ) सेट्, अक, आ। (धा.क.)

❖ **ट्वल [ट्वल्] वैक्लव्ये** **(भ्वा०)**

तल **ट्वल** वैकल्ये। (शा.आ.)

टल ट्वल वैक्लव्ये। (धा.प्र.)(मा.धा.)(धा.क.)

टल ट्वल वैप्लव्ये। विप्लव एव वैप्लव्यम्। (क्षी.त.)

टल्, ट्वल्, सेट्, अक, प। (धा.क.)

❖ डप [डप्] सङ्घाते (चुरा०)

डप डिप सङ्घाते। (धा.प्र.)(मा.धा.)(धा.क.)

डप्, डिप्, अक, आ। (धा.क.)

❖ डपि [डम्प्] सङ्घाते (चुरा०)

डपि डिपि सङ्घाते। डभि डिभि इति दौर्गाः। (क्षी.त.)

❖ डिप [डिप्] क्षेपे (दिवा०)

डिप क्षेपे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ डिप स्तिप क्षेपे। (क्षी.त.)

अयं तुदादौ चुरादौ तु सङ्घाते च इह क्वचित्। (मा.धा.)

डिप्, सेट्, सक, प। मनोरमासम्मते दुर्गपाठे धातुः अयं दृश्यत इति तुदादौ। चुरादौ चायम्। (धा.क.)

❖ डिप [डिप्] क्षेपे (तुदा०)

डिप क्षेपे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

डिप्, सेट्, सक, प। (धा.क.)

❖ डिप [डिप्] क्षेपे (चुरा०)

डिप क्षेपे। (धा.प्र.) (मा.धा.) (धा.क.)

दभ दिभि तिप टिप डिप स्तिप क्षेपे। (क्षी.त.)

डप डिप सङ्घात इत्याकुस्मीयः (मा.धा.)

डिप्, सक, उ। (धा.क.)

❖ डिप [डिप्] सङ्घाते (चुरा०)

डप **डिप** सङ्घाते। (धा.प्र.)(मा.धा.)(धा.क.)

डप्, डिप्, अक, आ। (धा.क.)

❖ डिपि [डिम्प्] सङ्घाते (चुरा०)

डपि **डिपि** सङ्घाते। (क्षी.त.)

❖ डीङ् [डी] विहायसा गतौ (भ्वा०)

डीङ् विहायसा गतौ। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

डयतेः परस्य निष्ठाप्रत्ययस्य सेटः कित्त्वप्रतिषेधो धातुपारायणे उपसङ्ख्यातः। (धा.प्र.)

दिवादौ डीङ् गतौ । (धा.प्र.)(क्षी.त.)

विहायसां गताविति क्वचित्पठ्यते। तदाकाशगमन इति पठद्भ्यां चन्द्रधनपालाभ्यां प्रत्युक्तम्। व्योमोरोभ्यां गमने डयते अंहते च इति पठन् केशवस्वाम्यत्रैवानुकूलः। अयमेव पाठो मैत्रेयादीनामपि डीङ् शब्दे दैवादिकस्य। (मा.धा.)

विहायसां गताविति च क्वचित् पठ्यते। डी, (ङ्) सेट्, अक, आ। (धा.क.)

❖ डीङ् [डी] विहायसा गतौ (दिवा०)

डीङ् विहायसा गतौ। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

डी (ङ्), सेट्, अक, आ। (धा.क.)

❖ डुकृञ् [कृ] करणे (तना०)

डुकृञ् करणे।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भ्वादौ कृञ् करणे। स्वादौ कृञ् हिंसायाम्। (क्षी.त.)

करणं विधानम्, अनुष्ठानम्, यत्नः। कृ, (डु, ञ्) अनिट्, सक, उ। प्र - अनुष्ठानम्। कथनम्। गाथाः प्रकुरुते। उपयोगः। साहसिक्यम्।

कुलभार्यां प्रकुर्वाणः। विप्रपीडनम्। अनु - अनुकरणं, गुरोरनुकुर्वीत गतिभावितचेष्टितैः। (मनुः) अप - अपकारः। भर्त्सनम्। अत्या- अधिक्षेपः। गार्गिकया अत्याकुरुते। अपा - अपसारणम्। शिवा भुजच्छेदमपाचकार (रघु.)। उदा - भर्त्सनम् - श्येनो वर्त्तिकाम् उदाकुरुते। उपा-संस्कारपूर्वकवेदग्रहणम्। संस्कारपूर्वकपशुहिंसा। निरा - निराकरणम्। उप - उपकारः, सेवा प्रतियत्नः, भूषणम्, समवायः, वाक्याध्याहारः। नि - निकारः। परि- परिष्कारः। प्रति - प्रतिकारः। वि-विकारः। सम्-संस्कारः। आ-णिच्- ईक्षितम्, आह्वानम्। हूतिराकारणाह्वानम् इत्यमरः। (धा.क.)

❖ **डुक्रीञ् [क्री] द्रव्यविनिमये** **(क्र्या०)**

डुक्रीञ् द्रव्यविनिमये। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

विनिमयः परिवर्तः। (क्षी.त.)

क्री (डु, ञ्) सक, उ। (धा.क.)

❖ **डुदाञ् [दा] दाने** **(जुहो०)**

डुदाञ् दाने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)

आस्य विहरणे तु व्याददात्यननमत्र मृत्युरिति। (शा.आ.)

दाण् दाने। देङ् रक्षणे। दैप् शोधने। त्रयं भूवादौ। दाप् लवने इत्यदादौ। (मा.धा.)

दा, (डु, ञ्) अनिट्, सक, उ। (धा.क.)

❖ **डुधाञ् [धा] धारणपोषणयोः** **(जुहो०)**

डुधाञ् धारणपोषणयोः। (शा.आ.)(धा.प्र.)
(मा.धा.) (धा.क.)

डुधाञ् दानधारणयोः। (क्षी.त.)

पूर्ववत् अयं तु विशेषः। (शा.आ.)

अनुदात्त उभयपदी। दानेऽप्येके। (मा.धा.)

धा, (डु, ञ्) अनिट्, सक, उ। (धा.क.)

❖ **डुपचष् [पच्] पाके** **(भ्वा०)**

डुपचष् पाके। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

सानुनासिकः अकारः सर्वेषाम् उपलक्षणार्थः। (क्षी.त.)

पच् (डु, ष्) अनिट्, सक, उ। व्यक्तीकरणे गतम्। (धा.क.)

❖ **डुभृञ् [भृ] धारणपोषणयोः** **(जुहो०)**

डुभृञ् धारणपोषणयोः। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

भृ, (डु, ञ्) अनिट्, सक, उ। द्राविडास्तु द्वितं पठित्वा भरथुरित्युदाहरन्ति। शेषं भरतिवत्। (धा.क.)

❖ **डुमिञ् [मि] प्रक्षेपणे** **(स्वा०)**

डुमिञ् प्रक्षेपणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

मि (डु, ञ्) अनिट्, सक, उ। (धा.क.)

❖ **डुलभष् [लभ्] प्राप्तौ** **(भ्वा०)**

डुलभष् प्राप्तौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

लभ् (डु, ष्) अनिट्, सक, आ। (धा.क.)

❖ डुवप् [वप्] बीजसन्ताने (भ्वा०)

डुवप बीजसन्ताने। (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

बीजानां सन्तानः क्षेत्रे विस्तारणम्। (क्षी.त.)

बीजसन्तानं क्षेत्रे बीजविकरणम्। अयं गर्भाधाने अपि दृश्यते। यथा मा वः क्षेत्रे परबीजान्यवाप्सुः छेदनेऽपि दृश्यते केशान्वपतीति। (मा.धा.)

वप् (डु) अनिट्, सक, उ। बीजसन्तानं क्षेत्रे बीजवपनम्। अयं गर्भाधानेऽपि दृश्यते। (धा.क.)

❖ ढौकृ [ढौक्] गत्यर्थः (भ्वा०)

ककि वकि श्वकि त्रकि **ढौकृ** त्रौकृ ष्वक्क वस्क मस्क तिकृ टिकृ टीकृ रघि लघि गत्यर्थाः। (धा.प्र.)

ढौकृ त्रौकृ ककि श्वकि त्रकि ष्वष्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (शा.आ.)

ककि श्वकि त्रकि **ढौकृ** त्रौकृ ष्वक्क वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (क्षी.त.)

ककि वकि श्वकि त्रकि **ढौकृ** त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (मा.धा.)

ककि वकि [मकि] श्वकि त्रकि **ढौकृ** त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ [सेकृ श्रेकृ श्रकृ श्लकि] रघि लघि गत्यर्थाः। (धा.क.)

❖ णक्क [नक्क्] नाशने (चुरा०)

णक्क धक्क नाशने (क्षी.त.)

❖ णक्ष [नक्ष्] गतौ (भ्वा०)

तृक्ष ष्टृक्ष **णक्ष** गतौ। (धा.प्र.) (धा.क.)

तृक्ष स्तृक्ष **णक्ष** गतौ। (क्षी.त.) षोपदेशो न्याय्यः। तथा च चान्द्राः तृक्ष ष्टृक्ष इति पेठुः। (क्षी.त.)

तृक्ष, स्तृक्ष, नक्ष, सेट्, सक, प। (धा.क.)

❖ णख [नख्] गत्यर्थः (भ्वा०)

उख उखि वख वखि मख मखि नख **णख** णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि **णख** णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश। तृतीयान्तास्त्रयोदश। (मा.धा.)

उख उखि वख वखि मख मखि **णख** णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। (धा.क.)

❖ णखि [नङ्ख्] गत्यर्थः (भ्वा०)

उख उखि वख वखि मख मखि नख **णख** णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि **णख** णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश। तृतीयान्तास्त्रयोदश। (मा.धा.)

उख उखि वख वखि मख मखि **णख** णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। (धा.क.)

❖ णट [णट्] नृत्तौ (भ्वा०)

णट नृतौ। (मा.धा.) (धा.क.)

अत्र पुरुषकारे णट नृत्तावित्यपि क्षीरस्वामी। इत्युभयथापि नर्तनमेवार्थ इति। अयं णोपदेशः नृतिनन्दीति णोपदेशपर्युदासवाक्ये नाटीति सवृद्धिकस्य ग्रहणादस्य घटादित्वान्मित्त्वात् नाटिरूपाभावादग्रहणम्। यदाह हरदत्तः जासिनिप्रहण इत्यत्र नट नृतावित्यस्य घटादिपठितस्याग्रहणम्। विकृतनिर्देशादिति। अत एव णोपदेशपर्युदासविवरणे अपि न्यास-पदमञ्जरीपुरुषकारादिभिः अवस्यन्दनार्थस्य चौरादिकस्य ग्रहणं कृतम्। ननु क्षीरस्वामी घटादौ नट नृताविति पठित्वा नटयति शाखा इत्युदाहृत्य नृत्तौ नाटयतीति वक्ष्यति। अवश्यं हरदत्तादिभिः अप्युभत्र पाठसामर्थ्यादस्य नाटयति इति अङ्गीकार्यम्। तत्कथमुक्तं विकृतनिर्देशादिति उच्यते। द्वयोर्ग्रहणे नटीत्येव निर्दिशेत् न नाटीति विकृतम्। तत्सामर्थ्यात् यस्य नाटीत्येव रूपम्। तस्यैव पर्युदासो विज्ञास्यते। न तु यस्य नटिरूपं नाटिरूपं च ननु योऽस्ति घटादिधातुर्नित्यं नटिरूपमापन्नः। स एव विकृतनिर्देशेन व्यावर्त्त्यते। मैवम् येऽप्यत्र पठिता घटादौ पठ्यन्ते न ते पृथग् धातवः। किन्तु मित्त्वार्थमेव तेषामनुवाद इति। तत्र स्थितत्वात् इह नृत्तिर्नर्त्तनम्। यत्कारिषु नटव्यपदेशः। न तु मार्गदेशीशब्दाभ्यां प्रसिद्धं नृत्तं नृत्यं च। यत्कारिषु नर्त्तकव्यपदेशः तत्र वाक्यार्थाभिनयो नाट्यम्। पदार्थाभिनयस्तु नृत्यम् अभिनयशून्यः। पुनः शास्त्रोक्ताङ्गभङ्गः स्वगात्रविक्षेपो नृत्त इति तद्विदः। नैघण्टुकानां तु ताण्डवं नटनं नाट्य लास्यं नूत्यं च नर्त्तनमिति। अभेदव्यवहारो निरूढलक्षणया नेयः प्रणटतीत्यादि नटी। (मा.धा.)

नट्, सेट्, अक, प। (धा.क.)

❖ णट [नट्] नृत्तौ गतावित्यन्ये (भ्वा०)

णट गतावित्येके। नतावित्यन्ये - नटयतीति नट नृत्तावित्यनेन। नट अवस्यन्दन इति चुरादौ नाटयतीति। (धा.प्र.)

❖ णद [नद्] अव्यक्ते शब्दे (भ्वा०)

णद अव्यक्ते शब्दे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

चुरादौ भासार्थः। (क्षी.त.)

णद भाषार्थश्चुरादौ। (मा.धा.)

णो नः इति नत्वम्। नद, सेट्, अक, प। (धा.क.)

❖ **णद [नद्] भाषार्थः** (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ **णद** कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ **णद** कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचम् उत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ **णद** कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ **णद** कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा - दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ **णभ [नभ्] हिंसायाम्** (भ्वा०)

णभ तुभ हिंसायाम्। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

णभिरयमभावेपि वर्त्तते। **नभन्तामन्यके समे** इत्यत्र **मा भूवन्नन्यके सर्वे** इति निरुक्तम्। तथा **नभन्तामन्यके ज्याका अधि धन्वसु** इत्यत्र भाष्येषु अन्यकेषां शत्रूणां धन्वसु स्थिता ज्याकाः छिन्ना मा भवन्त्विति। नभसः - समुद्रम् आकाशश्च। इमौ दिवादी क्र्यादी च। (मा.धा.)

नभ्, तुभ्, सेट्, सक, आ। इमौ दिवादी, क्र्यादौ च। (धा.क.)

❖ **णभ [नभ्] हिंसायाम्** (दिवा०)

णभ तुभ हिंसायाम्। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

इमावपि द्युतादौ क्र्यादौ च पठ्यते। (मा.धा.)

नभ्, तुभ्, सेट्, सक, प। इमावपि भ्वादौ क्र्यादौ च। (धा.क.)

❖ **णभ [नभ्] हिंसायाम्** (क्र्या०)

णभ तुभ हिंसायाम्। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

नभ्, तुभ्, सेट्, सक, प। (धा.क.)

❖ **णम [नम्] प्रह्वत्वे शब्दे च** (भ्वा०)

णम प्रह्वत्वे शब्दे। (शा.आ.) (मा.धा.)

णम प्रह्वत्वे शब्दे च। (धा.प्र.) (धा.क.)

णम प्रह्वत्वे। प्रह्वत्वं नम्रत्वम्। (क्षी.त.)

❖ णय [नय्] गतौ (भ्वा०)

अय वय यय मय चय तय **णय** गतौ। **णय** रक्षणे च। (धा.प्र.)

अय वय पय मय चय तय **णय** गतौ - इत आरभ्य रेवत्यन्ता उदात्ता अनुदात्तेतः। नयादीनामपि अयिवत् न ये इति युज्निषेधात् तच्छीलादौ तृनेव। णय रक्षणे चेति मैत्रेयः। तय णयेत्येके। (मा.धा.)

अय वय पय मय चय तय **णय** गतौ - सर्वे सेटः, सकर्मकाः, आत्मनेपदिनश्च। णय रक्षणे चेति मैत्रेयः। तय णयेत्येके। अयादीनां क्विप्, अत्, वत् इत्यादि भवति। दुर्गस्तु णय स्थाने अयं पठति। (धा.क.)

❖ णल [नल्] गन्धे बन्धन इत्येके (भ्वा०)

णल गन्धे। (धा.प्र.)(मा.धा.)(धा.क.)

गन्धोऽर्दनम्। (क्षी.त.)

बन्धन इति काश्यपः। प्रणलीतत्यादि नालः। (मा.धा.)

बन्धन इति काश्यपः। नल्, सेट्, अक, प। डलयोरेकत्वस्मरणात् नडः। (धा.क.)

❖ णश [नश्] अदर्शने (दिवा०)

णश अदर्शने। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

अदर्शनमनुपलब्धिः। (क्षी.त.)

अदर्शनम् - क्षयः मरणम्। अदर्शनं तिरोभावः, लुक्कायनम्। नश्, वेट्, अक, प। (धा.क.)

❖ णस [नस्] कौटिल्ये (भ्वा०)

णस कौटिल्ये। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

नस्, सेट्, अक, आ। (धा.क.)

❖ णह [नह्] बन्धने (दिवा०)

णह बन्धने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

नह्, अनिट्, सक, उ। (धा.क.)

❖ णसि [नंस] कौटिल्ये (भ्वा०)

णसि कौटिल्ये। (शा.आ.)

❖ णाथृ[नाथ्] याच्ञोपतापैश्वर्याशीः (भ्वा०)

णाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु। सकर्मकः अकर्मकश्च। आशिषि नाथ इत्यौपसङ्ख्यानि नियमादाशिष्येवात्मनेपदम् इतरत्र शेषत्वात् परस्मैपदम्। (शा.आ.)

❖ णाधृ[नाध्] याच्ञोपतापैश्वर्याशीःषु (भ्वा०)

णाधृ नाथृ याच्ञोपतापैश्वर्य्याशीःषु। आद्यो णोपदेशः। (धा.प्र.)

❖ णासृ [नास्] शब्दे (भ्वा०)

भासृ **णासृ** शब्दे। (शा.आ.)

णासृ शब्दे। (क्षी.त.)

णासृ रासृ शब्दे। (धा.प्र.)(मा.धा.)(धा.क.)

केचिन्नासिकापर्य्याये नसाशब्दमिच्छन्ति। तथा च वराहनक्षत्रपुरुषप्रकाशे नसाशब्दः प्रयुक्तः। (धा.प्र.)

नास्, रास् (ऋ) सेट्, अक, आ। (धा.क.)

❖ णिक्ष [निक्ष्] चुम्बने (भ्वा०)

णिक्ष चुम्बने। (शा.आ.)(धा.प्र.)
(क्षी.त.) (मा.धा.) (धा.क.)

चुम्बनं वक्कसंयोगः। (क्षी.त.)

णिक्ष्, सेट्, सक, प। (धा.क.)

❖ णिजि [निञ्ज्] शुद्धौ (अदा०)

णिजि शुद्धौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

णिजिर् शौचपोषणयोरिति जौहोत्यादिकस्यैव ग्रहः। अयं सेडुदाहृत। (मा.धा.)

निन्ज् (इ) सेट्, अक, आ। (धा.क.)

❖ णिजिर् [निज्] शौचपोषणयोः (जुहो०)

णिजिर् शौचपोषणयोः। (शा.आ.)(क्षी.त.)
(मा.धा.) (धा.क.)

निज् (इर्) अनिट्, सक, उ। अव - अवनेजनम्। निर् - निर्णेजनम् - शोधनम्। चेलनिर्णेजकः। अद्भिर्निर्णिक्तम् (मनु०)। (धा.क.)

❖ णिदि [निन्द्] कुत्सायाम् (भ्वा०)

णिदि कुत्सायाम्। (शा.आ.) (धा.प्र.)
(मा.धा.) (धा.क.)

भट्टिकाव्ये तु तिङ्यपि विकल्पो दर्शितः। प्रणिन्दिष्यति नो भूयः इति। (धा.प्र.)

णिदृ कुत्सासन्निकर्षयोरिति दिवादौ। (मा.धा.)

निन्द्, (इ) सक, सेट्, प। निदृ कुत्सासन्निकर्षयोः इति दिवादौ। (धा.क.)

❖ णिदृ [निद्] कुत्सासन्निकर्षयोः (भ्वा०)

णिदृ णेदृ कुत्सासन्निकर्षयोः। (धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

णिवृ णेवृ इति प्राञ्चो हेवाकिनः। (क्षी.त.)

निन्दतीति कुत्सायां गतम्। (मा.धा.)

निद्, नेट् (ऋ) सेट्, अक, उ। (धा.क.)

❖ णिल [निल्] गहने (तुदा०)

णिल गहने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

निल्, सेट्, सक, प। (धा.क.)

❖ णिवि [निन्व्] सेचने, सेवने (भ्वा०)

पिवि मिवि **णिवि** स्रंसने। (धा.प्र.)

पिवि मिवि **णिवि** सेवने। (मा.धा.)(धा.क.)

अयं पाठो मैत्रेयस्य च। अन्ये तृतीयं मूर्धन्योष्ठ्यादिं पठन्ति। सेचन इति तरङ्गिण्याम्। (मा.धा.)

अयं पाठो मैत्रेयस्य च, अन्ये तृतीयं मूर्द्धन्योष्ठ्यादिं पठन्ति। केचित् सेचन इति। सर्वे इतुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ णिश [निश्] समाधौ (भ्वा०)

णिश समाधौ। (धा.प्र.)(क्षी.त.)
(मा.धा.) (धा.क.)

तालव्योष्मान्तः। अत्र मैत्रेयो निशाशब्दम् अस्मादाह तस्याभिप्रायः। (मा.धा.) (धा.क.)

निश्, सेट्, अक, प। (धा.क.)

❖ णिष्क [निस्क्] परिमाणे (चुरा०)

णिष्क परिमाणे। (धा.प्र.)

❖ णिसि [निंस्] चुम्बने (अदा०)

णिसि चुम्बने। (शा.आ.) (क्षी.त.)
(मा.धा.)(धा.क.)

णिसि चुम्बने च। (धा.प्र.)

इदिद्दित्यान्तः निंस्ते इत्यादि कसिवत् अत्रात्रेयादयः। (मा.धा.)

निन्स्, (इ), सक, आ, सेट्। आभरणकारस्तु तालव्यान्तमिमं पठति। (धा.क.)

❖ णीञ् [नी] प्रापणे (भ्वा०)

णीञ् प्रापणे। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

प्रापणमासादनम्। (क्षी.त.)

इह प्रापणं गमनाङ्गं भवति। अत्र हरदत्तः यद्यपि नैतयोर्गतिरर्थः। अथापि गतिफलं प्रापणमर्थं इति फलतया गातः प्रतीयते इति मत्वा प्रतिषेध इति। (मा.धा.)

इह प्रापणं गमनाङ्गं भवति। नी (ञ्) अनिट्, सक, उ। नयते शास्त्रे अर्थान्, युक्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रतिपादयतीत्यर्थः। कर्मकारानुनयते - भृतिदानेन आत्मनः समीपे प्रापयतीत्यर्थः। ऋणं विनयते – निर्यातयति इत्यर्थः। शतं विनयते - धर्मादौ विनियुङ्क्ते इत्यर्थः। मन्युं विनयते - कर्तृस्थे चाशरीरे कर्मणि इति तङ्, कर्त्तृग्रहणात् देवदत्तस्य मन्युं विनयतीत्यत्र न भवति। तथा शरीरग्रहणात् गडुं विनयतीत्यत्र न भवति। हरति आदयः चत्वारोऽनुदात्ता उभयपदिनः। प्र-प्रणयः। अनु-अनुनयः। वि-विनयः। अप-अपनयनम्-अपसारणम्। अभि - अभिनयः। आ - आनयनम्। प्रति - आ - प्रत्यानयनम्। उत् - उन्नयनम् - उत्क्षेपणम्। उन्नतिः-वृद्धिः। सम्-उत् - समुन्नयनम्। उप - उपनयनम्। उपनेता। उपनेत्री। निर्णयः। परिणयः। प्रणयनम् - रचना। (धा.क.)

❖ णीव [नीव्] स्थौल्ये (भ्वा०)

पीव मीव तीव **णीव** स्थौल्ये। (धा.प्र.) (मा.धा.) (धा.क.)

सर्वे सेटः, अकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ णील [नील्] वर्णे (भ्वा०)

णील वर्णे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वर्णोपलक्षितायां क्रियायाम्। (क्षी.त.)

णिल गतौ इति ह्रस्वोपधस्तुदादौ। (मा.धा.)

नील्, सेट्, अक, प। ह्रस्वोपधस्तुदादौ। (धा.क.)

❖ णु [णु] स्तुतौ (अदा०)

णु स्तुतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

दीर्घान्तोऽयं तुदादौ। (मा.धा.)

णु, सेट्, सक, प। यङ्लुक्यपि अयमात्मनेपदी। दीर्घान्तोऽयं तुदादौ। (धा.क.)

❖ णु [नु] स्तवने (तुदा०)

णु स्तवने। (शा.आ.)

❖ णुद [नुद्] प्रेरणे (तुदा०)

णुद प्रेरणे। (क्षी.त.)(क्षी.त.)(मा.धा.)(धा.क.)

नुदिस्तुदेरनन्तरं पठितः स्वरितेत्, तस्मादिह परस्मैपदिमध्ये न पाठ्यः। (क्षी.त.)

आलस्यसुखाहरणयोरिति वक्तव्यम् इति वचनात् यस्तु दुःखामेकमपनुदति। सुखं नाहरति। तत्राणि शोकापनोद इति भवति। अयं परस्मैपदिष्वपि पठ्यते। तेन अयं भाषायां

परस्मैपदी एव इति वर्द्धमानः। स्वाम्यपि तथा परस्मैपदिषु एव अमुं पपाठ। उभयमात्रेयमैत्रेयाद्यनेकव्याख्याविरुद्धम्। यदाहुः उभयपदिषु पठितस्य अस्य पुनः परस्मैपदिषु पाठः कर्त्रभिप्रायेऽपि परस्मैपदार्थ इति। कर्त्रभिप्रायेऽपि क्रियाफले परस्मैपदार्थः पुनः पाठः। (मा.धा.)

नुद्, अनिट्, सक, उ। कर्त्रभिप्राये क्रियाफले परस्मैपदार्थः पुन पाठः। नुद्, अनिट्, सक, प। (धा.क.)

❖ णू [नू] स्तवने (तुदा०)

णू स्तवने। (धा.प्र.)(मा.धा.)(धा.क.)

णू स्तवे। (क्षी.त.)

ह्रस्वान्तमात्रेयादयः पठन्ति। यथा तु भाष्यं तथा दीर्घान्तः। (मा.धा.) (धा.क.)

नू, सेट्, सक, प। (धा.क.)

❖ णेदृ [नेद्] कुत्सासन्निकर्षयोः (भ्वा०)

णिदृ **णेदृ** कुत्सासन्निकर्षयोः। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

णिवृ णेवृ इति प्राच्चो हेवाकिनः। (क्षी.त.)

निद्, नेद् (ऋ) सेट्, अक, उ। (धा.क.)

❖ णेषृ [नेष्] गतौ (भ्वा०)

जेषृ **णेसृ** एषृ ह्रेषृ गतौ। (धा.प्र.)(क्षी.त.)

जेषृ **णेषृ** एषृ प्रेषृ गतौ। (मा.धा.) (धा.क.)

ह्रेषा वाजिध्वनौ स्त्रियाम् । (धा.प्र.)

सर्वे ऋदनुबन्धाः, सेटः, सकर्मकाः, आत्मनेपदिनश्च। नेषते, प्रणेषते। (धा.क.)

❖ तक [तक्] हसने (भ्वा०)

तक हसने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

सहन इति दुर्गः। (क्षी.त.)

तक, सेट्, अक, प। हसनार्थत्वात् नात्मनेपदम्।

तक हसने सहने च इति केचित्। (धा.क.)

❖ तकि [तङ्क्] कृच्छ्रजीवने (भ्वा०)

तकि कृच्छ्रजीवने। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

कृच्छ्रजीवनं दुःस्थता। तङ्क् (इ) सेट्, अक, प। (धा.क.)

❖ तक्ष [तक्ष्] त्वचने (भ्वा०)

तक्ष त्वचने। (धा.प्र.)(मा.धा.)(धा.क.)

त्वचनं संवरणम्। (धा.प्र.)

त्वचनं संवरणमिति दुर्गकाश्यपमैत्रेयाः। त्वचो ग्रहणमिति स्वामी। अयम् ऊदित् तनूकरणे गतः अत्रैव पक्षपरिग्रह इत्यप्येके। (मा.धा.)

त्वचनं संवरणमिति दुर्गकाश्यपमैत्रेयाः। त्वचो ग्रहणमिति स्वामी। तक्ष्, सेट्, सक, प। (धा.क.)

❖ तक्षू [तक्ष्] तनूकरणे (भ्वा०)

तक्षू त्वक्षू तनूकरणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

त्वक्षेरप्येवमूह्यम्। (शा.आ.)

तनूकरणे तक्षः। त्वक्ष त्वचने अर्थभेदार्थः। (क्षी.त.)

त्वक्षु त्वचन इत्यग्रे तूदित्। (मा.धा.)

तक्ष्, त्वक्ष् (ऊ) सेट्, सक, प। तक्ष त्वचन इत्यग्रेऽनूदित्। (धा.क.)

❖ **तगि [तङ्ग्] गत्यर्थः (भ्वा०)**

उख नख वख मख रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि **तगि** त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि **तगि** त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि **तगि** त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश। तृतीयान्तास्त्रयोदश। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि **तगि** त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। (धा.क.)

❖ **तञ्चु [तञ्च्] गत्यर्थः (भ्वा०)**

वञ्चु चञ्चु **तञ्चु** त्वञ्चु म्रुञ्चु म्लुञ्चु म्रुचु म्लुचु गत्यर्थाः। (धा.प्र.)

वञ्चु चञ्चु **तञ्चु** त्वञ्चु ग्रञ्चु ग्लञ्चु स्रञ्चु म्रुचु म्लुचु गत्यर्थाः - ग्लुचु स्तेये। ग्लुञ्चु गतौ। (शा.आ.)

वञ्चु चञ्चु **तञ्चु** त्वञ्चु म्रुञ्चु म्लुञ्चु म्रुचु म्लुचु गत्यर्थाः। तञ्चू सङ्कोचन इति रुधादौ। (मा.धा.)

❖ **तञ्चू [तञ्च्] सङ्कोचने (रुधा०)**

तञ्चू सङ्कोचने। तञ्च् (ऊ) वेट्, सक, प। तञ्चू इति तृतीयान्तमात्रेयादयः। (धा.क.)

❖ **तञ्जू [तञ्जू] सङ्कोचने (रुधा०)**

तञ्जू सङ्कोचने। (शा.आ.)

❖ **तट [तट्] उच्छ्राये (भ्वा०)**

तट उच्छ्राये। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तड आघात इति डकारान्तश्चुरादौ। (मा.धा.)

(धा.क.)

तट्, सेट्, अक, प। (धा.क.)

❖ **तट [तट्] परिभाषणे (भ्वा०)**

वट **तट** परिभाषणे। (शा.आ.)

❖ **तड [तड्] आघाते (चुरा०)**

तड आघाते। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तड्, सक, उ। (धा.क.)

❖ **तडि [तण्ड्] ताडने (भ्वा०)**

तडि ताडने। (धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

तण्ड च इति कुशकाशावलम्बनम्। (क्षी.त.)

तण्ड् (इ) सेट्, सक, आ। (धा.क.)

❖ **तत्रि [तन्त्र्] कुटुम्बधारणे (चुरा०)**

तत्रि कुटुम्बधारणे। (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

कुटुम्बं परिवारः, उपलक्षणञ्चैतत्। तन्द्रा तन्द्रीति पृषोदरादित्त्वात्। द्वौ धातू मत्त्वा चान्द्राः कुटुम्बयत इत्यप्युदाहरन्ति। (क्षी.त.)

चान्द्राः कुटुम्बेति पृथग्धातुं पठित्वा कुटुम्बयते इत्याहुः। (मा.धा.) (धा.क.)

कुटुम्बधारणमिह कुटुम्बपोषणमिति। तन्त्र् (इ) सक, आ। (धा.क.)

❖ तनु [तन्] विस्तारे (तना०)

तनु विस्तारे। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

इतः षट् सेट उभयपदिनश्च। (क्षी.त.)

तनु श्रद्धोपकरणयोरिति युजादौ। (मा.धा.)

तन् (उ) सेट्, सक, उ। (धा.क.)

❖ तनु [तन्] श्रद्धोपकरणयोः (चुरा०)

तनु श्रद्धोपकरणयोः।(धा.प्र.)(मा.धा.)(धा.क.)

तनु श्रद्धोपकरणयोः उपसर्गाच्च दैर्घ्ये - चकारं भिन्नक्रममाहुः । (क्षी.त.)

उपसर्गाच्च दैर्घ्ये तनुत इति विस्तारे अत्र क्वचित् चन श्रद्धोपहिंसनयोरिति पठ्यते । (मा.धा.)

तन् (उ) सक, उ। उपसर्गाच्च दैर्घ्ये - अत्र क्वचित् वन श्रद्धोपहिंसनयोरिति पठ्यते।(धा.क.)

❖ तन्चु [तञ्च्] गत्यर्थः (भ्वा०)

वन्चु चन्चु **तन्चु** त्वन्चु म्रुचु म्लुचु गत्यर्थाः (क्षी.त.)

वन्चु चन्चु **तन्चु** त्वन्चु म्रन्चु म्लुन्चु ग्रुन्चु ग्लुन्चु म्रुचु म्लुचु गत्यर्थाः - सर्वे उदनुबन्धाः, सेटः, सकर्म्मकाश्च। गत्यर्था इत्यत्र गतौ इति दुर्गः पठति। वच प्रलम्भन इति चुरादौ। तन्च् सङ्कोचन इति रुधादौ। (धा.क.)

❖ तन्चू [तञ्च्] सङ्कोचने (रुधा०)

तन्चू सङ्कोचने। (धा.प्र.)(मा.धा.)

❖ तन्जू [तञ्ज्] सङ्कोचने (रुधा०)

तन्जू सङ्कोचने। तन्चू इति द्रमिडाः । (क्षी.त.)

❖ तप [तप्] सन्तापे (भ्वा०)

तप सन्तापे। (शा.आ.)(धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

आसेवनं पौनः पुन्यं ततोऽयमनासेवनम्। अयमैश्वर्ये दिवादौ दाहे चुरादौ। (मा.धा.)

तप्, अनिट्, सक, प। अयमैश्वर्ये दिवादौ, दाहे चुरादौ। (धा.क.)

❖ तप [तप्] दाहे ऐश्वर्ये (दिवा०)

तप ऐश्वर्ये। (शा.आ.)(क्षी.त.)

तप ऐश्वर्य्ये वा। (धा.प्र.)(मा.धा.)(धा.क.)

तपतेरैश्वर्य्यार्थे दैवादिकत्वम्, आत्मनेपदित्वञ्च। वा ग्रहणादैश्वर्य्येऽपि तपतीत्येके। पत इति चैके। (धा.प्र.)

अन्ये तु तप संतापे इत्यस्यैव भ्वादेरैश्वर्ये सन्तापे च श्यंस्तङौ वा मन्यन्ते, वा ग्रहणाद् ऐश्वर्येऽपि भ्वादिरित्येके। नन्द्यादौ (गण) तपनः सञ्ज्ञायाम्। द्विषन्तपः, परन्तपः। पत इति द्रमिडाः। (क्षी.त.)

अयं धातुरैश्वर्ये वा तङ्श्यनौ उत्पादयतीत्यर्थः। अन्यदा न्याय्यविकरणः परस्मैपदी च। तपिं तिपिम् इत्यनिङ्कारिकान्यासे तु तप सन्तापे। तप ऐश्वर्यर्थे वा इत्येवं पठतोऽस्यापि वा शब्दः। तपतीति शपि गतं सन्तापे। (मा.धा.)

अयं धातुरैश्वर्ये वा तङ्श्यनौ उत्पादयतीत्यर्थः। अनात्र न्यायविकरणः परस्मैपदी च। तप्, अनिट्, अक, आ। अत्र पत इति केचित्

पठन्ति। तथा च निरुक्ते इरज्यति पत्यते क्षयति राजतीति चत्वार ऐश्वर्य्यकर्माण इति। परिक्षुद्रे अपि द्युतद्यामा नियुत पत्यमाल इति। माधवोऽपि स्वीकरोतीदमिति। तपतीति सन्तापे भ्वादौ। (धा.क.)

❖ तप [तप्] दाहे (चुरा०)

तप दाहे। (धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

तप्, सक, उ। (धा.क.)

❖ तमु [तम्] काङ्क्षायाम् (दिवा०)

तमु काङ्क्षायाम् (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

काङ्क्षा - आकाङ्क्षा, ग्लानिरिति वोपदेवः। तम्, (उ) सेट्, सक, प। (धा.क.)

❖ तमु [तम्] उपक्षये (दिवा०)

तमु उपक्षये। (शा.आ.)

❖ तय [तय्] गतौ (भ्वा०)

अय वय षय मय चय दय **तय** नय गतौ। **तय** रक्षणे। (शा.आ.)

अय वय यय मय चय **तय** णय गतौ। (धा.प्र.)

अय वय पय मय चय **तय** नय गतौ। (क्षी.त.)

अय वय पय मय चय **तय** णय गतौ।(मा.धा.)

अय वय पय मय चय **तय** णय गतौ - सर्वे सेटः, सकर्मकाः, आत्मनेपदिनश्च। (धा.क.)

❖ तर्क [तर्क्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप **तर्क** वृतु वृधु भाषार्थाः। भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रंघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप **तर्क** वृतु वृधु भासार्थाः। एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप **तर्क** वृतु वृधु भाषार्थाः- मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुप् धूप विच्छ ची पुथ लोकृ लोचृ णद कुप **तर्क** वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ तर्ज [तर्ज्] भर्त्सने (भ्वा०)

तर्ज भर्त्सने।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अयं चुरादावपि। (मा.धा.)

तर्ज्, सेट्, सक, प। अयं चुरादावपि। (धा.क.)

❖ तर्ज [तर्ज्] तर्जने (चुरा०)

तर्ज भर्त्स सन्तर्जने। (धा.प्र.)(मा.धा.)(धा.क.)

भर्त्स तर्ज सन्तर्जने- भ्वादौ तर्ज भर्त्सने। (क्षी.त.)

❖ तर्द [तर्द्] हिंसायाम् (भ्वा०)

तर्द हिंसायाम्। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

पूर्वकेण हिंसार्थधातुना सहास्य निर्देशो न कृतः। रेफवत्संयोगान्तप्रकरणात्। एवम् अन्यत्रापि व्यतिक्रमे हेतुर्वेदितव्यः। (धा.प्र.)

सकर्मकः। (मा.धा.)

तर्द्, सेट्, सक, प। (धा.क.)

❖ तल [तल्] वैकल्ये (भ्वा०)

तल ट्वल वैकल्ये। (शा.आ.)

❖ तल [तल्] प्रतिष्ठायाम् (चुरा०)

तल प्रतिष्ठाकरणे। (धा.प्र.)

तल प्रतिष्ठायाम्। (क्षी.त.)(मा.धा.)(धा.क.)

मैत्रेयस्तु घुषिरविशब्दने। इति ज्ञापकं समान्यम् इत्युक्त्वा णिजभावे तलशब्दमाह। (मा.धा.)

तल्, अक, उ। (धा.क.)

❖ तसि [तंस्] अलङ्करणे (चुरा०)

तसि भूष अलङ्कारे। (धा.प्र.)(मा.धा.)(धा.क.)

तसि भूष अलङ्कार इति पुरुषकारे तु उक्तम् उभयत्रापि भूषैवेत्येव बहव इति। (मा.धा.)

तन्स्, (इ, वा णिच्) भूष, सक, उ। (धा.क.)

❖ तसु [तस्] उपक्षये (दिवा०)

तसु प्रक्षेपे। (धा.प्र.)

तसु उपक्षये (क्षी.त.)(मा.धा.)(धा.क.)

तसु, दसु, उत्क्षेपे इति दुर्गः पठति। तस्, दस्, (उ) सेट्, सक, प। (धा.क.)

❖ तायृ [ताय्] सन्तानपालनयोः (भ्वा०)

तायृ सन्तानपालनपूजानिशामनेषु। (शा.आ.)

तायृ सन्तानपालनयोः। (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

सन्तानः प्रबन्धः। (क्षी.त.)(मा.धा.)(धा.क.)

ताय् (ऋ) सक, सेट्, आ। (धा.क.)

❖ तिक [तिक्] गतौ (स्वा०)

तिक तिग च। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चकारेणास्कन्दन इत्यपेक्षते। (धा.प्र.)

चकाराद् आस्कन्दने। (क्षी.त.)

चकारादास्कन्दने इत्यनुषज्यते। (मा.धा.)(धा.क.)

तिक्, तिग्, सेट्, सक, प। (धा.क.)

❖ तिकृ [तिक्] गत्यर्थः (भ्वा०)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वक्क वस्क मस्क **तिकृ** टिकृ टीकृ रघि लघि गत्यर्थाः। (धा.प्र.)

❖ तिग [तिग्] गतौ च (स्वा०)

तिक तिग च। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चकारेणास्कन्दन इत्यपेक्षते। (धा.प्र.)

इतश्चम्वन्ता नव सेटः परस्मैपदिनश्च। चकाराद् आस्कन्दने। (क्षी.त.)

चकारादास्कन्दने इत्यनुषज्यते। (मा.धा.)(धा.क.)

तिक्, तिग्, सेट्, सक, प। (धा.क.)

❖ तिज [तिज्] निशाने (भ्वा०)

तिज निशानक्षमयोः। (शा.आ.)

तिज निशाने। (मा.धा.)(धा.क.)

तिज निशाने क्षमायाञ्च। (धा.प्र.) (क्षी.त.)

निशानं तीक्ष्णीकरणम्। (क्षी.त.)

तिज्, सेट्, स, आ। (धा.क.)

❖ तिज [तिज्] निशाने (चुरा०)

तिज निशाने।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भ्वादौ क्षमायां सन् । (क्षी.त.)

तिज्, सक, उ। (धा.क.)

❖ तिप [तिप्] क्षेपे (चुरा०)

दभ दिभि **तिप** टिप डिप स्तिप क्षेपे। (क्षी.त.)

❖ तिपृ [तिप्] क्षरणार्थः (भ्वा०)

तिपृ तेपृ ष्टिपृ ष्टेपृ क्षरणार्थाः। (धा.प्र.) (क्षी.त.) (मा.धा.)

दिपृ देपृ इति च काश्यपः। (मा.धा.)

तिपृ तेपृ ष्टिपृ क्षरणार्थाः - तिप् (ऋ) अनिट्, तेप् (ऋ), ष्टिप् (ऋ) सेट्, सक, आ। एतदादयः तोभत्यन्ता उदात्ता अनुदात्तेतः। तिपिः एकः अनुदात्तः। ऋदित् पवर्गान्तात्मनेपदित्वसाम्यात् च इह पाठः। क्षीरस्वमिना त्वयं सेडुदाहृतः, तत् काश्यपवृत्तिन्यासपदमञ्जर्य्यादिविरोधात् तपिं तिपिमिति व्याघ्रभूतिवचनविरोधात् च उपेक्ष्यम्। दिपृ, देपृ इति च काश्यपः। (धा.क.)

❖ तिम [तिम्] आर्द्रीभावे (दिवा०)

तिम तीम ष्टिम ष्टीम आर्द्रभावे। (शा.आ.)

तिम ष्टिम ष्टीम आर्द्रीभावे। (धा.प्र.)

तिम तीम ष्टिम ष्टीम आर्द्रीभावे। (क्षी.त.)

तिम स्तिम ष्टीम आर्द्रीभावे - अत्र केचिद् असंयोगादि तीम इति दीर्घान्तं चतुर्थम् अपि धातुं पठन्तीत्यात्रेयः । (मा.धा.)

तिम स्तिम ष्टीम आर्द्रीभावे - तिम्, स्तिम्, स्तीम् - सेट्, अक, प। (धा.क.)

❖ तिल [तिल्] गतौ (भ्वा०)

तिल गतौ। (धा.प्र.)

❖ तिल [तिल्] स्नेहने (तुदा०)

तिल स्नेहने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

तिल्, सेट्, अक, प। (धा.क.)

❖ तिल [तिल्] स्नेहने (चुरा०)

तिल स्नेहने।(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

तिल्, अक, उ। (धा.क.)

❖ तिल्ल [तिल्ल्] गतौ (भ्वा०)

तिल्ल गतौ - तिल इत्यपि दुर्गः । (क्षी.त.)

❖ तीम [तीम्] आर्द्रीभावे (दिवा०)

तिम **तीम** ष्टिम ष्टीम आर्द्रभावे। (शा.आ.)

तिम **तीम** ष्टिम ष्टीम आर्द्रीभावे। (क्षी.त.)

❖ तीर [तीर] कर्मसमाप्तौ (चुरा०)

पार **तीर** कर्मसमाप्तौ। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

पार, तीर, सक, प। (धा.क.)

❖ तीव [तीव्] स्थौल्ये (भ्वा०)

पीव मीव **तीव** णीव स्थौल्ये। (धा.प्र.) (मा.धा.)(धा.क.)

पीव मीव नीव **तीव** स्थौल्ये। (क्षी.त.)

सर्वे सेटः, अकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ तु [तु] वृद्धिहिंसयोः (अदा०)

तु वृद्धिहिंसयोः - सौत्रिको धातुः। तु, सेट्, प। तौति, तवीति इत्यादि रौतिवत्, छान्दसः अयमिति सर्वैर्नाद्रियते। (धा.क.)

❖ तुज [तुज्] हिंसायाम् (भ्वा०)

तुज तुजि हिंसायाम्। (धा.प्र.)(क्षी.त.)

तुज हिंसायाम्। (मा.धा.) (धा.क.)

तुज्, सेट्, सक, प। (धा.क.)

❖ तुजि [तुञ्ज्] हिंसायाम् पालने च(भ्वा०)

तुज **तुजि** हिंसायाम् (धा.प्र.) (क्षी.त.)

तुजि पालने च। (धा.प्र.) (मा.धा.)

तुजि पालने। (धा.क.)

चुरादौ भासार्थः तथा तुजि पिजि लुजि हिंसाबलादाननिकेतनेषु तुञ्जो निकेतनम्। (क्षी.त.)

वार्त्तिकमते न्याङ्क्वादित्वात् कुत्वम् भाषार्थोऽयं युजादौ। (मा.धा.)

तुजि बलने च इति कातन्त्रम्। केचित् प्रापणे हिंसायां बले च इत्यपि पठन्ति। तुञ्ज् (इ) सेट्, सक, प। वार्त्तिकमते न्यङ्क्वादित्वात् कुत्वम्। उत्- उत्तुङ्गः। भाषार्थोऽयं युजादौ। (धा.क.)

❖ तुजि [तुञ्ज्] हिंसाबलादाननिकेतनेषु (चुरा०)

तुजि पिजि हिंसाबलादाननिकेतनेषु- एतौ पटादिदण्डके गणान्तरेऽपि पठितौ। (धा.प्र.)

तुजि पिजि लुजि हिंसाबलादाननिकेतनेषु - निकेतनमावसथः। (क्षी.त.)

तुजि पिजि हिंसाबलादाननिकेतनेषु - तुजि हिंसायां तुजि पालने चेति भूवादिपाठादेव हिंसायां तुञ्जतीति सिद्धाविदित्त्वेन णिच् अनित्यत्वं बलादाननिकेतनयोरपि भाषार्थौ अग्रे भविष्यतः। (मा.धा.)

तुजि पिजि हिंसादाननिकेतनेषु - तुञ्ज् (इ) (तुन्ज) पिञ्ज् (पिन्ज) सक, उ। (धा.क.)

❖ तुजि [तुञ्ज्] भाषार्थः (चुरा०)

पट पुट लट लुट **तुजि** पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट **तुजि** पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट **तुजि** मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट **तुजि** मिजि पिजि लुजि भजि लघि

त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ तुट [तुट्] कलहकर्मणि (तुदा०)

तुट कलहकर्मणि। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तुट्, सेट्, अक, प। (धा.क.)

❖ तुट [तुट्] संवरणे (तुदा०)

तुट स्फुट संवरणे। (शा.आ.)

❖ तुड [तुड्] तोडने (तुदा०)

तुड तोडने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तोडनं भेदः पृथक्करणं वा। (क्षी.त.)

अयं तृतीयान्तः प्रथमान्तः कलहकर्मार्थः पूर्वत्र पठितः। तोडनं भेदः। (मा.धा.)

तोडनं भेदः। तुड्, सेट्, सक, प। (धा.क.)

❖ तुडि [तुण्ड्] तोडने (भ्वा०)

तुडि तोडने।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तोडनं हिंसा। (क्षी.त.)

तोडनं दारणं हिंसनं । अयम् अनिदित् परस्मैपदिषु। (मा.धा.)(धा.क.)

तुण्ड् (इ) सेट्, सक, आ। (धा.क.)

❖ तुडृ [तुड्] तोडने (भ्वा०)

तुडृ तोडने। (धा.प्र.)(मा.धा.)(धा.क.)

तोडनं दारणं हिंसनं चेत्युक्तम्। तुड इति स्वामिशाकटायनौ। (मा.धा.)

तुड् (ऋ) सेट्, सक, प। तोडनं दारणं हिंसनं चेत्युक्तम्। (धा.क.)

❖ तुण [तुण्] कौटिल्ये (तुदा०)

तुण तृण कौटिल्ये। (शा.आ.)

तुण कौटिल्ये। (धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

तूण पूरण इति दीर्घोपध आकुस्मीयः। (मा.धा.)

तुण्, सेट्, अक, प। (धा.क.)

❖ तुत्थ [तुत्थ्] आवरणे (चुरा०)

तुत्थ आवरणे। (धा.प्र.)(मा.धा.)(धा.क.)

अतुत्थयदुत्थितोऽद्रेः इति माघः। (धा.प्र.)

यथाभिधानमिति मैत्रेयादयः। अन्ये तु भूवादिष्वेतदन्तेषु दशगणीषु धातूनां पाठो निदर्शनाय। (मा.धा.)

तुत्थ, सक, प। यथाभिधानमिति मैत्रेयादयः। अन्ये तु भ्वादिष्वेतदन्तासु दशगणीषु धातूनां पाठो निदर्शनाय। (धा.क.)

❖ तुद [तुद्] व्यथने (तुदा०)

तुद व्यथने। (शा.आ.)(क्षी.त.)(मा.धा.)(धा.क.)

तुत्थम् अञ्जनम्, धातुविशेषश्च। (क्षी.त.)

तुद्, अनिट्, सक, उ। (धा.क.)

❖ तुन्प [तुम्प्] हिंसार्थः (भ्वा०)

तुप तुन्प त्रुप **त्रुन्प** तुफ तुन्फ हिंसार्थाः- प्राक् तुम्पतेर्गतौ सुट् प्रस्तुम्पति गां वत्सः। त्रुफ त्रुन्फ

इति चन्द्रः अधिकौ पठति। (क्षी.त.)

तुप तुन्प त्रुप **त्रुन्प** तुफ् तुन्फ त्रुफ त्रुन्फ हिंसार्थाः। तुप् तुन्प् त्रुप त्रुन्प् तुफ् तुन्फ त्रुफ् त्रुन्फ् सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। अरेफाः चत्वारस्तुदादावपि। आद्यास्तु चुरादावपि। तत्र त्वर्दनमर्थः। (धा.क.)

❖ तुन्प [तुन्प] हिंसायाम् (तुदा०)

तुप **तुन्प** तुफ तुन्फ हिंसायाम्। (क्षी.त.) (मा.धा.) (धा.क.)

भ्वादौ तुन्प तुन्फ पाठो व्यर्थः। (क्षी.त.)

एषां भूवादौ पाठः स्वरार्थ इति तत्रैवोक्तम्। (मा.धा.)

तुप्, तुन्प्, तुफ्, तुन्फ्, सेट्, सक, प। एषां भ्वादौ पाठः स्वरार्थं। इति तत्रैवोक्तम्। (धा.क.)

❖ तुन्फ [तुन्फ] हिंसायाम् (तुदा०)

तुप तुन्प तुफ **तुन्फ** हिंसायाम्। (क्षी.त.) (मा.धा.) (धा.क.)

भ्वादौ तुन्प तुन्फ पाठो व्यर्थः। (क्षी.त.)

एषां भूवादौ पाठः स्वरार्थ इति तत्रैवोक्तम्। (मा.धा.)

तुप्, तुन्प्, तुफ्, तुन्फ्, सेट्, सक, प। एषां भ्वादौ पाठः स्वरार्थं। इति तत्रैवोक्तम्। (धा.क.)

❖ तुन्फ [तुन्फ] हिंसार्थः (भ्वा०)

तुप तुम्प त्रुप त्रुम्प तुफ **तुन्फ** त्रुफ त्रुन्फ हिंसार्थाः। (धा.प्र.)

तुप तुन्प त्रुप त्रुन्प तुफ **तुन्फ** हिंसार्थाः - प्राक् तुम्पतेर्गतौ सुट्। प्रस्तुम्पति गां वत्सः। त्रुफ त्रुन्फ इति चन्द्रः अधिकौ पठति। (क्षी.त.)

तुप तुन्प त्रुप त्रुन्प तुफ् **तुन्फ** त्रुफ त्रुन्फ हिंसार्थाः। तुप्, तुन्प्, ऋप, त्रुन्प्, तुफ्, तुन्फ्, त्रुफ्, त्रुन्फ्, सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनः च। अरेफाश्चत्वारस्तुदादावपि आद्यास्तु चुरादौ अपि तत्र त्वर्दनमर्थः। (धा.क.)

❖ तुन्फ [तुन्फ] हिंसायाम् (तुदा०)

तुप **तुन्प** तुफ तुन्फ हिंसायाम्। (क्षी.त.)(धा.क.)

भ्वादौ तुन्प तुन्फ पाठो व्यर्थः। (क्षी.त.)

तुप, तुन्प, तुफ, तुन्फ, सेट्, सक, प। एषां भ्वादौ पाठः स्वार्थं इति तत्रैवोक्तम्। (धा.क.)

❖ तुप [तुप्] हिंसार्थः (भ्वा०)

तुप तुम्प त्रुप त्रुम्प तुफ तुन्फ त्रुफ त्रुन्फ हिंसार्थाः। (धा.प्र.)

तुप तुम्प तुफ तुम्फ हिंसायाम् – तुप तुम्प ग्रहणं भ्वादौ स्वरार्थम्। (धा.प्र.)

तुप तुन्प त्रुप त्रुन्प तुफ तुन्फ हिंसार्थाः - प्राक् तुम्पतेर्गतौ सुट्। प्रस्तुम्पति गां वत्सः। त्रुफ त्रुन्फ इति चन्द्रः अधिकौ पठति। (क्षी.त.)

तुप तुम्प त्रुप त्रुम्प तुफ तुम्फ त्रुफ त्रुम्फ हिंसार्थाः - अरेफाः चत्वारः तुदादौ अपि आद्यः तु चुरादावपि तत्र त्वर्दनमर्थः। (मा.धा.)(धा.क.)

तुप्, तुन्प्, त्रुप, त्रुन्प्, तुफ्, तुन्फ, त्रुफ्, त्रुन्फ्, सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ तुप [तुप्] हिंसायाम् (तुदा०)

तुप तुम्प तुफ तुम्फ हिंसायाम्। (धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

तुप तुम्प ग्रहणं भ्वादौ स्वरार्थम्। (धा.प्र.)

भ्वादौ तुन्प तुन्फ पाठो व्यर्थः। (क्षी.त.)

एषां भूवादौ पाठः स्वरार्थ इति तत्रैवोक्तम्। (मा.धा.) (धा.क.)

तुप्, तुन्प्, तुफ्, तुन्फ्, सेट्, सक, प। (धा.क.)

❖ **तुपि [तुम्प्] अर्द्दने** **(चुरा०)**

लुबि तुबि **तुपि** अर्द्दने। (धा.प्र.)

❖ **तुफ [तुफ्] हिंसार्थः** **(भ्वा०)**

तुप तुम्प त्रुप त्रुम्प तुफ तुन्फ **त्रुफ** त्रुन्फ हिंसार्थाः। (धा.प्र.)

तुप तुम्प **तुफ** तुम्फ हिंसायाम्। तुपतुम्पग्रहणं भ्वादौ स्वरार्थम्। (धा.प्र.)

तुप तुन्प त्रुप त्रुन्प **तुफ** तुन्फ हिंसार्थाः। (क्षी.त.)

तुप तुन्प त्रुप त्रुन्प **तुफ्** तुन्फ त्रुफ त्रुन्फ हिंसार्थाः - तुप्, तुन्प्, त्रुप, त्रुन्प्, तुफ्, तुन्फ, त्रुफ्, त्रुन्फ्, सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। अरेफाश्चत्वारः तुदादौ अपि। (धा.क.)

❖ **तुफ [तुफ्] हिंसायाम्** **(तुदा०)**

तुप तुन्प **तुफ** तुन्फ हिंसायाम्। (क्षी.त.) (मा.धा.) (धा.क.)

तुप तुम्प **तुफ** तुम्फ हिंसायाम्। (धा.प्र.)

एषां भूवादौ पाठः स्वरार्थ इति तत्रैवोक्तम्। (मा.धा.)(धा.क.)

तुप्, तुन्प्, तुफ्, तुन्फ्, सेट्, सक, प। (धा.क.)

❖ **तुबि [तुम्ब्] अर्दने** **(भ्वा०)**

लुबि **तुबि** अर्दने (धा.प्र.)(मा.धा.) (धा.क.)

अर्दनमिह हिंसा, याचनमित्यपरे इति रमानाथः। लुन्ब्, तुन्ब्, (इ) सेट्, सक, प। तुम्बी अलाबूः, गौरादित्वात् ङीष्। (धा.क.)

❖ **तुबि [तुम्ब्] अदर्शने अर्दने** **(चुरा०)**

लुबि **तुबि** तुपि अर्द्दने। (धा.प्र.)

लुबि **तुबि** अर्दने। (क्षी.त.)(मा.धा.)(धा.क.)

तुपि इति दौर्गाः। चान्द्रे त्रयोऽपि भ्वादौ सिद्धाः। (क्षी.त.)

अर्दन इति मैत्रेयः। अनयोरिदित्त्वादेव लुम्बति तुम्बतीति सिद्धेरर्दनेऽर्थे भ्वादौ पाठो व्यर्थः स्यात्। इहार्शनेऽर्थे त्त्वर्थभेदात् सोऽपि सार्थकः। (मा.धा.)

अर्दन इति मैत्रेयः। लुम्ब्, तुम्ब्, (इ) अक, उ। (धा.क.)

❖ **तुभ [तुभ्] हिंसायाम्** **(भ्वा०)**

नभ **तुभ** हिंसायाम्। (शा.आ.)

णभ **तुभ** हिंसायाम्। (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

इमौ दिवादी क्र्यादी च। (मा.धा.)

नभ्, तुभ्, सेट्, सक, आ। इमौ दिवादी, क्र्यादौ च। (धा.क.)

❖ **तुभ [तुभ्] हिंसायाम्** **(दिवा०)**

णभ **तुभ** हिंसायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

अनयोरपीह पाठः। क्षुभेरिव इमावपि द्युतादौ क्र्यादौ च पठ्यते। (मा.धा.)

नभ्, तुभ्, सेट्, सक, प। इमावपि भ्वादौ क्र्यादौ च। (धा.क.)

❖ तुभ [तुभ्] हिंसायाम् **(क्र्या०)**

णभ **तुभ** हिंसायाम् (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

नभ्, तुभ्, सेट्, सक, प। (धा.क.)

❖ तुम्प [तुम्प्] हिंसार्थः **(भ्वा०)**

तुप **तुम्प** त्रुप त्रुम्प तुफ तुन्फ त्रुफ त्रुन्फ हिंसार्थाः। (धा.प्र.)

तुप **तुम्प** तुफ तुम्फ हिंसायाम्। तुपतुम्पग्रहणं भ्वादौ स्वरार्थम्। (धा.प्र.)

तुप **तुम्प** त्रुप त्रुम्प तुफ तुम्फ त्रुफ त्रुम्फ हिंसार्थाः। अरेफाः चत्वारः तुदादौ अपि। (मा.धा.)

❖ तुम्प [तुम्प्] हिंसायाम् **(तुदा०)**

तुप **तुम्प** तुफ तुम्फ हिंसायाम्। तुपतुम्पग्रहणं भ्वादौ स्वरार्थम्। (धा.प्र.)

❖ तुम्फ [तुम्फ्] हिंसार्थः **(तुदा०)**

तुप तुम्प तुफ **तुम्फ** हिंसायाम्। (धा.प्र.)

❖ तुर [तुर्] त्वरणे **(जुहो०)**

तुर त्वरणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तुर्, सेट्, अक, प। (धा.क.)

❖ तुर्वी [तुर्व्] हिंसार्थः **(भ्वा०)**

उर्वी **तुर्वी** थुर्वी दुर्वी धुर्वी हिंसायाम्। (धा.प्र.)

उर्वी **तुर्वी** दुर्वी धुर्वी हिंसार्थाः। (क्षी.त.)

उर्वी **तुर्वी** थुर्वी धुर्वी दुर्वी हिंसार्थाः। (मा.धा.)

उर्वी **तुर्वी** थुर्वी दुर्वी धुर्वी हिंसायाम्। सर्वे ईदनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ तुल [तुल्] उन्माने **(चुरा०)**

तुल उन्माने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तुल, सक, उ। तुलया सम्मितं तुल्यम्। यत् सम्मितमिति व्युत्पत्तिमात्रं रूढशब्दश्चायं सदृशपर्य्यायः। कृष्णस्य तुल्यः, कृष्णेन वा तुल्यार्थैरिति षष्ठीतृतीये। (धा.क.)

❖ तुष [तुष्] शब्दे **(भ्वा०)**

तुष तुष्टौ। (शा.आ.)

❖ तुष [तुष्] प्रीतौ **(दिवा०)**

तुष प्रीतौ। (क्षी.त.) (मा.धा.)

प्रीतिस्तृप्तिः। (मा.धा.) (धा.क.)

तुष्, अक, अनिट्, प। (धा.क.)

❖ तुष [तुष्] तुष्टौ **(दिवा०)**

तुष तुष्टौ। (शा.आ.)(धा.प्र.)

❖ तुस [तुस्] शब्दे **(भ्वा०)**

तुस ह्रस ह्लस रस शब्दे। (शा.आ.)(धा.प्र.) (मा.धा.)(धा.क.)

तुस ह्रस ह्लस रस शब्दार्थाः। (क्षी.त.)

तुस्, ह्रस्, ह्लस्, रस्, सेट्, अक, प। (धा.क.)

❖ तुहिर् [तुह्] अर्दने **(भ्वा०)**

तुहिर् उहिर् अर्दने। (शा.आ.)

तुहिर् दुहिर् अर्दने। (धा.प्र.)

तुहिर् उहिर् इत्येके। (धा.प्र.)

तुहिर् दुहिर् उहिर् अर्दने। (मा.धा.) (धा.क.)

तुहिर् उहिर् अर्दने। तुहिर् दुहिर् इति चन्द्रदुर्गौ। (क्षी.त.)

तुह्, दुह्, उह्, (इर्) सेट्, सक, प। (धा.क.)

❖ तूडृ [तूड्] तोडने (भ्वा०)

तूडृ तोडने। तोडनं द्रावणम्। तुडृ इति दुर्गः। (क्षी.त.)

❖ तूण [तूण्] पूरणे (चुरा०)

तूण पूरणे। (धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

तूल इति चन्द्रः। (क्षी.त.)

तूण्, सक, आ। (धा.क.)

❖ तूरी [तूर्] गतित्वरणहिंसनयोः (दिवा०)

तूरी त्वरणहिंसयोः। (धा.प्र.)

तूरी गतित्वरणहिंसनयोः। (क्षी.त.) (मा.धा.) (धा.क.)

गतेस्त्वरणे हिंसने च। तूर इति दुर्गः। (क्षी.त.)

तूर् (ई) सेट्, सक, आ। (धा.क.)

❖ तूल [तूल्] निष्कर्षे (भ्वा०)

तूल निष्कर्षे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

निष्कर्षो वस्तुनिःसारणम्। (क्षी.त.)

निष्कर्षो निष्कोषणम्। तच्च अन्तर्गतस्य बहिः निःसारणम्। (मा.धा.)(धा.क.)

तूल्, सेट्, सक, प। दुर्गवोपदेवादिमते चुरादौ चायम्। (धा.क.)

❖ तूष [तूष्] तुष्टौ (भ्वा०)

तूष तुष्टौ। (धा.प्र.)(क्षी.त.)(मा.धा.)

तूष्, सेट्, अक, प। (धा.क.)

❖ तृंहू [तृंह्] हिंसार्थः (तुदा०)

तृहू स्तृहू तृंहू हिंसार्थाः। (धा.प्र.)

❖ तृक्ष [तृक्ष्] गतौ (भ्वा०)

तृक्ष ष्टृक्ष णक्ष गतौ। (धा.प्र.) (धा.क.)

तृक्ष स्तृक्ष णक्ष गतौ। (क्षी.त.) (मा.धा

चान्द्राः तृक्ष ष्टृक्ष णक्ष इति पेठुः। (क्षी.त.)

तृक्ष्, स्तृक्ष्, नक्ष्, सेट्, सक, प। (धा.क.)

❖ तृणु [तृण्] अदने (तना०)

तृण अदने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तृणु अर्दने इति नन्दी। (क्षी.त.)

तृण्, (उ) सेट्, सक, उ। (धा.क.)

❖ तृण [तृण्] कौटिल्ये (तुदा०)

तुण तृण कौटिल्ये। (शा.आ.)

❖ तृन्हू [तृन्ह]हिंसार्थाः (तुदा०)

तृहू स्तृहू **तृन्हू** हिंसार्थाः। (मा.धा.)(धा.क.)

तृहू **तृन्हू** स्तृहू स्तृन्हू हिंसायाम्। (क्षी.त.)

अत्र सानुषङ्गं मूर्धन्यादिं चतुर्थमपि ष्टृह इति धातुं केचित्पठन्ति। आत्रेयमैत्रेयादिभिरयं न पठ्यते तृह हिंसार्थो रूधादौ। (मा.धा.)

तृह्, स्तृह्, तृन्ह्, (ऊ) वेट्, सक, प। (धा.क.)

❖ तृप[तृप्] प्रीणने (दिवा०)

तृप प्रीणने। (शा.आ.) (मा.धा.) (धा.क.)

तृप प्रीतौ। प्रीतिः सौहित्यम्। तुदादौ तृप तृप्तौ। (क्षी.त.)

इह प्रीणनं तृप्तिस्तर्पणं च। दृश्यते च उभयथा तृप्यन्तु भवन्तः। न अग्निस्तृप्यति काष्ठानाम्। पितृनताप्सीत् सममंस्त बन्धून् इति। अमुं स्वादावपि मैत्रेयात्रेयादयः पठन्ति। तद्वृत्तिन्यासपदमञ्जर्यादिकृतामनभिमतम्। तत्र एव उपपादयिष्यते। अयं युजादौ तुदादौ च तत्र तुदादौ द्वितीयान्त इत्येके। (मा.धा.)

प्रीणनं तर्पणम्। तृप्, वेट्, सक, प। मैत्रेयादयः

स्वादावप्यमुं पठन्ति। युजादौ तुदादौ चायम्। (धा.क.)

❖ तृप [तृप्] प्रीणने (दिवा०)

तृप प्रीणने। (धा.प्र.)(धा.क.)

न्यासकृता तु स्वादावपठितत्वात् तृप्नोतीति क्षुभ्नादिपाठज्ञापकात् साधितम्। (धा.प्र.)

प्रीतिः सौहित्यम्। तुदादौ तृप तृप्तौ। (क्षी.त.)

प्रीणनं तर्पणम्। तृप्, वेट्, सक, प। मैत्रेयादयः स्वादावप्यमुं पठन्ति। युजादौ तुदादौ चायम्। (धा.क.)

❖ तृप [तृप्] तृप्तौ (तुदा०)

तृप तृम्फ तृप्तौ। (मा.धा.) (धा.क.)

आद्यः प्रथमान्त इति वामनः। यदाह तृप्यतिदृप्यती सृपमित्यनिड्कारिकायां श्यना निर्देशस्य व्यावर्त्य दर्शयन् तुदादिषु यौ तृपिदृपी तौ उदात्तौ वेति। आत्रेयमैत्रेयादयस्तु द्वितीयान्तं पठित्वा प्रथमान्तं वामनः पठतीत्याहुः। (मा.धा.)

तृप्, तृन्फ्, सेट्, सक, प। अयं भ्वादि - स्वादिचुरादिषु। (धा.क.)

❖ तृप [तृप्] प्रीणने (स्वा०)

तृप प्रीणने। (धा.प्र.)

❖ तृप [तृप्] तृप्तौ सन्दीपने च (चुरा०)

तृप तृप्तौ। (धा.प्र.) (मा.धा.)(धा.क.)

तृप दृप सन्दीपने। दिवादौ तृप प्रीतौ। (क्षी.त.)

सन्दीपन इति क्षीरस्वामी। अनिड्कारिकायां तृप्यति इति श्यना निर्देशान्नास्यानिट्त्वम्। तृपति तृम्पतीति शे। तृप्यतीति श्यनि। अस्य स्वादौ पाठो वृत्तिकारादीनाम् अनभिमत इत्यवोचाम। (मा.धा.)

सन्दीपन इति क्षीरस्वामी। तृप्, सक, उ। (धा.क.)

❖ तृन्फ [तृन्फ्] तृप्तौ (तुदा०)

तृफ **तृन्फ** तृप्तौ। (धा.प्र.)(क्षी.त.)(धा.क.)

तृप तृन्प इत्येके। (क्षी.त.)

तृप्, तृन्फ्, सेट्, सक, प। अयं भ्वादि - स्वादिचुरादिषु। (धा.क.)

आत्रेयमैत्रेयादयस्तु द्वितीयान्तं पठित्वा प्रथमान्तं वामनः पठतीत्याहुः। (मा.धा.)

❖ तृफ [तृफ्] तृप्तौ (तुदा०)

तृफ तृन्फ तृप्तौ। (धा.प्र.) (क्षी.त.)

तृप तृन्प इत्येके। (क्षी.त.)

❖ तृह [तृह्] वृद्धौ (भ्वा०)

तृह तृहि दृह दृहि वृह वृहि वृद्धौ। (धा.प्र.)

❖ तृह [तृह्] हिंसायाम् (रुधा०)

तृह हिंसायाम्। (शा.आ.)(मा.धा.)(धा.क.)

तृह हिसि हिंसायाम्। (धा.प्र.)

तृह्, सेट्, सक, प। (धा.क.)

❖ तृहि [तृंह्] वृद्धौ (भ्वा०)

तृह **तृहि** दृह दृहि वृह वृहि वृद्धौ। (धा.प्र.)

❖ तृहि [तृंह्] हिंसायाम् (रुधा०)

तृहि हिसि हिंसायाम्। (क्षी.त.)

❖ तृहू [तृह्] हिंसार्थः (तुदा०)

तृहू स्तृहू सृहू हिंसायाम्। (शा.आ.)

तृहू स्तृहू तृंहू हिंसार्थाः। (धा.प्र.)

तृहू तृन्हू स्तृहू स्तृन्हू हिंसायाम्। (क्षी.त.)

तृहू स्तृहू तृन्हू हिंसार्थाः। अत्र सानुषङ्गं मूर्धन्यादिं चतुर्थमपि ष्टृह इति धातुं केचित् पठन्ति। आत्रेयमैत्रेयादिभिरयं न पठ्यते। तृह हिंसार्थौ रुधादौ। (मा.धा.)

तृहू स्तृहू तृन्हू हिंसार्थाः। तृह्, स्तृह्, तृन्ह्, (ऊ) वेट्, सक, प। (धा.क.)

❖ तॄ [तॄ] प्लवनतरणयोः (भ्वा०)

तॄ प्लवनतरणयोः। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

प्लवनं मज्जनम्, तरणं लङ्घनम्। (क्षी.त.)

तॄ, सेट्, सक, प। आ-आतरः। वि-वितरः। अति-अतितरः, अतिक्रमः। अव-अवतरणम्। उद्-उत्तरणम्। निर्-निस्तारः। वि-विस्तारः। प्र-णिच् - प्रतारणा। वितरणम्। सम् - सन्तरणम्। सन् - उ - तितीर्षुः। (धा.क.)

❖ तेज [तेज्] पालने (भ्वा०)

तेज पालने। (धा.प्र.) (मा.धा.) (धा.क.)

क्षमार्थोऽग्रे, तिज निशान इति चुरादौ। (मा.धा.) (धा.क.)

तेज्, सेट्, सक, प। (धा.क.)

❖ तेपृ [तेप्] क्षरणार्थः कम्पने च (भ्वा०)

तिपृ **तेपृ** ष्टिपृ ष्टेपृ क्षरणार्थाः। **तेपृ** कम्पने च। (धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

दिपृ देपृ इति च काश्यपः। (मा.धा.)

तिप् (ऋ) अनिट्, तेप् (ऋ), ष्टिप् (ऋ) सेट्, सक, आ। ऋदित्- पवर्गान्तात्मनेपदित्वसाम्यात् च इह पाठः। क्षीरस्वमिना त्वयं सेडुदाहृतः, तत् काश्यपवृत्तिन्यासपदमञ्जर्य्यादिविरोधात् तपिं तिपिमिति व्याघ्रभूतिवचनविरोधात् च उपेक्ष्यम्। दिपृ, देपृ इति च काश्यपः। तेप् (ऋ) सेट्, अक। (धा.क.)

❖ तेवृ [तेव्] देवने (भ्वा०)

तेवृ देवृ देवने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

तेव्, देव्, (ऋ) सेट्, अक, आ। (धा.क.)

❖ त्यज [त्यज्] हानौ (भ्वा०)

त्यज हानौ। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

अनिट्त्वं च -

पचिं वचिं विचि रिचि रञ्जपृच्छतीन्।
णिजिं सिचिं मुचि भजि भञ्ज भृज्जतीन्।
त्यजिं यजिं युजि रुजि सञ्ज मज्जती।
भुजिं ध्वजिं सृजि मृजि विध्यनिट्स्वरान्॥

इति त्यजतीत्यादि। (शा.आ.)

हानिस्त्यागः। त्याज्यम् - त्यजियज्योः कुत्वं नेष्टम्। (क्षी.त.)

अयं ण्यन्तो द्विकर्मके इति सुधाकरादिमतेन नाथतावुक्तम्। दृश्यते च प्रयोगः त्याजितैः फलमुत्खातैः, धूपोष्मणा त्याजितमार्द्रभावम् इत्यादि। अकथितं च इत्यत्र गौः पयस्त्यजति, गवा पयः त्याजयतीति प्रयुञ्जानयोः कैयट-हरदत्तयोः प्रयोज्यस्य कर्मत्वमनभिमतम्। (मा.धा.)

हानिस्त्यागः। त्यज्, अनिट्, सक, प। गौः पयः त्यजति, गवा पयस्त्याजयतीति प्रयुञ्जानयोः कैयटहरदत्तयोः प्रयोज्यस्य कर्मत्वम् अनभिमतम्। (धा.क.)

❖ त्रकि [त्रङ्क्] गत्यर्थः (भ्वा०)

ककि वकि श्वकि **त्रकि** ढौकृ त्रौकृ ष्वक्क वस्क मस्क तिकृ टिकृ टीकृ रघि लघि गत्यर्थाः। (धा.प्र.)

ढौकृ त्रौकृ ककि श्वकि **त्रकि** ष्वष्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (शा.आ.)

ककि श्वकि **त्रकि** ढौकृ त्रौकृ ष्वक्क वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (क्षी.त.)

ककि वकि श्वकि **त्रकि** ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (मा.धा.)

ककि वकि [मकि] श्वकि **त्रकि** ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ [सेकृ श्रेकृ श्रकृ श्लकि] रघि लघि गत्यर्थाः। (धा.क.)

❖ त्रगि [त्रङ्ग्] गत्यर्थः (चुरा०)

उख नख वख मख रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि **त्रगि** श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

❖ त्रदि [त्रन्द्] चेष्टायाम् (भ्वा०)

त्रदि चेष्टायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

त्रन्द्, (इ) अक्, सेट्, प। (धा.क.)

❖ त्रपूष् [त्रप्] लज्जायाम् (भ्वा०)

त्रपूष् लज्जायाम्। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

त्रप् (ऊ, ष) वेट्, अक, आ। (धा.क.)

❖ त्रस [त्रस्] धारणे (चुरा०)

त्रस धारणे। (धा.प्र.)(मा.धा.)(धा.क.)

अत्र वारणे धारणशब्दः। (धा.प्र.)

ग्रहण इति नन्दी। अत्र धारणं वारणमिति मैत्रेयः। वारण इत्येव शाकटायनः। दिवादौ उद्वेगे। (मा.धा.)(धा.क.)

त्रस् सक, उ। (धा.क.)

❖ त्रसि [त्रंस्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि **त्रसि** पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि **त्रसि** दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि **त्रसि** पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य भासार्था इत्येक इति मैत्रेयः

तथा च क्षीरस्वामी भासा दीप्तिरर्थौ येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि **त्रसि** पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थौ येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ **त्रसी [त्रस्] उद्वेगे** **(दिवा०)**

त्रसी उद्वेगे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

उद्वेगो भयम्। चुरादौ त्रस धारणे । (क्षी.त.)

रत्नदोषो भयं च त्रस धारणे चुरादौ। (मा.धा.)

त्रस् (ई), सेट्, अक, प। (धा.क.)

❖ **त्रुट [त्रुट्] छेदने** **(तुदा०)**

त्रुट छेदने (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

त्रुट्, सेट्, सक, प। त्रोटयति इति चुरादौ आत्मनेपदी। (धा.क.)

❖ **त्रुट [त्रुट्] कलहकर्मणि** **(तुदा०)**

त्रुट कलहकर्मणि। (शा.आ.)

❖ **त्रुट [त्रुट्] छेदने** **(चुरा०)**

त्रुट छेदने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

त्रुड इत्येके। उत्त्रोडयते तृणम्। (क्षी.त.)

अयं तुदादौ च। कुटेत्येक इति स्वामी। (मा.धा.)

त्रुट्, सक, आ। अयं तुदादौ च। (धा.क.)

❖ **त्रुन्प [त्रुम्प्] हिंसार्थः** **(भ्वा०)**

तुप तुन्प त्रुप **त्रुन्प** तुफ तुन्फ हिंसार्थाः- त्रुफ त्रुन्फ इति चन्द्रः अधिकौ पठति। (क्षी.त.)

तुप **तुन्प** त्रुप त्रुन्प तुफ तुन्फ त्रुफ त्रुन्फ हिंसार्थाः- तुप्, तुन्प्, त्रुप, त्रुन्प्, तुफ्, तुन्फ, त्रुफ्, त्रुन्फ्, सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ **त्रुन्फ [त्रुन्फ] हिंसार्थः** **(भ्वा०)**

तुप तुम्प त्रुप त्रुम्प तुफ **तुन्फ** त्रुफ त्रुन्फ हिंसार्थाः। (धा.प्र.)

तुप तुन्प त्रुप त्रुन्प तुफ् **तुन्फ** त्रुफ त्रुन्फ हिंसार्थाः - तुप्, तुन्प्, त्रुप, त्रुन्प्, तुफ्, तुन्फ, त्रुफ्, त्रुन्फ्, सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ **त्रुप [त्रुप्] हिंसार्थः** **(भ्वा०)**

तुप तुम्प **त्रुप** त्रुम्प तुफ तुन्फ त्रुफ त्रुन्फ हिंसार्थाः। (धा.प्र.)

तुप तुन्प **त्रुप** त्रुन्प तुफ तुन्फ हिंसार्थाः - प्राक् तुम्पतेर्गतौ सुट् प्रस्तुम्पति गां वत्सः। त्रुफ त्रुन्फ इति चन्द्रः अधिकौ पठति। (क्षी.त.)

तुप तुम्प **त्रुप** त्रुम्प तुफ तुम्फ त्रुफ त्रुम्फ हिंसार्थाः। (मा.धा.)(धा.क.)

तुप्, तुन्प्, ऋप, त्रुन्प्, तुफ्, तुन्फ, त्रुफ्, त्रुन्फ्, सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ **त्रुफ [त्रुफ्] हिंसार्थः** **(भ्वा०)**

तुप तुम्प त्रुप त्रुम्प तुफ तुन्फ **त्रुफ** त्रुन्फ हिंसार्थाः। (धा.प्र.)

तुप तुम्प त्रुप त्रुम्प तुफ तुम्फ **त्रुफ** त्रुम्फ हिंसार्थाः। (मा.धा.)

तुप तुन्प त्रुप त्रुन्प तुफ् तुन्फ **त्रुफ** त्रुन्फ हिंसार्थाः- तुप्, तुन्प्, त्रुप, त्रुन्प्, तुफ्, तुन्फ, त्रुफ्, त्रुन्फ्, सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनः च। (धा.क.)

❖ **त्रुम्प [त्रुम्प्] हिंसार्थः (भ्वा०)**

तुप तुम्प त्रुप त्रुम्प तुफ तुन्फ **त्रुफ** त्रुन्फ हिंसार्थाः। (धा.प्र.)

तुप तुम्प त्रुप त्रुम्प तुफ तुम्फ **त्रुफ** त्रुम्फ हिंसार्थाः। (मा.धा.)

❖ **त्रुम्फ [त्रुम्फ्] हिंसार्थः (भ्वा०)**

तुप तुम्प त्रुप त्रुम्प तुफ तुम्फ त्रुफ **त्रुम्फ** हिंसार्थाः। (मा.धा.)

❖ **त्रैङ् [त्रै] पालने (भ्वा०)**

त्रैङ् पालने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

देवत्रातो गलो ग्राह इति योगे च सद्विधिः।
मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः॥
[महाभाष्यम्]। (क्षी.त.)

त्रै (ङ्) अनिट्, सक, आ। (धा.क.)

❖ **त्रौकृ [त्रैक्] गत्यर्थः (भ्वा०)**

ककि वकि श्वकि त्रकि ढौकृ **त्रौकृ** ष्वक्क वस्क मस्क तिकृ टिकृ टीकृ रघि लघि गत्यर्थाः। (धा.प्र.)

ढौकृ **त्रौकृ** ककि श्वकि त्रकि ष्वष्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (शा.आ.)

ककि श्वकि त्रकि ढौकृ **त्रौकृ** ष्वक्क वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (क्षी.त.)

ककि वकि श्वकि त्रकि ढौकृ **त्रौकृ** ष्वष्क वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (मा.धा.)

ककि वकि [मकि] श्वकि त्रकि ढौकृ **त्रौकृ** ष्वष्क वस्क मस्क टिकृ टीकृ [सेकृ श्रेकृ श्रकृ श्लकि] रघि लघि गत्यर्थाः। (धा.क.)

❖ **त्वक्ष [त्वक्ष्] त्वचने (भ्वा०)**

त्वक्ष त्वचने - त्वचनं त्वचोग्रहणम्। संवरणमिति दुर्गः। त्वष्टा। (क्षी.त.)

❖ **त्वक्षू [त्वक्ष्] तनूकरणे (भ्वा०)**

तक्षू **त्वक्षू** तनूकरणे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

त्वक्ष त्वचने अर्थभेदार्थः। (क्षी.त.)

त्वक्षेरप्येवमूह्यम्। (शा.आ.)

त्वक्षु त्वचन इत्यग्रे तूदित्। (मा.धा.)

तक्ष, त्वक्ष (ऊ) सेट्, सक, प। तक्ष त्वचन इत्यग्रे अनूदित्। (धा.क.)

❖ **त्वगि [त्वङ्ग्] गत्यर्थः कम्पने च (भ्वा०)**

उख नख वख मख रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि **त्वगि** त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि **त्वगि** श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि **त्वगि** श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश। तृतीयान्तास्त्रयोदश। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि **त्वगि** श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। (धा.क.)

❖ त्वगि [त्वङ्ग्] गत्यर्थः कम्पने च (भ्वा०)

त्वगि कम्पने। (शा.आ.)

त्वगि कम्पने च। (क्षी.त.)(धा.क.)

त्वङ्ग्, सेट्, अक, प। (धा.क.)

❖ त्वच [त्वच्] संवरणे (तुदा०)

त्वच संवरणे। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

संवरणम् आच्छादनम्। (क्षी.त.) (धा.क.)

त्वच्, सेट्, सक, प। (धा.क.)

❖ त्वञ्चु [त्वञ्च्] गत्यर्थः (भ्वा०)

वञ्चु चञ्चु तञ्चु **त्वञ्चु** ग्रञ्चु ग्लञ्चु स्रञ्चु म्रुचु म्लुचु गत्यर्थाः। (शा.आ.)

वञ्चु चञ्चु तञ्चु **त्वञ्चु** म्रुञ्चु म्लुञ्चु म्रुचु म्लुचु गत्यर्थाः। (धा.प्र.)

वञ्चु चञ्चु तञ्चु **त्वञ्चु** म्रुञ्चु म्लुञ्चु म्रुचु म्लुचु गत्यर्थाः। (मा.धा.)

❖ त्वन्चु [त्वञ्च्] गत्यर्थः (भ्वा०)

वन्चु चन्चु तन्चु **त्वन्चु** म्रुचु म्लुचु गत्यर्थाः। (क्षी.त.)

वन्चु चन्चु तन्चु **त्वन्चु** म्रन्चु म्लुन्चु ग्रुन्चु ग्लुन्चु म्रुचु म्लुचु गत्यर्थाः - सर्वे उदनुबन्धाः, सेटः, सकर्म्मकाश्च। गत्यर्था इत्यत्र गतौ इति दुर्गः पठति। (धा.क.)

❖ त्विष [त्विष्] दीप्तौ (भ्वा०)

त्विष दीप्तौ। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

अवपूर्वोऽयं दाननिरसनयोरिति मैत्रेयादायः। (मा.धा.)

त्विष, अनिट्, अक, उ। अवपूर्वः अयं दाननिरसनयोः इति मैत्रेयादयः। (धा.क.)

❖ त्विषा [त्विष्] दीप्तौ (भ्वा०)

त्विषा दीप्तौ - त्वष्टा अर्कः। अवपूर्वो दान-निरसनयोः च इति दुर्गः। निरसनमपाकरणम्। अवत्वेषति गां द्विजाय, अवत्वेषते मलम्। (क्षी.त.)

❖ त्सर [त्सर्] छद्मगतौ (भ्वा०)

त्सर छद्मगतौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

छद्मप्रकारार्थे। त्सद्म इत्यपीति कौशिकः त्सद्मति। (क्षी.त.)

त्सर, सेट्, सक, प। (धा.क.)

❖ थुड [थुड्] संवरणे (तुदा०)

थुड छुड संवरणे। (धा.प्र.)

स्थुड **थुड** संवरणे। (क्षी.त.)

थुड स्फुड संवरणे। खुड छुड इत्येके। अत्र कुड

सङ्घात इत्यात्रेयः। बाल्ये पठितस्येह पाठः अर्थभेदादिति तस्याभिप्रायो द्रष्टव्यः। अत्रापठतां मैत्रेयादीनां धातूनामनेकार्थत्वादत्रापि वृत्तिः भविष्यतीत्यभिप्रायः। (मा.धा.)

थुड स्फुड संवरणे। थुड्, स्फुड्, सेट्, सक, प। (धा.क.)

❖ थुर्वी [थुर्व्] हिंसार्थः (भ्वा०)

उर्वी तुर्वी **थुर्वी** दुर्वी धुर्वी हिंसायाम्। (धा.प्र.)

उर्वी तुर्वी **थुर्वी** धुर्वी दुर्वी हिंसार्थाः। (मा.धा.)

उर्वी तुर्वी **थुर्वी** दुर्वी धुर्वी हिंसायाम्। सर्वे ईदनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ दंश [दंश्] दशने (भ्वा०)

दंश दंशने। (शा.आ.) (मा.धा.)

दंशनं द्रष्ट्राव्यापारः। अत एव निर्देशाद् अनुनासिकलोप इति स्वामी दशति। (मा.धा.)

❖ दक्ष [दक्ष्] वृद्धौ शीघ्रार्थे च (भ्वा०)

दक्ष वृद्धौ शीघ्रार्थे च। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

दक्ष, सेट्, अक, आ। (धा.क.)

❖ दक्ष [दक्ष्] गतिहिंसनयोः (भ्वा०)

दक्ष गतिहिंसयोः। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

दक्ष वृद्धौ शीघ्रार्थे चेति अनुदात्तेत्सु पठितम्। (धा.प्र.)

दक्ष वृद्धौ शीघ्रार्थे च इत्यस्य एव अर्थभेदाद् घटादिकार्यार्थं पुनः पाठः। (क्षी.त.)

वृद्धिशैघ्र्योरनुदात्तेदयं पठितस्तस्येहार्थविशेषे मित्त्वार्थोनुवादः। (मा.धा.)

दक्ष, सेट्, सक, आ। (धा.क.)

❖ दघ [दघ्] घातने पालने च (स्वा०)

दघ घातने। (धा.प्र.)(क्षी.त.)

दघ घातने पालने च। (मा.धा.)(धा.क.)

अत्र दघ घातने इति स्वादिः। ततो निदघ्यते अनेन इति कृत्वा निदाघशब्दः साधुरिति पारायणिका इति सुधाकरस्तदपाणिनीयम्। सञ्ज्ञायामर्घमेघनिदाघावदाघा इति न्यङ्क्वादौ पठित्वा दहतेर्घञि व्युत्पादनात् तथा च तत्र वृत्तिः। अपूर्वस्य निपूर्वस्य च दहेरिति। (मा.धा.)

दघ्, सेट्, सक, प। (धा.क.)

❖ दघि [दङ्घ्] वर्जने पालने च (भ्वा०)

दघि पालने। (धा.प्र.)

दघि पालने च। चकाराद् वर्जने च। (क्षी.त.)

❖ दण्ड [दण्ड] दण्डनिपातने (चुरा०)

दण्ड निपातने। (धा.प्र.)

दण्ड दण्डनिपातने। (क्षी.त.)(मा.धा.)(धा.क.)

अयं द्विकर्मकः। (मा.धा.) (धा.क.)

दण्ड, अक, प। (धा.क.)

❖ दद [दद्] दाने (भ्वा०)

दद दाने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

प्रसह्य ते साधुधियं ददन्ते। (धा.प्र.)

किञ्चिदुद्दिश्यापुनर्ग्रहणाय स्वीयत्यागो दानम्। (मा.धा.)

किञ्चिदुद्दिश्य अपुनर्ग्रहणाय स्वीयवस्तु त्यागो दानम्। दद, सेट्, सक, आ। (धा.क.)

❖ दध [दध्] धारणे (भ्वा०)

दध धारणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

कौशिकस्तु दद धारणे दध दाने इति पाठं व्यत्यास्थात्। (क्षी.त.)

दान इति केचित् पठन्ति। दद दान इत्यत्र धारण इति तदयुक्तम्।

तद्वेषोऽसदृशोऽन्याभिस्त्रीभिर्मधुरताभृतः।
दधते सुलभां शोभां तदीया विभ्रमा इव।
(का.प्र.)

व्रज विटपममुं ददस्व तस्यै।
पिबति च पाति च याऽसकौ रहस्त्वाम्।
दाददो दुद्दुद्दादी दादादो दददीददोः॥
दुद्दादं दददे दुद्दे ददाददददोऽददः। (शिशु.)

इत्यादौ दधो धारणार्थत्वस्य अन्यस्य दानार्थत्वस्य च व्यवस्थितत्वात्। (मा.धा.)

धारणमिह धारणम् इनः स्वार्थिकत्वात्। **नृपप्रियाभीममहोत्सवागताः तदङ्घिलाक्षाम् अदधन्त मङ्गलम्** इति नैषधे । दानधृत्योरिति वोपदेवः। दध्, सेट्, सक, आ। (धा.क.)

❖ दन्भु [दम्भु] दम्भे (स्वा०)

दन्भु दम्भे। (क्षी.त.)(धा.क.)

दम्भ्, (उ) सेट्, सक, प। (धा.क.)

❖ दन्श [दंश] धारणे (भ्वा०)

दन्श दंशने। (धा.प्र.)(क्षी.त.)

दशनं दन्तकर्म। (क्षी.त.)

दन्श दंशने [दशने]। दंशनं दंष्ट्राव्यापारः। दन्श्, अनिट्, सक, प। (धा.क.)

❖ दभ [दभ्] क्षेपे (चुरा०)

दभ दिभि तिप टिप डिप स्तिप क्षेपे- दभि इति नन्दी। (क्षी.त.)

❖ दमु [दम्] उपशमे (दिवा०)

दमु उपशमने। (शा.आ.) (मा.धा.)

दमु उपशमे। (धा.प्र.)(क्षी.त.)(धा.क.)

दम्, (उ) सेट, अक, प। (धा.क.)

❖ दम्भु [दम्भ्] दम्भने (स्वा०)

दम्भु स्तम्भे। (शा.आ.)

दम्भु दम्भे। (धा.प्र.)

दम्भु दम्भने। दम्भो लोकार्जवार्थम् एव कर्मानुष्ठानम्। (मा.धा.)

❖ दय [दय्] दानगतिरक्षणहिंसादानेषु (भ्वा०)

दय दानगतिरक्षणहिंसादानेषु। (धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

दयाञ्चक्रे न राक्षसः। (धा.प्र.)

अय वय षय मय चय **दय** तय नय गतौ। तय रक्षणे। **दय** दानगतिरक्षणेषु। (शा.आ.)

देङ् रक्षणे। मातरं दयते, दीयते, दाता। (क्षी.त.)

दया दयतिर्भिदादिषु द्रष्टव्यः। (मा.धा.)

अत्र रक्षणमिति दुर्गो न पठति। सर्पिषो दयते, सर्पिः दयते। अधीगर्थदयेशां कर्मणीति कर्मणि शेषे षष्ठी। अशेषे तु द्वितीयैव। दय्, सक, सेट्, आ। (धा.क.)

❖ **दवि [दन्व] गत्यर्थः (भ्वा०)**

रिवि रवि **दवि** धवि गत्यर्थाः। (क्षी.त.)

❖ **दरिद्रा [दरिद्रा] दुर्गतौ (अदा०)**

दरिद्रा दुर्गतौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

दरिद्रा, सेट्, अक, प। (धा.क.)

❖ **दल [दल्] विशरणे (भ्वा०)**

दल विदारणे। (धा.प्र.)

दल विशरणे। (क्षी.त.)(मा.धा.)(धा.क.)

पृषोदरादिः अयं घटादावपि। (मा.धा.)

दल्, सेट्, सक, प। (धा.क.)

❖ **दल [दल्] विदारणे (चुरा०)**

दल विदारणे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

भ्वादौ दल विशरणे । (क्षी.त.)

दल, सक, उ। (धा.क.)

❖ **दशि [दंश्] दंशने (चुरा०)**

दशि दंशने।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भ्वादौ दन्श दशने। (क्षी.त.)

आकुस्मीयमात्मनेपदं णिच् सन्नियोगेन इति व्याख्यातारः। तेन इदित्करणसामर्थ्यात् णिजभावे दंशतीति शपि। (मा.धा.)

दन्श (इ वा णिच्) सक, आ। आकुस्मीयम् आत्मनेपदं णिच्सन्नियोगेनेति व्याख्यातारः। (धा.क.)

❖ **दशि [दंश्] भाषार्थः (चुरा०)**

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि **दशि** कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः। भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि **दशि** घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि **दशि** कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः- मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि **दशि** कुशि घट घटि वृहि बर्ह बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्।(धा.क.)

❖ **दसि [दंस्] दर्शनदंशनयोः (चुरा०)**

दसि दर्शनहिंसयोः। (धा.प्र.)

दसि दर्शनदंशनयोः।(क्षी.त.)(मा.धा.)(धा.क.)

दंशनदर्शनयोरिति प्रायेण दृश्यते इति पुरुषकारे। (मा.धा.)

दन्स्, (इ वा णिच्) सक, आ। अत्र दस इति अनिदितमपि केचित् पठन्ति। (धा.क.)

❖ दसि [दंस्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि **दसि** घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः। भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि **दसि** दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

रुठ लजि अजि **दसि** भृशि कशि रुसि शीक नट पुटि जुचि रघि अहि रहि महि भाषार्थाः - इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते। (मा.धा.)

रुठ लजि अजि **दसि** भृशि रुशि रुसि शीक नट पुटि जुचि रघि अहि रहि महि इत्येते पञ्चदश स्वामिकाश्यपमतानुसारेण लिख्यन्ते। (धा.क.)

❖ दसु [दस्] उपक्षये (दिवा०)

दसु च। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तसु, दसु, उत्क्षेपे इति दुर्गः पठति। तस्, दस्, (उ) सेट्, सक, प। (धा.क.)

❖ दह [दह्] भस्मीकरणे (भ्वा०)

दह भष्मीकरणे। (शा.आ.)

दह भस्मीकरणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

अवदाघो भक्ष्ये। अवदाहोऽन्यः। (क्षी.त.)

दह्, अनिट्, सक, प। (धा.क.)

❖ दहि [दंह्] रक्षणे (चुरा०)

जसि रक्षणे, **दहि** च। (क्षी.त.)

❖ दाण् [दाण्] दाने (भ्वा०)

दाण् दाने। (शा.आ.) (धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

अवदत्तं विदत्तञ्च प्रदत्तं चादिकर्मणि।
सुदत्तमनुदत्तञ्च निदत्तमिति चेष्यते॥

इति वचनादवदत्तादौ तो न भवति अत्रैव वार्त्तिके चकारावदत्तादीनामबाधः। (मा.धा.)(धा.क.)

दा (ण्) अनिट्, सक, प। दा इत्यस्य यः तकारः तदादावुतरपदे इगन्तस्योपसर्गस्य दीर्घ इति दीर्घः। (धा.क.)

❖ दान [दान्] खण्डने (भ्वा०)

दान अवखण्डने। (शा.आ.)(धा.प्र.)(क्षी.त.)

दान अवखण्डने। शान तेजने। इमावपि नित्यसनन्तौ स्वरितेतौ। (मा.धा.)

दान खण्डने [अवखण्डने] शान तेजने - इमावपि नित्यसन्नन्तौ स्वरितेतौ। दान्, शान्, सेट्, सक, उ। दानेरार्जवे शानेर्निशाने सन् स्यादिति वृत्तिः। (धा.क.)

❖ दाप् [दा] लवने (अदा०)

दाप् लवने। (शा.आ.)(धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

लवनमिह छेदनम्। दा, (प) अनिट्, सक, प।

पकारो धातुसञ्ज्ञायाम् अदाप् इति निषेधार्थः। (धा.क.)

❖ **दाश [दाश्] हिंसायाम्** **(स्वा०)**

रि क्षि चिरि जिरि **दाश** दृ हिंसायाम्। (धा.प्र.) (मा.धा.)(धा.क.)

ऋक्षि चिरि जिरि **दाश** दृ हिंसायाम् - दुर्गस्तु तिक तिघ षघ ऋक्ष क्षिरि चिरि जिरि दाश द्रु हिंसायामित्याह। छान्दसा अमी जिघर्त्यादिवत् नियतविषयाः। (क्षी.त.)

अयं भाषायामपीत्यात्रेयमैत्रेयादयः प्रयुज्यते। दुर्गः तिक तिग षघ रि क्षि चिरि जिरि दाश् दृ दुङ् हिंसायाम्। छान्दसाश्चामी परस्मैभाषा उदात्ता इति। (मा.धा.)

रि क्षि चिरि जिरि **दाशृ** दृ हिंसायाम् - रि, क्षि, चिरि, जिरि, दाश्, दृ, सेट्, अनिट्, सक, प। अयं भाषायामपि। दुर्गस्तु - तिक्, तिग, षघ रिक्षि चिरि जिरि दाश् दृ दुङ् जिघांसायामिति पठतीति माधवः। (धा.क.)

❖ **दाशृ [दाश्] दाने** **(भ्वा०)**

दाशृ दाने। (शा.आ.)(धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

दायृ दान इति कौशिकः। (क्षी.त.)

दाश् (ऋ), सेट्, सक, उ। (धा.क.)

❖ **दाशृ [दाश्] हिंसायाम्** **(स्वा०)**

रि क्षि चिरि जिरि **दाशृ** दृ हिंसायाम् - रि, क्षि, चिरि, जिरि, दाश्, दृ, सेट्, अनिट्, सक, प। अयं भाषायाम् अपि। दुर्गस्तु - तिक, तिग, षघ रिक्षि चिरि जिरि दाश् दृ दुङ् जिघांसायामिति पठतीति माधवः। (धा.क.)

❖ **दाशृ [दाश्] दाने** **(चुरा०)**

दाशृ दाने। (क्षी.त.)

❖ **दासृ [दास्] दाने** **(भ्वा०)**

दासृ दाने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

दासृ दाने। आद्यो दासृ, अयं दाश्र इत्येके। (क्षी.त.)

दास, सेट्, सक, उ। (धा.क.)

❖ **दिभि [दिम्भ्] क्षेपे** **(चुरा०)**

दभ **दिभि** तिप टिप डिप स्तिप क्षेपे - दभि इति नन्दी। (क्षी.त.)

❖ **दिवि [दिन्व्] प्रीणनार्थः** **(भ्वा०)**

इवि धिवि **दिवि** जिवि प्रीणनार्थे। (शा.आ.)

हिवि **दिवि** धिवि जिवि प्रीणनार्थाः। (धा.प्र.) (मा.धा.)(धा.क.)

इवि जिवि **दिवि** धिवि प्रीणनार्थाः। (क्षी.त.)

अत्र केचिदाद्यमिकारादिं पठित्वा, पुनः पाठोऽर्थभेदादिति धातूनामनेकार्थत्वे तु न प्रयोजनमस्तीति आहुः। तस्मान्मैत्रेयोक्त एव हिवीति पाठो ज्यायान्। (मा.धा.)(धा.क.)

सर्वे इदनुबन्धाः, सेटः, सकर्मकाः परस्मैपदिनश्च। (धा.क.)

❖ **दिवु [दिव्] क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु** **(दिवा०)**

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोद-

मदस्वप्नकान्तिगतिषु। (शा.आ.)

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिमोदमदस्वप्नगतिषु। (धा.प्र.)

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिगतिषु - व्यवहारः क्रयविक्रयादिः। (क्षी.त.)

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु - अक्षैर्दीव्यति। (मा.धा.)

क्रीडा - खेलनम्, विजिगीषा - विजयेच्छा, व्यवहारः - क्रयविक्रयलक्षणः, द्युतिः - शोभा, कान्तिः - इच्छा। दिव्, (उ) सेट्, [प्रायेण सक], अक, प। (धा.क.)

❖ दिवु [दिव्] परिकूजने (चुरा०)

दिवु परिकूजने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वञ्चुप्रभृतिमुदितं पठन्ति। स एवायं धातुरर्थान्तरे चुरादिरित्येवं बोधनार्थम्। (धा.प्र.)

दिव्, (उ) अक, आ। (धा.क.)

❖ दिवु [दिव्] मर्दने (चुरा०)

दिवु मर्दने - परिकूजने आकुस्मीयो गतः। अयमपि परिकूजनार्थः इति चन्द्रादयः। (मा.धा.)

❖ दिवु [दिव्] अर्दने (चुरा०)

दिवु अर्दने। (धा.प्र.)(क्षी.त.)(धा.क.)

परिकूजने पूर्वं दर्शितः। (धा.प्र.)

चन्द्रो दिवु परिकूजने इत्येव सिद्धिमाह। (क्षी.त.)

दिव् (उ, वा णिच्) सक, उ। (धा.क.)

❖ दिश [दिश्] अतिसर्जने (तुदा०)

दिश अतिसर्जने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अतिसर्जनं त्यागः। (क्षी.त.)

अतिसर्जनं दानम्, आदेशः, निर्देशः, कथनम्।

दिश्, अनिट्, सक, उ। (धा.क.)

❖ दिह [दिह्] उपचये (अदा०)

दिह उपचये। (शा.आ.)(क्षी.त.)(मा.धा.)

दिह उपतापे (धा.प्र.)

उपचयोऽत्र लेपः। (क्षी.त.)

दिह्, अनिट्, सक, उ। (धा.क.)

❖ दीक्ष [दीक्ष्] मौण्ड्येज्योपनयननियमव्रतादेशेषु (भ्वा०)

दीक्ष मौण्ड्योपनयननियमव्रतादेशेषु। (शा.आ.)

दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु। (धा.क.)(क्षी.त.)(धा.प्र.) (मा.धा.)

मौण्ड्यं वपनम्। इज्या यजनम्। उपनयनम् मौर्वीबन्धः। नियमः संयमः। व्रतादेशः संस्कारादेशकथनम्। (क्षी.त.)

दीक्ष्, सेट्, आ। (धा.क.)

❖ दीङ् [दी] क्षये (दिवा०)

दीङ् क्षये। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

दी (ङ्), अनिट्, अक, आ। (धा.क.)

❖ दीधीङ् [दीधी] दीप्तिदेवनयोः (अदा०)

दीधीङ् दीप्तिदेवनयोः। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

देवनं क्रीडा। (क्षी.त.)

दीधी, (ङ्) सेट्, अक, आ। (धा.क.)

❖ **दीपी [दीप्] दीप्तौ** **(दिवा०)**

दीपी दीप्तौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

दीप, (ई) सेट्, अक, आ। उद् - उद्दीपनम्, प्रकाशनम्। उद्दीपना। सम् - सन्दीपनम्। प्र - प्रदीपः। (धा.क.)

❖ **दु [दु] गतौ** **(भ्वा०)**

दु द्रु गतौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

दु, द्रु, अनिट्, सक, प। (धा.क.)

❖ **दुञ् [दु] गतौ** **(भ्वा०)**

दुञ् गतौ। (शा.आ.)

❖ **दुःख [दुःख] तत्क्रियायाम्** **(चुरा०)**

सुख **दुःख** तत्क्रियायाम्। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

तदिति सुखदुःखप्रातिपदिकार्थो निर्दिश्यते। (धा.प्र.)

सुखनं दुःखनं च तत्क्रिया। (क्षी.त.)

तच्छब्देन सुखदुःखे प्रातिपदिकार्थौ निर्दिश्येते। प्रातिपदिकाद्धात्त्वर्थे इति सिद्धे इहानयोः पाठः सोपसर्गात्प्रत्ययार्थ इति मैत्रेयः। (मा.धा.)(धा.क.)

सुख, दुःख, अक, प। (धा.क.)

❖ **दुड [दुड्] निमज्जने** **(तुदा०)**

दुड हुड निमज्जने। क्रुड इत्येके। (क्षी.त.)

❖ **दुर्वी [दुर्व्] हिंसार्थः** **(भ्वा०)**

उर्वी तुर्वी थुर्वी **दुर्वी** धुर्वी हिंसायाम्। (धा.प्र.)

उर्वी तुर्वी **दुर्वी** धुर्वी हिंसार्थाः - थुर्वी इति चन्द्रः। (क्षी.त.)

उर्वी तुर्वी थुर्वी धुर्वी **दुर्वी** हिंसार्थाः। (मा.धा.)

उर्वी तुर्वी थुर्वी **दुर्वी** धुर्वी हिंसायाम् - सर्वे ईदनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ **दुल [दुल्] उत्क्षेपे** **(चुरा०)**

दुल उत्क्षेपे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

दुल्, सक, उ। (धा.क.)

❖ **दुष [दुष्] वैकृत्ये** **(दिवा०)**

दुष वैकृत्ये। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वैकृत्यं रूपभङ्गः। वा चित्तविरागे - चित्तं दोषयति, चित्तं दूषयति। (क्षी.त.)

वैकृत्यं विकृतिः। (मा.धा.)(धा.क.)

दुष्, अनिट्, अक, प। (धा.क.)

❖ **दुह [दुह्] प्रपूरणे** **(अदा०)**

दुह प्रपूरणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

प्रपूरणं पूरणाभावः, उपसर्गोऽत्र धात्वर्थे बाधते प्रस्थानवत्। (क्षी.त.)

दुह्, अनिट्, सक, उ। इदिदयमर्दनार्थः भ्वादौ गतः। (धा.क.)

❖ **दुहिर् [दुह्] अर्दने** **(भ्वा०)**

तुहिर् **दुहिर्** अर्दने। (धा.प्र.)

तुहिर् **दुहिर्** उहिर् अर्दने। (मा.धा.)(धा.क.)

तुह्, दुह्, उह्, (इर्) सेट्, सक, प। (धा.क.)

❖ दूङ् [दू] परितापे (दिवा०)

दूङ परितापे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

परितापः खेदः। (क्षी.त.)(मा.धा.) (धा.क.)

दू (ङ्), सेट्, अक, आ। (धा.क.)

❖ दृ [दृ] भये (भ्वा०)

दृ भये। (शा.आ.)(धा.प्र.)

दृ विदारण इति क्र्यादिः। तस्येह भये मित्त्वार्थः पुनश्च पाठः। (धा.प्र.)

❖ दृ [दृ] हिंसायाम् (स्वा०)

रि क्षि चिरि जिरि दाश दृ हिंसायाम्। (धा.प्र.)
(मा.धा.)

ऋक्षि चिरि जिरि दाश दृ हिंसायाम् - दुर्गस्तु तिक तिघ षघ ऋक्ष क्षिरि चिरि जिरि दाश द्रु हिंसायामित्याह। छान्दसा अमी जिघर्ति आदिवन्नियतविषयाः। (क्षी.त.)

अयं भाषायामपीत्यात्रेयमैत्रेयादयः प्रयुज्यते। दुर्गः तिक तिग षघ रि क्षि चिरि जिरि दाश् दृ दुङ् हिंसायां। छान्दसाश्चामी परस्मैभाषा उदात्ता इति। (मा.धा.)

रि क्षि चिरि जिरि दाश्ट दृ हिंसायाम् - रि, क्षि, चिरि, जिरि, दाश्, दृ, सेट्, अनिट्, सक, प। अयं भाषायामपि। दुर्गस्तु - तिक, तिग, षघ रिक्षि चिरि जिरि दाश् दृ दुङ् जिघांसायामिति पठतीति माधवः। (धा.क.)

❖ दृङ् [दृ] आदरे (तुदा०)

दृङ् आदरे। (शा.आ.)(धा.प्र.) (क्षी.त.)
(मा.धा.) (धा.क.)

अनुदात्तौ - आदर इत्याग्रहणाद्। (क्षी.त.)

केच्चित्तु भये दरति इति घटादिपाठादाहुः।
(मा.धा.)

अयमाङ्पूर्वः। आ - दृ, (ङ्) अनिट्, सक, आ। केच्चित्तु भये दरतीति घटादिपाठादाहुः। (धा.क.)

❖ दृन्फ [दृन्फ्] उत्क्लेशे (तुदा०)

दृफ **दृन्फ** उत्क्लेशे। (धा.क.)(क्षी.त.)

दृफ्, दृन्फ, सेट्, अक, प। (धा.क.)

❖ दृप [दृप] प्रीणने (भ्वा०)

दृप प्रीणने। (शा.आ.)

❖ दृप [दृप्] हर्षमोहनयोः (दिवा०)

दृप हर्षविमोचनयोः। (शा.आ.)

दृप हर्षणमोचनयोः। (धा.प्र.)

दृप हर्षमोहनयोः। मोहनं गर्वः। (क्षी.त.)

दृप हर्षणमोहनयोः। मोहनं गर्व इति स्वामी। हर्षविमोचनयोः इत्येके। अयं उत्क्लेषे तुदादिः। तृपिदृप्योः अनुदात्तेत्त्वममर्थम्। (मा.धा.)

दृप हर्षमोहनयोः। नन्द्यादिः। तुदादौ चायम्। हर्षणमोचनयोरिति केच्चित्। (धा.क.)

❖ दृप [दृप] सन्दीपने (चुरा०)

तृप **दृप** सन्दीपने। (क्षी.त.)

❖ दृफ [दृफ्] उत्क्लेशे (तुदा०)

दृफ दृम्फ उत्क्लेशे। (धा.प्र.)(मा.धा.)

दृफ दृन्फ उत्क्लेशे। (क्षी.त.)(धा.क.)

वामनस्तु तृपिदृपी पान्ताविच्छति। यदुक्तं- तुदादौ यौ तृपिदृपी तौ उदात्तौ एव इति (काशिका)। (धा.प्र.)

प्रथमः प्रथमान्त इति वामनः। तृपतौ उपपादितम् अन्ये द्वितीयान्त इति। (मा.धा.)

दृफ्, दृन्फ, सेट्, अक, प। अत्र प्रथमः प्रथमान्त इति वामनः। (धा.क.)

❖ दृभ [दृभ्] सन्दर्भे (चुरा०)

दृभ सन्दर्भे। (धा.प्र.)(मा.धा.)(धा.क.)

पूर्ववदुदाहरणम्। दृभितमिति विशेषः। (धा.प्र.)

अस्यानीदित्त्वान्निष्ठायामपि सेट्त्त्वं विशेषः। अमुं बहवो न पठन्तीति पुरुषकारे। अस्माभिस्तु देवमैत्रेयानुसारेण पठितः। तुदादेरीदितो ग्रन्थने दृभतीति। (मा.धा.)

दृभ्, सक, उ। (धा.क.)

❖ दृभी [दृभ्] ग्रन्थे (तुदा०)

दृभी ग्रन्थे। (शा.आ.)(धा.प्र.)(क्षी.त.)
(मा.धा.) (धा.क.)

अयमनिटि चुरादौ। (मा.धा.)

दृभ् (ई) सेट्, सक, प। चुरादौ चायम्। (धा.क.)

❖ दृभी [दृभ्] भये (चुरा०)

दृभी भये। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

क्र्यादौ दृभी ग्रन्थे। (क्षी.त.)

दृभ्, (ई) अक, उ। (धा.क.)

❖ दृम्फ [दृम्फ्] उत्क्लेशे (तुदा०)

दृफ **दृम्फ** उत्क्लेशे। (धा.प्र.)(मा.धा.)

दृ वामनस्तु तृपिदृपी पान्तौ इच्छति। यदुक्तं- तुदादौ यौ तृपिदृपी तावुदात्तौ एव इति (काशिका)। (धा.प्र.)

प्रथमः प्रथमान्त इति वामनः तत् तृपतौ उपपादितम् अन्ये द्वितीयान्त इति। (मा.धा.)

❖ दृशिर् [दृश्] प्रेक्षणे (भ्वा०)

दृशिर् प्रेक्षणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

दृश्, अनिट्, सक, प। प्र - प्रदर्शनम्। उद् - उद्दर्शनम् - ऊर्द्ध्वं दर्शनम्। नि - निदर्शनम्। परि- परिदर्शनम्। सम् - सन्दर्शनम्। (धा.क.)

❖ दृह [दृह्] वृद्धौ (भ्वा०)

दृह दृहि बृह बृहि वृद्धौ। (शा.आ.)(क्षी.त.)
(मा.धा.) (धा.क.)

तृह तृहि **दृह** दृहि वृह वृहि वृद्धौ। (धा.प्र.)

दृह्, दृन्ह् (इ) बृह्, बृन्ह् (इ) सेट्, अक, प। (धा.क.)

❖ दृहि [दृंह्] वृद्धौ (भ्वा०)

दृह **दृहि** बृह बृहि वृद्धौ। (शा.आ.)(क्षी.त.)
(मा.धा.) (धा.क.)

तृह तृहि दृह **दृहि** वृह वृहि वृद्धौ। (धा.प्र.)

दृह्, दृन्ह् (इ) बृह्, बृन्ह् (इ) सेट्, अक, प। (धा.क.)

❖ दॄ [दॄ] भये (भ्वा०)

दॄ भये (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

दृ विदारण इति क्र्यादिः। तस्येह भये मित्त्वार्थः पुनश्च पाठः। धात्वन्तराभ्युपगमे दरतीत्येके। (धा.प्र.)

क्र्यादौ दृ विदारणे । तस्यैव मित्त्वार्थ इह पाठ इत्येके। (क्षी.त.)

अत्र देवधनपालपूर्णचन्द्रा अमुं धात्वन्तरमाहुः। मैत्रेयस्तु दृ विदारण इति क्र्यादिः। तस्य मित्वार्थं पाठः। दृणन्तं प्रयुङ्क्ते धात्वन्तराभ्युपगमे

दरीत्येके इति क्षीरस्वामी पुनर्दरतीत्युदाहृत्य कैयाटिकस्यैव मित्त्वार्थमिहानुवाद इत्येक इत्याह। तत्राभरणकारोऽमुं ह्रस्वान्तं धात्वन्तरं पठति। न चार्थभेदो। (मा.धा.)

अत्र देवधनपालपूर्णचन्द्राः अमुं धात्वन्तरम् आहुः। मैत्रयत्रिलोचनादयस्तु दृ विदारण इति क्रैयादिकस्येह पाठो मित्त्वार्थः। न पुनः प्रकृत्यन्तरमिदम्। दरन्ति दिगीशाश्चेति हलायुधे प्रकृत्यन्तरं दृश्यते। आभरणकारस्त्वमुं ह्रस्वान्तं धात्वन्तरं पठति। (धा.क.)

❖ दॄ [दॄ] विदारणे (क्र्या०)

दॄ विदारणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

दॄ सेट्, सक, प। वोपदेवादिमते दिवादौ चायम्। (धा.क.)

❖ देङ् [दे] रक्षणे (भ्वा०)

देङ् रक्षणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

दाण् दाने । दैप् शोधने। (क्षी.त.)

दे (ङ्) अनिट्, सक, आ। (धा.क.)

❖ देवृ [देव्] देवने (भ्वा०)

तेवृ देवृ देवने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

तेव्, देव्, (ऋ) सेट्, अक, आ। (धा.क.)

❖ दै [दै] न्यक्षरणे (भ्वा०)

दै न्यक्षरणे। (शा.आ.)

❖ दैप् [दैप्] शोधने (भ्वा०)

दैप् शोधने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

दै (प्), अनिट्, सक, प। (धा.क.)

❖ दो [दो] अवखण्डने (दिवा०)

दो अवखण्डने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)

दो, अनिट्, सक, प। (धा.क.)

❖ द्यु [द्यु] अभिगमने (अदा०)

द्यु अभिगमने। (शा.आ.)(धा.प्र.)(क्षी.त.)
(मा.धा.) (धा.क.)

अनुदात्त उदात्तेत्। केचिदस्य सेट्त्वमिच्छन्तीति धातुपारायणे। तत् उतां च रुस्नुवौ क्षुवं तथोर्णौतिमथो युणुक्ष्णव इति उकारान्तसेट्परिगणने पाठाभावादिच्छामात्रम्। (मा.धा.)

अनुदात्तेत्। द्यु, अनिट्, सक, प। केचिदस्य सेट्त्वमिच्छन्तीति धातुपारायणे। (धा.क.)

❖ द्युत [द्युत्] दीप्तौ (भ्वा०)

द्युत दीप्तौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

द्युत्, सेट्, अक, आ। (धा.क.)

❖ द्यै [द्यै] न्यक्करणे (भ्वा०)

द्यै न्यंविकरणे। (शा.आ.)

द्यै न्यक्करणे। (धा.प्र.)(मा.धा.) (धा.क.)

द्यै न्यङ्गविधाने। न्यङ्गं कुत्सिताङ्गम्। (क्षी.त.)

न्यङ्गविधान इति क्षीरस्वामी। न्यङ्गं कुत्सिताङ्गम्। (मा.धा.)(धा.क.)

द्यै (द्या) अनिट्, सक, प। (धा.क.)

❖ **द्रम [द्रम्] गतौ** **(भ्वा०)**

द्रम हम्म मीमृ गतौ। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

अयं शब्दे चेति क्वचित्पठ्यते। (मा.धा.) (धा.क.)

द्रम्, हम्म्, मीम् (ऋ) सक, सेट्, प। (धा.क.)

❖ **द्रा [द्रा] कुत्सायां गतौ** **(अदा०)**

द्रा कुत्सायां गतौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

कुत्सिता गतिः पलायनम्, निद्रा च। भ्वादौ द्रै स्वप्ने। (क्षी.त.)

कुत्सितगतिः पलायनं स्वापश्चेति स्वामी। तत्र प्रायो निपूर्वोऽयं स्वापवचनः। (मा.धा.)(धा.क.)

द्रा, अनिट्, अक, प। (धा.क.)

❖ **द्राक्षि [द्राङ्क्ष्] काङ्क्षायाम् घोरवासिते च** **(भ्वा०)**

द्राक्षि ध्राक्षि ध्वाक्षि काङ्क्षायाम् घोरवाशिते च। (शा.आ.)(क्षी.त.)

द्राक्षि ध्राक्षि ध्वाक्षि घोरवाशिते च (धा.प्र.)(मा.धा.)(धा.क.)

चकारेण पूर्वोक्तोऽर्थः परामृश्यते। द्राङ्क्ष् , ध्राङ्क्ष्, ध्वाङ्क्ष्, (इ) सेट्, प। (धा.क.)

❖ **द्राखृ [द्राख्] शोषणालमर्थयोः** **(भ्वा०)**

ओखृ राखृ लाखृ **द्राखृ** ध्राखृ शोषणालमर्थयोः। (धा.प्र.)(मा.धा.)(धा.क.)

शोषणं स्नेहराहित्यम्। अलमर्थः - भूषणम्, पर्याप्तिः, वारणं, सामर्थ्यञ्च। पञ्चैव ऋदनुबन्धाः, परस्मैपदिनः, सेटश्च। (धा.क.)

❖ **द्राघृ [द्राघ्] सामर्थ्ये आयामे च** **(भ्वा०)**

राघृ लाघृ **द्राघृ** सामर्थ्ये। **द्राघृ** आयामे च। (धा.प्र.)

राघृ लाघृ **द्राघृ** ध्राघृ सामर्थ्ये। **द्राघृ** आयासे च। द्राघिमन्ये न पेठुः। आयासः कदर्थनम्। कौशिकस्त्वायामे, दैर्घ्यविशिष्टायां क्रियायाम् इत्याख्यत्। काल्पनिके हि प्रकृतिप्रत्ययविभागे द्राघिमादयः। कस्मिंश्चिद् व्याकरणे धातोरेव साधिताः। (क्षी.त.)

द्राघृ आयामे च - आयामो दैर्घ्यक्रियेति कौशिकः। चकारात् सामर्थ्यानुवृत्तिः। आयासे च इति दुर्गः पठति। आयासः खेदः। द्राघते वपुः। खिद्यते इत्यर्थ इति रमानाथः। कदर्थनमिति स्वामी। ध्राघृ इति तवर्गचतुर्थादिमपि केचित् पठन्ति। द्राघ् (ऋ) सेट्, आ। द्राघते वपुरत्यर्थं यद्वियोगे मृगीदृशाम्। (कवि०) (धा.क.)

❖ **द्राडृ [द्राड्] विशरणे** **(भ्वा०)**

द्राडृ ध्राडृ विशरणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

विशरणं विभेदः, भट्टमल्लेन तालव्यमध्यपठितत्वात्। द्राड्, ध्राड् (ऋ) सेट्, सक, आ। (धा.क.)

❖ **द्राहृ [द्राह्] निद्राक्षये, निक्षेपे** **(भ्वा०)**

द्राहृ निद्राक्षये। (धा.प्र.)(मा.धा.) (धा.क.)

द्राहृ निक्षेपे। **द्राहृ** निद्राक्षये इति दुर्गः। (क्षी.त.)

निक्षेप इति केचित्। (मा.धा.) (धा.क.)

द्राह्, (ऋ) सेट्, अक, आ। (धा.क.)

❖ द्रु [द्रु] गतौ (भ्वा०)

दु द्रु गतौ। (शा.आ.)(धा.प्र.)

(क्षी.त.)(मा.धा.) (धा.क.)

द्रु, द्रु, अनिट्, सक, प। (धा.क.)

❖ द्रुण [द्रुण्] हिंसागतिकौटिल्येषु (तुदा०)

द्रुण हिंसागतिकौटिल्येषु। (धा.प्र.)

(क्षी.त.)(मा.धा.)

द्रुण हिसागतिकौटिल्ये। द्रुण्, सेट्, सक, प। कौटिल्यार्थे अकर्मकः। (धा.क.)

❖ द्रुह [द्रुह्] जिघांसायाम् (दिवा०)

द्रुह जिघांसायाम्। (शा.आ.)(धा.प्र.)

(क्षी.त.)(मा.धा.)(धा.क.)

जिघांसा हन्तुमिच्छा। द्रोहः। द्रुह्, वेट्, सक, प। (धा.क.)

❖ द्रूञ् [द्रू] हिंसायाम् (क्र्या०)

द्रूञ् हिंसायाम्। (धा.प्र.) (क्षी.त.) (मा.धा.)

स्वादौ (दुर्गमते) । (क्षी.त.)

❖ द्रूञ् [द्रू] शब्दे (क्र्या०)

द्रूञ् शब्दे - द्रू (ञ्), सेट्, सक, उ। (धा.क.)

❖ द्रेकृ [द्रेक्] शब्दोत्साहयोः (भ्वा०)

द्रेकृ ध्रेकृ शब्दोत्साहयोः। (धा.प्र.)

(मा.धा.)(धा.क.)

द्रेकृ धेकृ शब्दोत्साहे। शब्दस्यौद्धत्ये। चन्द्रो वृद्धावित्याह। (क्षी.त.)

शब्दोत्साह इति केचित् यदाह काश्यपः द्रेकते। शब्देनोत्साहं करोतीति। उत्साहो वृद्धिरिति चन्द्रः। औद्धत्यमिति स्वामी। (मा.धा.)(धा.क.)

द्रेक्, ध्रेक्, सेट्, अक, आ। (धा.क.)

❖ द्रै [द्रै] स्वप्ने (भ्वा०)

द्रै स्वप्ने। (शा.आ.)(धा.प्र.) (क्षी.त.)

(मा.धा.)(धा.क.)

❖ द्विष [द्विष्] अप्रीतौ (अदा०)

द्विष अप्रीतौ। (शा.आ.)(धा.प्र.)

(क्षी.त.) (मा.धा.) (धा.क.)

द्विष्, सक, अनिट्, उ। (धा.क.)

❖ द्वृ [द्वृ] अनादरे (भ्वा०)

द्वृ अनादरे। (धा.प्र.)

❖ द्वृ [द्वृ] वरणे (भ्वा०)

द्वृ वरणे। वरणं स्थगनम्। (क्षी.त.)

❖ धक्क [धक्क्] नाशने (चुरा०)

नक्क **धक्क** नाशने। (धा.प्र.) (मा.धा.)

णक्क **धक्क** नाशने। (क्षी.त.)

नक्क **धक्क** नाशने [व्यथने] - नक्क्, धक्क्, सक, प। (धा.क.)

❖ धण [धण्] शब्दे (भ्वा०)

वन भण **धण** शब्दे - कौशिकस्तु दन्त्यान्त्यम् आह। (क्षी.त.)

❖ धन [धन्] धान्ये (जुहो०)

धन धान्ये। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

❖ धवि [धन्व्] गत्यर्थः (भ्वा०)

रिवि रवि **धवि** गत्यर्थाः। (धा.प्र.)

(मा.धा.)(धा.क.)

रिवि रवि दवि **धवि** गत्यर्थाः। (क्षी.त.)

रिन्व्, रन्व्, धन्व्, (इ) सेट्, सक, प। (धा.क.)

❖ धावु [धाव] गतिशुद्ध्योः (भ्वा०)

धावु गतिशुद्धयोः। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

धाव् (उ) सेट्, अक, उ। धावनः। अनु - अनुधावनम्। अप - पलायनम्। निर् - मार्जनम्। (धा.क.)

❖ धि [धि] धारणे (तुदा०)

धि विधारणे। (धा.प्र.)

धि धारणे। (क्षी.त.)(मा.धा.) (धा.क.)

धि, अनिट्, सक, प। (धा.क.)

❖ धिक्ष [धिक्ष्] सन्दीपनक्लेशनजीवनेषु (भ्वा०)

धुक्ष **धिक्ष** सन्दीपनक्लेशनजीवनेषु। (शा.आ.) (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

धुक्ष, धिक्ष, सेट्, अक, आ। (धा.क.)

❖ धिवि [धिन्व्] प्रीणनार्थः (भ्वा०)

हिवि दिवि **धिवि** जिवि प्रीणनार्थाः। (धा.प्र.) (मा.धा.)(धा.क.)

इवि **धिवि** दिवि जिवि प्रीणनार्थे। (शा.आ.)

इवि जिवि **दिवि** धिवि प्रीणनार्थाः। (क्षी.त.)

अत्र केचिदाद्यमिकारादिं पठित्वा पुनः पाठोर्थभेदादिति। धातूनामनेकार्थत्वे तु न प्रयोजनमस्ति। (मा.धा.)(धा.क.)

सर्वे इदनुबन्धाः, सेटः, सकर्मकाः परस्मैपदिनः च। (धा.क.)

❖ धिष [धिष्] शब्दे (जुहो०)

धिष शब्दे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

धिष, सेट्, अक, प। (धा.क.)

❖ धीङ् [धी] आधारे (दिवा०)

धीङ् अनादरे। (धा.प्र.)

धीङ् आधारे। (क्षी.त.)

धीङ् आदाने। यस्तु अस्मास्वधीनं किमु निस्पृहाणाम् इत्यादौ अधीनशब्दः सः अव्युत्पन्नः परतन्त्रवचनः। यथाह कैयटः वाक्यं वक्तर्यधीनं हि इत्युपादाय अध्युतरपदात् खविधानाद् अव्युत्पन्न आयत्तार्थवृत्तिः अधीनशब्दः इति। (मा.धा.)

धीङ् आदाने [आधारे] - धी (ङ्), अनिट्, सक, आ। (धा.क.)

❖ धीङ् [धी] अनादरे (दिवा०)

धीङ् अनादरे। (शा.आ.)

❖ धुक्ष [धुक्ष्] सन्दीपनक्लेशनजीवनेषु (भ्वा०)

धुक्ष धिक्ष सन्दीपनक्लेशनजीवनेषु। (शा.आ.) (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

धुक्ष, धिक्ष, सेट्, अक, आ। (धा.क.)

❖ धुञ् [धू] कम्पने (स्वा०)

धुञ् कम्पने। (शा.आ.)(धा.प्र.) (मा.धा.)(धा.क.)

अनुदात्तः। अत्र स्वामी तु ह्रस्वान्तममुं पठित्वा प्रयोगवशाद्दीर्घान्तमप्याह। शिवस्वामिकाश्यपौ तु दीर्घान्तमाहतुः। उभयमपीति चान्द्रा इति सुधाकरः दीर्घान्तस्य तेनैव प्रयोगो दर्शितः। ऊर्ध्वं धूनोति वायुर्विवृतशिवशिरः श्रोणिकुञ्जेषु इति क्र्यादौ युजादौ च। धू विधूनन इति तुदादौ। (मा.धा.)

धू, (ञ्) अनिट्, सक, उ। दीर्घान्तः क्र्यादौ युजादौ च। धू विधूनन इति तुदादौ च। (धा.क.)

❖ धुर्वी [धुर्व्] हिंसार्थः (भ्वा०)

उर्वी तुर्वी थुर्वी दुर्वी **धुर्वी** हिंसायाम्। (धा.प्र.)

उर्वी तुर्वी दुर्वी **धुर्वी** हिंसार्थाः - थुर्वी इति चन्द्रः। जुर्वी इति दौर्गाः। (क्षी.त.)

उर्वी तुर्वी थुर्वी **धुर्वी** दुर्वी हिंसार्थाः। (मा.धा.)

उर्वी तुर्वी थुर्वी दुर्वी **धुर्वी** हिंसायाम् - सर्वे ईदनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ धू [धू] विधूनने (तुदा०)

धू विधूनने। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

अयं पूर्वश्चोदात्तः। प्राणा वैधवित्रमिति तु छान्दसमिति च। (मा.धा.)

धू, सेट्, सक, प। (धा.क.)

❖ धूञ् [धू] कम्पने (स्वा०)

धूञ् कम्पने। (शा.आ.)(क्षी.त.)

❖ धूञ् [धू] कम्पने (क्र्या०)

धूञ् कम्पने।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तुदादौ धू विधूनने । (क्षी.त.)

धू (ञ्) सेट्, सक, उ। अव - निरासः। व्यथामवधूय (रघु.) निर् - वि - निरासः, क्षयः। ज्ञाननिर्धूतकल्मषाः। विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम् स्मृतिः। (धा.क.)

❖ धूञ् [धू] कम्पने (चुरा०)

धूञ् कम्पने।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

धूञ्प्रीणोरिति हरदत्तकौमारादीनां पाठः। तन्मते प्रीणातिसाहचर्यात् धूञः अपि क्रैयादिकस्य एव नुका भाव्यम्। अत एवात्र मैत्रेयो धावयतीत्युदाजहार। एवञ्च स्वादौ दीर्घवादिनामपि धावयति इति भवति। (मा.धा.)

धू (ञ्) अक, उ। धूञ्प्रीणात्योरिति हरदत्तकौमारादीनां पाठः। तन्मते प्रीणातिसाहचर्य्यात् धूञोऽपि क्रैयादिकस्यैव नुका भाव्यम्। अत एवात्र मैत्रेयो धावयति इत्युदाजहार। (धा.क.)

❖ धूप [धूप्] सन्तापे (भ्वा०)

धूप सन्तापे। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

चुरादौ भासार्थः। (क्षी.त.)

भाषार्थेऽयं चुरादौ। (मा.धा.)

धूप, सेट्, सक, प। (धा.क.)

❖ धूप [धूप्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप **धूप** विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू **धूप** विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप **धूप** विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः। मैत्रेयानुरोधेनायं पाठो दण्डकस्य भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुप् **धूप** विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ **धूरी [धूर्] हिंसागत्योः** **(दिवा०)**

धूरी गूरी हिंसागत्योः। (धा.प्र.)

(मा.धा.)(धा.क.)

धूरी हिंसागत्योः। (क्षी.त.)

सर्वे ईदनुबन्धाः, सेटः, सकर्मकाः, वयोहानावर्थे घूरी जूरी इमावकर्मकौ। (धा.क.)

❖ **धूष [धूष्] कान्तिकरणे** **(चुरा०)**

धूष कान्तिकरणे। तालव्यान्त इत्येके, दन्त्त्यान्त इति दौर्गाः धूसरः। (क्षी.त.)

❖ **धूस [धूस्] कान्तिकरणे** **(चुरा०)**

धूस कान्तिकरणे। (धा.प्र.)(मा.धा.)

धूष इत्येके। (धा.प्र.)

दन्त्योष्ठ्यान्त इति श्रीभद्रमैत्रेयादयः। मूर्धन्योष्ठ्यान्त इति स्वामी। तथा च मैत्रेयोऽपि धूषइत्येकइति। काश्यपस्तुतालव्योष्मान्तमाह। (मा.धा.) (धा.क.)

धूस, सक, उ। (धा.क.)

❖ **धृ [धृ] धारणे** **(तुदा०)**

धृ धारणे। (शा.आ.)

❖ **धृङ् [धृ] अवध्वंसने** **(भ्वा०)**

धृङ् अवध्वंसने। (धा.प्र.)(क्षी.त.)(धा.क.)

तुदादौ धृङ् आधारे। चुरादौ धृ धारणे धारयति। (क्षी.त.)

धृ (ङ्) अनिट्, सक, आ। (धा.क.)

❖ **धृङ् [धृ] अवस्थाने** **(तुदा०)**

धृङ् अनवस्थाने। (शा.आ.)

(धा.प्र.)(मा.धा.)(धा.क.)

धृङ् स्थाने। अनुदात्तौ- आदर इत्याग्रहणाद्। (क्षी.त.)

धृ (ङ्) अनिट्, अक, प। भ्वादौ धृधातौ विशेषो द्रष्टव्यः। (धा.क.)

❖ **धृज [धृज्] गतौ** **(भ्वा०)**

ध्रज ध्रजि **धृज** धृजि ध्वज ध्वजि गतौ। (धा.प्र.)(मा.धा.)(धा.क.)

ध्रज धृजिवत् तरङ्गिणीकाश्यपसम्मतास्तु आद्यौ व्रजव्रजी इति दन्त्योष्ठ्यादी पठ्येते। (मा.धा.)

ध्रज्, ध्रञ्ज् (इ) धृज्, धृञ्ज् (इ) ध्वज्, ध्वञ्ज् (इ) सेट्, सक, प। सर्व एव तवर्गीयचतुर्थवर्णादयः।

तरङ्गिण्यादौ तु आदौ व्रजव्रजी इति दन्त्योष्ठ्यादि पठ्येते। (धा.क.)

❖ धृजि [धृञ्ज्] गतौ (भ्वा०)

ध्रज ध्रजि धृज **धृजि** ध्वज ध्वजि गतौ। (धा.प्र.)(मा.धा.) (धा.क.)

ध्रजधृजिवत् तरङ्गिणीकाश्यपसम्मतास्तु आद्यौ व्रजव्रजी इति दन्त्योष्ठ्यादी पठ्येते। सर्वत्र तवर्गीयादी एव। (मा.धा.)

ध्रज्, घ्रञ्ज् (इ) धृज्, धृञ्ज् (इ) ध्वज्, ध्वञ्ज् (इ) सेट्, सक, प। सर्व एव तवर्गीयचतुर्थवर्णादयः। तरङ्गिण्यादौ तु आदौ व्रजव्रजी इति दन्त्योष्ठ्यादि पठ्येते। (धा.क.)

❖ धृञ् [धृ] धारणे (भ्वा०)

धृञ् धारणे। (शा.आ.)(धा.प्र.) (मा.धा.)(धा.क.)

धृ (ञ्) अनिट्, सक, उ। (धा.क.)

❖ धृष [धृष्] प्रसहने (चुरा०)

धृष प्रसहने। (धा.प्र.)(मा.धा.) (धा.क.)

धृष अप्रसहने। अप्रसहनम् अभिभवः, अत एव प्रसहन इति युक्तम्। (क्षी.त.)

आदित् शाकटायनस्य। पशबन्धन इति केचित् पठन्ति। तदुक्तं मैत्रेयेण। (मा.धा.)

धृष्, अक, उ। युज पृच इत्यारभ्य धृषपर्यन्तेभ्यो विभाषया णिच् भवति। (धा.क.)

❖ धृषु [धृष्] संघर्षे (भ्वा०)

धृषु सङ्घर्षे। (शा.आ.)

❖ धेकृ[ध्रेक्] शब्दोत्साहयोः (भ्वा०)

द्रेकृ **ध्रेकृ** शब्दोत्साहयोः। (धा.प्र.)(धा.क.)

द्रेकृ **धेकृ** शब्दोत्साहे - शब्दस्यौद्धत्ये। चन्द्रो वृद्धावित्याह। (मा.धा.)

शब्दोत्साहे इति केचित्। यदाह काश्यपः - द्रेकते, शब्देनोत्साहं करोतीति। उत्साहो वृद्धिरिति चन्द्रः। औद्धत्वमिति स्वामी। द्रेकृ, ध्रेकृ, सेट्, अक, आ। (धा.क.)

❖ धेट् [धे] पाने (भ्वा०)

धेट् पाने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

धय इति केचित्। (धा.प्र.)

धेट् पा पाने इति दुर्गः पठति। धे [धा] (ट्) अनिट् सक, प। (धा.क.)

❖ धोर्ऋ [धोर्] गतिचातुर्ये (भ्वा०)

धोर्ऋ गतिचातुर्ये। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

अश्वानां गतिविशेषः। (मा.धा.)

धोर् (ऋ) सेट्, अक, प। धौरितकोऽश्वानां गतिविशेषः। (धा.क.)

❖ ध्मा [ध्मा] शब्दाग्निसंयोगयोः (भ्वा०)

ध्मा शब्दाग्निवक्रसंयोगयोः। (शा.आ.)

ध्मा शब्दाग्निसंयोगयोः। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

शब्दे, मुखादिना च अग्निसंयोगे। धमिः प्रकृत्यन्तरमित्येके। यथा धान्तो धातुः पावकस्येव राशिः। (क्षी.त.)

इहाग्निसंयोगो मुखवायुनाऽग्निसंयोगः। (मा.धा.) (धा.क.)

ध्मा, अनिट्, प। (धा.क.)

❖ ध्यै [ध्यै] चिन्तायाम् (भ्वा०)

ध्यै चिन्तायाम्। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

स्मृ, ध्यै चिन्तायामिति दुर्गः पठति। ध्यै (ध्या) अनिट्, सक, प। (धा.क.)

❖ ध्रज [ध्रज्] गतौ (भ्वा०)

ध्रज ध्रजि धृज धृजि ध्वज ध्वजि गतौ।
(धा.प्र.)(मा.धा.) (धा.क.)

वृज ध्रजि **ध्रज** ध्वजि गतौ। (क्षी.त.)

ध्रज धृजिवत् तरङ्गिणीकाश्यपसम्मताः तु आद्यौ व्रजव्रजी इति दन्त्योठ्यादी पठ्येते। सर्वत्र तवर्गीयादी एव। (मा.धा.)

ध्रज्, ध्रञ्ज् (इ) धृज्, धृञ्ज् (इ) ध्वज्, ध्वञ्ज् (इ) सेट्, सक, प। सर्व एव तवर्गीयचतुर्थवर्णादयः। तरङ्गिण्यादौ तु आदौ व्रजव्रजी इति दन्त्योष्ठ्यादि पठ्येते। (धा.क.)

❖ ध्रजि [ध्रञ्ज्] गतौ (भ्वा०)

ध्रज **ध्रजि** धृज धृजि ध्वज ध्वजि गतौ।
(धा.प्र.)(मा.धा.) (धा.क.)

वृज **ध्रजि** ध्रज ध्वजि गतौ। ध्वजेत्येके।
(क्षी.त.)

ध्रजधृजिवत् तरङ्गिणीकाश्यपसम्मतास्तु आद्यौ व्रजव्रजी इति दन्त्योष्ठ्यादी पठ्येते सर्वत्र तवर्गीयादी एव। (मा.धा.)

ध्रज्, ध्रञ्ज् (इ) धृज्, धृञ्ज् (इ) ध्वज्, ध्वञ्ज् (इ) सेट्, सक, प। सर्व एव तवर्गीयचतुर्थवर्णादयः। तरङ्गिण्यादौ तु आदौ व्रजव्रजी इति दन्त्योष्ठ्यादि पठ्येते। (धा.क.)

❖ ध्रण [ध्रण्] शब्दे (भ्वा०)

ध्रण शब्दे। (धा.प्र.)(मा.धा.)

उपदेशे दन्त्यान्तोऽयमिति प्रागस्य निर्देशो न कृतः। (धा.प्र.)

उपदेशे नान्तोयमिति प्रागस्य निर्देशो न कृतः। तस्य प्रयोजनं यङ्लुकीति मैत्रेयः। अतोस्य दण्डके पाठः प्रत्युक्तः। क्वचित् कोशे वण भण धण इति त्रयः पठ्यन्ते। (मा.धा.)

❖ ध्रन [ध्रन] शब्दे (भ्वा०)

ध्रन शब्दे। उपदेशे नान्तोऽयमिति प्रागस्य निर्देशो न कृतः। तस्य प्रयोजनं यङ्लुकीति मैत्रेयः। अतोऽस्य दण्डके पाठः प्रत्युक्तः। ध्रन्, सेट्, अक, प। (धा.क.)

❖ ध्राक्षि [ध्राङ्क्ष्] काङ्क्षायाम् घोरवासिते च (भ्वा०)

द्राक्षि **ध्राक्षि** ध्वाक्षि काङ्क्षायाम् घोरवाशिते च।
(शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

काक्षि वाक्षि माक्षि द्राक्षि **ध्राक्षि** ध्वाक्षि काङ्क्षायाम्। (क्षी.त.)

द्राक्षि **ध्राक्षि** घोरनिवाशिते च। (क्षी.त.)

चकारेण पूर्वोक्तोऽर्थः परामृश्यते। द्राङ्क्ष् , ध्राङ्क्ष्, ध्वाङ्क्ष्, (इ) सेट्, प। (धा.क.)

❖ ध्राखृ [ध्राख्] शोषणालमर्थयोः (भ्वा०)

ओखृ राखृ लाखृ द्राखृ **ध्राखृ** शोषणा-

लमर्थयोः (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

शोषणं स्नेहराहित्यम्। अलमर्थः - भूषणम्, पर्याप्तिः, वारणं, सामर्थ्यञ्च। पञ्चैव ऋदनुबन्धाः, परस्मैपदिनः, सेटश्च। (धा.क.)

❖ ध्राघृ [ध्राघ्] सामर्थ्ये (भ्वा०)

राघृ लाघृ द्राघृ **ध्राघृ** सामर्थ्यें। (क्षी.त.)

❖ ध्राडृ [ध्राड्] विशरणे (भ्वा०)

द्राडृ **ध्राडृ** विशरणे। (धा.प्र.)(क्षी.त.)
(मा.धा.) (धा.क.)

विशरणं विभेदः, भट्टमल्लेन तालव्यमध्यपठितत्वात्। द्राड्, ध्राड् (ऋ) सेट्, सक, आ। (धा.क.)

❖ ध्रु [ध्रु] स्थैर्ये (भ्वा०)

ध्रु स्थैर्यें। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अयं तुदादौ गत्यर्थश्च । (मा.धा.)

ध्रु, अनिट्, अक, प। अयं तुदादौ गत्यर्थ एव। (धा.क.)

❖ ध्रु [ध्रु] गतिस्थैर्ययोः (तुदा०)

ध्रु गतिस्थैर्ययोः। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अत्र स्वाम्यादयो ध्रुव इति वकारान्तं धातुं पठन्ति। उक्तञ्च ध्रुवमपाये इत्यत्र हरदत्तेन ध्रु गतिस्थैर्ययोरित्यस्मात्पचाद्यच्। ये ध्रुवं गतिस्थैर्ययोः इति पठन्ति। (मा.धा.)

ध्रु, अनिट्, सक, [अक]प। अत्र स्वाम्यादयो ध्रुव इति वकारान्तं धातुं पठन्ति। (धा.क.)

❖ ध्रुड [ध्रुड्] निमज्जने (तुदा०)

ध्रुड इत्यपरे। (धा.प्र.)

❖ ध्रुव [ध्रुव्] गतिस्थैर्ये (तुदा०)

ध्रुव स्थैर्यें। (शा.आ.)

❖ ध्रेकृ [ध्रेक्] शब्दोत्साहयोः (भ्वा०)

द्रेकृ **ध्रेकृ** शब्दोत्साहयोः। (धा.प्र.)

द्रेकृ **धेकृ** शब्दोत्साहे - शब्दस्यौद्धत्ये। चन्द्रो वृद्धावित्याह। (क्षी.त.)

❖ ध्रै [ध्रै] तृप्तौ (भ्वा०)

ध्रै तृप्तौ। (धा.प्र.)(क्षी.त.)
(धा.प्र.)(मा.धा.)(धा.क.)

ध्रै (ध्रा) अनिट्, सक, प। (धा.क.)

❖ ध्वंसु [ध्वंस्] अवस्रंसने गतौ च (भ्वा०)

स्रंसु **ध्वंसु** भ्रंसु अवस्रंसने। **ध्वंसु** गतौ च। (मा.धा.)

❖ ध्वज [ध्वज्] गतौ (भ्वा०)

ध्रज ध्रजि धृज धृजि **ध्वज** ध्वजि गतौ।
(धा.प्र.)(मा.धा.) (धा.क.)

ध्रज्, ध्रञ्ज् (इ) धृज्, धृञ्ज् (इ) ध्वज्, ध्वञ्ज् (इ) सेट्, सक, प। सर्व एव तवर्गीयचतुर्थवर्णादयः। (धा.क.)

❖ ध्वजि [ध्वञ्ज्] गतौ (भ्वा०)

ध्रज ध्रजि धृज धृजि ध्वज **ध्वजि** गतौ।
(धा.प्र.)(मा.धा.)(धा.क.)

वृज ध्रजि ध्रज **ध्वजि** गतौ। ध्वजेत्येके। (क्षी.त.)

ध्रज्, ध्रञ्ज् (इ) धृज्, धृञ्ज् (इ) ध्वज्, ध्वञ्ज् (इ) सेट्, सक, प। सर्व एव तवर्गीयचतुर्थवर्णादयः। (धा.क.)

❖ **ध्वण [ध्वण्] शब्दार्थः (भ्वा०)**

अण रण वण मण कण क्वण व्रण भ्रण **ध्वण** शब्दार्थाः। एते शब्दनक्रियार्थाः। चुरादौ व्रण गात्रविचूर्णने। मूर्धन्यान्तो ध्वणिर् लोके नास्ति। (क्षी.त.)

अण रण वण मण कण क्वण व्रण व्रण भ्रण **ध्वण** शब्दार्थाः - अयं निमीलनार्थश्चुरादौ। घ्रणिरपि सम्मतायामत्र पठ्यते। (मा.धा.)

अन रण वण भण मण कण क्वण व्रण भ्रण **ध्वण** शब्दार्थाः। इतः क्रम्यन्ता उदात्ता उदात्तेतः। अण, रण, वण, भण, मण, कण, क्वण, ष्टण, वन, ध्वन, शब्दे, इति दुर्गः। सर्वे सेटः, अकर्म्मकाः, सकर्म्मकाश्च, परस्मैपदिनः। अयं निमीलनार्थश्चुरादौ। ध्रणिरपि सम्मतायामत्र पठ्यते। (धा.क.)

❖ **ध्वन [ध्वन्] शब्दे (भ्वा०)**

स्यमु स्वन **ध्वन** शब्दे। (शा.आ.)

(धा.प्र.)(मा.धा.)(धा.क.)

ध्वन स्वन शब्दे। (धा.प्र.)

स्यमु स्वन स्तन **ध्वन** शब्दे। ष्टन इति चन्द्रः। (क्षी.त.)

मित्त्वार्थमयमनूद्यते। ध्वन्, सेट्, अक, प। अस्पष्टाक्षरन् उच्चारयतीत्यर्थः। तथा च प्रातिशाख्यम् अक्षरव्यञ्जनानाम् उपलब्धिः ध्वनिरिति। स्यम् (उ) स्वन्, ध्वन्, सेट्, अक, प। (धा.क.)

❖ **ध्वन् [ध्वन्] शब्दे (चुरा०)**

ध्वन शब्दे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भ्वादौ [ध्वन शब्दे]। (क्षी.त.)

ध्वन, अक, उ। (धा.क.)

❖ **ध्वन्सु [ध्वंस्] अवस्रंसने (भ्वा०)**

स्रन्सु **ध्वन्सु** भ्रन्सु अवस्रंसने। (शा.आ.)

स्रन्सु भ्रन्शु **ध्वन्सु** अधःपतने अवस्रंसने च। **ध्वन्सु** गतौ च। (धा.प्र.)

स्रन्सु **ध्वन्सु** भ्रन्शु अवस्रंसने। **ध्वन्सु** गतौ च। (क्षी.त.)(धा.क.)

सर्वे उदनुबन्धाः सेटः, अकर्मकाः, आत्मनेपदिनः च। (धा.क.)

❖ **ध्वाक्षि [ध्वाङ्क्ष्] काङ्क्षायाम् घोरवासिते च (भ्वा०)**

द्राक्षि **ध्राक्षि** ध्वाक्षि काङ्क्षायाम् घोरवाशिते च। (शा.आ.)(मा.धा.)(धा.क.)

द्राक्षि **ध्राक्षि** ध्वाक्षि घोरवाशिते च। (धा.प्र.)

काक्षि वाक्षि माक्षि द्राक्षि **ध्राक्षि** ध्वाक्षि काङ्क्षायाम्। (क्षी.त.)

चकारेण पूर्वोक्तोऽर्थः परामृश्यते। द्राङ्क्ष्, ध्राङ्क्ष्, ध्वाङ्क्ष्, (इ) सेट्, प। (धा.क.)

❖ **ध्वृ [ध्वृ] हूर्च्छने (भ्वा०)**

ध्वृ हूर्छने। (शा.आ.)(धा.प्र.)

(क्षी.त.)(मा.धा.)(धा.क.)

हूर्छनं कौटिल्यम्। छन्दसि निष्टर्क्यदेवहूय इति

ध्वर्यः। न ध्वरोऽध्वरो यज्ञः। (क्षी.त.)

हूर्च्छनं कौटिल्यं भ्रातृव्यमेव। तदपध्वरतीत्यादौ हिंसायामपि दृश्यते। (मा.धा.) (धा.क.)

ध्वृ, अनिट्, अक, प। (धा.क.)

❖ **नक्क [नक्क्] नाशने** **(चुरा०)**

नक्क धक्क नाशने। (धा.प्र.) (मा.धा.)

अयं तवर्गीयादिः णोपदेशपर्युदासे नृतिनन्दि इत्यादावुपादानात् नक्कयति। (मा.धा.)

नक्क धक्क नाशने [व्यथने] - नक्क्, धक्क्, सक, प। अयं तवर्गीयपञ्चमादिः। (धा.क.)

❖ **नख [नख्] गत्यर्थः** **(भ्वा०)**

उख **नख** वख मख रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि **नख** णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

❖ **नट [नट्] नृतौ** **(भ्वा०)**

नट नृतौ। (क्षी.त.)(मा.धा.) (धा.क.)

नतावित्येके। चुरादौ नट अवस्यन्दने। (क्षी.त.)

पूर्वत्र नृनिर्नाट्यमित्युक्तत्वात् इइ नृतिशब्दो न ततोऽन्योर्थो नृत्तनृत्यलक्षणः चलनादिलक्षणं च उच्यते। अत्र मैत्रेयः गतावित्येके नतावित्येके। स्वामी च नताविति पठित्वा नटयति शाखामित्युदाहृत्य नृत्तौ नाटयतीति। (मा.धा.) (धा.क.)

नट्, सेट्, अक, प। अयमपि च घटादिः। (धा.क.)

❖ **नट [नट्] अवस्यन्दने** **(चुरा०)**

नट अवस्यन्दने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

अवस्यन्दनं भ्रंशनम्। नाटक्राथपिषाम् भ्वादौ घटादौ नट नतौ - नट नृतौ। नड इति नन्दी। (क्षी.त.)

अवस्यन्दनं नाट्यम्। नाट्य इत्येव चन्द्रः। (मा.धा.) (धा.क.)

नट भाषायामिति केचित्। (धा.क.)

❖ **नट [नट्] भाषार्थः** **(चुरा०)**

रुठ लजि अजि दसि भृशि कशि रुसि शीक नट पुटि जुचि रघि अहि रहि महि भाषार्थाः - इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते रोठयति। (मा.धा.)

रुठ लजि अजि दसि भृशि रुशि रुसि शीक नट पुटि जुचि रघि अहि रहि महि इत्येते पञ्चदश स्वामिकाश्यपमतानुसारेण लिख्यन्ते - भसि, पिसि, लडि, वृडि, तुडि, नडि इत्यन्ये पठन्तीति स्वामी। (धा.क.)

❖ **नद [नद्] अव्यक्ते शब्दे** **(भ्वा०)**

नद अव्यक्ते शब्दे। (शा.आ.)

❖ **नभ [नभ्] हिंसायाम्** **(क्र्या०)**

नभ तुभ हिंसायाम्। (शा.आ.)

❖ **नय [नय्] गतौ** **(भ्वा०)**

अय वय षय मय चय दय तय **नय** गतौ। (शा.आ.)

अय वय पय मय चय तय **नय** गतौ। (क्षी.त.)

❖ नर्द [नर्द्] शब्दे **(भ्वा०)**

नर्द गर्द शब्दे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

दन्त्यादिरयं नृतिनन्दिनर्दीति पर्य्युदासात्। नर्द्, सेट्, अक, प। गर्द, सेट्, अक, प। (धा.क.)

❖ नर्द [नर्द्] हिंसायाम् **(भ्वा०)**

नर्द गर्द हिंसायाम्। (शा.आ.)

❖ नर्ब [नर्ब्] गतौ **(भ्वा०)**

वर्फ रफ रफि अर्ब वर्ब कर्ब खर्ब गर्ब घर्ब शर्ब षर्ब सर्ब चर्ब भर्ब **नर्ब** गतौ। पञ्चदशैते गत्यर्थाः। (क्षी.त.)

❖ नल [नल्] गन्धे **(भ्वा०)**

नल गन्धे। (शा.आ.)

❖ नस [नस्] कौटिल्ये **(भ्वा०)**

नस कौटिल्ये। भ्रष्टाधीर्नसते। (शा.आ.)

❖ नाथृ [नाथ्] याच्ञोपतापैश्वर्याशीःषु **(भ्वा०)**

नाधृ **नाथृ** याच्ञोपतापैश्वर्याशीःषु (क्षी.त.)
(मा.धा.)(धा.क.)

णाधृ **नाथृ** याच्ञोपतापैश्वर्य्याशीःषु - आद्यो णोपदेशः। (धा.प्र.)

उपताप उपघातः। याच्ञोपतापयोरित्यर्थयोः क्रियात्वात् ऐश्वर्याशिषोस्तु द्योत्ययोः धर्ममात्राभिधानात्। (क्षी.त.)

उपतापो रोग इति वृत्तौ। उपघात इति तरङ्गिण्याम् आद्यो धान्तः। (मा.धा.)

याच्ञोपतापैश्वर्याशीःषु इति वृत्तिकारपाठः। उपतापो रोग इति केचित्। उपघात इति तरङ्गिण्याम्। दुर्गमते इतः पूर्वं बिथृ वेथृ याचने इति पाठस्तन्मतेऽत्र चकारात् पूर्वतो याचनानुवृत्तिः। आद्यो धान्तः, अपरः थान्तः। अस्य धान्तस्य थान्तकाण्डे पाठोऽर्थसाम्यात्। उभावपि दन्त्यादी। (धा.क.)

❖ नाधृ [नाध्] याच्ञोपतापैश्वर्याशीःषु **(भ्वा०)**

णाथृ **नाधृ** याच्ञोपतापैश्वर्याशीःषु। सकर्मकः अकर्मकश्च। (शा.आ.)

नाधृ **नाथृ** याच्ञोपतापैश्वर्याशीःषु। (क्षी.त.)
(मा.धा.)(धा.क.)

उपताप उपघातः। याच्ञोपतापयोरित्यर्थयोः क्रियात्वात् ऐश्वर्याशिषोस्तु द्योत्ययोः धर्ममात्राभिधानात्। (क्षी.त.)

उपतापो रोग इति वृत्तौ। उपघात इति तरङ्गिण्याम् आद्यो धान्तः। (मा.धा.)

याच्ञोपतापैश्वर्याशीःषु इति वृत्तिकारपाठः। उपतापो रोग इति केचित्। उपघात इति तरङ्गिण्याम्। दुर्गमते इतः पूर्वं बिथृ वेथृ याचने इति पाठस्तन्मतेऽत्र चकारात् पूर्वतो याचनानुवृत्तिः। आद्यो धान्तः, अपरः थान्तः। अस्य धान्तस्य थान्तकाण्डे पाठोऽर्थसाम्यात्। उभावपि दन्त्यादी। (धा.क.)

❖ नजि [निञ्ज्] शुद्धौ **(अदा०)**

निजि शुद्धौ। (शा.आ.)

❖ निजिर् [निज्] शौचपोषणयोः (जुहो०)

निजिर् शौचपोषणयोः। (धा.प्र.)

❖ निवास [निवास] आच्छादने (चुरा०)

निवास आच्छादने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

निवास, सक, उ। (धा.क.)

❖ निवि [निन्व] सेचने (भ्वा०)

पिवि **निवि** मिवि सेचने। (शा.आ.)

पिवि मिवि **निवि** सेचने - सेवन इत्येके। (क्षी.त.)

❖ निष्क [निष्क्] परिमाणे (चुरा०)

निष्क परिमाणे। (क्षी.त.)(मा.धा.)(धा.क.)

निष्क्, सक, आ। (धा.क.)

❖ नीव [नीव्] स्थौल्ये (भ्वा०)

पीव मीव **नीव** तीव स्थौल्ये। (क्षी.त.)

❖ नुथि [नुन्थ्] हिंसासङ्क्लेशनयोः (भ्वा०)

कुथि पुथि **नुथि** लुथि मथ मथि हिंसासंक्लेशनयोः। (शा.आ.)

❖ नुद [नुद्] प्रेरणे (तुदा०)

नुद प्रेरणे। (शा.आ.)(धा.प्र.)

पुनः परस्मैपदिष्वयं पठिष्यते। कर्त्रभिप्राये क्रियाफलेऽपि परस्मैपदार्थम्। (धा.प्र.)

❖ नृ [नृ] नयादिष्वर्थेषु (भ्वा०)

नृ नयादिष्वर्थेषु। (शा.आ.)

नृ नये इत्येके। (धा.प्र.)

नृ नये - अयमपि क्र्यादिपठितो मित्त्वार्थ इह पठ्यते। मैत्रेयस्तु नामुमिहेच्छति। (धा.क.)

❖ नृती [नृत्] गात्रविक्षेपे (दिवा०)

नृती गात्रविक्षेपे। (शा आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

गात्रविक्षेपो नाट्यम्। (क्षी.त.)

नृत् (ई) सेट्, अक, प। (धा.क.)

❖ नॄ [नॄ] नये (भ्वा०)

नॄ नये इत्येके। (धा.प्र.)

नॄ नये। (क्षी.त.)(मा.धा.)(धा.क.)

क्र्यादेः मित्त्वार्थं विरलोऽस्य पाठः। (क्षी.त.)

मैत्रेयस्तु नामुमिच्छति। यदाह नृ नय इत्यप्येके इति। (मा.धा.)

अयमपि क्र्यादिपठितो मित्त्वार्थ इह पठ्यते। मैत्रेयस्तु नामुमिहेच्छति। (धा.क.)

❖ नॄ [नॄ] नये (क्र्या०)

नॄ नये। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

नॄ, सेट्, सक, प। (धा.क.)

❖ न्वी [न्वी] वयोहानौ (क्र्या०)

न्वी इत्येके। (धा.प्र.)

❖ पक्ष [पक्ष्] परिग्रहे (भ्वा०)

पक्ष परिग्रहे। (शा.आ.)

पक्ष परिग्रह इत्यप्येके। (धा.प्र.)

पक्ष परिग्रह इत्येके। (क्षी.त.)

❖ पक्ष [पक्ष्] परिग्रहे (चुरा०)

पक्ष परिग्रहे। (मा.धा.) (धा.क.)

पक्ष्, सक, उ। (धा.क.)

❖ पचि [पञ्च्] व्यक्तीकरणे (भ्वा०)

पचि व्यक्तीकरणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ पचि विस्तारवचने। दुर्गोऽदन्तमाह। (क्षी.त.)

पञ्चेति दुर्गः तथा वर्धमानोपि। डुपचष्पाके पच व्यक्तीकरण इति। सम्मतायां तु वर्धमानवदुक्त्वा अन्यैस्त्वयमिदित् पठ्यत इत्युक्तम्। पच व्यक्तीकरण इति पठन् न्यासकारः परस्मैपदिनं च मन्यते। डुपचष्पाक इत्यग्रे पचि विस्तारवचन इति चुरादौ। (मा.धा.)

पञ्च् (इ) सेट्, सक, आ। पच् इति दुर्गः। तथा वर्द्धमानोऽपि। सम्मतायान्तु वर्द्धमानवदुक्त्वा अन्यैस्त्वयमिदित् पठ्यत इत्युक्तम्। पच व्यक्तीकरण इति पठन् न्यासकारः परस्मैपदिनञ्च मन्यते। वोपदेवमते तु पच् पञ्च् (इ) इति द्वावेव व्यक्तीकरणे भ्वादावात्मनेपदिनौ। डुपचष् पाके इत्यग्रे पचि विस्तारवचने इति चुरादौ। (धा.क.)

❖ पचि [पञ्च्] विस्तारवचने (चुरा०)

पचि विस्तारे वचने। (धा.प्र.)

पचि विस्तारवचने। (क्षी.त.)(मा.धा.)(धा.क.)

पञ्च् (इ, णिच् वा) सक, उ। (धा.क.)

❖ पट [पट्] गतौ (भ्वा०)

अट **पट** गतौ। (शा.आ.)(धा.प्र.) (मा.धा.) (धा.क.)

चुरादौ **पट** वट ग्रन्थे अदन्तः तथा पट भाषार्थः। (क्षी.त.)

अट **पट** कट किट इट इ गतौ इति दुर्गः पठति।

अट्, सेट्, सक, प। (धा.क.)

❖ पट [पट्] भाषार्थः (चुरा०)

पट **पुट** लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः। भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट **पुट** रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः। एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट **पुट** लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः। मैत्रेयानुरोधेनायं पाठो दण्डकस्य भासार्था इत्येक इति मैत्रेयः तथा च क्षीरस्वामी भासा दीप्तिरर्थौ येषान्ते भासार्थाः। (मा.धा.)

पट **पुट** लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः]। मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थौ येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वा णिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

Digitized by Madhuhan Trust

❖ **पट [पट] ग्रन्थे** **(चुरा०)**

पट वट ग्रन्थे। (धा.प्र.)(क्षी.त.)
(मा.धा.) (धा.क.)

ग्रन्थो वेष्टनम्। भ्वादौ अट पट गतौ वट वेष्टने।
(क्षी.त.)

वट वेष्टन इति क्षीरस्वामी। ओष्ठ्यादिं बहवः पठन्तीति तत्रैवोक्तम्। (मा.धा.)

वट वेष्टने इति क्षीस्वामी। पट, वट, अक, उ।
‘(धा.क.)

❖ **पठ [पठ्] व्यक्तायां वाचि** **(भ्वा०)**

पठ व्यक्तायां वाचि। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

पठ्, सेट्, सक, प। (धा.क.)

❖ **पडि [पण्ड्] गतौ** **(भ्वा०)**

पडि गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

नाशार्थश्चुरादौ। (मा.धा.) (धा.क.)

पण्ड् (इ) सेट्, सक, आ। (धा.क.)

❖ **पडि [पण्ड्] नाशने** **(चुरा०)**

पडि पसि नाशने। (मा.धा.)(धा.क.)

पण्ड्, पन्स् (इ, वा णिच्) सक, उ। (धा.क.)

❖ **पण [पण्] व्यवहारे स्तुतौ च** **(भ्वा०)**

पण व्यवहारे स्तुतौ च। (शा.आ.)
(धा.प्र.)(क्षी.त.)(मा.धा.)

पृथङ्निर्देशात् स्तुतावित्यनेनैवायं सम्बध्यते।
(मा.धा.)

व्यवहारः क्रयविक्रयलक्षणः। गुणकथनं स्तुतिः। पण्, सेट्, सक, आ। (धा.क.)

❖ **पण [पण्] गतौ** **(भ्वा०)**

कण**पणौ** च। (शा.आ.)

❖ **पत [पत] देवशब्दे गतौ** **(चुरा०)**

पत गतौ। (धा.प्र.)

पत गतौ वा। (क्षी.त.)(मा.धा.)(धा.क.)

अन्ये पत ऐश्वर्य इति पेठुः, वा शब्दः तु उत्तरैकदेशार्थः वावृतुवत्। (क्षी.त.)

वाशब्दं केचिन्न पठन्तीति पुरुषकारे। (मा.धा.)

वाशब्द केचिन्न पठन्ति। अयं विकल्पेन णिचम् उत्पादयति। पत, सक, उ। (धा.क.)

❖ **पत्लृ [पत्] गतौ** **(भ्वा०)**

पत्लृ गतौ। (शा.आ.)

शल हुल **पत्लृ** गतौ। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

शल चलनसंवरणयोः इत्यस्यैव ज्वलादिकार्यार्थः पाठः। (क्षी.त.)

अत्र मैत्रेयः चकारोत्रान्वाचये गतावस्य तावत् प्रयोगः। क्वचित्तु हिंसासंवरणयोश्चेति क्वचित्तु पठ्यते। शल ह्वल ह्मल पद्लृ गतौ हुल हिंसासंवरणयोश्चेति। अत्र पाठे चकाराद्गतौ चेति व्याख्येयम् । (मा.धा.)

पल, शल, पत्लृ पथे च गताविति दुर्गः पठति। हुल हिंसासंवरणयोश्चेति कश्चित्। अत्र मैत्रेयः चकारोऽत्रान्वाचये गतावस्य तावत्प्रयोगः। क्वचित्तु हिंसासंवरणयोश्चेति। क्वचित् पठ्यते - शल, ह्वल, ह्मल, पत्लृ, गतौ, हुल हिंसासंवरणयोश्चेति। शल्, हुल्, पत् (लृ) सेट्, अक, प। (धा.क.)

❖ पथि [पन्थ] गतौ (चुरा०)

पथि गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

परिपूर्वो वैरिवाचकः। (क्षी.त.)

पथे गतावित्यस्य शपि। (धा.क.)

❖ पथे [पथ्] गतौ (भ्वा०)

पथे गतौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

पथि गतावितिचुरादौ। (मा.धा.) (धा.क.)

पथ् (ए) सेट्, अक, प। (धा.क.)

❖ पद [पद्] गतौ (दिवा०)

पद गतौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

गतिर्यानं ज्ञानं च। (क्षी.त.)

अयं कथादावपि। (मा.धा.)

पद्, अनिट्, सक, आ। (धा.क.)

❖ पद [पद] गतौ (चुरा०)

पद गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भ्वादौ पद स्थैर्ये (मतान्तरे)। (क्षी.त.)

पद, सक, आ। (धा.क.)

❖ पन [पन्] व्यवहारे स्तुतौ च (भ्वा०)

पन च। (शा.आ.)(धा.प्र.)
(क्षी.त.) (मा.धा.) (धा.क.)

स्तुत्यर्थ एव। (शा.आ.)

चकारात् स्तुतौ। (क्षी.त.)

पृथङ्निर्देशात् स्तुतावित्यनेनैवायं सम्बध्यते।
(मा.धा.) (धा.क.)

पन, सेट्, सक, प। (धा.क.)

❖ पय [पय्] गतौ (भ्वा०)

अय वय **पय** मय चय तय नय गतौ। (क्षी.त.)

अय वय **पय** मय चय तय णय गतौ। (मा.धा.)

अय वय **पय** मय चय तय णय गतौ - सर्वे सेटः, सकर्मकाः, आत्मनेपदिनश्च। (धा.क.)

❖ पर्ण [पर्ण] हरितभावे (चुरा०)

पर्ण हरितभावे। (धा.प्र.)(मा.धा.)(धा.क.)

पर्ण, अक, प। (धा.क.)

❖ पर्द [पर्द्] कुत्सिते शब्दे (भ्वा०)

पर्द कुत्सिते शब्दे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

पायुध्वनौ वर्ततेऽयम्। अन्ये निश्शब्दमधोवातं मन्वाना अशब्द इत्याहुः। (क्षी.त.)

रेफवद्दान्तः संयोगान्तेषूर्दादिष्वयं न पठितः शब्दविशेषार्थेन ह्लाद्यादिनापि साम्यात्। स्वादिस्त्वाकारवत्संयोगादित्वेन ह्लाद्यनुरोधेन मध्ये पठितः। इह कुत्सितः शब्दो गुदरवः तदाह केशवस्वामी कौक्षे कर्दति पर्दते गुदरव इति। (मा.धा.)

रेफवद्दान्तः। इह कुत्सितः शब्दो गुदरवः। तदाह केशवस्वामी - कौक्षे कर्दति पर्दते गुदरवः इत्यादि। पर्द, सेट्, अक, आ। (धा.क.)

❖ पर्थ् [पर्थ्] प्रक्षेपणे (चुरा०)

पर्थ प्रक्षेपणे। पृथ इत्येके। (क्षी.त.)

❖ पर्प [पर्प्] गतौ (भ्वा०)

पर्प रफ रफि अर्ब पर्ब वर्ब मर्ब षर्ब कर्ब खर्ब गर्ब शर्ब चर्ब गतौ। (धा.प्र.)

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब

शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः परौ द्वावपि द्वियीयान्तौ एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। (मा.धा.)

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः। परौ द्वावपि द्वितीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ पर्ब [पर्ब्] गतौ (भ्वा०)

पर्प रफ रफि अर्ब **पर्ब** वर्ब मर्व षर्ब कर्ब खर्ब गर्व शर्ब चर्ब गतौ। (धा.प्र.)

पर्प रफ रफि अर्ब **पर्ब** लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः परौ द्वावपि द्वियीयान्तौ एकादश परे तृतीयान्ताः द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः अर्वादयो नोपधा इति कौशिकः। (मा.धा.)

पर्प रफ रफि अर्ब **पर्ब** लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः। परौ द्वावपि द्वितीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ पर्व [पर्व्] पूरणे (भ्वा०)

पुर्व **पर्व** मर्व पूर्तौ। (धा.प्र.)(मा.धा.)(धा.क.)

पूर्व **पर्व** मर्व पूरणे। (क्षी.त.)

सर्वे सेटः, सकर्मकाः, परस्मैपदिनश्च। पूर्व निकेतने इति चुरादौ। (धा.क.)

❖ पर्ष [पर्ष्] स्नेहने (भ्वा०)

पर्ष वर्ष स्नेहने। (धा.प्र.)

पर्ष स्नेहने। (क्षी.त.)

❖ पल [पल्] गतौ (भ्वा०)

पल गतौ। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

चुरादौ पल रक्षणे । (क्षी.त.)

पाल रक्षण इति चुरादौ। (मा.धा.)

पल्, सेट्, अक, प। पल रक्षण इति चुरादौ। (धा.क.)

❖ पल [पल्] रक्षणे (चुरा०)

पल रक्षणे। (धा.प्र.)(क्षी.त.)(धा.क.)

पाल इति चन्द्रः -पाली। (क्षी.त.)

पल्, सक, उ। (धा.क.)

❖ पल्यूल [पल्यूल] लवनपवनयोः(चुरा०)

पल्यूल लवनपवनयोः। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

लवनपतनयोरिति दुर्गः। वल्युलेति दौर्गाः। (क्षी.त.)

पल्यूलनं शोधनद्रव्यमिति नास्य पल्यूलवासः। पल्यूलयेयुरित्यत्र भाष्ये। (मा.धा.) (धा.क.)

पल्यूल, सक, उ। (धा.क.)

❖ पश [पश्] बन्धने (चुरा०)

पश बन्धने। (शा.आ.)(धा.प्र.) (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

पश बन्धन इति युजादावेके पठन्ति। (धा.प्र.)

उभयत्रापि मूर्धन्यान्त इति दुर्गः। (क्षी.त.)

पश्, सक, उ। (धा.क.)

❖ पश [पश्] अनुपसर्गात् (चुरा०)

पश अनुपसर्गात्। गतावित्येव, अर्थनिर्देशात्।

अनार्षोऽयमिति चन्द्रः। मूर्धन्यान्तोऽयमिति नन्दी। (क्षी.त.)

❖ पष [पष] अनुपसर्गात् गतौ (चुरा०)

पष अनुपसर्गे। (धा.प्र.)(मा.धा.)

अनुपसर्गात् गतावित्यत्रापि सम्बध्यते। केचित् तालव्यान्तं पठन्तो वाग्रहणं चानुवर्त्यादन्तादेत्त्वं विकल्पयन्ति। स्वाम्यनुसारिणः अत्रादन्तत्त्व-विकल्पनमनन्तरत्त्वाद्युक्तं तालव्यान्तत्त्वं तु पुरुषकारोऽपि न सहते। यदाह पषादिस्तु पष अनुपसर्गादित्यस्य भविष्यति। (मा.धा.)

पष अनुपसर्गात्। गतावित्यत्र सम्बध्यते। पष, सक, उ। अत्र केचित् तालव्यान्तं पठन्ति, तन्न सर्वैराद्रियते। (धा.क.)

❖ पसि [पंस्] नाशने (चुरा०)

पसि नाशने। (धा.प्र.) (क्षी.त.)

पडि **पसि** नाशने। (मा.धा.)(धा.क.)

पण्ड्, पन्स् (इ, वा णिच्) सक, उ। (धा.क.)

❖ पा [पा] पाने (भ्वा०)

पा पाने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

पा, अनिट्, सक, प। (धा.क.)

❖ पा [पा] रक्षणे (अदा०)

पा रक्षणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

पा, अनिट्, सक, प। (धा.क.)

❖ पार [पार] कर्मसमाप्तौ (चुरा०)

पार तीर कर्मसमाप्तौ। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

पार, तीर, सक, प। (धा.क.)

❖ पाल [पाल्] रक्षणे (चुरा०)

पाल रक्षणे। (मा.धा.)

❖ पि [पि] गतौ (तुदा०)

रि **पि** गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

रि, पि, अनिट्, सक, प। (धा.क.)

❖ पिच्च [पिच्च्] कुट्टने (चुरा०)

पिच्च कुट्टने। पिचुः कर्पासः तुलं च पिचव्यः। (क्षी.त.)

❖ पिच्छ [पिच्छ्] कुट्टने (चुरा०)

पिच्छ कुट्टने। (धा.प्र.) (मा.धा.)(धा.क.)

पिच्छ, सक, उ। (धा.क.)

❖ पिजि [पिञ्ज्] वर्णे (अदा०)

पिजि वर्णे। (धा.प्र.)(मा.धा.) (धा.क.)

सम्पर्चने इति शाकटायनः। उभयत्रेति सम्मता। अवयवे इति काश्यपः। अयं शिञ्जिश्च द्वावव्यक्ते शब्द इति काश्यपः। पृजीत्येके इति मैत्रेयः एवमात्रेयश्च। पिजि भाषार्थः तुजि पिजि हिंसाबलादाननिकेतनेष्विति चुरादौ। (मा.धा.)

सम्पर्च्चन इति शाकटायनः। उभयत्रेति सम्मता। अवयवे इति काश्यपः। पिन्ज, (इ) सेट्, अक, आ। (धा.क.)

❖ पिजि [पिञ्ज्] हिंसाबलादाननिकेतनेषु (चुरा०)

तुजि **पिजि** हिंसाबलादाननिकेतनेषु। (धा.प्र.) (मा.धा.)(धा.क.)

एतौ पटादिदण्डके गणान्तरे अपि पठितौ। (धा.प्र.)

तुजि **पिजि** लुजि हिंसाबलादाननिकेतनेषु। निकेतनमावसथः। पट पुट आदौ आस्वदः सकर्मकात् इति सकर्मकार्थमर्थभेदार्थं वैषां पाठः, रूपभेदार्थं वा। पिजि (कौशिकमते)। (क्षी.त.)

शाकटायनस्तुज पिजेति पपाठ। पिज वर्ण इत्यदादौ। इह लजि लुजि इत्यपि क्वचिद् दृश्येते। तौ मैत्रेयादिभिर्न पठ्येते। (मा.धा.)

तुञ्ज् (इ - तुन्ज) पिञ्ज् (इ - पिन्ज) सक, उ। (धा.क.)

❖ **पिजि [पिञ्ज्] भाषार्थः** **(चुरा०)**

पट पुट लट लुट तुजि **पिजि** मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि **पिजि** लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि **पिजि** लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थौ येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि **पिजि** लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थौ येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ **पिट [पिट्] शब्दसङ्घातयोः** **(भ्वा०)**

पिट शब्दसङ्घातयोः। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

पिट्, सेट्, अक, प। (धा.क.)

❖ **पिट [पिट्] शब्दे** **(भ्वा०)**

पिट शब्दे। अर्थभेदाद् द्विः पाठः। पिड इत्येके। (क्षी.त.)

❖ **पिठ [पिठ्] हिंसासंक्लेशनयोः** **(भ्वा०)**

पिठ हिंसासंक्लेशयोः। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

पिठ्, सेट्, सक, प। (धा.क.)

❖ **पिडि [पिण्ड्] सङ्घाते** **(भ्वा०)**

पिडि सङ्घाते। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

चुरादावप्ययम्। (मा.धा.) (धा.क.)

पिण्ड् (इ) सेट्, अक, आ। (धा.क.)

❖ **पिडि [पिण्ड्] सङ्घाते** **(चुरा०)**

पिडि सङ्घाते। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

पडि इत्येके। (क्षी.त.)

पिण्ड्, (इ, वा णिच्) सक, उ। पि (धा.क.)

❖ पिवि [पिन्व्] सेचने, सेवने (भ्वा०)

पिवि निवि मिवि सेचने। पिन्वन्त्यापो मरुतः। (शा.आ.)

पिवि मिवि णिवि स्रंसने। (धा.प्र.)

पिवि मिवि निवि सेचने। सेवन इत्येके। (क्षी.त.)

पिवि मिवि णिवि सेवने। अयं पाठो मैत्रेयस्य च। सेचन इति तरङ्गिण्याम्। (मा.धा.)

पिवि मिवि णिवि सेवने। अयं पाठो मैत्रेयस्य च। केचित् सेचन इति। सर्वे इनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ पिल [पिल्] क्षेपे (चुरा०)

कल **पिल** क्षेपे। (धा.प्र.)

कल किल **पिल** क्षेपे। कथादौ कल संख्याने। तुदादौ किल श्वैत्यक्रीडनयोः। पेलृ गतौ इत्यस्मात् पेल्यते इति चन्द्रः। (क्षी.त.)

❖ पिश [पिश्] अवयवे (तुदा०)

पिश अवयवे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

उदात्त उदात्तेत्। अयं दीपनायामपि वर्तते। तथा च - त्वष्टा रूपाणि पिंशत्वित्यत्र हरदत्तः - पिंशतिर्दीप्तिकर्मा नक्षत्रेभिः पितरो द्यामपिंशन् इति दर्शनादिति। पिश गतौ चुरादौ। (मा.धा.)

पिश्, सेट्, अक, प। (धा.क.)

❖ पिष्लृ [पिष्] सञ्चूर्णने (रुधा०)

पिष्लृ सञ्चूर्णने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

पिष्, (लृ) अनिट्, सक, प। (धा.क.)

❖ पिस [पिस्] गतौ (चुरा०)

पिस गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

पिस्, सक, उ। (धा.क.)

❖ पिसि [पिंस्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि **पिसि** दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः। भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि **पिसि** कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि **पिसि** कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः]। मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। (धा.क.)

❖ पिसृ [पिस्] गतौ **(भ्वा०)**

पिसृ पेसृ गतौ। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

चुरादौ पिस गतौ। पिशृ पेसृ वेसृ इति सभ्याः। (क्षी.त.)

इह क्वचित् विसृ वेसृ पिशृ पेशृ इत्यपि पठ्यन्ते। आद्यौ दन्त्योष्ठ्यादी तालव्योष्मान्तौ चत्वार एते मैत्रयादिषु न दृश्यन्ते। पिस अवयव इति तु चुरादौ। (मा.धा.)

पिस्, पेस्, (ऋ) अनिट् सक, प। इह क्वचित् विस्, वेस्, पिश् इत्यपि पठ्यते। आद्यौ दन्त्योष्ठ्यादौ दन्त्यान्तौ, इतरावोष्ठ्यादी तालव्योष्मान्तौ, चत्वार एते मैत्रेयादिषु न दृश्यन्ते। पिस चुरादौ च। (धा.क.)

❖ पीङ् [पी] पाने **(दिवा०)**

पीङ् पाने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

परयापि तृषा बिबाधितो नहि रथ्यागतमम्बु पीयते। माङ् मान इति दुर्गः। (क्षी.त.)

पी (ङ्), अनिट्, सक, आ। (धा.क.)

❖ पीड [पीड्] अवगाहने **(चुरा०)**

पीड अवगाहने। (धा.प्र.) (मा.धा.)(धा.क.)

गहनं बाधा। पीड अवगाहन इति दुर्गः।(क्षी.त.)

तृतीयाप्रभृतित्वात् समासविकल्पः धनुररिभिः असह्यं मुष्टिपीडं दधान इति वदन् भट्टिकार उपोपसर्गग्रहणमतन्त्रं मन्यते। (मा.धा.)

पीड, सक, उ। सप्तम्यां चोपपीडेति णमुल्। धनुररिभिरसह्यं मुष्टिपीडं दधाने इति भट्टिकार उपोपसर्गग्रहणमतन्त्रं मन्यते। (धा.क.)

❖ पील [पील्] प्रतिष्टम्भे **(भ्वा०)**

पील प्रतिष्टम्भे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

प्रतिष्टम्भो रोधनम्। (क्षी.त.)(मा.धा.)(धा.क.)

पील्, सेट्, अक, प। पीला नाम काचित्। तस्या अपत्यम् - पैलः, पैलेयः। (धा.क.)

❖ पीव [पीव्] स्थौल्ये **(भ्वा०)**

पीव मीव स्थौल्ये। (शा.आ.)

पीव मीव तीव णीव स्थौल्ये। (धा.प्र.)
(मा.धा.)(धा.क.)

पीव मीव नीव तीव स्थौल्ये। (क्षी.त.)

सर्वे सेटः, अकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ पुंस [पुंस्] अभिवर्धने **(चुरा०)**

पुंस अभिवर्धने। (धा.प्र.)(मा.धा.)(धा.क.)

पुंस अभिमर्दने। (क्षी.त.)

पुंस, सक, उ। (धा.क.)

❖ पुट [पुट्] परिवर्तने **(भ्वा०)**

घुट **पुट** परिवर्तने। (शा.आ.)

❖ पुट [पुट्] संश्लेषणे **(तुदा०)**

पुट संश्लेषणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ पुट सञ्चूर्णने तथा भासार्थः। (क्षी.त.)

अयं भाषार्थश्चुरादौ दण्डके संसर्गार्थस्तु कथादौ। (मा.धा.)

पुट्, सेट्, अक, प। चुरादौ चायम्। (धा.क.)

❖ पुट [पुट्] भाषार्थः **(चुरा०)**

पट **पुट** लट लुट तुजि पिजि मिजि लुजि भजि

भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः। भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट **पुट** रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः - एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट **पुट** लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थौ येषान्ते भासार्थाः। (मा.धा.)

पट **पुट** लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थौ येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ पुट [पुट] सञ्चूर्णने (चुरा०)

पुट सञ्चूर्णने। भासार्थोऽपि । तुदादौ पुट संश्लेषणे। (क्षी.त.)

❖ पुट [पुट] संसर्गे (चुरा०)

पुट संसर्गे। (धा.प्र.)(मा.धा.)(धा.क.)

भाषार्थौ दण्डके गतः। संश्लेषे तुदादिः। (मा.धा.)

पुट, अक, प। भाषार्थौ दण्डके गतः। पुटतीति संश्लेषे तुदादिः। (धा.क.)

❖ पुटि [पुण्ट्] भाषार्थः (चुरा०)

रुठ लजि अजि दसि भृशि कशि रुसि शीक नट **पुटि** जुचि रघि अहि रहि महि भाषार्थाः। इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते रोठयति। (मा.धा.)

रुठ लजि अजि दसि भृशि रुशि रुसि शीक नट **पुटि** जुचि रघि अहि रहि महि इत्येते पञ्चदश स्वामिकाश्यपमतानुसारेण लिख्यन्ते। (धा.क.)

❖ पुट्ट [पुट्ट्] अल्पीभावे (चुरा०)

पुट्ट चुट्ट अल्पीभावे। (धा.प्र.)(मा.धा.) (धा.क.)

पुट्ट, चुट्ट, अक, उ। (धा.क.)

❖ पुड [पुड्] उत्सर्गे (तुदा०)

पुड उत्सर्गे। (धा.प्र.)(मा.धा.)(धा.क.)

मुड इत्यात्रेयः। (मा.धा.)(धा.क.)

पुड्, सेट्, अक, प। (धा.क.)

❖ पुडि [पुण्ड्] खण्डने (भ्वा०)

पुडि चेत्येके। (धा.प्र.)

❖ पुण [पुण्] कर्मणि शुभे (तुदा०)

पुण शुभकर्मणि। (शा.आ.)

पुण कर्मणि शुभे। (धा.प्र.)(मा.धा.)(धा.क.)

पुण कर्मणि शब्दे च। (क्षी.त.)

पुण्, अक, सेट्, प। (धा.क.)

❖ **पुथ [पुथ्] हिंसायाम्** **(दिवा०)**

पुथ हिंसायाम्। (शा.आ.)(धा.प्र.)

(क्षी.त.)(मा.धा.)(धा.क.)

पुथ्, सेट्, सक, प। (धा.क.)

❖ **पुथ [पुथ्] भाषार्थः** **(चुरा०)**

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव **पुथ** लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। ते अपि अत्र इत्येके। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह **पुथ** लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव **पुथ** लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुप् धूप विच्छ ची **पुथ** लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ **पुथि [पुन्थ्] हिंसासङ्क्लेशनयोः** **(भ्वा०)**

कुथि **पुथि** नुथि लुथि मथ मथि हिंसासंक्लेशनयोः। (शा.आ.)

कुथि **पुथि** लुथि मथि हिंसासंक्लेशनयोः - कुन्थ संक्लेश इति क्र्यादौ। (धा.प्र.)

कुथि **पुथि** लुथि मन्थ हिंसासंक्लेशयोः - हिंसा प्राण्युपघातः, संक्लेशो बाधा। (क्षी.त.)

कुथि **पुथि** लुथि मथि हिंसासंक्लेशनयोः। पुथ हिंसायामिति दिवादौ। पुथ भाषार्थश्चुरादौ। (मा.धा.)

कुथि **पुथि** लुथि मथि हिंसासंक्लेशयोः। प्राणवियोगफलकव्यापारो हिंसा। दुःखं क्लेशः। सर्वे इदनुबन्धाः। कुन्थ्, पुन्थ्, लुन्थ्, मुन्थ (इ) सेट्, प। (धा.क.)

❖ **पुर [पुर्] अग्रगमने** **(तुदा०)**

पुर अग्रगमने। (शा.आ.)(धा.प्र.)

(क्षी.त.)(मा.धा.)(धा.क.)

पुर्, सेट्, सक, प। (धा.क.)

❖ **पुर्व [पुर्व्] पूरणे** **(भ्वा०)**

पुर्व पर्व मर्व पूर्तौ। (धा.प्र.)

पुर्व पर्व मर्व पूरणे। (मा.धा.)(धा.क.)

पूर्वं निकेतन इति चुरादौ। अत्र देवः पूर्व्यतीति तु यत् स्वप्ने तत्कण्ड्वादिषु दर्शनादित्याह। गणपाठे पुनः पूर्वशब्दो न दृश्यते। यस्तु अर्थनिर्देशसहिते गणे पठ्यते। शाकटायनायाममोघायां वृत्तौ अर्थनिर्देशम् अन्तरेण कण्ड्वादीनां पाठे पूर्वशब्दो न पठ्यते स्पष्टं चैतत्पुरुषकारे। (मा.धा.)

सर्वे सेटः, सकर्मकाः, परस्मैपदिनश्च। पूर्व निकेतने इति चुरादौ। (धा.क.)

❖ पुर्व [पुर्व] निकेतने (चुरा०)

गर्द पुर्व निकेतने - गुर्द, पुर्व, अक, उ। अत्र क्षीरस्वामी, पूर्वनिकेतनमासाद्य अभ्यवहारः। पारायणे द्वौ धातू इति। (धा.क.)

❖ पुल [पुल्] महत्त्वे (भ्वा०)

पुल महत्त्वे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अयं चुरादावपि तुदादावपीति क्षीरस्वामी। (मा.धा.) (धा.क.)

पुल्, सेट्, अक, प। (धा.क.)

❖ पुल [पुल्] महत्त्वे (चुरा०)

पुल महत्त्वे। (धा.प्र.)(मा.धा.) (धा.क.)

पुल समुच्छ्राये। भ्वादौ तुदादौ च पुल महत्त्वे-प्राकृतेऽर्थे णिचि सिद्धे चन्द्रो न एनमध्यैष्ट। (क्षी.त.)

पुल्, अक, उ। (धा.क.)

❖ पुष [पुष्] वृद्धौ (भ्वा०)

वष **पुष** वृद्धौ। (शा.आ.)

❖ पुष [पुष्] पुष्टौ (भ्वा०)

पुष पुष्टौ। (शा.आ.)(धा.प्र.)(मा.धा.) (धा.क.)

चुरादौ पुष धारणे। (क्षी.त.)

पुष, सेट्, सक, प। अयं दिवादिः क्र्यादिश्च। धारणार्थश्चुरादिः। (धा.क.)

❖ पुष [पुष्] पुष्टौ (दिवा०)

पुष पुष्टौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

अकर्मकममुमाहुः। वराह इव पुष्यति। चुरादौ पुष धारणे। (क्षी.त.)

पुष्, अनिट्, सक, प। भ्वादितुदादिक्र्यादि-चुरादिष्वप्ययम्। (धा.क.)

❖ पुष [पुष्] पुष्टौ (क्र्या०)

पुष पुष्टौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

पुष वृद्धावित्यस्य शपि। (मा.धा.)

पुष्, सेट्, सक, प। भ्वादौ दिवादौ चायम्। (धा.क.)

❖ पुषु [पुष्] पुष्टौ (क्र्या०)

पुषु प्लुषु स्नेहनपूरणयोः। (शा.आ.)

❖ पुष [पुष्] धारणे (चुरा०)

पुष धारणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

पोषयत्याभरणम्। (धा.प्र.)(धा.क.)

पोषयत्याभरणान्। (क्षी.त.)

आभरणम् पोषति। (मा.धा.)

पुष्, सक, उ। (धा.क.)

❖ पुष [पुष्] वैकृत्ये (दिवा०)

पुष वैकृत्ये। (शा.आ.)

❖ पुष्प [पुष्प्] विकसने (दिवा०)

पुष्प विकसने। (शा.आ.)(धा.प्र.) (मा.धा.) (धा.क.)

पुष्प विकासे। (क्षी.त.)

पुष्प्, सेट्, अक, प। (धा.क.)

❖ पुस्त [पुस्त्] आदरानादरयोः (चुरा०)

पुस्त बुस्त आदरानादरयोः। (धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

पुस्त, बुस्त, सक, उ। (धा.क.)

❖ पुस्त[पुस्त्] सङ्घाते (चुरा०)

पुस्त सङ्घाते। (धा.प्र.)

❖ पूङ् [पू] पवने (भ्वा०)

पूङ् पवने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

पवनं नीरजीकरणम्। क्र्यादौ पूञ्। (क्षी.त.)

पूङ् क्र्यादौ। (मा.धा.)

पू (ङ्) सेट्, सक, आ। पूञ् क्र्यादौ, दिवादौ, चुरादौ च। (धा.क.)

❖ पूज [पूज्] पूजायाम् (चुरा०)

पूज पूजायाम्। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

पूज्, सक, उ। (धा.क.)

❖ पूञ् [पू] पवने (क्र्या०)

पूञ् पवने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

पवनं शुद्धिः। (क्षी.त.)

पवनं पूतीकरणम्। सकर्मकोऽयम् तथा च पुनात्यग्निं। पुनीते आत्मानं कर्षकेण। (मा.धा.)

पू (ञ्) सेट्, सक, उ। (धा.क.)

❖ पूयी [पूय्] विशरणे दुर्गन्धे च (भ्वा०)

पूयी विशरणे दुर्गन्धे च। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

पूय् (ई) सेट्, अक, आ। (धा.क.)

❖ पूरी [पूर्] आप्यायने (दिवा०)

पूरी आप्यायने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

आप्यायनं वृद्धिः। (क्षी.त.)

आप्यायनं - प्रीणनम्। पूरणं - वर्द्धनम्। पूर् (ई) सेट्, सक, आ। (धा.क.)

❖ पूरी [पूर्] हिंसावयोहान्योः (दिवा०)

पूरी जूरी हिंसावयोहान्योः। (शा.आ.)

❖ पूरी [पूर्] आप्यायने (चुरा०)

पूरी आप्यायने। (धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

पूर् (ई) सक, उ। (धा.क.)

❖ पूर्व [पूर्व्] पूरणे (भ्वा०)

पूर्व पर्व मर्व पूरणे। (क्षी.त.)

❖ पूर्व [पूर्व्] निकेतने (चुरा०)

पूर्व निकेतने। (धा.प्र.)

❖ पूल [पूल्] सङ्घाते (भ्वा०)

पूल सङ्घाते। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

पूलतीति शपि पुरुषकारे तु पुर्णोति क्षीरस्वामी। पुणेति शाकटायन इत्युक्त्वा कोशशुद्धिः तु ईदृशेऽर्थे कीदृशीति न विद्म इत्युपहसितम्। (मा.धा.)

पूल्, सेट्, अक, प। (धा.क.)

❖ **पूल [पूल्] सङ्घाते** **(चुरा०)**

पूल सङ्घाते। (धा.प्र.)(क्षी.त.)(धा.क.)

पूल, सक, उ। (धा.क.)

❖ **पूष [पूष्] वृद्धौ** **(भ्वा०)**

पूष वृद्धौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

पुष पुष्टाविति इहैवाग्रे दिवादौ क्र्यादौ च। पुष धारण इति चुरादौ। (मा.धा.) (धा.क.)

पूष्, सेट्, अक, प। (धा.क.)

❖ **पृ [पृ] पालनपूरणयोः** **(जुहो०)**

पृ पालनपूरणयोः। दीर्घान्तं केऽपि पठन्ति। (धा.प्र.)

❖ **पृ [पृ] प्रीतौ** **(स्वा०)**

पृ प्रीतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

पृ, अनिट्, अक, प। (धा.क.)

❖ **पृङ् [पृ] व्यायामे** **(तुदा०)**

पृङ् व्यायामे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

व्यायाम उद्योगः। (क्षी.त.)

ओष्ठ्यादिः प्रायेणायं व्याङ्पूर्वः। (मा.धा.)

प्रायेणायं व्याङ्पूर्वः। पृ (ङ्) अनिट्, अक, आ। (धा.क.)

❖ **पृच [पृच्] संयमने** **(चुरा०)**

युज **पृच** संयमने। (धा.प्र.)(मा.धा.)(धा.क.)

युज्, पृच्, सक, उ। (धा.क.)

❖ **पृची [पृच्] सम्पर्चने** **(अदा०)**

पृजी सम्पर्के। (धा.प्र.)(क्षी.त.)

पृची सम्पर्चने। (मा.धा.)(धा.क.)

सम्पर्को मिश्रणम्। पृचि इति कौशिकः। (क्षी.त.)

ओष्ठ्यादिरीदित्। इदिदिति दुर्गकाश्यपनन्दिधनपालादयः। इदित्तृतीयान्त इति कौशिकः। ईदिदित्यपरे। पिजु वृजु पृचै सम्पर्चने इति पठन् शाकटायनोऽप्यत्रैवानुकूलः। अयं रुधादौ। युज पृच संयमन इति युजादौ। (मा.धा.)

ओष्ठ्यादिश्चान्त ईदित्। सम्पर्कः संयोजनम्। सम्पृक्ते मधुना चूर्णम् भिषगिति चतुर्भुजः। पृच्, (ई) सेट्, सक, आ। इदिदिति काश्यपनन्दिधनपालदयः इदित्तृतीयान्त इति कौशिकः। (धा.क.)

❖ **पृची [पृच्] सम्पर्के** **(रुधा०)**

पृची सम्पर्के। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

मधुपर्कमर्हति मधुपर्क्यः। पृक्त इत्यदादिपाठात्, वृक्त इति च। (धा.प्र.)

चुरादौ युज पृची संपर्चने। (क्षी.त.)

पृच्, (ई) सेट्, सक, प। (धा.क.)

❖ **पृची [पृच्] सम्पर्चने** **(चुरा०)**

युज **पृची** सम्पर्चने। दिवादौ युज समाधौ युज्यते, रुधादौ युजिर् योगे। अदादौ पृची सम्पर्के सम्पृक्ते। (क्षी.त.)

❖ **पृचि [पृञ्च्] सम्पर्के** **(रुधा०)**

पृचि सम्पर्के। (शा.आ.)

❖ **पृजि [पृञ्ज्] सम्पर्चने** **(अदा०)**

पृजि इत्येके। (धा.प्र.)

❖ **पृजी [पृज्] सम्पर्के** **(अदा०)**

पृजी सम्पर्के। (धा.प्र.)

❖ **पृड [पृड्] सुखने** **(तुदा०)**

पृड च। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चात् पूर्वोक्तोऽर्थः। पृड् सेट्, सक, प। (धा.क.)

❖ **पृण [पृण्] प्रीणने** **(तुदा०)**

पृण प्रीणने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वृण इति दन्त्योष्ठ्यादिरप्यत्र पठितव्यः। तथा च भाष्यं धात्वन्तरे पृणिवृणी इति धात्वन्तरे इति तौदादिकावित्यर्थ इति कैयटे। (मा.धा.)

पृण् सेट्, सक, प। वृण इति दन्त्योष्ठ्यादिरप्यत्र पठितव्यः। (धा.क.)

❖ **पृथ [पृथ्] प्रक्षेपे** **(चुरा०)**

पृथ प्रक्षेपे। (धा.प्र.)(मा.धा.)(धा.क.)

पथ इत्येक इति स्वामी। (मा.धा.)

पृथ्, सेट्, सक, उ। (धा.क.)

❖ **पृथु [पृथ्] विस्तारे** **(भ्वा०)**

पृथु विस्तारे। (शा.आ.)(क्षी.त.)

❖ **पृषु [पृष्] सेचने** **(भ्वा०)**

पृषु वृषु मृषु सेचने। मृषु सहने च। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

इतरौ हिंसासंक्लेशनयोश्च। अत्र काश्यपः पृषु हृषु वृषु हिंसासंक्लेशनदानेषु इत्यादि पपाठ। (मा.धा.)

इतरौ हिंसासंक्लेशनयोश्च। अत्र काश्यपः - पृषु, हृषु, वृषु, हिंसासंक्लेशणदानेष्वित्यादि पपाठ। सर्वे उदनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनः च। (धा.क.)

❖ **पॄ [पॄ] पालनपूरणयोः** **(जुहो०)**

पॄ पालनपूरणयोः। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

पूर्णं व्यापृतमिति धात्वन्तरस्य रूपम्। दीर्घान्तं केऽपि पठन्ति। (धा.प्र.)

पूरी आप्यायने अस्मात् तु पूर्णः। क्र्यादौ पृणाति, तत्रैव ग्रहणशेषं वक्ष्यामः। (क्षी.त.)

उदात्तः परस्मैभाषः। अयं क्र्यादावपि पृ गताविति स्वामी। पृञ् व्यायामे तुदादौ। पृ पूरणे इति चुरादौ। (मा.धा.)

पृ, सेट्, सक, प। अयं ह्रस्वान्त इति वर्द्धमान-कश्यपाभरणपुरुषकाराः, तथा आत्रेयमैत्रेयौ च। (धा.क.)

❖ **पॄ [पॄ] पालनपूरणयोः** **(क्र्या०)**

पॄ पालनपूरणयोः। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

पूर्णं व्यापृतमिति धात्वन्तरस्य रूपम्। (धा.प्र.)

चुरादौ पृ पूरणे । (क्षी.त.)

पृ, सेट्, सक, प। (धा.क.)

❖ **पॄ [पॄ] पूरणे** **(चुरा०)**

पॄ पूरणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

क्र्यादौ पृणाति। पृ इति दुर्गः । (क्षी.त.)

अत्र श्रीभद्रादयो दीर्घोच्चारणसामर्थ्यात्पक्षे णिज् नेति (मा.धा.)

पृ सक, उ। दीर्घोच्चारणसामर्थ्यात् पक्षे णिच् वेति। (धा.क.)

❖ **पेबृ [पेब्] सेवने** **(भ्वा०)**

पेबृ षेबृ सेवने। (धा.प्र.)

❖ **पेलृ [पेल्] गतौ** **(भ्वा०)**

पेलृ फेलृ शेलृ गतौ। (धा.प्र.)(क्षी.त.)

पेलृ शेलृ फेलृ गतौ। (मा.धा.)(धा.क.)

सर्वे ऋदनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनः च। (धा.क.)

❖ **पेवृ [पेव्] सेवने** **(भ्वा०)**

शेवृ षेवृ गेवृ ग्लेवृ **पेवृ** मेवृ म्लेवृ सेचने। सेवृ खेवृ क्लेवृ इत्येके। (धा.प्र.)

एवृ शेवृ षेवृ सेवृ केवृ खेवृ ग्लेवृ **पेवृ** क्लेवृ मेवृ म्लेवृ सेवने। (क्षी.त.)

षेवृ गेवृ ग्लेवृ **पेवृ** म्लेवृ सेवने - सेव्, गेव्, ग्लेव्, पेव्, म्लेव्, (ऋ) सेट्, सक, आ। (धा.क.)

❖ **पेसृ [पेस्] गतौ** **(भ्वा०)**

पिसृ पेसृ गतौ। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

चुरादौ पिस गतौ । पिशृ पेसृ वेसृ इति सभ्याः। (क्षी.त.)

क्वचित् विसृ वेसृ पिशृ पेशृ इत्यपि पठ्यन्ते। आद्यौ दन्त्योष्ठ्यादी तालव्योष्मान्तौ चत्वार एते मैत्रयादिषु न दृश्यन्ते। पिस अवयव इति तु चुरादौ। (मा.धा.)

पिस्, पेस्, (ऋ) अनिट् सक, प। क्वचित् विसृ, वेसृ, पिशृ इत्यपि पठ्यते। आद्यौ दन्त्योष्ठ्यादौ दन्त्यान्तौ, इतरावोष्ठ्यादी तालव्योष्मान्तौ, चत्वार एते मैत्रेयादिषु न दृश्यन्ते। (धा.क.)

❖ **पै [पै] शोषणे** **(भ्वा०)**

पै ओवै वै शोषणे। (शा.आ.)

पै ओवै शोषणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

पै, वै (ओ) अनिट्, सक, प। (धा.क.)

❖ **पैणृ [पैण्] गतिप्रेरणश्लेषणेषु** **(भ्वा०)**

पैणृ गतिश्लेषणप्रेरणेषु। (धा.प्र.)

पैणृ गतिप्रेरणश्लेणेषु। (क्षी.त.) (धा.क.)

पैण् (ऋ) सेट्, सक, प। (धा.क.)

❖ **प्युस [प्युस्] विभागे** **(दिवा०)**

प्युस विभागे। (क्षी.त.) (क्षी.त.)

प्युष इति दुर्गः। पुस इत्येके - पुस्तकम्, पुस्तं लेप्यादि कर्म। (क्षी.त.)

❖ **प्यैङ् [प्यै] वृद्धौ** **(भ्वा०)**

प्यैङ् वृद्धौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

प्यै (ङ्) अनिट्, अक, आ। (धा.क.)

❖ **प्रछ [प्रच्छ्] ज्ञीप्सायाम्** **(तुदा०)**

प्रछ ज्ञीप्सायाम्। (शा.आ.) (क्षी.त.)

ज्ञीप्सा जिज्ञासा। (क्षी.त.)

❖ **प्रच्छ [प्रच्छ्] ज्ञीप्सायाम्** **(तुदा०)**

प्रच्छ ज्ञीप्सायाम्। (धा.प्र.)(मा.धा.)(धा.क.)

प्रच्छ्, अनिट्, सक, प। आ - आमन्त्रणम्, प्रस्थानम्, सम्भाषणम्। **व्रजापृच्छस्व** सुहृज्जनम् रामायणम्। **सर्वा मातुरापृच्छय** प्रययुः इति भारतम्। (धा.क.)

❖ **प्रथ [प्रथ्] प्रख्याने** **(भ्वा०)**

प्रथ प्रख्याने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

प्रख्यानं प्रसिद्धिः। (क्षी.त.)

पृथ प्रक्षेप इति चुरादौ। (मा.धा.)

प्रथ्, सेट्, सक, आ। अयं कथादावपि। अत्र केच्चत् पृथेति ऋकारोपधमपि पठन्ति। यदाह

वर्द्धमानः - पृथिकदिक्रन्दिदक्ष्यादीनां घटादौ पाठः । अत्र स्वामी - प्रथेः सम्प्रसारणविधानमार्षं मन्यते। पुरुषकारोऽपि यदप्रथयत्। तत् पृथिव्याः पृथिवीत्वमिति श्रौतस्य निर्वचनस्य आर्षपक्ष एवाञ्जस्यमिति, अन्यथा यद् अपर्थयद् इत्येव ब्रूयात्। पुनश्चोक्तम्, तथापि पृथेः घटादिपाठे तत्फलं घटादयः षित इति षित्वादङि सति पृथेति रूपं द्रष्टव्यमिति। व्यथादिस्थान्तः, पृथ प्रक्षेप इति चुरादौ। (धा.क.)

❖ **प्रथ [प्रथ्] प्रख्याने** **(चुरा०)**

प्रथ प्रख्याने। (शा.आ)(धा.प्र.)
(मा.धा.)(धा.क.)

प्रथ्, सक, उ। (धा.क.)

❖ **प्रषु [प्रष्] दाहे** **(भ्वा०)**

श्रिषु श्लिषु **प्रषु** प्लुषु दाहे। (क्षी.त.)

❖ **प्रस [प्रस्] प्रसवे** **(भ्वा०)**

प्रस प्रसवे। प्रस विस्तार इति दुर्गः। (क्षी.त.)

❖ **प्रस [प्रस्] विस्तारे** **(भ्वा०)**

प्रस विस्तारे। (धा.प्र.)(मा.धा.)(धा.क.)

प्रस्, सेट्, सक, आ। (धा.क.)

❖ **प्लह [प्लह्] गतौ** **(भ्वा०)**

प्लह गतौ। (शा.आ.)

❖ **प्रा [प्रा] पूरणे** **(अदा०)**

प्रा पूरणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

प्रा, अनिट्, सक, प। (धा.क.)

❖ **प्रीङ् [प्री] प्रीतौ** **(दिवा०)**

प्रीङ् प्रीतौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

क्र्यादौ प्रीञ् तर्पणे कान्तौ च। (क्षी.त.)

अकर्मकः प्रीञ् तर्पण इति क्र्यादौ चुरादौ च। (मा.धा.)

प्री (ङ्), अनिट्, अक, आ। अयं तर्पणे क्र्यादौ चुरादौ च। ङानुबन्धात् आत्मनेपदम्। (धा.क.)

❖ **प्रीङ् [प्री] वृणोत्यर्थे** **(दिवा०)**

प्रीङ् वृणोत्यर्थे। (शा.आ.)

❖ **प्रीञ् [प्री] तर्पणे कान्तौ च** **(क्र्या०)**

प्रीञ् तर्पणे कान्तौ च। (शा.आ.)
(क्षी.त.)(मा.धा.)(धा.क.)

प्रीञ् तर्पणे। (धा.प्र.)

कान्तिरभिलाषः। दिवादौ प्रीङ् प्रीतौ। (क्षी.त.)

कान्तिः कामनेति पुरुषकारे। (मा.धा.)

प्री (ञ्) अनिट्, सक, उ। (धा.क.)

❖ **प्रीञ् [प्री] तर्पणे** **(चुरा०)**

प्रीञ् तर्पणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

दिवादौ प्रीङ् प्रीतौ, क्र्यादौ च। (क्षी.त.)

प्री (ञ्) सक, उ। (धा.क.)

❖ **प्रीण [प्रीण्] प्रीणने** **(चुरा०)**

प्रीण प्रीणने। (शा.आ.)

❖ **प्रुङ् [प्रु] गतौ** **(भ्वा०)**

च्युङ् **प्रुङ्** प्लुङ् गतौ। (शा.आ.)

च्युङ् छ्युङ् ज्युङ् झ्युङ् **प्रुङ्** प्लुङ् गतौ। (धा.प्र.)

च्युङ् छ्युङ् ज्युङ् **प्रुङ्** प्लुङ् गतौ - जुङ् इति नन्दी। (क्षी.त.)

च्युङ् ज्युङ् **प्रुङ्** प्लुङ् गतौ। (मा.धा.)

च्युङ् ज्युङ् **प्रुङ्** प्लुङ् गतौ - च्यु, ज्यु, प्रु, प्लु (ङ्) अनिट्, सक, आ। अव - अधःपतनम्। आ - अवगाहनम्। उत् - उल्लम्फः। उप - उत्पीडनम्। परि - व्याप्तिः। विप्लवः। (धा.क.)

❖ प्रुष [प्रुष्] स्नेहसेचनपूरणेषु (क्र्या०)

प्रुष प्लुष स्नेहनमोचनपूरणेषु - दाहार्थे भ्वादिगणे। एतौ उदितावुक्तौ। (धा.प्र.)

प्रुष प्लुष स्नेहसेचनपूरणेषु - दिवादौ प्लुष दाहे। (क्षी.त.)

प्रुष प्लुष स्नेहनसेवनपूरणेषु - भौवादिकयोः दाहार्थयोः उदितोः प्रुषिस्तु दिवादौ पुषादौ। (मा.धा.)

प्रुष प्लुष स्नेहनसेचनपूरणेषु - प्रुष्, प्लुष्, सेट्, सक, प। (धा.क.)

❖ प्रुषु [प्रुष्] दाहे (भ्वा०)

श्रिषु श्लिषु **प्रुषु** प्लुषु दाहे। (धा.प्र.) (क्षी.त.)(धा.क.)

क्र्यादौ प्रुष प्लुष स्नेहसेचनपूरणेषु । (क्षी.त.)

सर्वे उदनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनश्च। आलिङ्गने दिवादिः। श्लेषणे चुरादिः। प्रुषिप्लुषी द्वौ स्नेहने क्र्यादौ। (धा.क.)

❖ प्रुष [प्रुष्] दाहे (भ्वा०)

प्रुष प्लुष दाहे। (शा.आ.)

❖ प्रेषृ [प्रेष्] यत्ने (भ्वा०)

प्रेषृ यत्ने। (धा.प्र.)

❖ प्रेषृ [प्रेष्] गतौ (भ्वा०)

जेषृ णेषृ एषृ **प्रेषृ** गतौ (मा.धा.)

रेषृ णेषृ एषृ **प्रेषृ** गतौ - सर्वे ऋदनुबन्धाः, सेटः, सकर्मकाः, आत्मनेपदिनः च। (धा.क.)

❖ प्रैणृ [प्रैण्] गतिप्रेरणश्लेषणेषु (भ्वा०)

प्रैणृ गतिप्रेरणश्लेषणेषु - पैणृ इति क्वचित् पठ्यते। (मा.धा.)

❖ प्रोथृ [प्रोथ्] पर्याप्तौ (भ्वा०)

प्रोथृ पर्य्याप्तौ। (धा. प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

प्रोथु पर्याप्तिगतावित्याह। (मा.धा.)

पर्याप्तिः सामर्थ्यं परिपूर्णतेति गोविन्दभट्टः।

प्रोथ्, (ऋ) सेट्, अक, उ। भट्टभास्करमते हिंसार्थोऽप्ययम्। (धा.क.)

❖ प्लिह [प्लिह्] गतौ (भ्वा०)

प्लिह गतौ।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

प्लिह्, सेट्, सक, आ। (धा.क.)

❖ प्ली [प्ली] श्लेषणे (क्र्या०)

प्ली च। श्लेषण इत्यपेक्षते। (धा.प्र.)

❖ प्ली [प्ली] गतौ (क्र्या०)

प्ली गतौ। (शा.आ.)(मा.धा.) (धा.क.)

ओष्ठ्यादिः केचिदमुं दन्त्योष्ठ्यादिं पठन्तो व्ली वरण इत्यमुं न पेठुः। मैत्रेयस्तु वरणार्थं पठित्वाऽमुं न पपाठ। (मा.धा.)

प्ली अनिट्, सक, प। (धा.क.)

❖ प्लीङ् [प्ली] गतौ (दिवा०)

प्लीङ् गतौ। (शा.आ.)

❖ प्लुङ् [प्लु] गतौ (भ्वा०)

च्युङ् प्रुङ् **प्लुङ्** गतौ। (शा.आ.)

च्युङ् छ्युङ् ज्युङ् झ्युङ् प्रुङ् **प्लुङ्** गतौ। (धा.प्र.)

च्युङ् छ्युङ् ज्युङ् प्रुङ् **प्लुङ्** गतौ - जुङ् इति नन्दी। (क्षी.त.)

च्युङ् ज्युङ् प्रुङ् **प्लुङ्** गतौ। (मा.धा.)

च्युङ् ज्युङ् प्रुङ् **प्लुङ्** गतौ - च्यु, ज्यु, प्रु, प्लु (ङ्) अनिट्, सक, आ। अव - अधःपतनम्। आ - अवगाहनम्। उत् - उल्लम्फः। उप - उत्पीडनम्। परि - व्याप्तिः। विप्लवः। (धा.क.)

❖ प्लुष [प्लुष्] दाहे (भ्वा०)

प्रुष **प्लुष** दाहे। (शा.आ.)

प्लुष च। (धा.प्र.)

❖ प्लुष [प्लुष] विभागे (दिवा०)

प्लुष विभागे। (शा.आ.)

❖ प्लुष [प्लुष्] दाहे (दिवा०)

प्लुष दाहे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

अयं पुषादावपि पठ्यते। फलमङ्गोऽपि सिद्धिरिति स्वामी। (मा.धा.) (धा.क.)

चकारेण पूर्व्वोक्तः। अर्थः परामृश्यते प्लुष्, सेट्, सक, प। प्लुष्, सेट्, सक, प। (धा.क.)

❖ प्लुष [प्लुष्] स्नेहसेचनपूरणेषु (क्र्या०)

प्रुष **प्लुष** स्नेहनमोचनपूरणेषु - दाहार्थे भ्वादिगणे। एतौ उदितावुक्तौ। (धा.प्र.)

प्रुष **प्लुष** स्नेहसेचनपूरणेषु - दिवादौ प्लुष दाहे। (क्षी.त.)

प्रुष **प्लुष** स्नेहनसेवनपूरणेषु। भौवादिकयोः दाहार्थयोरुदितोः। प्रुषिस्तु दिवादौ पुषादौ। (मा.धा.)

प्रुष **प्लुष** स्नेहनसेचनपूरणेषु - प्रुष्, प्लुष्, सेट्, सक, प। (धा.क.)

❖ प्लुषु [प्लुष्] दाहे (भ्वा०)

श्रिषु श्लिषु प्रुषु **प्लुषु** दाहे। (धा.प्र.) (क्षी.त.)(धा.क.)

क्र्यादौ प्रुष प्लुष स्नेहसेचनपूरणेषु। (क्षी.त.)

प्रुषिप्लुषी द्वौ स्नेहने क्र्यादौ। (मा.धा.)

सर्वे उदनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनः च। प्रुषिप्लुषी द्वौ स्नेहने क्र्यादौ। (धा.क.)

❖ प्लुषु [प्लुष्] स्नेहनपूरणयोः (क्र्या०)

पुषु **प्लुषु** स्नेहनपूरणयोः। (शा.आ.)

❖ प्लेबृ [प्लेब्] गतौ (भ्वा०)

रेबृ **प्लेबृ** गतौ। (धा.प्र.)

❖ प्लेवृ [प्लेव्] गतौ (भ्वा०)

रेवृ **प्लेवृ** गतौ। रेबृ प्लेबृ पवर्गे पठितौ स्पर्शान्तौ, इमौ तु यरलवान्तवर्गे पठितौ ईषत्स्पृष्टौ वेदितव्यौ। प्लव इत्येके। पव इत्यन्ये। (धा.प्र.)

❖ प्लेवृ [प्लेव्] सेवने (भ्वा०)

एवृ शेवृ षेवृ सेवृ केवृ खेवृ ग्लेवृ पेवृ **प्लेवृ** मेवृ म्लेवृ सेवने। (क्षी.त.)

❖ प्सा [प्सा] भक्षणे (अदा०)

प्सा भक्षणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

प्सा, अनिट्, सक, प। (धा.क.)

❖ फक्क [फक्क्] नीचैर्गतौ (भ्वा०)

फक्क नीचैर्गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

नीचैर्गतिर्मन्दगमनमसद्व्यवहारो वा। (क्षी.त.)

नीचैः गतिः मन्दगमनमसद्व्यवहारो वेति स्वामी। (मा.धा.) (धा.क.)

फक्क, सेट्, प। (धा.क.)

❖ फण [फण्] गतौ (भ्वा०)

फण गतौ। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

फणेः पूर्वे घटादय इत्येके। (क्षी.त.)

फण्, सेट्, सक, प। (धा.क.)

❖ फर्व [फर्व्] पूरणे (भ्वा०)

पुर्व पर्व **फर्व** मर्व पूरणे। पूर्वं निकेतन इति चुरादौ। (मा.धा.)

❖ फल [फल्] निष्पत्तौ (भ्वा०)

फल निष्पत्तौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

निष्पत्तिः सिद्धिः। (क्षी.त.)

फल्, सेट्, सक, प। (धा.क.)

❖ फुल्ल [फुल्ल्] विकसने (भ्वा०)

फुल्ल विकसने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

फुल्ल्, सेट्, अक, प। (धा.क.)

❖ फेलृ [फेल्] गतौ (भ्वा०)

पेलृ **फेलृ** शेलृ गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

सर्वे ऋदनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ बद [बद्] स्थैर्ये (भ्वा०)

बद स्थैर्ये। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वद व्यक्तायां वाचि इति तु दन्त्यौष्ठ्यादिः। (क्षी.त.)

ओष्ठ्यादिरयम्। बद्, सेट्, अक, प। (धा.क.)

❖ बध [बध्] बन्धने (भ्वा०)

बध बन्धने। (शा.आ.)(धा.प्र.)(क्षी.त.)(धा.क.)

चुरादौ बध संयमने। (क्षी.त.)

बध्, सेट्, स, आ। (धा.क.)

❖ बध [बध्] संयमने (चुरा०)

बध संयमने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

बन्धेति चान्द्रः। बन्ध बन्धन इति क्रैयादिकस्य। (मा.धा.)

बध, सक, उ। बधस्थाने बन्ध इति चान्द्रः। बन्ध इति क्र्यादौ। बध इति भ्वादौ वैरूप्ये नित्यसनन्तः - बीभत्सते। (धा.क.)

❖ बन्ध [बन्ध्] बन्धने (क्र्या०)

बन्ध बन्धने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अजन्तपरस्मैपदिषु च अस्य उपदेशः अनिड्करणानुरोधात्। (धा.प्र.)

बन्ध्, अनिट्, सक, प। सम् - सम्बन्धः, सम्पर्कः। अनु - अनुबन्धः अनुवर्त्तनम्। नि - निबन्धः - ग्रन्थनम, रचना निरोधः। प्रति - प्रतिबन्धः। प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः। (रघु) निर् - निर्बन्धः आग्रहातिशयः। (धा.क.)

❖ बभ्र [बभ्र्] गत्यर्थः (भ्वा०)

अभ्र **बभ्र** मभ्र चर गत्यर्थाः। (क्षी.त.)

❖ बर्ब [बर्ब्] गतौ (भ्वा०)

पर्प रफ रफि अर्ब पर्ब लर्ब **बर्ब** मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः अर्बादयो नोपधा इति कौशिकः। (मा.धा.)

पर्प रफ रफि अर्ब पर्ब लर्ब **बर्ब** मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ बर्ह [बर्ह्] प्राधान्ये (भ्वा०)

बर्ह बल्ह प्राधान्ये। (धा.क.)(क्षी.त.) (मा.धा.)(धा.क.)

चुरादौ भासार्थौ । (क्षी.त.)

ओष्ठ्यादी। भाषार्थौ चुरादी बर्ह हिंसायामपि तत्रैव। बृहविवृद्धाविति अत्रैवाग्रे परस्मैपदिषु। (मा.धा.) (धा.क.)

बर्ह्, बल्ह्, सेट्, अक, आ। वृह उद्यमने चुरादौ। (धा.क.)

❖ बर्ह [बर्ह्] हिंसायाम् (चुरा०)

ब्रूस **बर्ह** हिंसायाम्। (धा.प्र.)(मा.धा.)

ब्रीस **बर्ह** हिंसायाम्। भ्वादौ बर्ह प्राधान्ये। (क्षी.त.)

भाषार्थोऽग्रे भविष्यति। (मा.धा.)

❖ बर्ह [बर्ह्] भाषार्थः (चुरा०)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव **बर्ह** बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि **बर्ह** बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः]। मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ बल [बल्] प्राणने धान्यावरोधने च (भ्वा०)

बल प्राणने। (शा.आ.)

बल प्राणने धान्यावरोधे च। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

प्राणनं जीवनम्। वल संवरणे त्वात्मनेपदी। (क्षी.त.)

प्राणनं जीवनम्। धान्यमवरुध्यते यत्र कुसूलादौ तद्धातूनामनेकार्थत्वात् धान्यावरोधनव्यापार इत्यर्थः। बलीत्यादि बालं बलम्। (मा.धा.)

प्राणनं जीवनम्, धान्यमवरुध्यते यत्र कुसूलादौ तद्धातूनामनेकार्थत्वाद् धान्यावरोधनव्यापार इत्यर्थः। बल्, सेट्, अक, प। अयं चुरादिर्मित्। (धा.क.)

❖ बल [बल्] प्राणने (चुरा०)

बल प्राणने (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

बल, अक, उ, मित्। (धा.क.)

❖ बल [बल्] भृतौ (चुरा०)

बल भृतौ। (धा.प्र.)

❖ बल्भ [बल्भ्] भोजने (भ्वा०)

बल्भ भोजने - बल्भ्, सेट्, सक, आ। दन्त्योष्ठ्यादिः। (धा.क.)

❖ बल्ह [बल्ह्] प्राधान्ये (भ्वा०)

बर्ह **बल्ह** प्राधान्ये (क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ भासार्थौं । (क्षी.त.)

ओष्ठ्यादी भाषार्थौं चुरादौ। (मा.धा.) (धा.क.)

बर्ह्, बल्ह्, सेट्, अक, आ। (धा.क.)

❖ बल्ह [बल्ह्] भाषार्थः (चुरा०)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह **बल्ह** पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह **बल्ह** गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः]। मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ बष्क [बष्क्] दर्शने (चुरा०)

बष्क दर्शने। (मा.धा.)(धा.क.)

बष्क्, सक, प। नायमन्यत्र दृश्यते। (धा.क.)

❖ बस्त [बस्त्] अर्दने (चुरा०)

बस्त गन्ध अर्दने। (धा.प्र.)(क्षी.त.)(मा.धा.)

अर्दने गतौ हिंसायां याचने वेत्यर्थः। (धा.प्र.)

❖ बहि [बंह्] वृद्धौ (भ्वा०)

बहि महि वृद्धौ। (क्षी.त.)(मा.धा.)(धा.क.)

अयं भावार्थश्चुरादौ इति स्वामी। (मा.धा.)

बन्ह्, मन्ह् (इ) सेट्, अक, आ। अयं भाषार्थश्चुरादाविति स्वामी। (धा.क.)

❖ बहि [बंह्] भासार्थः (चुरा०)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि **बहि** महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

❖ बाडृ [बाड्] आप्लाव्ये (भ्वा०)

बाडृ आप्लाव्ये - वशादिः। आप्लवनमाप्लावः। उन्मजनमित्येके। तस्मात् यप्रत्यये आप्लाव्यं स्नानमिति गोविन्दभट्टः। अनेनैव चक्र [वाल] वाडपदं व्युत्पादितम् अमरटीकाकारेण। बाड् (ऋ) सेट्, आ, सक। (धा.क.)

❖ बाधृ [बाध्] लोडने (भ्वा०)

बाधृ लोडने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)

रोटनं प्रतिघातः। (क्षी.त.)

लोडनं प्रतिघातः (मा.धा.)(धा.क.)

बाधृ लोडने। [विलोडने] हिंसेति गोविन्दभट्टः। [पीडनम्। प्रतिबन्धः।] बाधृ, सेट्, आ। धातुः अयं दन्त्योष्ठ्यादिरिति वोपदेवः। सम् - परस्परपीडने। (धा.क.)

❖ बाहृ [बाह्] प्रयत्ने (भ्वा०)

वेहृ जेहृ **बाहृ** प्रयत्ने। (क्षी.त.)(धा.क.)

उभावपि केवलौष्ठ्यादिः इत्येके। दन्त्योष्ठ्यादी इत्यन्ये। वेह्, जेह्, बाह्, (ऋ) सेट्, अक, आ। (धा.क.)

❖ बिट [बिट्] आक्रोशे (भ्वा०)

बिट बिड अक्रोशे। (धा.प्र.)

बिट आक्रोशे। (मा.धा.)(धा.क.)

बशादिः । केचित्पठन्ति। (मा.धा.)

बिट्, अक, सेट्, प। (धा.क.)

❖ बिड [बिड्] आक्रोशे (भ्वा०)

बिट **बिड** आक्रोशे। (धा.प्र.)

❖ बिदि [बिन्द्] अवयवे (भ्वा०)

बिदि अवयवे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

एकदेशगतक्रियायाम्। विन्दुरिच्छुः इति वेत्तेः निपातनम्। (क्षी.त.)

अवयव इति अवयवक्रियोच्यते। (मा.धा.)

बिन्द्, (इ) अक, सेट् प। (धा.क.)

❖ बिल [बिल्] संवरणे (तुदा०)

बिल संवरणे। (शा.आ.)

❖ बिल [बिल्] भेदने (तुदा०)

बिल भेदने। (शा.आ.)(धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

अयं चुरादौ चेत्यात्रेयः मैत्रेयस्त्वत्रैव पपाठ नान्यत्र ओष्ठ्यादिरयम्। (मा.धा.)

बिल्, सेट्, सक, प। अयमोष्ठ्यादिः। (धा.क.)

❖ बिल [बिल्] भेदने (चुरा०)

बिल भेदने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भिल इति कौशिकः। (क्षी.त.)

बिल, सक, उ। (धा.क.)

❖ बिस [बिस्] प्रेरणे (दिवा०)

बिस प्रेरणे। (क्षी.त.)(मा.धा.)

ओठ्यादिः। (मा.धा.)

❖ बुक्क [बुक्क्] भषणे (भ्वा०)

बुक्क भषणे। (धा.प्र.)(मा.धा.)(धा.क.)

बुक्क भाषणे। भषण इत्येके। बुक्कति, श्वा। बुक्का सुगन्धद्रव्यपिष्टम्। (क्षी.त.)

भषणमिह श्वरवः। अयं चुरादावपि। (मा.धा.) (धा.क.)

बुक्क्, सेट्, अक, प। (धा.क.)

❖ बुक्क [बुक्क्] भाषणे (चुरा०)

बुक्क भाषणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

अत्र स्वामी शब्द उपसर्गादाविष्कारे चेति पठित्वा उपसर्गपूर्वात् शब्द इत्यस्मादाविष्कारे चकाराद्भाषणे च। मैत्रेयस्तु द्वावेवात्र अपठत् शब्द शब्दक्रियायाम् इति पठित्वा शब्दयति इति आह। स्वामिपाठे तु शब्दकरणे। (मा.धा.)

बुक्क्, सक, उ। (धा.क.)

❖ बुध [बुध्] बोधने (भ्वा०)

बुध बोधने। बुधिर् इति नन्दी । (क्षी.त.)

❖ बुध [बुध्] अवगमने (भ्वा०)

बुध अवगमने। (शा.आ.)(क्षी.त.)
(मा.धा.)(धा.क.)

बुध अवगमने बोधने। (धा.प्र.)

अवगमनं ज्ञापनम्। (क्षी.त.)

बुध्, सेट्, सक, प। (धा.क.)

❖ बुध [बुध्] अवगमने (दिवा०)

बुध अवगमने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

बुध्, अनिट्, सक, आ। भ्वादौ चायम्। (धा.क.)

❖ बुधिर् [बुध्] बोधने (भ्वा०)

बुधिर् बोधने। (धा.प्र.)(मा.धा.)(धा.क.)

पूर्वत्र पाठोऽस्य कर्त्रभिप्राये क्रियाफलेऽपि परस्मैपदार्थः। (धा.प्र.)

बुध् (इर्) सेट्, सक, उ। ज्वलादिः परस्मैपदी अवगमने गतः। (धा.क.)

❖ बुल [बुल्] निमज्जने (चुरा०)

बुल निमज्जने। (क्षी.त.)

❖ बुस [बुस्] उत्सर्गे (दिवा०)

बुस उत्सर्गे। (धा.प्र.) (क्षी.त.) (मा.धा.)

उत्सर्गस्त्यागः। (क्षी.त.)

बुस्, सेट्, सक, प। उत्सर्ग इह त्यागः। बुस्यति जलं मेघः। दन्त्यान्तोऽयम्। (धा.क.)

❖ बुस्त [बुस्त्] आदरानादरयोः (चुरा०)

पुस्त बुस्त आदरानादरयोः। (धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

बुस्त बन्धने इति चन्द्रः (चा. धा.)। (क्षी.त.)

पुस्त, बुस्त, सक, उ। (धा.क.)

❖ बृह [बृह्] वृद्धौ (भ्वा०)

दृह दृहि बृह बृहि वृद्धौ। (शा.आ.)
(क्षी.त.)(मा.धा.)(धा.क.)

दृह्, दृन्ह् (इ) बृह्, बृन्ह् (इ) सेट्, अक, प। (धा.क.)

❖ बृहि [बृंह्] वृद्धौ शब्दे च (भ्वा०)

बृहि वृद्धौ शब्दे च। (शा.आ.)

बृहि शब्दने। (मा.धा.) (धा.क.)

दृह दृहि बृह **बृहि** वृद्धौ। (क्षी.त.)

बृहि शब्दे च। बृहिर् इति दुर्गः । बृंहेर्नलोपाद् बृहोऽद्यतनः। (क्षी.त.)

वृहिर इति चन्द्रगुप्तौ। क्षीरस्वामी वृह वृहि भाषार्थौ इति प्राधान्ये गतम्। (मा.धा.)

बृन्ह् (इ) सेट्, अक, प। बृहिर् इति चन्द्रगुप्तौ। क्षीरस्वामी - वृह, वृहि इति भाषार्थौ। (धा.क.)

❖ बृहि [बृंह्] वृद्धौ (भ्वा०)

दृह दृहि बृह **बृहि** वृद्धौ। (शा.आ.)
(मा.धा.) (धा.क.)

दृह्, दृन्ह् (इ) बृह्, बृन्ह् (इ) सेट्, अक, प। स्वरे वा पञ्चमालोप इति दुर्गः। (धा.क.)

❖ बृहू [बृह्] उद्यमने (तुदा०)

बृहू उद्यमने। (शा.आ.)(धा.क.)

बृहू उद्यमे। उद्यम उद्धरणम्। भ्वादौ बृह वृद्धौ। (क्षी.त.)

बृह्, (ऊ) वेट्, सक, प। (धा.क.)

❖ ब्रीस [ब्रीस्] हिंसायाम् (चुरा०)

ब्रीस बर्ह हिंसायाम्। ब्रूस इत्येके। भ्वादौ बर्ह प्राधान्ये । (क्षी.त.)

❖ ब्रुड [ब्रुड्] सङ्घाते (तुदा०)

ब्रुड भ्रुड इत्येके। (धा.प्र.)

❖ ब्रूञ् [ब्रू] व्यक्तायां वाचि (अदा०)

ब्रूञ् व्यक्तायां वाचि। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

अनुदात्त उभयतोभाषः। (मा.धा.)

अनुदात्तः। ब्रू, (ञ्) अनिट्, सक, उ। (धा.क.)

❖ ब्रूस [ब्रूस्] हिंसायाम् (चुरा०)

ब्रूस बर्ह हिंसायाम्। (धा.प्र.)(मा.धा.)(धा.क.)

भाषार्थोऽग्रे भविष्यति अत्र गर्ज गर्द शब्दे। गर्ध अभिकाङ्क्षायाम् इति क्वचित् पठ्यन्ते। (मा.धा.)

ब्रूस्, सक, उ। अत्र गर्ज, गर्द शब्दे; गर्द्ध अभिकाङ्क्षायामिति क्वचित् पठ्यते। (धा.क.)

❖ ब्लेष्क [ब्लेष्क] दर्शने (चुरा०)

ब्लेष्क दर्शने। (क्षी.त.)

❖ भक्ष [भक्ष्] भक्षणे (भ्वा०)

भक्ष भक्षणे। भ्रक्ष इत्येके। भ्लक्ष इत्येके। (धा.प्र.)

❖ भक्ष [भक्ष्] अदने (चुरा०)

भक्ष अदने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

हिंसायां तु - भक्षयति यवान् बलीवर्द्दान् इति भवति। अत्र भक्षयतिर्हिंसाङ्गे भक्षणे वर्तते, हिंसायां च सर्वे भावाः सचेतना इति दर्शनेन यवानां सचेतत्वादस्ति। दर्शनान्तरे यवानां भक्षणे स्वामिनो हिंसा भवतीति तदपेक्षं भक्षणस्य हिंसाङ्गत्त्वम्। (मा.धा.)

भक्ष्, सेट्, सक, उ। (धा.क.)

❖ भक्ष [भक्ष्] हसने (अदा०)

जक्ष **भक्ष** हसनयोः। (शा.आ.) (क्षी.त.)(मा.धा.)

अत्रात्रेयः केचिद्रामायणे यक्षशब्दस्य भक्षणार्थत्वेन व्युत्पादनाद् अन्तस्थादिमाहुः। तत् चिन्त्यम् इत्युक्तम् रामायणोक्तिस्तु यक्ष पूजायाम् इत्यस्य अनेकार्थत्वाश्रयेण निर्वाह्या। (मा.धा.)

❖ भज [भज्] सेवायाम् (भ्वा०)

भज सेवायाम्। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

भञ्जो आमर्दन इति रुधादौ। भज विश्राणने। भाज पृथक्कर्मणीति द्वयं चुरादौ तथा अत्रैव भजेति भाषार्थौ दण्डके। (मा.धा.)

भज्, श्रिञ् सेवायामिति दुर्गः पठति। भज्, अनिट्, सक, उ। भन्जो आमर्दन इति रुधादौ, भज विश्राणने, भाज पृथक्कर्मणीति द्वयं चुरादौ। अत्रैव भजेति भाषार्थौ दण्डके। (धा.क.)

❖ भज [भज्] विश्राणने (चुरा०)

भज विश्राणने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

विश्राणनं दानम्। विश्राणे विवेचन इत्यन्ये। (क्षी.त.)

भाज पृथक्कर्मणी। भाषार्थेऽग्रे। (मा.धा.)

विश्राणनं दानम्। भज, सक, उ। (धा.क.)

❖ भजि [भञ्ज्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि **भजि** भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट

घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट लुट तुजि मिजि पिजि लुजि **भजि** लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि **भजि** लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह वल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ भञ्जो [भञ्ज्] आमर्दने (रुधा०)

भञ्जो आमर्दने। (शा.आ.)(धा.प्र.)

❖ भट [भट्] भृतौ (भ्वा०)

भट भृतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भृतिर्वेतनम्। (क्षी.त.)

भटित्रं शूलेन संस्कृतं मांसमिति निघण्टुः। वेतनमित्युणादिवृत्तौ अशित्रादिभ्या इतीत्रः। अयं घटादिः परिभाषणार्थः। (मा.धा.)

भट्, सेट्, सक, प। भटति। घटादिः परिभाषणार्थः। (धा.क.)

❖ भट [भट्] परिभाषणे (भ्वा०)

वट **भट** परिभाषणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वट वेष्टने **भट** भृतौ। (धा.प्र.)(क्षी.त.)

वट वेष्टने भट् भृताविति पठितयोः परिभाषणे मित्त्वार्थोयमनुवादः। अत्र षुरुषकारे वट इत्यादि बहुषु दृश्यते इति। (मा.धा.)

❖ भडि [भण्ड्] परिहासे (भ्वा०)

भडि परिहासे। (शा.आ.)

❖ भडि [भण्ड्] परिभाषणे (भ्वा०)

भडि परिहासे। (शा.आ.)

भडि परिभाषणे। (क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ भडि कल्याणे। (क्षी.त.)

परिहास इति देवः। परितो भाषणं परिभाषणम् इति स्वाम्यादयः कल्याणार्थश्चुरादौ। (मा.धा.)

परिहास इति वोपदेवो दुर्गश्च। परितो भाषणं परिभाषणमिति स्वाम्यादयः। यः सनिन्द उपालम्भः तत्र स्यात् परिभाषणम् इति निघण्टुः। भण्ड् (इ) सेट्, सक, आ। कल्याणार्थश्चुरादौ। (धा.क.)

❖ भडि [भण्ड्] कल्याणे (चुरा०)

भडि कल्याणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भ्वादौ भडि परिभाषणे । (क्षी.त.)

परिहास इत्येके। (मा.धा.)

भण्ड् (इ वा णिच्) अक, उ। (धा.क.)

❖ भण [भण्] शब्दार्थः (भ्वा०)

अण रण मण क्वण जण **भण** शब्दार्थाः। (शा.आ.)

अण रण वण **भण** मण कण क्वण व्रण भ्रण शब्दार्थाः। (धा.प्र.)

वन **भण** धण शब्दे - संवननं वशीकरणम्। भाणः अलङ्कारे सुप्रसिद्धः। कौशिकस्तु दन्त्यान्त्यमाह। (क्षी.त.)

अन रण वण **भण** मण कण क्वण व्रण भ्रण ध्वण शब्दार्थाः - इतः क्रम्यन्ता उदात्ता उदात्तेतः। अण, रण, वण, भण, मण, कण, क्वण, ष्टण, वन, ध्वन, शब्दे, इति दुर्गः। सर्वे सेटः, अकर्म्मकाः, सकर्म्मकाश्च, परस्मैपदिनः। अयं निमीलनार्थश्चुरादौ। अयं वसादिः क्वचित् पठ्यते। दन्त्योष्ठ्यादिरेव सर्वत्र, तथा च यादवः, व्रणेः शब्दार्थविषये, व्रणगात्रचूर्णन इति गात्रचूर्णनार्थः अयं कथादिः। ध्रणिः अपि सम्मतायामत्र पठ्यते। (धा.क.)

❖ भण [भण्] शब्दे (भ्वा०)

वण **भण** शब्दे। (शा.आ.)

❖ भदि [भन्द्] कल्याणे सुखे च (भ्वा०)

भदि कल्याणे सुखे च। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

भद्रः पुंसि वृषे मतः। (धा.प्र.)

कल्याणं श्रेयो मङ्गलादि, सुखम् आत्मगुणादयः। (क्षी.त.)

कल्याणं मङ्गलं सुखमात्मगुणः। (मा.धा.)

कल्याणं मङ्गलम्। सुखमात्मवृत्तिगुणविशेषः। अकर्म्मकः। भन्द्, (इ) सेट्, अक, आ। (धा.क.)

❖ भन्जो [भञ्ज्] आमर्दने (रुधा०)

भन्जो आमर्दने। (क्षी.त.)(मा.धा.)(धा.क.)

भाज् दीप्त्यर्थ इति चुरादौ दण्डके इदित्। (मा.धा.)

आमर्दनं भञ्जनम्। भन्ज् (अ) अनिट्, सक, प। भनक्त्युपवनं कपिः इति भट्टिः। भाज् इति चुरादौ। भज इति भ्वादौ। (धा.क.)

❖ भर्त्स [भर्त्स्] तर्जने (चुरा०)

तर्ज **भर्त्स** सन्तर्जने। (धा.प्र.)(मा.धा.)(धा.क.)

भर्त्स तर्ज सन्तर्जने - अत एव चुरादिभूतान् स्वरान्वितात् न् अकरोत्। भ्वादौ तर्ज भर्त्सने। (क्षी.त.)

तर्ज्, भर्त्स्, सक, आ। (धा.क.)

❖ भर्ब [भर्ब्] गतौ (भ्वा०)

वर्फ रफ रफि अर्ब वर्ब कर्ब खर्ब गर्ब घर्ब शर्ब षर्ब सर्ब चर्ब **भर्ब** नर्ब गतौ - पञ्चदशैते गत्यर्थाः। बर्फादींस्त्रीन् हिंसार्थे कण्ठः पठति। गर्वेत्यनार्षः, ओष्ठ्योऽत्र बः, पवर्गप्रस्तावात्। अर्बेत्यादौ रेफस्थाने नकारं कौशिको मन्यते। एकः शर्बस्तालव्यादिः, अपरः षोपदेशः, अन्यो दन्त्यादिः। (क्षी.त.)

❖ भर्व [भर्व्] हिंसायाम् (भ्वा०)

भर्व हिंसायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

अयमीदित्स्वपि क्वचित्पठ्यते। (मा.धा.)

भर्व, सेट्, सक, प। । अयमीदित्स्वपि क्वचित् पठ्यते। (धा.क.)

❖ **भल [भल्] परिभाषणहिंसादानेषु(भ्वा०)**

भल भल्ल परिभाषणहिंसादानेषु। (शा.आ.) (धा.प्र.) (क्षी.त.)(मा. धा.)(धा.क.)

चुरादौ भल आभण्डने । (क्षी.त.)

अयमाभण्डने चुरादिः। (मा. धा.)

भल्, भल्ल्, सेट्, सक। (धा.क.)

❖ **भल [भल्] आभण्डने (चुरा०)**

भल आमण्डने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

आभण्डनं निरूपणम्। (क्षी.त.)

भल, अक, आ। (धा.क.)

❖ **भल्ल [भल्ल्] परिभाषणहिंसादानेषु (भ्वा०)**

भल **भल्ल** परिभाषणहिंसादानेषु। (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

चुरादौ भल आभण्डने । (क्षी.त.)

भां दीप्तिं लातीति वा भालः भल्लूकः श्वापदः।

अयमाभण्डने चुरादिः। (मा.धा.)

भल्, भल्ल्, सेट्, सक। (धा.क.)

❖ **भष [भष्] भर्त्सने (भ्वा०)**

भष भर्त्सने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

शब्दकर्मकः। (शा.आ.)(धा.प्र.)

भषकः श्वा। शब्दः शब्दविशेषः कुक्कुरध्वनिः। कर्म क्रियास्येति शब्दकर्मकः। सोऽप्यस्यार्थः। (धा.प्र.)

शब्दकर्मकः, कुत्सितशब्दकरणार्थे। श्वा भषति, बुक्कति। पैशुन्येन वक्तीत्यर्थः। (क्षी.त.)

इह भर्त्सनं श्वरवो यतस्तत्रैवायं प्रसिद्धः। (मा.धा.)

इह भर्त्सनं श्वरवो। यतस्तत्रैवायं प्रसिद्धः। भष्, सेट्, अक, प। । (धा.क.)

❖ **भस [भस्] भर्त्सनदीप्त्योः (जुहो०)**

भस भर्त्सनदीप्त्योः। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

भस्, सेट्, भर्त्स्नार्थे सक, दीप्त्यर्थे अक, प। कपिर्बभस्ति ते जनम्। बभस्ति जनं विस्तेजसम्। (धा.क.)

❖ **भा [भा] दीप्तौ (अदा०)**

भा दीप्तौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

भा, अनिट्, अक। (धा.क.)

❖ **भाज [भाज] पृथक्कर्मणि (चुरा०)**

भाज पृथक्कर्मणि। (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

भ्वादौ भज सेवायाम्। भज विश्राणने। (क्षी.त.)

भाज, सक, उ। (धा.क.)

❖ **भाम [भाम्] क्रोधे (भ्वा०)**

भाम क्रोधे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भाम्, सेट्, अक, आ। भामः क्रोधः, सोऽस्यास्तीति भामिनी। देवदत्ताय भामत

इत्यत्र कोपविषयत्वेन सम्प्रदानत्वम्। भामते युवती सपत्नीम् इति रमानाथः। (धा.क.)

❖ **भाम [भाम] क्रोधे** **(चुरा०)**

भाम क्रोधे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भाम, अक, उ। (धा.क.)

❖ **भाष [भाष्] व्यक्तायां वाचि** **(भ्वा०)**

भाष व्यक्तायां वाचि। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

भाष्, सेट्, सक, आ। अप - अपभाषणम् - निन्दा। अभि - अभिभाषणम्। सम् - सम्भाषणम्। आ - आभाषणम् - आलापः। परि - परिभाषा- सङ्केतः। वि - विभाषा - विकल्पः। (धा.क.)

❖ **भासृ [भास्] दीप्तौ** **(भ्वा०)**

भासृ दीप्तौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

भास दीप्ताविति दुर्गः। भास् (ऋ) सेट्, अक, आ। (धा.क.)

❖ **भासृ [भास्] शब्दे** **(भ्वा०)**

भासृ णासृ शब्दे। (शा.आ.)

❖ **भिक्ष [भिक्ष्] भिक्षायामलाभे लाभे च** **(भ्वा०)**

भिक्ष याञ्चायां लाभेऽलाभे च। (धा.प्र.)

भिक्ष याञ्चायाम् अलाभे लाभे च। (शा.आ.) (मा.धा.)(धा.क.)

भिक्ष याञ्चायाम् अलाभे लाभे च - क्लेशे च व्यक्तायां वाचि। तत्तद्देशादिप्रसिद्धार्थानां पृथङ्निर्देशः। क्लेशे चेति सभ्याः पृथक् पेठुः, तथा च क्लेश भाषण इति चान्द्रं सूत्रम् (चा. धा.) क्लेश बाधन इति दौर्गम्। (क्षी.त.)

अयं द्विकर्मकः। (मा.धा.)

भिक्ष याञ्चायामिति दुर्गः पठति। भिक्ष्, सेट्, सक, आ। (धा.क.)

❖ **भिदिर् [भिद्] विदारणे** **(रुधा०)**

भिदिर् विदारणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

स्वभावादयं कर्मकर्तरि। भिदा - भिदादित्वादङ्। तत्र भिदा विदारणे इति पाठादन्यत्र भित्तिरिति। भित्तम् - भित्तं शकलम् इति शकले निष्ठानत्वाभावः। अन्यत्र भिन्नमिति। (मा.धा.)

भिद्, (इर्) अनिट्, सक, उ। उद् - ऊर्ध्वभेदः, प्रकाशः। निर् - भेदः, प्रकाशः। प्रति - भर्त्सनम्, निराकरणम्। सम् - मिश्रणम्, संश्लेषः। कदम्ब-सम्भिन्नः पवनः। खल् - दुर्भेदः सुभेदः। (धा.क.)

❖ **भिल [भिल्] गहने** **(तुदा०)**

भिल गहने। (शा.आ.)

❖ **भुज [भुज्] पालनाभ्यवहारयोः** **(रुधा०)**

भुज पालनाभ्यवहारयोः। (शा.आ.) (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भुजोऽनवने इति वचनात् पालने परस्मैपदम् भुनक्ति। (शा.आ.)

अभ्यवहारो भोजनम्। तुदादौ भुजो कौटिल्ये। (क्षी.त.)

पालनं - रक्षणम्। अभ्यवहारः - भोजनम्,

उपभोगः, अनुभवः। भुज, अनिट्, सक, [प] उ। (अनवने आत्मनेपदी) (धा.क.)

❖ भुजि [भुञ्ज्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि **भुजि** लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

❖ भुजो [भुज्] कौटिल्ये (तुदा०)

भुजो कौटिल्ये। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

रुधादौ भुज पालनाभ्यवहारयोः। (क्षी.त.)

मूलविभुजो रथः। भाष्ये अनवनकौटिल्ययोः इति वक्तव्यम्। (मा.धा.)

भुज, (ओ) अनिट्, अक, प। (धा.क.)

❖ भू [भू] सत्तायाम् (भ्वा०)

भू सत्तायाम् (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

उदात्तः परस्मैभाषः। भू इत्ययं धातुः सत्तायामर्थे वर्तते। भू इति स्थिते भूवादयो धातवः भू इत्येवमादयः शब्दाः क्रियावाचिनो धातुसञ्ज्ञा भवन्ति। साध्यमानरूपा हि क्रिया। सा च पूर्वापरीभूतावयवा तत्र पूर्वावयवोऽधिश्रयणादिः अपर उदकसेकादिः पाकक्रियायाः एवमन्यासाम् अपि यदि पूर्वापरीभूतावयवा क्रिया तद्वाचकः। शब्दो धातुः। भू इत्येतस्य धातुसञ्ज्ञायां क्रियाप्रधानत्वार्थविशेषणाय कालकारकविशेषविवक्षायां तावद्वर्तमानकाल उपतिष्ठते। (शा.आ.)

सतो भावः सत्ता। तत्परं सामान्यमपि भवति आदिपदैः सत्ता साध्यस्वभावतयोच्यत इति क्रियावचनानां भूवादीनां धातुसञ्ज्ञा विधीयमानास्य अपि भवति। (धा.प्र.)

भू इति अविभक्तिकोऽयं निर्देशो भ्रान्तिनिरासार्थः, छान्दसो वा सुलुक् - छन्दोवत् सूत्राणि भवन्ति (भाष्ये) इति। एवं सर्वत्र। सतो भावः सत्ता = अस्तित्वम्। भावो धात्वर्थसामान्यमिति यावत्। यदाहुः -

सा नित्या सा महानात्मा तामाहुः त्वतलादयः।
प्राप्तक्रमा विशेषेषु क्रिया सैवाभिधीयते॥
तां प्रतिपदिकार्थं च धात्वर्थं च प्रचक्षते॥

इति। (वाक्यपदीयम्) सा जातिरित्यर्थः। यद् वैशेषिकम् - सामान्यं द्विविधम् , परमपरं च। परं सत्ता महाविषयत्वात् (प्रशस्तपादभाष्य, उद्देश्यप्रकरण)। अपि च -

धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते।

तथा - यत्रान्यत् क्रियापदं न श्रूयते तत्र अस्तिर्भवन्तीपरः प्रयोक्तव्य इति। अत एव माङ्गलिकत्वाच्च पूर्वमस्य प्रयोगः। धातूनाम् अर्थनिर्देशोऽयं निदर्शनार्थ इति सौनागाः। यदाहुः

क्रियावाचित्वमाख्यातुमेकोऽत्रार्थः प्रदर्शितः।
प्रयोगतोऽनुमन्तव्या अनेकार्था हि धातवः॥

तथा च भूरयं क्वचिद् अस्त्यर्थे वर्तते - बहूनि धनान्यस्य भवन्ति, सन्तीत्यर्थः। क्वाप्यभूतप्रादुर्भावे - क्षीरभोजिन्याः श्रुतन्धरः पुत्रो भवति, जायत इत्यर्थः। क्वचिद् अभूततद्भावात्मके सम्पद्यर्थे - पटः अशुक्लः शुक्लो भवति, सम्पद्यत इत्यर्थः। अपि च तत्तदुपसर्गवशाद् धातोः स सोऽर्थः प्रकाश्यते। यथा प्रभवतीति स्वाम्यर्थः, प्रथमत उपलम्भश्च। पराभवति, परिभवति, अभिभवति इति प्रथमतः तिरस्कारः। सम्भवतीति तन्मात्रार्थः। अनुभवतीति संवेदनम्। विभवतीति व्याप्तिः। आभवतीति भागावगतिः। उद्भवतीत्युद्भेदः। प्रतिभवतीति लग्नकत्वम्। (क्षी.त.)

वर्त्तत इति शेषः सत्तेहात्मभरणम्। यदाह हरिः-

आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते।

इति। हेलाराजश्चः -

अस्ति आत्मानं बिभर्त्तिं सत्तां भावयतीति

यावत् इति कैयटकारोपि 'आत्मभरणवचनो भवति इति। नैरुक्ताश्चः 'अस्तीत्युत्पन्नस्य आत्मधारणमाचष्टे इति। उपलक्षणमर्थनिर्देशः। हिमवतो गङ्गा प्रभवति। मल्लो मल्लाय प्रभवति। ग्रामस्य प्रभवति। परान् पराभवति इदमेवं सम्भवति स्थाली तण्डुलान् सम्भवति। शमनुभवतीत्यादौ प्रकाशनाङ्गनिःसरणपर्याप्ति-ऐश्वर्याभिभवोत्प्रेक्षान्तर्भावनसंवेदनादीनाम् अवगमात्। न च मन्तव्यं प्रभूप्रभृतयस्समुदाया एवैतेष्वर्थेषु वर्त्तन्त इति एवं हीह भुवः क्रियावाचित्वाभावात् समुदायस्य च भूवादावपाठान्नेह धातुत्वम् इति। तन्निबन्धनप्रत्ययाभावात् प्रभवतीत्यादि रूपं न स्यात्। किं चोपसर्गसम्बन्धमन्तरेण भूतिवामः पुत्रो भवति बहुवैं भवतो भ्रातृव्यः इत्यादावैश्वर्योत्पत्तिलिप्सादयः अवगम्यन्ते। न चोत्पत्तिः सत्ता। उत्पन्नस्यात्मधारणलक्षणा सेत्युक्तत्वात् तथा च नैरुक्ताः - जायते अस्ति विपरिणमते वर्द्धते अपक्षीयते विनश्यति इति क्रमेण षड् भावविकारानाहुः। क्रिया च यद्वस्तु सिद्धमसिद्धं वा शब्देन साध्यत्वेनाभिधीयमानमाश्रिक्रमं तदिति वैयाकरणानां मतम्। तदुक्तम्

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात्क्रियेति व्यपदिश्यते।

इति। (मा.धा.)

भू इति धातुः सत्तास्वरूपेऽर्थे वर्त्तत इत्यर्थः। सत्तेहात्मभरणमिति। यदाह हरिः -

आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते।

इति। हेलाराजश्च - अस्ति आत्मानं बिभर्त्ति, सत्तां भावयतीति यावदिति। कैयटकारोऽपीत्थं व्याचष्टे। नैरुक्ताश्च अस्तीत्युत्पन्नस्य आत्मधारणमाचष्ट इति। सत्तेति सतो भावः - प्रवृत्तिनिमित्तं सर्वधात्वर्थानुगतं क्रियासामान्यम् इति रमानाथः। सत्तायामित्यर्थनिर्देशस्तु उपलक्षणं हिमवतो गङ्गा प्रभवति, मल्लो मल्लाय प्रभवति, ग्रामस्य प्रभवति, परान् पराभवति,

इदमेवं सम्भवति, स्थाली तण्डुलान् सम्भवति, शमनुभवतीत्यादौ प्रकाशनाङ्गनिःसरणपर्याप्ति-ऐश्वर्याभिभवोत्प्रेक्षान्तर्भावनसंवेदनादीनाम् अवगमात्। न च मन्तव्यं प्रभूप्रभृतयः समुदाया एवैतेष्वर्थेषु वर्त्तन्त इति। उपसर्गसम्बन्धम् अन्तरेण भूतिकामः पुत्रो भवति बहुवैं भवतो भ्रातृव्य इत्यादौ ऐश्वर्य्योत्पत्तिलिप्सादयः अवगम्यन्ते। तथा च नैरुक्ताः - जायते अस्ति विपरिणमते वर्द्धते अपक्षीयते विनश्यतीति क्रमेण षड्भावविकारानाहुः। लोकेऽपि सत्ता-जन्मनोः भिन्नत्वादेव घटः किमुत्पद्यत इति पृष्टो न कश्चिदप्यस्तीति प्रतिवक्ति। तथा च अर्थेनापि तत्र जातः, तत्र भव इति भेदेन निर्द्दिश्यते, तस्माद् धातुः एव अनेकार्थाभिधायी, प्रादयः तु प्रकारणादिवद्विशेषस्मृतिहेतवो द्योतकाः। द्योतकापेक्षा च शब्दशक्तिस्वाभाव्यात् क्वचिदेव, यथा हरिशब्दो भेकादावेव। भू प्राप्तौ आत्मनेपदी चुरादौ। वोपदेवमते तु भ्वादौ च प्राप्त्यर्थेऽयमुभयपदी। भूधातुश्चुरादिगणीय उभयपदी शोधने चिन्तायाञ्च वर्त्तते इति। यथा - औषधं भावयति। हरि भावयते। भावना। भावनाख्यस्तु संस्कारः भाषापरिच्छेदे। (धा.क.)

❖ **भू [भू] अवकल्कने** **(चुरा०)**

भुवोऽवकल्कने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अवकल्कनम् पीडनम्। भावयति ब्राह्मणान् तपः। (धा.प्र.)

अवकल्कनम् मिश्रीकरणम्। भावयति दध्नौदनम्। विकल्कने इति नन्दी - भावयेत् ब्राह्मणन्तपः। भू प्राप्तावात्मनेपदी विभाषा णित्। (क्षी.त.)

अवकल्कनं मिश्रीकरणमिति स्वामी पुरुषकारे अवकल्कनं चिन्तनमिति काश्यपः क्वचित् स्वामिग्रन्थे अनुकल्कनम् इति पठित्त्वा अनुकल्कनं मिश्रीकरणमिति दृश्यते। नन्दी तु भुवो विकल्कन इति। विकल्कनं विपाचनम् तथा च प्रत्युज्यते तपोभावितमात्मानमिति। अवकल्कन इत्यपरे तथा च धनपालः। (मा.धा.)

भू सक, उ। भू कृप अवकल्कने इति दुर्गः पठति। अत्र भू कृप इति द्वौ धातू। (धा.क.)

❖ **भू [भू] प्राप्तौ** **(चुरा०)**

भू प्राप्तावात्मनेपदी। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

आकुस्मादात्मनेपदीति प्रकरणे भू प्राप्ताविति वक्तव्ये आत्मनेपदीति सूर्य्योद्गमनं सम्भावयते। (धा.प्र.)

याचितारश्च नः सन्तु दातारश्च भवामहै। (क्षी.त.) वा अयं प्राप्तौ वा णिचमुत्पादयति आत्मनेपदी चेत्यर्थः। अत्र केचिदात्मनेपदं णिच्सन्नियोगेनैव तेनान्यदा नेति। मैत्रेयस्तु आकुस्मीयप्रकरणे भूप्राप्तौ वेति लघुनैव न्यासेन णिच्यात्मनेपदे वा ग्रहणाण्णिचो विकल्पे च सिद्धे पुनरिह पठित्त्वात्मनेपदीति वचनात् णिजभावे

आत्मनेपदम् इत्याह इदम्पुरुषकारे दूषितम्। (मा.धा.)

(धा.क.)

भू, सक, आ।

❖ **भूष [भूष्] अलङ्कारे** **(भ्वा०)**

भूष अलङ्कारे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भूषते कन्या स्वयमेव। भूषणम्। (धा.प्र.)

तसि **भूष** इति दुर्गः। (क्षी.त.)

भूषति भूषते कन्यास्वयमेव अभूषिष्ट कन्या स्वयमेव। अयं चुरादौ च। (मा.धा.)

भूष्, सेट्, सक, प। चुरादौ चायम्। (धा.क.)

❖ **भूष [भूष्] अलङ्करणे** **(चुरा०)**

तसि **भूष** अलङ्कारे। (धा.प्र.)(मा.धा.)(धा.क.)

भूष अलङ्कारे - तसि भूषेति दुर्गः । (क्षी.त.)

दौर्गास्तु शप्यपि पेठुः। तसि भूष अलङ्कारे इति पुरुषकारे तु उक्तम् उभयत्रापि भूषैवेत्येव बहवः इति। (मा.धा.)

तन्स्, (इ, वा णिच्) भूष, सक, उ। दौर्गास्तु शप्यपि पेठुः - तसि भूष, अलङ्कारे इति। पुरुषकारे तूक्तमुभयत्रापि। भूषैवेत्येवेति बहवः। (धा.क.)

❖ **भृजी [भृज्] भर्जने** **(भ्वा०)**

ऋजि **भृजी** भर्जने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भर्जनं पाकप्रकारः। (क्षी.त.)

द्वितीय ईदित्। भर्जनं पाकविशेषः। (मा.धा.)

ऋञ्ज्, (इ) भृज्, (ई) सेट्, सक, आ। भर्ज्जनं पाकविशेषः। भ्रस्ज पाक इति तुदादौ। (धा.क.)

❖ **भृञ् [भृ] भरणे** **(भ्वा०)**

भृञ् भरणे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

क्र्यादौ भृ भरणे । (क्षी.त.)

ॠकारान्तो भर्त्सनादौ क्र्यादौ। (मा.धा.)

भृ (ञ्) अनिट्, सक, उ। ङ्वनुबन्धः अयं जुहोत्यादौ ॠकारान्तः क्र्यादौ। (धा.क.)

❖ **भृड [भृड्] निमज्जने** **(तुदा०)**

भृड इत्यप्येके। (धा.प्र.)

❖ **भृशि [भृंश्] भाषार्थः** **(चुरा०)**

रुठ लजि अजि दसि **भृशि** कशि रुसि शीक नट पुटि जुचि रघि अहि रहि महि भाषार्थाः - इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते। (मा.धा.)

रुठ लजि अजि दसि **भृशि** रुशि रुसि शीक नट पुटि जुचि रघि अहि रहि महि इत्येते पञ्चदश स्वामिकाश्यपमतानुसारेण लिख्यन्ते। (धा.क.)

❖ **भृशु [भृश्] अधःपतने** **(दिवा०)**

भृशु भ्रशु म्रशु अधः पतने। (शा.आ.)

भृशु भ्रंशु अधःपतने। (धा.प्र.)(मा.धा.)(धा.क.)

भृशु भ्रन्शु अधःपतने - तालव्यान्तश्चत्वारः, आद्यः ऋदुपधः। (क्षी.त.)

भृश्, भ्रन्श, (उ) अक, प। (धा.क.)

❖ **भृषु [भृष्] हिंसासङ्घातयोः** **(क्र्या०)**

भृषु हिंसासङ्घातयोः। (क्षी.त.)

❖ भॄ [भॄ] भर्त्सने भरणे (क्र्या०)

भॄ भर्जने। (शा.आ.)

भॄ भर्त्सने। (धा.प्र.) (मा.धा.) (धा.क.)

वॄ भॄ भरणे। (क्षी.त.)

भॄ भर्जने च - भर्जनं पाकः। (क्षी.त.)

भरणेऽप्येके। (मा.धा.) (धा.क.)

भॄ, सेट्, सक, प। (धा.क.)

❖ भेषृ [भेष्] भये गतौ (भ्वा०)

भेषृ भये। (धा.प्र.)(मा.धा.)(धा.क.)

भेषृ भ्रेषृ भये - भ्रेषृ चलने च। (क्षी.त.)

क्वचित् गताविति पठ्यते । (मा.धा.)

भेष् (ऋ) सेट्, अक, उ। (धा.क.)

❖ भ्यस [भ्यस्] भये (भ्वा०)

भ्यस भये। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भ्यस्, सेट्, अक, प। (धा.क.)

❖ भ्युङ् [भ्यु] गतौ (भ्वा०)

च्युङ् छ्युङ् ज्युङ् **भ्युङ्** प्रुङ् प्लुङ् गतौ। (धा.प्र.)

❖ भ्रन्शु [भ्रंश्] अधःपतने (दिवा०)

भृशु **भ्रन्शु** अधःपतने। (क्षी.त.)(धा.क.)

तालव्यान्तश्चत्वारः, आद्य ऋदुपधः। (क्षी.त.)

भृश्, भ्रन्श, (उ) अक, प। (धा.क.)

❖ भ्रशु [भ्रश्] अधःपतने (दिवा०)

भृशु **भ्रशु** म्रशु अधः पतने। (शा.आ.)

❖ भ्रंशु [भ्रश्] अधःपतने (दिवा०)

भृशु **भ्रंशु** अधःपतने। (धा.प्र.)(मा.धा.)

❖ भ्रंसु [भ्रंस्] अवस्रंसने (भ्वा०)

स्रंसु ध्वंसु **भ्रंसु** अवस्रंसने। ध्वंसु गतौ च - अत्र क्वचित् भ्रशिरपि पठ्यते। भ्रशु भ्रंषु अधःपतन इति दिवादौ देवमैत्रेयादिमते। (मा.धा.)

❖ भ्रन्सु [भ्रंस्] अवस्रंसने (भ्वा०)

स्रन्सु **भ्रन्शु** ध्वन्सु अधःपतने अवस्रंसने च। (धा.प्र.)

स्रन्सु ध्वन्सु **भ्रन्शु** अवस्रंसने। (क्षी.त.)

स्रन्सु ध्वन्सु **भ्रन्सु** अवस्रंसने। ध्वन्सु, गतौ च। सर्वे उदनुबन्धाः सेटः, अकर्मकाः, आत्मनेपदिनः च। (धा.क.)

❖ भ्रक्ष [भ्रक्ष्] अदने (भ्वा०)

भ्रक्ष अदने। (मा.धा.) (धा.क.)

भ्रक्ष्, सेट्, सक, उ। भ्लक्ष इति क्षीरस्वामी। भक्ष इति मैत्रेयः। (धा.क.)

❖ भ्रण [भ्रण्] शब्दार्थः (भ्वा०)

अण रण वण भण मण कण क्वण व्रण **भ्रण** शब्दार्थाः। (धा.प्र.)

अण रण वण मण कण क्वण व्रण **भ्रण** ध्वण शब्दार्थाः - एते शब्दनक्रियार्थाः। (क्षी.त.)

अण रण वण मण कण क्वण व्रण व्रण **भ्रण** ध्वण शब्दार्थाः - अयं निमीलनार्थश्चुरादौ। अयं बशादिः क्वचित्पष्यते दन्तोष्ठयादिरेव सर्वत्र। तथा च यादवः। (मा.धा.)

अन रण वण भण मण कण क्वण व्रण **भ्रण** ध्वण शब्दार्थाः - इतः क्रम्यन्ता उदात्ता उदात्तेतः। अण, रण, वण, भण, मण, कण, क्वण, ष्टण, वन, ध्वन, शब्दे, इति दुर्गः। सर्वे सेटः, अकर्म्मकाः, सकर्म्मकाश्च, परस्मैपदिनः।

अयं निमीलनार्थश्चुरादौ। अयं वसादिः क्वचित् पठ्यते। दन्त्योष्ठ्यादिरेव सर्वत्र, तथा च यादवः। (धा.क.)

❖ भ्रमु [भ्रम्] चलने (भ्वा०)

भ्रमु चलने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा)(धा.क.)

दिवादौ शमाद्यर्थः पाठः । (क्षी.त.)

भ्रम् (उ) सेट्, सक, प। (धा.क.)

❖ भ्रमु [भ्रम्] अनवस्थाने (दिवा०)

भ्रमु अनवस्थाने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अनवस्थानं देशान्तरगमनम्। भ्वादौ भ्रमु चलने। (क्षी.त.)

भ्रम् (उ) सेट्, अक, प। (धा.क.)

❖ भ्रस्ज [भ्रस्ज्] पाके (तुदा०)

भ्रस्ज पाके। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भ्रस्ज्, अनिट्, सक, उ। (धा.क.)

❖ भ्रस्जो [भ्रस्ज्] पाके (तुदा०)

भ्रस्जो पाके। (शा.आ.)

❖ भ्राजृ [भ्राज्] दीप्तौ (भ्वा०)

एजृ भ्रेजृ **भाजृ** दीप्तौ। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

एजृ रेजृ **भाजृ** दीप्तौ। (शा.आ.)

एज, भ्रेज, भ्राज्, (ऋ) सेट्, अक, आ। वर्च्च, कचि, एजृ, भ्रेजृ, भ्राजृ, दीप्ताविति दुर्गकृतः पाठः। (धा.क.)

❖ भ्री [भ्री] भये, भरणे (क्र्या०)

भ्री भये। (शा.आ.) (मा.धा.)(धा.क.)

भ्री भरणे। (धा.प्र.)(क्षी.त.)

भरण इत्येके। (मा.धा.)

भ्री, अनिट्, अक, प। (धा.क.)

❖ भ्रुड [भ्रुड्] संवरणे (तुदा०)

व्रुड **भ्रुड** संवरणे। (क्षी.त.)

❖ भ्रुड [भ्रुड्] सङ्घाते (तुदा०)

ब्रुड **भ्रुड** इत्येके। (धा.प्र.)

❖ भ्रूण [भ्रूण्] आशाविशङ्कयोः (चुरा०)

भ्रूण आशंसायाम्। (धा.प्र.)

भ्रूण आशायाम्। (क्षी.त.)(मा.धा.)(धा.क.)

आशाङ्कायामित्येके। (क्षी.त.)

भ्रूण्, सक, आ। (धा.क.)

❖ भ्रेजृ [भ्रेज्] दीप्तौ (भ्वा०)

एजृ **भ्रेजृ** भाजृ दीप्तौ। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

एज, भ्रेज, भ्राज्, (ऋ) सेट्, अक, आ। वर्च्च, कचि, एजृ, भ्रेजृ, भ्राजृ, दीप्ताविति दुर्गकृतः पाठः। (धा.क.)

❖ भ्रेषृ [भ्रेष्] गतौ (भ्वा०)

भ्रेषृ भ्लेषृ चलने। (धा.प्र.)

भेषृ **भ्रेषृ** भये - **भ्रेषृ** चलने च। (क्षी.त.)

भ्रेषृ श्लेषृ गतौ। (मा.धा.)(धा.क.)

भ्रेष्, भ्लेष् (ऋ) सेट्, सक, उ। (धा.क.)

❖ भ्लक्ष [भ्लक्ष्] अदने (भ्वा०)

भ्लक्ष भक्षणे - प्लक्ष इति दुर्गः। (क्षी.त.)

❖ भ्लेषृ [भ्लेष्] गतौ (भ्वा०)

भ्रेषृ **भ्लेषृ** चलने। (धा.प्र.)

भ्रेषृ **भ्लेषृ** गतौ। (मा.धा.)(धा.क.)

भ्रेष्, भ्लेष् (ऋ) सेट्, सक, उ। (धा.क.)

❖ मकि[मङ्क] गत्यर्थः (भ्वा०)

ककि वकि [**मकि**] श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ [सेकृ श्रेकृ श्रकृ श्लकि] रघि लघि गत्यर्थाः - सम्मतायां दन्त्यादिः पठ्यते। (धा.क.)

❖ मकि [मङ्क्] मण्डने (भ्वा०)

मकि मण्डने। (धा.प्र.)(क्षी.त.)(मा.धा.)

मण्डनं भूषणम्। मङ्क्, (इ) सक, सेट्, आ। (धा.क.)

❖ मक्ष [मक्ष्] रोषे (भ्वा०)

मक्ष इत्यप्येके। (धा.प्र.)

मक्ष रोषे। (क्षी.त.)

❖ मख [मख्] गत्यर्थः (भ्वा०)

उख नख वख **मख** रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि **मख** मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि **मख** मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश। तृतीयान्ताः त्रयोदश यद्यपि मैत्रेयेणादितस्त्रय इदित उखिवखिमखयः मूर्द्धन्यादिर्नखिरनिदित् इखिश्च न पठ्यते। अत्र चन्द्रो मुखिम् अपि पपाठ। (मा.धा.)

उख उखि वख वखि **मख** मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। यद्यपि मैत्रेयेणादितस्त्रयः इदित उखिबखिमखयः, मूर्द्धन्यादिर्नखिरनिदित्, इखिश्च न पठ्यते, तथापि इतरानेकव्याख्यातृणां प्रामाण्याद् अस्माभिः पठितः। अत्र चन्द्रो मुखिमपि पपाठ। एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ मखि [मङ्ख्] गत्यर्थः (भ्वा०)

उख उखि वख वखि मख **मखि** नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख **मखि** णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश।

तृतीयान्तास्त्रयोदश यद्यपि मैत्रेयेणादितस्त्रय इदित उखिवखिमखयः मूर्द्धन्यादिर्नखिरनिदित्। इखिश्च न पठ्यते। तथापि इतरानेकव्याख्यातृणां प्रामाण्यादस्माभिः पठितः। अत्र चन्द्रो मुखिमपि पपाठ। (मा.धा.)

उख उखि वख वखि मख **मखि** णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। यद्यपि मैत्रेयेणादितस्त्रय इदित उखिबखिमखयः, मूर्द्धन्यादिर्नखिरनिदित्, इखिश्च न पठ्यते, तथापि इतरानेकव्याख्यातृणां प्रामाण्यादस्माभिः पठितः। अत्र चन्द्रो मुखिमपि पपाठ। एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ **मगि [मङ्ग्] गत्यर्थः** **(भ्वा०)**

उख नख वख मख रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि **मगि** तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि **मगि** तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि **मगि** तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश। तृतीयान्तास्त्रयोदश। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि **मगि** तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। (धा.क.)

❖ **मघि [मङ्घ्] गत्याक्षेपे कैतवे च** (भ्वा०)

अघि वघि **मघि** गत्याक्षेपे। **मघि** कैतवे च। (धा.प्र.)(क्षी.त.)(धा.क.)

पूर्वमस्य पाठः कैतवार्थस्यान्वाचित्वद्योतनाय। (धा.प्र.)

गत्याक्षेपो वेगगतिर्गमनारम्भो वा। अङ्घिः इत्येके। कैतवं व्याजः। (क्षी.त.)

अघि वघि **मघि** गत्याक्षेपे - आक्षेपो निन्दा। गतौ गमनारम्भे चेति स्वामी (मा.धा.)

आक्षेपो निन्दा, गतौ गमनारम्भे चेति स्वामी। अङ्घ् (इ) सेट्, आ। (धा.क.)

❖ **मघि [मङ्घ्] मणडने** **(भ्वा०)**

मघि मण्डने। (धा.प्र.)(मा.धा.)(धा.क.)

मङ्घ्, (इ) सेट्, सक, प। (धा.क.)

❖ मच [मच्] कल्कने (भ्वा०)

मच मुचि कल्कने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

कल्कनं दम्भः शाठ्यञ्च। (धा.प्र.)

कल्कनं दम्भः क्थनञ्च। मुचेति चन्द्रः। तुदादौ मुच्लृ मोक्षणे। (क्षी.त.)

कल्कनं दम्भः शाठ्यं चेति मैत्रेयः। दम्भः कत्थनं चेति स्वामी । मुचेति चन्द्रः। मुच्लृ मोक्षण इति तुदादौ मुच प्रमोचन इति चुरादौ। (मा.धा.) (धा.क.)

मच्, मुञ्च (इ) सेट्, आ। (धा.क.)

❖ मचि [मञ्च्] धारणोच्छ्रायपूजनेषु(भ्वा०)

मचि धारणोच्छ्रायपूजनेषु। (धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

शाकटायनः तु मुचिं हित्वा द्वावेव धातू पपाठ। मचि बन्धने। मञ्चु धारणोच्छ्रायपूजनेषु इति तेन च अनुदात्तेत् स्थाने इद्विक्रियते। तस्य स्थाने वोदित्। धनपालः तावत् शाकटायनानुसारी। (मा.धा.)

धारणम् उच्छ्रायः। पूजनञ्चेति अर्थास्त्रयः। उच्छ्रायः उच्चता। मञ्च्, (इ) सेट्, आ। शाकटायनस्तु मुञ्चिं हित्वा द्वावेव धातू पपाठ। मचि बन्धने, मञ्चु धारणोच्छ्रायपूजनेष्विति; तेन चानुदात्तेत्स्थाने इद्विक्रियते, तस्य स्थाने वोदित्। (धा.क.)

❖ मज [मज्] शब्दार्थः (भ्वा०)

गज गजि गृज गृजि **मज** मुजि शब्दार्थाः। (क्षी.त.)

❖ मठ [मठ्] मदनिवासयोः (भ्वा०)

मठ मदनिवासयोः। (धा.प्र.) (क्षी.त.)

मठ कठ मदनिवासयोः। (मा.धा.)(धा.क.)

अयं पाठो मैत्रेयस्य। अन्येषां मठ मद निवासयोः कठ कृच्छ्रजीवन इति। मठ गताविति क्वचित् पठ्यते। मैत्रेयादयस्तु न पठन्ति। (मा.धा.)

अयं पाठो मैत्रेयस्य। अन्येषां मठ मदनिवासयोः। दुर्गस्य तु मठ निवासे, कठ कृच्छ्रजीवने इति पाठः। मठ्, कठ्, सेट्, अक, प। (धा.क.)

❖ मठि [मण्ठ्] शोके (भ्वा०)

मठि कठि शोके। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

शोकोऽत्राध्यानम्। (क्षी.त.)(मा.धा.)(धा.क.)

मण्ठ् (इ), कण्ठ् (इ) सेट्, सक, आ। (धा.क.)

❖ मडि [मण्ड्] वेष्टने (भ्वा०)

मडि च। (शा.आ.)

❖ मडि [मण्ड्] विभाजने (भ्वा०)

मडि च। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चकाराद् विभाजने। पृथक्सूत्रादर्थान्तरेऽपि। (क्षी.त.)

अत्र स्वामी वडि विभाजने। मडि चेति पृथक् सूत्रणादर्थान्तरेपि नन्दी तु वडि विभाजने। मडि वेष्टन इति। मडि भूषायामित्यग्रे परस्मैपदिषु। (मा.धा.)

अस्यार्थः उक्तः। स्वामी - वडि विभाजने, मडि चेति पृथक् सूत्रादर्थान्तरे अपि। नन्दी तु - वडि विभाजने, मडि वेष्टन इति युङ्क्षा पठतीति। मण्ड्,

(इ), सेट्, सक, आ। मडि भूषायामित्यग्रे। (धा.क.)

❖ **मडि [मण्ड्] भूषायाम्** **(भ्वा०)**

मडि भूषायाम्। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

मण्ड इति विभागे गतः। (मा.धा.)

मण्ड् (इ), सेट्, सक, प। मण्ड इति विभागे गतः। (धा.क.)

❖ **मडि [मण्ड्] भूषायां हर्षे च** **(चुरा०)**

मडि भूषायाम् हर्षे च। (धा.प्र.)
(मा.धा.)(धा.क.)

मडि भूषायाम्। (क्षी.त.)

मडि भूषायामिति भूवादौ। (मा.धा.)

मण्ड् (इ) सक, उ। मडि भूषायामिति भ्वादौ पाठादेव । (धा.क.)

❖ **मण [मण्] शब्दार्थः** **(भ्वा०)**

अणरण**मण**क्वणजणभणशब्दार्थाः।(शा.आ.)

अण रण वण भण **मण** कण क्वण व्रण भ्रण शब्दार्थाः। (धा.प्र.)

अण रण वण **मण** कण क्वण व्रण भ्रण ध्वण शब्दार्थाः - एते शब्दनक्रियार्थाः। (क्षी.त.)

अण रण वण **मण** कण क्वण व्रण व्रण भ्रण ध्वण शब्दार्थाः। अयं निमीलनार्थश्चुरादौ। (मा.धा.)

अन रण वण भण **मण** कण क्वण व्रण भ्रण ध्वण शब्दार्थाः। अण, रण, वण, भण, मण, कण, क्वण, ष्टण, वन, ध्वन, शब्दे, इति दुर्गः। सर्वे सेटः, अकर्म्मकाः, सकर्म्मकाश्च, परस्मैपदिनः। अयं निमीलनार्थश्चुरादौ। (धा.क.)

❖ **मत्रि [मन्त्र्] गुप्तभाषणे** **(चुरा०)**

मत्रि गुप्तभाषणे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

गुप्तभाषणं मन्त्रणा। मन्त्र् (इ, वा णिच्) सक, आ। (धा.क.)

❖ **मथ [मथ्] हिंसार्थः** **(भ्वा०)**

कथ **मथ** क्नथ क्लथ हिंसार्थाः। (शा.आ.)

❖ **मथ [मथ्] हिंसासङ्क्लेशनयोः** **(भ्वा०)**

कुथि पुथि नुथि लुथि **मथ** मथि हिंसासंक्लेशनयोः। (शा.आ.)

❖ **मथि [मन्थ्] हिंसासङ्क्लेशनयोः(भ्वा०)**

कुथि पुथि नुथि लुथि मथ **मथि** हिंसासङ्क्लेशनयोः। (शा.आ.)

कुथि पुथि लुथि **मथि** हिंसासङ्क्लेशनयोः।
(धा.प्र.)(मा.धा.)(धा.क.)

प्राणवियोगफलकव्यापारो हिंसा। दुःखं क्लेशः। सर्वे इदनुबन्धाः। कुन्थ्, पुन्थ्, लुन्थ्, मुन्थ (इ) सेट्, प। (धा.क.)

❖ **मथे [मथ्] विलोडने** **(भ्वा०)**

मथे विलोडने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

मथ् (ए) सेट्, सक, प। (धा.क.)

❖ **मद [मद्] तृप्तियोगे** **(चुरा०)**

मद तृप्तियोगे। (धा.प्र.)(मा.धा.)(धा.क.)

मद तृप्तिशोधने - शोधनं सम्पत्तिः। तृप्तियोग

इति नन्दी। दिवादौ मदी हर्षे । घटादौ मदी हर्षग्लेपनयोः । (क्षी.त.)

एवं मैत्रेयादयः। अन्ये तृप्तिशोधन इति पठन्ति यदाह क्षीरस्वामी तृप्तिशोधने तर्पणशुद्धाविति। (मा.धा.) (धा.क.)

❖ **मदि [मन्द] स्तुतिमोदमदस्वप्नकान्तिगतिषु (भ्वा०)**

मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु। (धा.प्र.) (मा.धा.)

मदि स्तुतिमोदमदस्वप्नगतिषु। (क्षी.त.) (धा.क.)

मोदो हर्षः, मदो दर्पः, स्वप्नेनालस्यमपि लक्ष्यते। चन्द्रस्तु मदि जाड्ये इत्येवाह। (क्षी.त.)

कान्तिगतिष्वित्येके। मोदो हर्षः। मदो गर्वः। स्वप्न आलस्यम्। चन्द्रस्तु मदि जय इत्यपि पपाठ। स्तुतिगतिभ्यामन्यत्राकर्मकः।अयं मदी हर्षे दिवादौ। मद हर्षग्लेपनयो घटादौ मद तृप्तियोग इति चुरादौ। (मा.धा.) (धा.क.)

मन्द्, (इ) सेट्, सक, आ। (धा.क.)

❖ **मदी [मद्] हर्षग्लेपनयोः (भ्वा०)**

मदी हर्षग्लपनयोः। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

मदी हर्षे इत्ययं दिवादिः। (क्षी.त.)

दैवादिकस्य चित्तविकारम् उत्पादयतीत्यर्थः। निमादयत्यक्षरव्यञ्जनानि स्पष्टम् उच्चारयति इत्यर्थः। तथा च प्रातिशाख्यम् उपलब्धिर्विमाद इति। अक्षरव्यञ्जनानामिति शेषः। (मा.धा.)

दैवादिकस्य मित्त्वार्थोऽयमनुवादः। मद्, अनिट्, प। मदयति - हर्षयति ग्लेपयति चेत्यर्थः। ग्लेपनं दैन्यम्, अन्यत्र मादयति, चित्तविकारम् उत्पादयतीत्यर्थः। निमादयति - अक्षरव्यञ्जनानि स्पष्टमुच्चारयतीत्यर्थः। तथा च प्रातिशाख्यम् - उपलब्धिर्विमाद इति, अक्षरव्यञ्जनानमिति शेषः। (धा.क.)

❖ **मदी [मद्] हर्षे (दिवा०)**

मदी हर्षे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

मद् (ई) सेट्, अक, प। (धा.क.)

❖ **मन [मन्] ज्ञाने (दिवा०)**

मन ज्ञाने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

तनादौ मनु अवबोधने। चुरादौ मन स्तम्भे। (क्षी.त.)

मनुष्या अप्यपत्यत्वारोपेण मानवा इत्युच्यन्ते यदा मानवस्य कुत्सादि विवक्ष्यते तदा -

अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः।
नकारस्य च मूर्धन्यस्तेन सिद्ध्यति माणवः।

इति नकारस्य णत्वम्। अण्तु सामान्येनैव सिद्धः। माणव एव माणवकः। मनु अवबोधन इति तनादौ। (मा.धा.)

मन्, अनिट्, सक, आ। यदा तु मानवस्य कुत्सादि विवक्ष्यते तदा -

अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः।
नकारस्य च मूर्द्धन्यस्तेन सिध्यति माणवः॥

अनु - अनुमतिः। सम् - सम्मतिः। वि - विमतिः। (धा.क.)

❖ मन [मन] शब्दे (भ्वा०)

स्तन वन **मन** शब्दे। (शा.आ.)

❖ मन [मन्] स्तम्भे (चुरा०)

मन स्तम्भे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

स्तम्भो गर्वः। (क्षी.त.)

मन्, अक, आ। (धा.क.)

❖ मनु [मन्] अवबोधने (तना०)

मनु बोधने। (धा.प्र.)

वनु याचने। **मनु** अवबोधने। दिवादौ मन ज्ञाने। (क्षी.त.)

मनु अवबोधे। (मा.धा.)

मनु अवबोधे [बोधने] - मन् (उ) सेट्, सक, आ। (धा.क.)

❖ मन्थ [मन्थ्] हिंसाक्लेशनयोः (भ्वा०)

कुथि पुथि लुथि **मन्थ** हिंसासंक्लेशयोः - हिंसा प्राण्युपघातः, सङ्क्लेशो बाधा। क्र्यादौ कुन्थ संश्लेषणे। ज्वलादौ मथे विलोडने। क्र्यादौ मन्थ विलोडने। मथिमाथीत्यपीति दौर्गाः (क्षी.त.)

❖ मन्थ [मन्थ्] विलोडने (भ्वा०)

मन्थ विलोडने। (धा.प्र.)(मा.धा.)(धा.क.)

क्र्यादिष्वप्ययं पठ्यते। (धा.प्र.)(मा.धा.)

विलोडनं क्षोभणम्। अयं क्र्यादावपि। इह चाग्रे निरनुषङ्ग एदित्। (मा.धा.)

विलोडनं क्षोभणम्। मन्थ्, सेट्, सक, प। (धा.क.)

❖ मन्थ [मन्थ्] विलोडने (क्र्या०)

मन्थ विलोडने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

अयं द्विकर्मकः । हिंसासंक्लेशनयोः शपि। (मा.धा.)

अयं द्विकर्मकोऽपि। मन्थ् सेट्, सक, प। मथि इति हिंसासङ्क्लेशयोः। (धा.क.)

❖ मभ्र [मभ्र्] गत्यर्थः (भ्वा०)

अभ्र वभ्र **मभ्र** चर गत्यर्थाः (धा.प्र.)(मा.धा.)(धा.क.)

अभ्र बभ्र **मभ्र** चर गत्यर्थाः। (क्षी.त.)

सर्वे सेटः सकर्मकाः परस्मैपदिनश्च। (धा.क.)

❖ मय [मय्] गतौ (भ्वा०)

अय वय षय **मय** चय दय तय नय गतौ। (शा.आ.)

अय वय यय **मय** चय तय णय गतौ। (धा.प्र.)

अय वय पय **मय** चय तय नय गतौ। (क्षी.त.)

अय वय पय **मय** चय तय णय गतौ। (मा.धा.)(धा.क.)

सर्वे सेटः, सकर्मकाः, आत्मनेपदिनश्च। (धा.क.)

❖ मर्च [मर्च्] शब्दार्थे (चुरा०)

गज **मर्च** मार्ज शब्दार्थाः। (क्षी.त.)

❖ मर्ब [मर्ब्] गतौ (भ्वा०)

पर्प रफ रफि अर्ब पर्ब वर्ब **मर्ब** षर्ब कर्ब खर्ब गर्ब शर्ब चर्ब गतौ। (धा.प्र.)

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब **मर्ब** कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः। परौ द्वावपि द्वियीयान्तौ। एकादश परे तृतीयान्ताः

द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। (मा.धा.)

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब **मर्ब** कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः। परौ द्वावपि द्वितीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ **मर्व [मर्व्] पूरणे** **(भ्वा०)**

पुर्व पर्व **मर्व** पूर्तौ। (धा.प्र.)

पूर्व पर्व **मर्व** पूरणे। (क्षी.त.)

पुर्व पर्व **मर्व** पूरणे - सर्वे सेटः, सकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ **मल [मल्] धारणे** **(भ्वा०)**

मल मल्ल धारणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

मालती तरुभेदः। चुराद्यन्तात् मलयतीति भट्टिः। (क्षी.त.)

मल्, मल्ल्, सेट्, सक, आ। (धा.क.)

❖ **मल्ल [मल्ल्] धारणे** **(भ्वा०)**

मल **मल्ल** धारणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

मल्, मल्ल्, सेट्, सक, आ। मलं मल्लते धारयति इति - मलमल्लं कौपीनम्। (धा.क.)

❖ **मव [मव्] बन्धने** **(भ्वा०)**

मव बन्धने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

मव्य **मव** बन्धने इति दुर्गः पठति। मव्, सेट्, सक, प। (धा.क.)

❖ **मव्य [मव्य्] बन्धने** **(भ्वा०)**

मव्य बन्धने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

मव्य मव बन्धने इति दुर्गः पठति। मव्य्, सेट्, सक, प। (धा.क.)

❖ **मश [मश्] शब्दे रोषकृते च** **(भ्वा०)**

मिश **मश** शब्दे रोषकृते च। (धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

शब्दने रोषक्रियायाञ्चार्थे। (क्षी.त.)

इमौ तालव्योष्मान्तौ । (मा.धा.)(धा.क.)

मिश्, मश्, सेट्, अक, प। (धा.क.)

❖ **मष [मष्] हिंसार्थः** **(भ्वा०)**

कष शिष जष झष शष वष **मष** मुष रुष रिष हिंसार्थाः। (क्षी.त.)

कष खष शिष जष झष शष वष **मष** रुष रिष हिंसार्थाः। हिंसार्थत्वे यदि दृश्यते। तदा धातूनामनेकार्थत्वाद् भविष्यति। (मा.धा.)

कष खष शिष जष झष शष वष **मष** रुष रिष हिंसार्थाः - तृतीयषष्ठो तालव्योष्मादी। सप्तमो दन्त्योष्ठादिः। सर्वे सकर्मकाः परस्मैपदिनश्च। हिंसार्थत्वं यदि दृश्यते, तदा धातुनाम् अनेकार्थत्वात् भविष्यति। (धा.क.)

❖ **मसी [मस्] परिणामे** **(दिवा०)**

मसी प्रमाणे। (धा.प्र.)

मसी परिणामे। (क्षी.त.)(मा.धा.)(धा.क.)

परिणामो विकारः। बसी च इति कण्ठः।(क्षी.त.)

अनु - अनुमतिः। सम् - सम्मतिः। वि - विमतिः। (धा.क.)

❖ मन [मन] शब्दे (भ्वा०)

स्तन वन **मन** शब्दे। (शा.आ.)

❖ मन [मन्] स्तम्भे (चुरा०)

मन स्तम्भे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

स्तम्भो गर्वः। (क्षी.त.)

मन्, अक, आ। (धा.क.)

❖ मनु [मन्] अवबोधने (तना०)

मनु बोधने। (धा.प्र.)

वनु याचने। **मनु** अवबोधने। दिवादौ मन ज्ञाने। (क्षी.त.)

मनु अवबोधे। (मा.धा.)

मनु अवबोधे [बोधने] - मन् (उ) सेट्, सक, आ। (धा.क.)

❖ मन्थ [मन्थ्] हिंसाक्लेशनयोः (भ्वा०)

कुथि पुथि लुथि **मन्थ** हिंसासंक्लेशयोः - हिंसा प्राण्युपघातः, सङ्क्लेशो बाधा। क्र्यादौ कुन्थ संश्लेषणे। ज्वलादौ मथे विलोडने। क्र्यादौ मन्थ विलोडने। मथिमाथीत्यपीति दौर्गाः (क्षी.त.)

❖ मन्थ [मन्थ्] विलोडने (भ्वा०)

मन्थ विलोडने। (धा.प्र.)(मा.धा.)(धा.क.)

क्र्यादिष्वप्ययं पठ्यते। (धा.प्र.)(मा.धा.)

विलोडनं क्षोभणम्। अयं क्र्यादावपि। इह चाग्रे निरनुषङ्ग एदित्। (मा.धा.)

विलोडनं क्षोभणम्। मन्थ्, सेट्, सक, प। (धा.क.)

❖ मन्थ [मन्थ्] विलोडने (क्र्या०)

मन्थ विलोडने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

अयं द्विकर्मकः । हिंसासंक्लेशनयोः शपि। (मा.धा.)

अयं द्विकर्मकोऽपि। मन्थ् सेट्, सक, प। मथि इति हिंसासङ्क्लेशयोः। (धा.क.)

❖ मभ्र [मभ्र्] गत्यर्थः (भ्वा०)

अभ्र वभ्र **मभ्र** चर गत्यर्थाः (धा.प्र.) (मा.धा.)(धा.क.)

अभ्र बभ्र **मभ्र** चर गत्यर्थाः। (क्षी.त.)

सर्वे सेटः सकर्मकाः परस्मैपदिनश्च।(धा.क.)

❖ मय [मय्] गतौ (भ्वा०)

अय वय षय **मय** चय दय तय नय गतौ। (शा.आ.)

अय वय यय **मय** चय तय णय गतौ। (धा.प्र.)

अय वय पय **मय** चय तय नय गतौ। (क्षी.त.)

अय वय पय **मय** चय तय णय गतौ।(मा.धा.) (धा.क.)

सर्वे सेटः, सकर्मकाः, आत्मनेपदिनश्च।(धा.क.)

❖ मर्च [मर्च्] शब्दार्थे (चुरा०)

गज **मर्च** मार्ज शब्दार्थाः। (क्षी.त.)

❖ मर्ब [मर्ब्] गतौ (भ्वा०)

पर्प रफ रफि अर्ब पर्ब वर्ब **मर्ब** षर्ब कर्ब खर्ब गर्ब शर्ब चर्ब गतौ। (धा.प्र.)

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब **मर्ब** कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः। परौ द्वावपि द्वियीयान्तौ। एकादश परे तृतीयान्ताः

द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। (मा.धा.)

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब **मर्ब** कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः। परौ द्वावपि द्वितीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ मर्व [मर्व्] पूरणे (भ्वा०)

पुर्व पर्व **मर्व** पूर्तौ। (धा.प्र.)

पूर्व पर्व **मर्व** पूरणे। (क्षी.त.)

पुर्व पर्व **मर्व** पूरणे - सर्वे सेटः, सकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ मल [मल्] धारणे (भ्वा०)

मल मल्ल धारणे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

मालती तरुभेदः। चुराद्यन्तात् मलयतीति भट्टिः। (क्षी.त.)

मल्, मल्ल, सेट्, सक, आ। (धा.क.)

❖ मल्ल [मल्ल्] धारणे (भ्वा०)

मल **मल्ल** धारणे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

मल्, मल्ल, सेट्, सक, आ। मलं मल्लते धारयति इति - मलमल्लं कौपीनम्। (धा.क.)

❖ मव [मव्] बन्धने (भ्वा०)

मव बन्धने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

मव्य **मव** बन्धने इति दुर्गः पठति। मव्, सेट्, सक, प। (धा.क.)

❖ मव्य [मव्य्] बन्धने (भ्वा०)

मव्य बन्धने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

मव्य मव बन्धने इति दुर्गः पठति। मव्य्, सेट्, सक, प।
(धा.क.)

❖ मश [मश्] शब्दे रोषकृते च (भ्वा०)

मिश **मश** शब्दे रोषकृते च। (धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

शब्दने रोषक्रियायाञ्चार्थे। (क्षी.त.)

इमौ तालव्योष्मान्तौ । (मा.धा.)(धा.क.)

मिश्, मश्, सेट्, अक, प। (धा.क.)

❖ मष [मष्] हिंसार्थः (भ्वा०)

कष शिष जष झष शष वष **मष** मुष रुष रिष हिंसार्थाः। (क्षी.त.)

कष खष शिष जष झष शष वष **मष** रुष रिष हिंसार्थाः। हिंसार्थत्वे यदि दृश्यते। तदा धातूनामनेकार्थत्वाद् भविष्यति। (मा.धा.)

कष खष शिष जष झष शष वष **मष** रुष रिष हिंसार्थाः - तृतीयषष्ठो तालव्योष्मादी। सप्तमो दन्त्योष्ठादिः। सर्वे सकर्मकाः परस्मैपदिनश्च। हिंसार्थत्वं यदि दृश्यते, तदा धातुनाम् अनेकार्थत्वात् भविष्यति। (धा.क.)

❖ मसी [मस्] परिणामे (दिवा०)

मसी प्रमाणे। (धा.प्र.)

मसी परिणामे। (क्षी.त.)(मा.धा.)(धा.क.)

परिणामो विकारः। बसी च इति कण्ठः। (क्षी.त.)

क्वचित् आद्यन्तव्यत्यासेन समीति पाठः। (मा.धा.)

मस्यति धनं गृही इति मनोरमा। मस्, (ई) सेट्, सक, प। उणादौ मसूर इति च रमानाथः। अस्वादयो मसीपर्य्यन्ता दन्त्यान्ताः। अत्र परिमाणस्थले परिणाम इति भीमः, परिणामो विकार इति मनोरमा। (धा.क.)

❖ मस्क [मस्क्] गत्यर्थः (भ्वा०)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वक्क वस्क **मस्क** तिकृ टिकृ टीकृ रघि लघि गत्यर्थाः। (धा.प्र.)

ढौकृ त्रौकृ ककि श्वकि त्रकि ष्वष्क **मस्क** टिकृ टीकृ रघि लघि गत्यर्थाः। (शा.आ.)

ककि श्वकि त्रकि ढौकृ त्रौकृ ष्वक्क वस्क **मस्क** टिकृ टीकृ रघि लघि गत्यर्थाः। (क्षी.त.)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क **मस्क** टिकृ टीकृ रघि लघि गत्यर्थाः। (मा.धा.)

ककि वकि [मकि] श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क **मस्क** टिकृ टीकृ [सेकृ श्रेकृ श्रकृ श्लकि] रघि लघि गत्यर्थाः। सम्मतायां दन्त्यादिः पठ्यते। (धा.क.)

❖ मह [मह्] पूजायाम् (भ्वा०)

मह पूजायाम्। (धा.प्र.)(मा.धा.)(धा.क.)

मह्, सेट्, सक, प। (धा.क.)

❖ मह [मह] पूजायाम् (चुरा०)

मह पूजायाम्। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

महि वृद्धावित्यस्य मंहत इति क्षीरस्वामी। तन्मतेन महि भाषितार्थोऽत्रैव दण्डके गतः। (मा.धा.)

मह, सक, उ। महि वृद्धावित्यस्य मंहते इति क्षीरस्वामी। (धा.क.)

❖ महि [मंह्] वृद्धौ (भ्वा०)

वहि **महि** वृद्धौ। (धा.प्र.)

बहि **महि** वृद्धौ। (क्षी.त.)(मा.धा.)(धा.क.)

बन्ह्, मन्ह् (इ) सेट्, अक, आ। अयं भाषार्थश्चुरादाविति स्वामी। मह पूजायामिति इहैवाग्रे परस्मैपदिषु। महीयते इत्यादि महीङिति कण्ड्वादिपाठात्। (धा.क.)

❖ महि [मंह्] भाषार्थः (चुरा०)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि **महि** गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः। एते सकर्मका भासार्था णिचम् उत्पादयन्ति। (क्षी.त.)

रुठ लजि अजि दसि भृशि कशि रुसि शीक नट पुटि जुचि रघि अहि रहि **महि** भाषार्थाः - इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते रोठयति। (मा.धा.)

रुठ लजि अजि दसि भृशि रुशि रुसि शीक नट पुटि जुचि रघि अहि रहि **महि** इत्येते पञ्चदश स्वामिकाश्यपमतानुसारेण लिख्यन्ते। (धा.क.)

❖ **मा [मा] माने** **(अदा०)**

मा माने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

मानं वर्तनम्। (क्षी.त.)

मानमिहान्तभावः। अत्रायमकर्मकः। (मा.धा.)

मा - अनिट्, अक, प। (धा.क.)

❖ **माक्षि [माङ्क्ष्] काङ्क्षायाम्** **(भ्वा०)**

काक्षि वाक्षि **माक्षि** काङ्क्षायाम्। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

काक्षि वाक्षि **माक्षि** द्राक्षि ध्राक्षि ध्वाक्षि काङ्क्षायाम्। (क्षी.त.)

काङ्क्ष्, वाङ्क्ष्, माङ्क्ष्, (इ) सेट्, सक, प। न काङ्क्षे विजयं कृष्ण गीता। आत्मनेपदमार्षम्। (धा.क.)

❖ **माङ् [मा] माने शब्दे च** **(जुहो०)**

माङ् माने। (शा.आ.)(धा.क.)

माङ् माने शब्दे च। (धा.प्र.)(क्षी.त.)(मा.धा.)

अदादौ मा माने। भ्वादौ मेङ् प्रणिदाने। (क्षी.त.)

अनुदात्त आत्मनेपदी। (मा.धा.)

मा, (ङ्) अनिट्, सक, आ। (धा.क.)

❖ **माङ् [मा] माने** **(दिवा०)**

माङ् माने। (धा.प्र.)(मा.धा.)(धा.क.)

अयं कैश्चिदेव पठ्यते। यदाह स्वामी माङ् मान इति दुर्ग। न्यासेऽपि मा इति कस्येदं ग्रहणम्। किं मेङ् प्रणिदान इति भौवादिकस्य। उत माङ् माने इति जौहोत्यादिकस्य। आहोस्विद् मा माने इत्यादादिकस्य, त्रयाणां ग्रहणमित्युच्यते पठतामीकारान्तमध्ये पाठः पवर्गीयाद्यात्मनेपदप्रसङ्गात्। (मा.धा.)

मा (ङ्), अनिट्, सक, आ। (धा.क.)

❖ **मान [मान्] पूजायाम्** **(भ्वा०)**

मान पूजायाम्। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

मान् सेट्, स, आ। (धा.क.)

❖ **मान [मान्] पूजायाम्** **(चुरा०)**

मान पूजायाम्। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

मान्, सक, उ। (धा.क.)

❖ **मारी [मार्] हिंसागत्योः** **(चुरा०)**

मारी जूरी हिंसागत्योः। (शा.आ.)

❖ **मार्ग [मार्ग्] अन्वेषणे** **(चुरा०)**

मार्ग अन्वेषणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

मार्ग, सक, उ। (धा.क.)

❖ **मार्ग [मार्ग्] संस्कारगत्योः** **(चुरा०)**

व्रज **मार्ग** संस्कारगत्योः - व्रज, मार्ग, सक, उ। अत्र धनपालो मार्गे चेति पठति। स्वामी तु व्रजस्थाने वर्जि पठित्वा मार्गेति द्वितीयं धातुमाह। तन्त्रान्तरे वजिव्रजी द्वौ पठित्वा मार्गसंस्कारगतौ अर्थौ उक्तौ। मृग अन्वेषणे कथादौ। मार्ग अन्वेषणे इति युजादौ। (धा.क.)

❖ **मार्ज [मार्ज्] शब्दार्थे** **(चुरा०)**

गज **मार्ज** शब्दे। (धा.प्र.)

गज मर्च **मार्ज** शब्दार्थाः। (क्षी.त.)

गज **मार्ज** शब्दार्थे - शौचालङ्कारयोः। मृजूष् शुद्धावित्यस्य अत्र मर्चिमपि केचित्पठन्ति। (मा.धा.)

गज **मार्ज** शब्दार्थौ - गज, मार्ज्, अक, उ।
केचिच्च गजस्थाने गर्ज्ज इति । (धा.क.)

❖ माह [माह्] माने (भ्वा०)

माह माने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)
मानं वर्तनम् । (क्षी.त.)
माह् (ऋ) सेट्, सक, उ। (धा.क.)

❖ मिछ [मिच्छ्] उत्क्लेशे (तुदा०)

मिछ उत्क्लेशे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)
मिमिच्छ रोगिणं तदा। (धा.प्र.)
उत्क्लेशो बाधनम्। पिछ इति द्रमिडाः। (क्षी.त.)
उत्क्लेशः पीडा। (मा.धा.)
उत्क्लेशः पीडा। मिच्छ्, सेट्, अक, प। (धा.क.)

❖ मिजि [मिञ्ज्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि **मिजि** लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट लुट तुजि **मिजि** पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थौ येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि **मिजि** पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थौ येषां ते भासार्थाः। सर्वे अकर्मकाः। (धा.क.)

❖ मिथृ [मिथ्] मेधाहिंसनयोः (भ्वा०)

मिथृ मेथृ मेधाहिंसनयोः - **मेथीवद्धोऽपि हि भ्राम्यन् घासग्रासं करोति गौः** (सुभाषितावली)। अमरसिंहस्तु - **पुंसि मेथिः खले दारू न्यस्तं** यत् पशुबन्धने। मिदृ मेदृ इति दुर्गः। (क्षी.त.)

❖ मिदि [मिन्द्] स्नेहने (चुरा०)

मिदि स्नेहने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)
मिद इति कौशिकः । (क्षी.त.)
अत्र क्षीरस्वाम्यनिदितं पठित्वा कैश्चिदिदित् पठ्यत इत्याह। तथा कौशिकः अपि अनिदितं पपाठ। ऋदितोऽपि शपि मेधाहिंसनयोः।
(मा.धा.)
मिन्द् (इ, वा णिच्) अक। ऋदितोऽपि शपि मेधाहिंसनयोः । (धा.क.)

❖ मिदृ [मिद्] मेधाहिंसनयोः (भ्वा०)

मिदृ मेदृ मेधाहिंसयोः। (शा.आ.)
(धा.प्र.)(मा.धा.)(धा.क.)
अयं पाठो देवादीनाम्। क्षीरस्वामी थान्तावेतौ। भिदादिसूत्रे मेधाशब्दं व्युत्पादयन् न्यासकरो

धान्तावाह। भोजीराजस्तु मेधिं नानुमन्यते। यदाह अङ्घ्रिधौ रखिलिखिशुभिसिधिमिथिगुधिभ्यो गुणः च इति। कौमारश्चात्रैवानुकूलः। मेदते इति द्युतादौ स्नेहने गतः। (मा.धा.)

अयं पाठो दिवादीनाम्। मिदृ, मेदृ, सेट्, उ। द्युतादौ स्नेहने गतः। (धा.क.)

❖ मिधृ [मिध्] मेधाहिंसनयोः (भ्वा०)

मिधृ मेधृ मेधाहिंसयोः सङ्गमे च। (शा.आ.)

❖ मिल [मिल्] श्लेषणे (तुदा०)

मिल सिल उञ्छे। (शा.आ.)

मिल श्लेषणे। (धा.प्र.)(मा.धा.)(धा.क.)

इति परस्मैपदिष्विह केचित् पठन्ति। तेषां कर्त्रभिप्राये क्रियाफलेऽपि परस्मैपदं फलम्। (धा.प्र.)

मिल इति स्वरितेदग्रे भविष्यति। तस्येह पाठे प्रयोजनं कर्त्रभिप्राये अपि क्रियाफले परस्मैपदम्। (मा.धा.)

श्लेषणमिह सम्बन्धीभावः। मिल्, सेट्, अक, प। मिल इति स्वरितेदग्रे पठिष्यते, इह पाठे प्रयोजनं कर्त्रभिप्रायेऽपि क्रियाफले परस्मैपदम्। मिलेः कुटादित्वमिष्यत इति कुलचन्द्रः। पञ्चभिः मिलितव्यम्। (धा.क.)

❖ मिल [मिल्] सङ्गमे (तुदा०)

मिल सङ्गमे। (शा.आ.)(धा.प्र.)

मिल सङ्गमने। (मा.धा.) (धा.क.)

तुदादीनामात्मनेपदेषूदाहरणमूह्यम्। (शा.आ.)

मिल संश्लेषण इति पठितस्येह पुनः पाठः कर्त्रभिप्राये तङर्थः इत्यात्रेयः। (मा.धा.)

मिल्, सेट्, सक, उ। मिलनमिति पद्मनामः। व्यालनिलयमिलनेन (गीतगोविन्दे) (धा.क.)

❖ मिवि [मिन्व्] सेचने, सेवने (भ्वा०)

पिवि निवि **मिवि** सेचने। (शा.आ.)

पिवि **मिवि** णिवि स्नंसने। (धा.प्र.)
(मा.धा.) (धा.क.)

पिवि **मिवि** निवि सेचने - सेवन इत्येके। (क्षी.त.)

अयं पाठो मैत्रेयस्य च। अन्ये तृतीयं मूर्धन्योष्ठ्यादिं पठन्ति। सेचने इति तरङ्गिण्याम्। (मा.धा.) (धा.क.)

केचित् सेचन इति। सर्वे इनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ मिश [मिश्] शब्दे (भ्वा०)

मिश मश शब्दे रोषकृते च। (धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

शब्दने रोषक्रियायाञ्चार्थे। (क्षी.त.)

इमौ तालव्योष्मान्तौ। (मा.धा.) (धा.क.)

मिश्, मश्, सेट्, अक, प। (धा.क.)

❖ मिश्र [मिश्र] सम्पर्के (चुरा०)

मिश्र सम्पर्के। (धा.प्र.)(मा.धा.)(धा.क.)

मिश्र सम्पर्चने। सम्पर्चनं श्लेषः। (क्षी.त.)

मिश्रयति गुडमिश्रः। (मा.धा.)

मिश्र, सक, प। (धा.क.)

❖ मिष [मिष्] स्पर्द्धायाम् (तुदा०)

मिष स्पर्धायाम्। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

मिष्, सेट्, अक, प। (धा.क.)

❖ मिषु [मिष्] सेचने (भ्वा०)

जिषु विषु **मिषु** सेवने। (धा.प्र.)

जिषु विषु **मिषु** सेचने। (क्षी.त.)

(मा.धा.)(धा.क.)

तुदादौ मिष स्पर्धायाम् । मिश मश शब्दे तालव्यान्तौ। (क्षी.त.)

सर्वे उदनुबन्धाः, सकर्मकाः परस्मैपदिनश्च। (धा.क.)

❖ मिह [मिह्] सेचने (भ्वा०)

मिह सेचने। (शा.आ.)(धा.प्र.)

(क्षी.त.)(मा.धा.) (धा.क.)

मिह्, अनिट्, सक, प। (धा.क.)

❖ मी [मी] गतौ (चुरा०)

मी गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

मी, सक, उ। मी (ञ्) हिंसायाम्। (धा.क.)

❖ मीङ् [मी] हिंसायाम् (दिवा०)

मीङ् हिंसायाम्। (शा.आ.)(धा.प्र.)

(क्षी.त.)(मा.धा.)(धा.क.)

क्र्यादौ मीञ्। (क्षी.त.)

अत्र हिंसाशब्देन हिंसाफलं प्राणविश्लेषः अभिधीयते मीयते। काश्यपस्वामिवर्धमानास्तु लाक्षणिकमीरूपस्य मिनोतेरग्रहणशङ्कापनोदनपरा वृत्तिः, न त्वस्याग्रहणपरा इति मित्सते इतीच्छन्ति। । भाष्यम् अप्युपलक्षणव्याख्येयम् मीनातीति क्र्यादौ डुमिञिति ह्रस्वान्तस्स्वादौ मी गताविति चुरादौ। (मा.धा.)

मी (ङ्), अनिट्, सक, आ। (धा.क.)

❖ मीञ् [मी] हिंसायाम् (क्र्या०)

मीञ् हिंसायाम्। (शा.आ.)(धा.प्र.)

(क्षी.त.)(मा.धा.)(धा.क.)

मी (ञ्) अनिट्, सक, उ। (धा.क.)

❖ मीमृ [मीम्] गतौ शब्दे च (भ्वा०)

द्रम हम्म **मीमृ** गतौ।(धा.प्र.)(मा.धा.)(धा.क.)

द्रम हम्म **मीमृ** गतौ। **मीमृ** शब्दे च। (क्षी.त.)

अयं शब्दे चेति क्वचित्पठ्यते।(मा.धा.)(धा.क.)

द्रम्, हम्म्, मीम् (ऋ) सक, सेट्, प। (धा.क.)

❖ मील [मील्] निमेषणे (भ्वा०)

मील स्मील निमेषणे। (शा.आ.)

मील स्मील क्ष्मील निमेषणे। (धा.प्र.)

मील श्मील निमेषणे। निमेषणं सङ्कोचः। (क्षी.त.)

मील श्मील क्ष्मील निमेषणे - निमेषणं सङ्कोचः। द्वितीयस्तालव्यादिः। तृतीयो दन्त्यादिः। मिल श्लेषण इति ह्रस्वोपधः तुदादौ। (मा.धा.)

मील श्मील क्ष्मील निमेषणे - सर्वे सेटः, अकर्मकाः, परस्मैपदिनश्च। मिल श्लेषणे ह्रस्वोपधो रुधादौ। (धा.क.)

❖ मीव [मीव्] स्थौल्ये (भ्वा०)

पीव **मीव** स्थौल्ये। (शा.आ.)

पीव **मीव** तीव णीव स्थौल्ये। (धा.प्र.)

(मा.धा.) (धा.क.)

पीव **मीव** नीव तीव स्थौल्ये। (क्षी.त.)

सर्वे सेटः, अकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ मुच [मुच्] प्रमोचने मोदने च (चुरा०)

मुच प्रमोचने। (धा.प्र.)(क्षी.त.)(मा.धा.)

मोचयति शरान्। भ्वादौ मुच कल्कने । मुच्लृ मोक्षणे। (क्षी.त.)

ऋणं निर्मोचयति। प्रतिददातीत्यर्थः मुञ्चतीति कल्कने शपि। शे तु मुञ्चतीति मोक्षणे। (मा.धा.)

मुच प्रमोचने मोचने च। मुच्, सक, उ। (धा.क.)

❖ मुञ् [मु] बन्धने (क्र्या०)

मुञ् बन्धने। (शा.आ.)

❖ मुचि [मुञ्च्] कल्कने (भ्वा०)

मच **मुचि** कल्कने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

कल्कनं दम्भः शाठ्यञ्च। (धा.प्र.)

कल्कनं दम्भः क्थनञ्च। मुचेति चन्द्रः। तुदादौ मुच्लृ मोक्षणे । (क्षी.त.)

कल्कनं दम्भः शाठ्यं चेति मैत्रेयः। दम्भः कत्थनं चेति स्वामी। मुचेति चन्द्रः। मुच्लृ मोक्षणे तुदादौ मुच प्रमोचन इति चुरादौ। (मा.धा.) (धा.क.)

मच्, मुञ्च (इ) सेट्, आ। (धा.क.)

❖ मुच्लृ [मुच्] मोक्षणे (तुदा०)

मुच्लृ मोक्षणे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

मुचादीनां विंशतिपर्यन्तानां शे मुचादीनामिति नुमागमः अनुस्वारपरस्वर्णौ। (शा.आ.)

इतः पञ्चानिट उभयपदिनश्च। (क्षी.त.)

प्रमोचनेयं चुरादिः। कल्कने शपि गतम्। (मा.धा.)

मुच् (लृ) अनिट्, सक, उ। अव - उन्मोचनम्। आ - परिधानम्। आमुञ्चत् वर्म्म (भट्टिः) उद्- उन्मोचनम्। प्रति - प्रत्यर्पणम्, परिधानम्। तुरङ्गं प्रतिमोक्तुमर्हसि (रघु०)। वि - विमुक्तिः त्यागः। (धा.क.)

❖ मुज [मुज्] शब्दार्थः (भ्वा०)

गज गजि गृज गृजि **मुज** मुजि शब्दार्थाः। (धा.प्र.)

गज गजि गृज गृजि **मुज** मुजि शब्दार्थाः - मृजमृजीति स्वामिचन्द्रौ। (मा.धा.)

गज गजि गृज गृजि **मुज** मुजि शब्दार्थाः। गज गृजि मृज मुजि गर्ज शब्दार्थौ इति दुर्गः पठति। सर्वे सेटः, अकर्म्मकाः, परस्मैपदिनश्च। मृजमृजीति स्वामिचन्द्रौ। (धा.क.)

❖ मुजि [मुञ्ज्] शब्दार्थाः (भ्वा०)

गज गजि गृज गृजि मुज **मुजि** शब्दार्थाः। गज मदने च। (धा.प्र.)

गज गजि गृज गृजि मज **मुजि** शब्दार्थाः। (क्षी.त.)(मा.धा.)(धा.क.)

मृजमृजीति स्वामिचन्द्रौ। (मा.धा.)

गज गृजि मृज मुजि गर्ज शब्दार्थौ इति दुर्गः पठति। सर्वे सेटः, अकर्म्मकाः, परस्मैपदिनश्च। मृजमृजीति स्वामिचन्द्रौ। (धा.क.)

❖ मुट [मुट्] प्रमर्दने (भ्वा०)

मुट प्रमर्दने। (धा.प्र.)(मा.धा.)(धा.क.)

मुडेति धनपालः। पुडिति पकारादिडान्त इति शाकाटायनः। क्षीरस्वामी तु द्वावपीदितौ

पपाठ। मैत्रेयस्त्वमुं टान्तमेव पठित्वा मुडि खण्डन इति चाग्रे पठित्वा पुडि चेत्येक इत्याह। मुट प्रमर्दनाक्षेपयोरिति तुदादौ। मुड सञ्चूर्णन इति चुरादौ। (मा.धा.)

मुट्, सेट्, सक, प। मुट प्रमर्द्दनाक्षेपयोरिति तुदादौ। (धा.क.)

❖ **मुट [मुट्] आक्षेपमर्दनयोः** **(तुदा०)**

मुट आक्षेपमर्दनयोः। (शा.आ.)

मुट आक्षेपप्रमर्दनयोः। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

❖ **मुट [मुट्] सञ्चूर्णने** **(चुरा०)**

मुट सञ्चूर्णने (धा.प्र.)(मा.धा.) (धा.क.)

मुट्, सक, उ। (धा.क.)

❖ **मुठि [मुण्ठ्] पालने** **(भ्वा०)**

मुठि पालने। (धा.प्र.)(मा.धा.)(धा.क.)

मुण्ठ् (इ), सेट्, सक, आ। (धा.क.)

❖ **मुठि [मुण्ठ्] पलायने** **(भ्वा०)**

मुठि पलायने। (क्षी.त.)

❖ **मुडि [मुण्ड्] प्रमर्दने** **(भ्वा०)**

मुडि प्रमर्दने - मुट इति दुर्गः। पुडि इत्येके।
(क्षी.त.)

❖ **मुडि [मुण्ड्] खण्डने** **(भ्वा०)**

मुडि खण्डने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

उकारवत्पवर्गादिप्रकरणाद् इहायं निर्द्दिश्यते। मडि भूषायाम् इति उकारवात् न भवतीति डकारान्तोऽप्यकारवत्त्वादादौ निर्द्दिष्टः।(धा.प्र.)

अर्थभेदात् पुनः पाठः। अत एव मुडि खण्डनप्रमर्दनयोः इति कण्ठः। मुटि इति कौशिकदुर्गौ। (क्षी.त.)

अत्र मैत्रेयः पुडि चेत्येके। उकारवत् पवर्गादिप्रकरणादिहायं निर्दिष्यते। मडि भूषायाम् इत्युकारवन्न भवति इति डकारान्तः अप्यकारवत्त्वादादौ निर्दिष्ट इति मैत्रेयः।
(मा.धा.)

मुण्ड् (इ), सेट्, सक, प। अत्र मैत्रेयः - पुडि चेत्येके। (धा.क.)

❖ **मुडि [मुण्ड्] मार्जने** **(भ्वा०)**

मुडि मार्जने। (धा.प्र.)(मा.धा.)(धा.क.)

शुद्धिन्यग्भावौ मार्जनम्। खण्डनार्थः परस्मैपदिषु। (मा.धा.)(धा.क.)

मुण्ड् (इ) सेट्, सक, आ। मुण्डयितारः श्राविष्ठायना बधूमूढाम्। (धा.क.)

❖ **मुडि [मुण्ड्] मज्जने** **(भ्वा०)**

मुडि मज्जने। मज्जनं शुद्धिर्न्यग्भावश्च। (क्षी.त.)

❖ **मुण [मुण्] प्रतिज्ञाने** **(तुदा०)**

मुण प्रतिज्ञाने। (धा.प्र.)(क्षी.त.)
(मा.धा.) (धा.क.)

आमन्त्रणे अयं कथादिः दीर्घोपधः सङ्कोचने आकुस्मीयः। (मा.धा.)

मुण, सेट्, सक, प। (धा.क.)

❖ **मुद [मुद्] हर्षे** **(भ्वा०)**

मुद हर्षे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

चुरादौ मुद संसर्गे । (क्षी.त.)

संसर्गार्थोऽयं चुरादौ। (मा.धा.) (धा.क.)

बन्धुप्रभृतिसङ्गमादिजश्चित्तप्रसादो हर्षः।

अकर्मकः। मुद, सेट्, आ। (धा.क.)

❖ मुद [मुद्] संसर्गे (चुरा०)

मुद संसर्गे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भ्वादौ मुद हर्षे । (क्षी.त.)

मुद्, सक, उ। (धा.क.)

❖ मुर [मुर्] संवेष्टने (तुदा०)

मुर संवेष्टने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

मुरा ओषधिविशेषः। (क्षी.त.)

मुर्, सेट्, सक, प। (धा.क.)

❖ मुर्छा [मुर्छ्] मोहसमुच्छ्राययोः (भ्वा०)

मुर्च्छा मोहसमुच्छ्राययोः। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

मुर्च्छ् (आ) सेट्, अक, प। (धा.क.)

❖ मुर्वी [मुर्व्] बन्धने (भ्वा०)

मुर्वी बन्धने।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

मूर्व्, सेट्, सक, प। (धा.क.)

❖ मुष [मुष्] स्तेये (भ्वा०)

मुष स्तेये। (शा.आ.)

❖ मुष [मुष्] हिंसार्थः (भ्वा०)

कष शिष जष झष शष वष मष **मुष** रुष रिष हिंसार्थाः। (क्षी.त.)

❖ मुष [मुष्] स्तेये (क्र्या०)

मुष स्तेये। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

अयं द्विकर्मक इत्युक्तं। (मा.धा.)

अयं द्विकर्म्मक इति केचित्। मुष, सेट्, सक, प।

मुषाण रत्नानि हरामराङ्गनाः इति माघः।
(धा.क.)

❖ मुष [मुष्] मण्डने (दिवा०)

मुष मण्डने। (शा.आ.)

❖ मुस [मुस्] खण्डने (दिवा०)

मुस खण्डने।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

मुष इत्येके। (धा.प्र.)

दन्त्यान्त इति सर्वे। आत्रेयस्तु कातन्त्रे मूर्धन्यान्तोऽयम्। तथा च राघवस्यामुषः कान्तम् इति भट्टिकाव्ये प्रयोगः चेति पाठान्तरमप्याह। (मा.धा.) (धा.क.)

मुस्, सेट्, सक, प। (धा.क.)

❖ मुस्त [मुस्त्] सङ्घाते (चुरा०)

मुस्त सङ्घाते। (क्षी.त.)

❖ मुह [मुह्] वैचित्ये (दिवा०)

मुह वैचित्ये। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

वैचित्त्यमविवेकः। (क्षी.त.)(मा.धा.)

वैचित्त्यं चित्तविकृतिः। मुह्, वेट्, अक, प।
(धा.क.)

❖ मूङ् [मू] बन्धने (भ्वा०)

मूङ् बन्धने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

मू (ङ्) सेट्, सक, आ। (धा.क.)

❖ **मूत्र [मूत्र्] प्रस्रवणे** **(चुरा०)**

मूत्र प्रस्रवणे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

मूत्र, सक, प। (धा.क.)

❖ **मूरी [मूर्] दाहे** **(दिवा०)**

मूरी दाहे। (शा.आ.)

❖ **मूर्च्छा[मूर्छ्] मोहसम्मुच्छ्राययोः** **(भ्वा०)**

मूर्च्छा मोहसमुच्छ्राययोः। (शा.आ.)(धा.क.)

मुर्च्छ् (आ) सेट्, अक, प। (धा.क.)

❖ **मूल [मूल्] प्रतिष्ठायाम्** **(भ्वा०)**

मूल प्रतिष्ठायाम्। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

चुरादौ मूल रोहणे । (क्षी.त.)

मूले जातो मूलकः। पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद् वुन् इति तत्र जात इति विषये वुन्। नक्षत्राणोऽपवादः। उत्पाटनीयं मूलमस्य इति मूल्यो मुद्गः- मूलमस्याबर्हि इत्यौपाधिकात्। अयं रोहणार्थश्चुरादिः। (मा.धा.)

मूल्, सेट्, सक, प। अयं रोहणार्थः चुरादिः। (धा.क.)

❖ **मूल [मूल्] रोहणे** **(चुरा०)**

मूल रोहणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

मूल इति नन्दी। (क्षी.त.)

मूल्, सक, उ। मूलतीति प्रतिष्ठायाम्। (धा.क.)

❖ **मूष [मूष्] स्तेये** **(भ्वा०)**

मूष स्तेये। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

कषादौ मुष हिंसार्थः। क्र्यादौ मुष स्तेये। लूषोऽपीति दुर्गः। (क्षी.त.)

मुष स्तेय इति क्र्यादौ। लूष रूष भूषायामिति सुधाकरः। (मा.धा.)

मूष्, सेट्, सक, प। ह्रस्वोपधः क्र्यादौ। लूष, रूष, भूषायामिति सुधाकरः। (धा.क.)

❖ **मृ [मृ] मरणे** **(भ्वा०)**

मृ मरणे। (शा.आ.)

❖ **मृ [मृ] गतौ** **(जुहो०)**

ॠ **मृ** गतौ - ॠ, अनिट्, सक, प। सम्पूर्वक आत्मनेपदी। (धा.क.)

❖ **मृक्ष [मृक्ष्] सङ्घाते** **(भ्वा०)**

मृक्ष सङ्घाते। (शा.आ.)(मा.धा.)(धा.क.)

मक्ष इत्यप्येके इति मैत्रेयः। (मा.धा.)

मृक्ष्, सेट्, अक, प। (धा.क.)

❖ **मृग [मृग] अन्वेषणे** **(चुरा०)**

मृग अन्वेषणे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

मृग, सक, आ। (धा.क.)

❖ **मृङ् [मृ] प्राणत्यागे** **(तुदा०)**

मृङ् प्राणत्यागे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(धा.क.)

मृ, (ङ्) अनिट्, अक, आ। (धा.क.)

❖ **मृजुष् [मृज्] शुद्धौ** **(अदा०)**

मृजुष् शुद्धौ - मृज् (उ) वेट्, सक, प। (धा.क.)

❖ **मृजूष् [मृज्] शुद्धौ** **(अदा०)**

मृजू शुद्धौ। (धा.प्र) (मा.धा.)

अयं शौचालङ्कारयोर्युजादिः। मार्ज शब्दार्थ इति चुरादौ। (मा.धा.)

❖ मृजू [मृज्] शौचालङ्कारयोः (चुरा०)

मृजू शौचालङ्कारयोः। (धा.प्र.)

मृजू शौचालङ्करणयोः। (मा.धा.)(धा.क.)

मृजू शुद्धौ। (धा.प्र.)

मृज(ऊ) उ। (धा.क.)

❖ मृजूष् [मृज्] शुद्धौ (अदा०)

मृजूष् शुद्धौ। (शा.आ.)(क्षी.त.)(धा.क.)

मृजेरजादौ संक्रमे। चुरादौ मृजूष् शौचालङ्कारयोः। मार्जित्ता रसालेति रूढिः (अमरकोषः)। (क्षी.त.)

मृज् (उ) वेट्, सक, प। (धा.क.)

❖ मृजूष् [मृज्] शौचालङ्कारयोः (चुरा०)

मृजूष् शौचालङ्कारयोः। (क्षी.त.)

❖ मृड [मृड्] सुखने (तुदा०)

मृड सुखने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अयं क्र्यादौ च। (मा.धा.) (धा.क.)

मृड्, सेट्, सक, प। (धा.क.)

❖ मृड [मृड्] क्षोदे सुखे च (क्र्या०)

मृड च। (धा.प्र.)(मा.धा.)(धा.क.)

मृड सुखने - मृडीकं हिरण्यम्। (क्षी.त.)

मृड सुखे चेति केचित्। मृड मुखन इत्यपरे। (मा.धा.)

चात् पूर्वोक्तोऽर्थः। मृड्, सुखे चेति केचित्। मृड्, सेट्, सक, प। (धा.क.)

❖ मृड [मृड्] सुखने (क्र्या०)

मृड सुखने। (शा.आ.)

❖ मृण [मृण्] हिंसायाम् (तुदा०)

मृण हिंसायाम्। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

मृण् सेट्, सक, प। (धा.क.)

❖ मृद [मृद्] क्षोदे (क्र्या०)

मृद क्षोदे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

मृद्, सेट्, सक, प। (धा.क.)

❖ मृदृ [मृद्] उन्दे (भ्वा०)

शृधृ मृदृ उन्दे। (शा.आ.)

❖ मृधु [मृध्] उन्दने (भ्वा०)

शृधु षृधु मृधु उन्दे। (धा.प्र.)

शृधु मृधु उन्दे। (क्षी.त.)(मा.धा.)(धा.क.)

उन्दः क्लेदनम्। (क्षी.त.)

उन्दनं क्लेदनम्। (मा.धा.)

शृध्, मृध् (उ) सेट्, सक, उ। (धा.क.)

❖ मृश [मृश्] आमर्शने (तुदा०)

मृश आमर्शने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

परामृशति आमर्शन इत्युक्तेः सोपसर्गः। (क्षी.त.)

आमर्शनं स्पर्शः । (क्षी.त.)(मा.धा.)

आमर्दन इति क्वचित्। आमर्शनं स्पर्शः। प्रणिधानम्। परामर्शः। चिन्ता। मृश्, सेट्, सक, प। (धा.क.)

❖ मृष [मृष्] तितिक्षायाम् (दिवा०)

मृष तितिक्षायाम्। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

परिपूर्वात् परेर्मृषः इति नित्यं परस्मैपदम्। (शा.आ.)

तुदादौ मृश आमर्शने तालव्यान्तः। (क्षी.त.)

अयमाधृषीयो अपि। (मा.धा.)

मृष्, सेट्, सक, उ। (धा.क.)

❖ मृष [मृष्] तितिक्षायाम् (चुरा०)

मृष तितिक्षायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

केचिद् अमुमदन्तत्वात् चौपजीवनार्थं व्यत्यस्य पठन्ति। (क्षी.त.)

पुरुषकारेणायं स्वरितेदित्युक्त्वा शाकटायनः अयमात्मनेपदीत्युक्तम्। (मा.धा.)(धा.क.)

मृष् सक, उ। (धा.क.)

❖ मृषु [मृष्] सेचने सहने च (भ्वा०)

पृषु वृषु **मृषु** सेचने। (शा.आ.)

पृषु वृषु **मृषु** सेचने। मृषु सहने च। (धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

इतरौ हिंसासंक्लेशनयोश्च। अत्र काश्यपः पृषु हृषु वृषु हिंसासंक्लेशनदानेष्वित्यादि पपाठ। मृषस्तितिक्षायामिति दिवादिः युजादिः च स्वरितेतौ। (मा.धा.) (धा.क.)

सर्वे उदनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनः च। (धा.क.)

❖ मृषु [मृष्] अलीके (भ्वा०)

मृषु अलीके। (शा.आ.)

❖ मॄ [मॄ] हिंसायाम् (क्र्या०)

मॄ मरणे। (शा.आ.)

मॄ इत्येके। (धा.प्र.)

मॄ हिंसायाम्। (क्षी.त.)(मा.धा.) (धा.क.)

मॄ, सेट्, सक, प। (धा.क.)

❖ मेङ् [मेङ्] प्रणिदाने (भ्वा०)

मेङ् प्रणिदाने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)

प्रणिदानं प्रत्यर्पणम्। अदादौ मा माने। ह्वादौ माङ् माने। (क्षी.त.)

प्रणिदानं विनिमयः प्रत्यर्पणम् इत्यपरे वृत्तौ माङ् माने। मेङः अप्युपलक्षणमिति हरदत्तः। (मा.धा.)

मेङ् प्रति(णि)दाने - प्रति(णि)दानं विनिमयः। प्रत्यर्पणमित्यपरे। मे (ङ्) अनिट्, सक, आ। (धा.क.)

❖ मेटृ [मेट्] उन्मादने (भ्वा०)

मेटृ म्रेटृ म्लेटृ उन्मादने। (धा.प्र.)

❖ मेथृ [मेथ्] मेधाहिंसनयोः (भ्वा०)

मिथृ **मेथृ** मेधाहिंसनयोः - **मेथीवद्धोऽपि हि भ्राम्यन् घासग्रासं करोति गौः** (सुभाषितावली)। अमरसिंहस्तु - **पुंसि मेथिः खले दारू न्यस्तं यत् पशुबन्धने।** मिदृ मेदृ इति दुर्गः। (क्षी.त.)

❖ मेदृ [मेद्] मेधाहिंसनयोः (भ्वा०)

मिदृ **मेदृ** मेधाहिंसयोः। (शा.आ.) (धा.प्र.)(मा.धा.)

अयं पाठो दिवादीनाम्। (मा.धा.)

मिदृ, **मेदृ** मेधाहिंसनयोः - अयं पाठो दिवादीनाम्। मिद्, मेद्, सेट्, उ। (धा.क.)

❖ मेधृ [मेध्] मेधाहिंसनयोः सङ्गमे च (भ्वा०)

मिधृ **मेधृ** मेधाहिंसयोः सङ्गमे च। (शा.आ.)

मेधृ सङ्गमे च। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

चकारान्मेधाहिंसनयोः। (क्षी.त.)

मेध्, सेट्, अक, उ। (धा.क.)

❖ मेपृ [मेप्] गतौ (भ्वा०)

मेपृ रेपृ लेपृ गतौ। (क्षी.त.)(मा.धा.)(धा.क.)

अयं पाठः स्वामिनः मैत्रेयस्तु मेपृ लेपृ सेवने। (मा.धा.)(धा.क.)

मेप्, रेप्, लेप् (ऋ) सेट् सक, आ। (धा.क.)

❖ मेवृ [मेव्] सेवने (भ्वा०)

शेवृ षेवृ गेवृ ग्लेवृ पेवृ **मेवृ** म्लेवृ सेचने- सेवृ खेवृ प्लेवृ इत्येके। (धा.प्र.)

एवृ शेवृ षेवृ सेवृ केवृ खेवृ ग्लेवृ पेवृ प्लेवृ **मेवृ** म्लेवृ सेवने। (क्षी.त.)

❖ मोक्ष [मोक्ष्] असने (चुरा०)

मोक्ष असने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

असनं क्षेपः। (धा.प्र.)

मोक्षयति शरान्। (क्षी.त.)

मोक्ष्, सक, उ। (धा.क.)

❖ म्ना [म्ना] अभ्यासे (भ्वा०)

म्ना अभ्यासे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

आम्नायः अम्नाती व्याकरणे। (धा.प्र.)

अभ्यासः पारम्पर्येण वृत्तिः। (क्षी.त.)

म्ना, अनिट्, सक, प। (धा.क.)

❖ म्रक्ष [म्रक्ष्] सङ्घाते (भ्वा०)

म्रक्ष सङ्घाते। (धा.प्र.)

❖ म्रक्ष [म्रक्ष्] म्लेच्छने (चुरा०)

म्रक्ष म्रक्षणे। (धा.प्र.)

म्रक्ष म्लेच्छने। (क्षी.त.)(मा.धा.)(धा.क.)

म्लेच्छनमपशब्दनम् । शपि म्लक्ष म्रक्ष अदन इत्यपि क्वचित्पठ्येते। (मा.धा.) (धा.क.)

म्लच्छो ह वा एष यदपशब्द इति श्रुतेः। म्रक्ष्, अक, उ। (धा.क.)

❖ म्रद [म्रद्] मदने (भ्वा०)

म्रद मदने। क्र्यादौ मृद क्षोदे । (क्षी.त.)

❖ म्रद [म्रद्] मर्दने (भ्वा०)

म्रद मर्दने। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

मृद क्षोद इति ऋकारोपधः क्र्यादौ। (मा.धा.) (धा.क.)

म्रद्, सेट्, सक, आ। (धा.क.)

❖ म्रन्चु [म्रञ्च्] गत्यर्थः (भ्वा०)

वन्चु चन्चु तन्चु त्वन्चु **म्रन्चु** म्लुन्चु ग्रुन्चु ग्लुन्चु म्रुचु म्लुचु गत्यर्थाः - सर्वे उदनुबन्धाः, सेटः, सकर्म्मकाश्च। गत्यर्था इत्यत्र गतौ इति दुर्गः पठति। (धा.क.)

❖ म्रशु [म्रश्] अधःपतने (दिवा०)

भृशु भ्रशु **म्रशु** अधः पतने। (शा.आ.)

❖ म्रुचु [म्रुच्] गत्यर्थः (भ्वा०)

वञ्चु चञ्चु तञ्चु त्वञ्चु ग्रञ्चु ग्लञ्चु स्रञ्चु **म्रुचु** म्लुचु गत्यर्थाः। (शा.आ.)

वञ्चु चञ्चु तञ्चु त्वञ्चु म्रुञ्चु म्लुञ्चु **म्रुचु** म्लुचु गत्यर्थाः। (धा.प्र.)(मा.धा.)

वन्चु चन्चु तन्चु त्वन्चु **म्रुचु** म्लुचु गत्यर्थाः। (क्षी.त.)

वन्चु चन्चु तन्चु त्वन्चु म्रन्चु म्लुन्चु ग्रुन्चु ग्लुन्चु **म्रुचु** म्लुचु गत्यर्थाः - सर्वे उदनुबन्धाः, सेटः, सकर्म्मकाश्च। गत्यर्था इत्यत्र गतौ इति दुर्गः पठति। (धा.क.)

❖ **म्रुञ्चु [म्रुञ्च्] गत्यर्थः** **(भ्वा०)**

वञ्चु चञ्चु तञ्चु त्वञ्चु **म्रुञ्चु** म्लुञ्चु म्रुचु म्लुचु गत्यर्थाः। (धा.प्र.)(मा.धा.)

❖ **म्रेटृ [म्रेट्] उन्मादे** **(भ्वा०)**

मेटृ **म्रेटृ** म्लेटृ उन्मादने। (धा.प्र.)

म्रेटृ म्लेटृ उन्मादे। म्रेडृ इति पठन्ति आम्रेडितम्। मेटृ इति दौर्गाः। (क्षी.त.)

म्रेटृ म्लेडृ म्लेटृ उन्मादे - द्वितीयस्तृतीयान्तः। (मा.धा.)

म्रेटृ म्रेडृ [म्लेडृ] उन्मादे - प्रथमः टान्तः, द्वितीयः डान्तः। म्रेट् (ऋ) म्रेड् [म्लेड्] (ऋ) अक, सेट् प। (धा.क.)

❖ **म्रेडृ [म्रेड्] उन्मादे** **(भ्वा०)**

म्रेटृ **म्रेडृ** [म्लेडृ] उन्मादे - प्रथमः टान्तः, द्वितीयः डान्तः। तथा च - म्रेट् (ऋ) म्रेड् [म्लेड्] (ऋ) अक, सेट् प। (धा.क.)

❖ **म्लुचु [म्लुच्] गत्यर्थः** **(भ्वा०)**

वञ्चु चञ्चु तञ्चु त्वञ्चु म्रुञ्चु म्लुञ्चु म्रुचु **म्लुचु** गत्यर्थाः। (धा.प्र.)(मा.धा.)

वन्चु चन्चु तन्चु त्वन्चु म्रुचु **म्लुचु** गत्यर्थाः (क्षी.त.)

वच प्रलम्भन इति चुरादौ। (मा.धा.)

वन्चु चन्चु तन्चु त्वन्चु म्रन्चु म्लुन्चु ग्रुन्चु ग्लुन्चु म्रुचु **म्लुचु** गत्यर्थाः - सर्वे उदनुबन्धाः, सेटः, सकर्म्मकाश्च। गत्यर्था इत्यत्र गतौ इति दुर्गः पठति। (धा.क.)

❖ **म्लुञ्चु [म्लुञ्च्] गत्यर्थः** **(भ्वा०)**

वञ्चु चञ्चु तञ्चु त्वञ्चु म्रुञ्चु **म्लुञ्चु** म्रुचु म्लुचु गत्यर्थाः। (धा.प्र.)(मा.धा.)

❖ **म्लुन्चु [म्लुञ्च्] गत्यर्थः** **(भ्वा०)**

वन्चु चन्चु तन्चु त्वन्चु म्रन्चु **म्लुन्चु** ग्रुन्चु ग्लुन्चु म्रुचु म्लुचु गत्यर्थाः - सर्वे उदनुबन्धाः, सेटः, सकर्म्मकाश्च। गत्यर्था इत्यत्र गतौ इति दुर्गः पठति। (धा.क.)

❖ **म्लेछ [म्लेच्छ्] अव्यक्ते शब्दे** **(भ्वा०)**

म्लेच्छ अव्यक्तायां वाचि। (धा.प्र.)

म्लेछ अव्यक्तायां वाचि - म्लेच्छनं, म्लेच्छः। म्लेच्छो ह वा एष योऽपशब्दः, न म्लेच्छितवै, नापभाषितवै। क्षुब्धस्वान्तध्वान्त इत्यविस्पष्टे म्लिष्टम् साधु, म्लेच्छितमन्यत्। (क्षी.त.)

म्लेच्छ अव्यक्ते शब्दे - इहाव्यक्तशब्दोस्फुट-शब्दोपशब्दश्च। उक्तं हि पस्पशायाम्- तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्द इति। न म्लेच्छितवा इत्यस्य पर्यायो नापभाषितवा इति कैयटे। अयं चुरादावपि। (मा.धा.)(धा.क.)

म्लेच्छ, सेट्, अक, प। (धा.क.)

❖ म्लेच्छ [म्लेच्छ्] अव्यक्तायां वाचि (चुरा०)

म्लेच्छ अव्यक्तायां वाचि। (धा.प्र.) (क्षी.त.)(मा.धा.)

म्लेछ अव्यक्तायां वाचि। (धा.क.)

म्रक्ष रोषे, म्लेच्छ अव्यक्ते शब्दे इति सिद्धे चन्द्र एतौ नैच्छत्। बहुलमेतन्निदर्शनम् इति सर्वे चुरादौ पाठ्याः इति चान्द्रोऽभिप्रायः। (क्षी.त.)

इहाव्यक्तवागपशब्दनम्। (मा.धा.) (धा.क.)

❖ म्लेटृ [म्लेट्] उन्मादे (भ्वा०)

मेटृ म्रेटृ **म्लेटृ** उन्मादने। (धा.प्र.)

म्रेटृ **म्लेटृ** उन्मादे - म्रेडृ इति पठन्ति आम्रेडितम्। मेटृ इति दौर्गाः। (क्षी.त.)

म्रेटृ **म्लेडृ** म्लेटृ उन्मादे - द्वितीयस्तृतीयान्तः। (मा.धा.)

❖ म्लेडृ [म्लेड्] उन्मादे (भ्वा०)

म्रेटृ **म्लेडृ** म्लेटृ उन्मादे - द्वितीयस्तृतीयान्तः। (मा.धा.)

❖ म्लेवृ [म्लेव्] सेवने (भ्वा०)

शेवृ षेवृ गेवृ ग्लेवृ पेवृ मेवृ **म्लेवृ** सेचने - सेवृ खेवृ प्लेवृ इत्येके। (धा.प्र.)

एवृ शेवृ षेवृ सेवृ केवृ खेवृ ग्लेवृ पेवृ प्लेवृ मेवृ **म्लेवृ** सेवने। (क्षी.त.)

षेवृ गेवृ ग्लेवृ **म्लेवृ** सेचने - शेवृ खेवृ मेवृ इत्यप्येक इति मैत्रेयः। (मा.धा.)

षेवृ गेवृ ग्लेवृ पेवृ **म्लेवृ** सेवने - सेव्, गेव्, ग्लेव्, पेव्, म्लेव्, (ऋ) सेट्, सक, आ। (धा.क.)

❖ म्लै [म्लै] हर्षक्षये (भ्वा०)

म्लै गात्रविनामे। (धा.प्र.)

ग्लै **म्लै** हर्षक्षये। (मा.धा.)(धा.क.)

हर्षक्षयो धातुक्षयः। (मा.धा.)

ग्लै (ग्ला) म्लै (म्ला) अनिट्, अक, प। (धा.क.)

❖ म्लै [म्लै] गात्रविनामे (भ्वा०)

म्लै गात्रविनामे। (शा.आ.)(क्षी.त.)

विनामः कान्तिक्षयः। म्लानः; बाहुलकात् म्लानिः। (क्षी.त.)

❖ यक्ष [यक्ष्] पूजायाम् (चुरा०)

यक्ष पूजायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

यक्ष, सक, आ। (धा.क.)

❖ यज [यज्] देवपूजासङ्गतिकरणदानेषु (भ्वा०)

यज देवपूजायासङ्गतिकरणदानेषु। (शा.आ.) (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

यज्, अनिट्, सक, उ। (धा.क.)

❖ यत [यत्] निकारोपस्कारयोः (चुरा०)

यत निकारोपस्कारयोः। (धा.प्र.) (क्षी.त.)(धा.क.)

निकारः स्वेदनम्। यातना तीव्रवेदना। यातयति राजा छिद्रम्, छादयतीत्यर्थः। भ्वादौ यती प्रयत्ने। निरश्च धान्यधनयोः प्रतिदाने निर्यातयत्यृणम्, शोधयतीत्यर्थः, धान्यधने उपलक्षणम्। (क्षी.त.)

यत निकारोपस्कारयोरिति मैत्रेयः।

क्रियानिघण्टौ तु यत्ने प्रैषे निराकारे पातयेद् अप्युपस्कृतौ इति क्षीरस्वामी। तु निराकारोपसंस्कारयोरिति तु पाठो दृश्यते। निराकारः परिभव इति चाह यातयति। (मा.धा.)

यत्, सेट्, सक, उ। (धा.क.)

❖ यती [यत्] प्रयत्ने (भ्वा०)

यती प्रयत्ने। (शा.आ.)(धा.प्र.) (क्षी.त.) (धा.क.)

चुरादौ यत निकारोपस्कारयोः। (क्षी.त.)(धा.क.)

यत्, सेट्, (ई) अक, आ। (धा.क.)

❖ यत्रि [यन्त्र्] सङ्कोचने (चुरा०)

यत्रि सङ्कोचे। (धा.प्र.)

यत्रि सङ्कोचने। (क्षी.त.)(मा.धा.)(धा.क.)

अत्रापि पूर्ववत् इदित्करणाद्यन्त्रति इत्याद्यपि भवति अत्र आभरणे यतृ इति । अयं पाठः चिरन्तनव्याख्यानेषु न दृश्यते। प्रत्युत यन्त्रणादिशब्दम् अस्मादेव मैत्रेयादयो व्युदपादयन्। अनेकविकरणविचारणे दैवे तद्व्याख्याने पुरुषकारे वा प्रयत्नार्थनिकारार्थवत् सङ्कोचार्थो नोपादीयत इति। (मा.धा.)

यन्त्र् (इ वा णिच्) सक, उ। (धा.क.)

❖ यभ [यभ्] मैथुने (भ्वा०)

यभ मैथुने। (शा.आ.)

यभ विपरीत मैथुने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

विपरीतार्थपूर्वक इत्यर्थः। जभ इत्येके। (धा.प्र.)

जभि च इति दौर्गाः। (क्षी.त.)

विपरीतानुष्ठान इत्यर्थ इति मैत्रेयः। पुरुषकारे तु यभ विपरीतमैथुने इति विपरीत यभन इत्यर्थ इति क्वचित्पठ्यते यभ मैथुन इति। जभेत्येके इति मैत्रेयः। जभ चेति धनपालशाकटायनौ। जप जभेति शाकटायनः। तत्र जभेः पाठो न्यासपदमञ्जरीकृतोरनभिमतः। (मा.धा.)

यभ मैथुन इति दुर्गः पठति। यभ, अनिट् अक, प। जप जभ इति शाकटायनः। (धा.क.)

❖ यम [यम्] उपरमे (भ्वा०)

यम उपरमे। (शा.आ.)(क्षी.त.) (मा.धा.) (धा.क.)

उपरमो निवृत्तिः। (क्षी.त.)

अत्र मैत्रेयः - उदित्त्वमस्य केचिदिच्छन्तीति। (मा.धा.)

उपरमो निवृत्तिः। अत्र मैत्रेयः - उदित्वमस्य केचिदिच्छन्ति। यम्, अनिट्, अक, प। (धा.क.)

❖ यम [यम्] परिवेषणे (चुरा०)

यम च परिवेषणे। (धा.प्र.)(मा.धा.)(धा.क.)

चकारेण मिदित्यनुकृष्यते। (धा.प्र.)

यम परिवेषणे - यम च इति दुर्गः, चकारः किलास्यैव मित्वमाकर्ष्टुम्, चमादीनां मा भूदिति। यम चम इति चन्द्रः पारायणे। यमोऽपरिवेषणे इत्येके पठन्ति। (क्षी.त.)

चकारेण मिदित्यपेक्ष्यत इति मैत्रेयादयः। इह परिवेषणं परिवेष्टनम्। न तु भोजना। नापि वेष्टना। तत्र हि घटादित्वात्सिद्धम्। न च वेष्टनेऽपि घटादित्वेन मित्त्वसिद्धिः

हेतुमद्ण्यन्तस्य तद्विधानात्। तस्य च वेष्टनाऽर्थो न तु वेष्टनमिति यमयति चन्द्रम्। परिवेष्टत इत्यर्थः। अन्यत्र नियामयति क्वचिद् यमोऽपरिवेषण इति पठ्यते। तदनार्षम् चकारेण मिदित्यपेक्ष्यत इति मैत्रेयादिविरोधात्। किं च घटादौ यमोऽपरिवेषण इति परिवेषणादन्यत्र मित्त्वं निषिध्यते। (मा.धा.)

यम्, सक, उ, मित्। **नियमयसि विमार्गप्रस्थितानात्तदण्डः** (शकु.) इति भौवादिकात् साधु। (धा.क.)

❖ यमु [यम्] उपरमे (भ्वा०)

यमु उपरमे - उदित्त्वमस्य केचिन्नेच्छन्ति। (धा.प्र.)

❖ यमोऽपरिवेषणे (भ्वा०)

यमोऽपरिवेषणे। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

परिवेषणे तु यमयति ब्राह्मणान्। (धा.प्र.)

यम उपरमे इत्यस्य परिवेषणादन्यत्रैवार्थे मित्सञ्ज्ञा। परिवेषणे तु यामयति श्राद्धेऽन्नम् आयामयति चन्द्रम्। अत्रैव स्वनोऽवतंसन इति दुर्गः। स्वनयति वस्त्रम्। (क्षी.त.)

यम उपरम इत्यग्रे। अयं परिवेषणादन्यत्र भोजनाद् अन्यत्रामन्तोपि न मित आयामयति। द्राघयति व्यापारयति वेत्यर्थः। परिवेषणे तु यमयति ब्राह्मणान्। (मा.धा.)(धा.क.)

अत्र स्वाम्यादयो नेत्यनपेक्ष्य परिवेषणाद् अन्यत्र मिदिति व्याचक्षते। तद्वृत्तिविरुद्धम्। (मा.धा.)

नियमयतीति प्रयोगोऽयं तत्करोतीति णौ द्रष्टव्यः। (धा.क.)

❖ यय [यय्] प्रापणे (भ्वा०)

अय वय **यय** मय चय तय णय गतौ। (धा.प्र.)

❖ यसु [यस्] प्रयत्ने (दिवा०)

यसु प्रयत्ने। (धा.प्र.)(मा.धा.)(धा.क.)

यसु यत्ने। (क्षी.त.)

यस्, (उ) सेट्, सक। (धा.क.)

❖ या [या] प्रापणे (अदा०)

या प्रापणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

प्रापणमिह गतिः। (मा.धा.) (धा.क.)

या, अनिट्, सक, प। (धा.क.)

❖ यु [यु] मिश्रणेऽमिश्रणे च (अदा०)

यु मिश्रणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

यु अमिश्रण इत्येके। क्र्यादौ युञ् बन्धने युनाति। चुरादौ यु जुगुप्सायाम्। (क्षी.त.)

युञ् बन्धन इति क्र्यादौ। यु जुगुप्सायाम् इत्याकुस्मीयः। (मा.धा.)

यु, सेट्, सक, प। (धा.क.)

❖ यु [यु] जुगुप्सायाम् (चुरा०)

यु जुगुप्सायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

यावयते ब्राह्मणान् जाल्मः। अददौ मिश्रणे। क्र्यादौ बन्धने। यु जु कुत्सायामित्येके। (क्षी.त.)

यु, सक, आ। (धा.क.)

❖ युगि [युङ्ग्] वर्जने (भ्वा०)

युगि जुगि रुगि वर्जने। (धा.प्र.) (मा.धा.)

युगि जुगि वुगि वर्जने। भुगि भर्जन इत्येके। (क्षी.त.)

युगि जुगि वुगि [रुगि] वर्ज्जने। युङ्ग्, जुङ्ग्, वुङ्ग्, (इ) सेट्, सक, प। (धा.क.)

❖ युच्छ [युच्छ्] प्रमादे (भ्वा०)

युच्छ प्रमादे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

युछ्, सेट्, अक, प। (धा.क.)

❖ युज [युज्] समाधौ (दिवा०)

युज समाधौ। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

समाधिश्चित्तवृत्तिनिरोधः। रुधादौ युजिर् योगे। चुरादौ युज पृची सम्पर्चने। (क्षी.त.)

समाधिश्चित्तनिरोधः। (मा.धा.)

युज्, अनिट्, अक, आ। (धा.क.)

❖ युज [युज्] संयमने (चुरा०)

युज पृच संयमने। (धा.प्र.)(मा.धा.)(धा.क.)

युज पृची सम्पर्चने - दिवादौ युज समाधौ, रुधादौ युजिर् योगे। अदादौ पृची सम्पर्के। (क्षी.त.)

युज्, पृच्, सक, उ। (धा.क.)

❖ युजिर् [युज्] योगे (रुधा०)

युजिर् योगे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

युज समाधाविति। (धा.प्र.)

दिवादौ युज समाधौ। (क्षी.त.)

युज् (इर्) अनिट्, सक, उ। दिवादौ चुरादौ चायम्। (धा.क.)

❖ युञ् [यु] बन्धने (क्र्या०)

युञ् बन्धने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अदादौ यु मिश्रणे। चुरादौ यु जुगुप्सायाम्। (क्षी.त.)

यु (ञ्) अनिट्, सक, उ। (धा.क.)

❖ युतृ [युत्] भासने (भ्वा०)

युतृ जुतृ भासने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

कौशिकस्तु ज्योतिःसिद्धये जुतिं ज्युतिं मन्यते,। जुतिरिति दुर्गः। (क्षी.त.)

युत्, जुत् (ऋ) सेट्, अक, आ। (धा.क.)

❖ युध [युध्] सम्प्रहारे (दिवा०)

युध सम्प्रहारे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

सम्प्रहारो हननम्। (क्षी.त.)

युध्, अनिट्, अक, आ। (धा.क.)

❖ युप [युप्] विमोहने (दिवा०)

युप रुप लुप विमोहने। (धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

युप्, रुप्, लुप्, अक, प। (धा.क.)

❖ यूष [यूष्] हिंसायाम् (भ्वा०)

यूष हिंसायाम्। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

पीते यूष्णि निरामयः। (धा.प्र.)

यूषः मांसरसविशेषः। (मा.धा.) (धा.क.)

यूष, सेट्, सक, प। (धा.क.)

❖ येषृ [येष्] प्रयत्ने (भ्वा०)

येषृ प्रयत्ने। (धा.प्र.)(क्षी.त.)

❖ यौटृ [यौट्] बन्धे (भ्वा०)

यौटृ सम्बन्धे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

सम्बन्धः श्लेषः। (क्षी.त.)

यौट् (ऋ) सक, सेट्, प। (धा.क.)

❖ रक [रक्] आस्वादने (चुरा०)

रक लक आस्वादने। (धा.प्र.)

रक लग आस्वादने। (मा.धा.)(धा.क.)

रघ लग इत्येक इति मैत्रेयः । अपरे त्वाद्यमपि रगेति तृतीयान्तं पठन्ति। शङ्कायां सङ्गे च घटादिः। (मा.धा.)

रक्, लग्, सक, उ। शङ्कायां, सङ्गे च घटादिः। (धा.क.)

❖ रक्ष [रक्ष्] पालने (भ्वा०)

रक्ष पालने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अव, रक्ष् पालने इति दुर्गः। रक्ष, सेट्, सक, प। (धा.क.)

❖ रख [रख्] गत्यर्थः (भ्वा०)

उख नख वख मख **रख** लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि **रख** रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्रमिडानां रिखिरपि। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि **रख** रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश। तृतीयान्तास्त्रयोदश। द्रविडास्तु रिखम् अपि पठन्ति। एवमेकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि **रख** रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। द्राविडास्तु रिखमपि पठन्ति, एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ रखि [रङ्ख्] गत्यर्थः (भ्वा०)

उख उखि वख वखि मख मखि नख णख णखि रख **रखि** लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्रमिडानां रिखिरपि - रिङ्खति, रिङ्खणम् स्खलनम्। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख **रखि** लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश।

तृतीयान्तास्त्रयोदश। द्रविडास्तु रिखमपि पठन्ति। एवमेकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख **रखि** लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। द्राविडास्तु रिखमपि पठन्ति, एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ रग [रग्] आस्वादने (चुरा०)

रग लग आस्वादने - अन्यत्रार्थे घटादौ रगे शङ्कायाम्, लगे सङ्गे। रक लकेति चन्द्रः, आसादने इति दुर्गः। (क्षी.त.)

❖ रगि [रङ्ग्] गत्यर्थः (भ्वा०)

उख नख वख मख रख लख वखि लखि इखि ईखि वल्ग **रगि** वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग **रगि** लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्रमिडानां रिखिरपि - रिङ्खति, रिङ्खणम् स्खलनम्। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग **रगि** लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश। तृतीयान्तास्त्रयोदश। द्रविडास्तु रिखमपि पठन्ति। एवमेकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग **रगि** लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। द्राविडास्तु रिखमपि पठन्ति, एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ रगे [रग्] शङ्कायाम् (भ्वा०)

रगे शङ्कायाम्। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

रगे शङ्कायां, लगे सङ्गे च इति दुर्गः पठति। रग्, लग् (ए) सेट्, प। (धा.क.)

❖ रघि [रङ्घ्] गत्यर्थः (भ्वा०)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वक्क वस्क मस्क तिकृ टिकृ टीकृ **रघि** लघि गत्यर्थाः। (धा.प्र.)

ढौकृ त्रौकृ ककि श्वकि त्रकि ष्वष्क मस्क टिकृ टीकृ **रघि** लघि गत्यर्थाः। (शा.आ.)

ककि श्वकि त्रकि ढौकृ त्रौकृ ष्वक्क वस्क मस्क

टिकृ टीकृ **रघि** लघि गत्यर्थाः। (क्षी.त.)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ **रघि** लघि गत्यर्थाः।(मा.धा.)

ककि वकि [मकि] श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ [सेकृ श्रेकृ श्रकृ श्लकि] **रघि** लघि गत्यर्थाः। (धा.क.)

❖ रघि [रङ्घ्] भाषार्थः (चुरा०)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि **रघि** लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

रुठ लजि अजि दसि भृशि कशि रुसि शीक नट पुटि जुचि **रघि** अहि रहि महि भाषार्थाः - इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते रोठयति। (मा.धा.)

रुठ लजि अजि दसि भृशि रुशि रुसि शीक नट पुटि जुचि **रघि** अहि रहि महि इत्येते पञ्चदश स्वामिकाश्यपमतानुसारेण लिख्यन्ते। (धा.क.)

❖ रच [रच] प्रतियत्ने (चुरा०)

रच प्रतियत्ने। (धा.प्र.)(क्षी.त.)(धा.क.)

रच, सक, उ। (धा.क.)

❖ रञ्ज [रञ्ज्] रागे (भ्वा०)

रञ्ज रागे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)

अयं दिवादावपि। (मा.धा.)

❖ रञ्ज [रञ्ज्] रागे (दिवा०)

रञ्ज रागे। (शा.आ.)(क्षी.त.)

❖ रट [रट्] परिभाषणे (भ्वा०)

रट परिभाषणे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

सामन्तात् प्रचारः परिभाषणम्। रट्, सेट्, सक, प। (धा.क.)

❖ रठ [रठ्] परिभाषणे (भ्वा०)

रठ परिभाषणे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

रठ्, सेट्, सक, प। (धा.क.)

❖ रण [रण्] शब्दार्थः (भ्वा०)

अण **रण** मण क्वण जण भण शब्दार्थाः। (शा.आ.)

अण **रण** वण भण मण कण क्वण व्रण भ्रण शब्दार्थाः। (धा.प्र.)

अण **रण** वण मण कण क्वण व्रण भ्रण ध्वण शब्दार्थाः - एते शब्दनक्रियार्थाः। (क्षी.त.)

अण **रण** वण मण कण क्वण व्रण व्रण भ्रण ध्वण शब्दार्थाः। अयं निमीलनार्थः चुरादौ।(मा.धा.)

अन **रण** वण भण मण कण क्वण व्रण भ्रण ध्वण शब्दार्थाः। अण, रण, वण, भण, मण, कण, क्वण, ष्टण, वन, ध्वन, शब्दे, इति दुर्गः। सर्वे सेटः, अकर्म्मकाः, सकर्म्मकाश्च, परस्मैपदिनः। अयं निमीलनार्थश्चुरादौ। (धा.क.)

❖ रण [रण्] गतौ (भ्वा०)

कण **रण** गतौ। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

अण रणेत्यादौ कणरणौ शब्दार्थौ। (धा.प्र.)

अनयोर्गत्यर्थयोर्मित्त्वम्। (क्षी.त.)

कण्, रण्, सेट्, सक, प। (धा.क.)

❖ रद [रद्] विलेखने (भ्वा०)

रद विलेखने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

विलेखनमुत्पाटनम्। (क्षी.त.)

विलेखनं भेदनम्। (मा.धा.)(धा.क.)

रद्, सेट्, सक, प। (धा.क.)

❖ रध [रध्] हिंसासंराधयोः (दिवा०)

रध हिंसासंराद्ध्योः। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

संराद्धिः पाकः। (मा.धा.)(धा.क.)

रध्, वेट्, सक, प। (धा.क.)

❖ रन्ज [रञ्ज्] रागे (भ्वा०)

रन्ज रागे। (मा.धा.)(धा.क.)

रन्ज्, अनिट्, सक, उ। (धा.क.)

❖ रन्ज [रञ्ज्] रागे (दिवा०)

रन्ज रागे। (धा.प्र.)(धा.क.)

रन्ज्, अनिट्, अक, उ। (धा.क.)

❖ रप [रप्] व्यक्तायां वाचि (भ्वा०)

रप लप व्यक्तायां वाचि। (शा.आ.) (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

रप, लप, सेट्, अक, प। अनु - मुहुर्भाषणम्, अनुलापः। अप-अपह्नवः, अपलापः। आ-आलापः। प्र-प्रलापः। सं-सल्लापः, मिथो-भाषणम्। विप्रलापो विरोधोक्ति, सल्लापो भाषणं मिथः। वि - विलापः। रिपुः - रपेरिच्चोपधाया इति उप्रत्यय उपधाया इकारः। (धा.क.)

❖ रफ [रफ्] गतौ (भ्वा०)

पर्प **रफ** रफि अर्ब पर्ब वर्ब मर्ब षर्ब कर्ब खर्ब गर्ब शर्ब चर्ब गतौ। (धा.प्र.)

वर्फ **रफ** रफि अर्ब वर्ब कर्ब खर्ब गर्ब घर्ब शर्ब षर्ब सर्ब चर्ब भर्ब नर्ब गतौ - पञ्चदशैते गत्यर्थाः। (क्षी.त.)

पर्प **रफ** रफि अर्ब पर्व लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः। परौ द्वावपि द्वियीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। (मा.धा.)

पर्प **रफ** रफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः। परौ द्वावपि द्वितीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ रफि [रम्फ्] गतौ (भ्वा०)

पर्प रफ **रफि** अर्ब पर्ब वर्ब मर्ब षर्ब कर्ब खर्ब गर्ब शर्ब चर्ब गतौ। (धा.प्र.)

वर्फ रफ **रफि** अर्ब वर्ब कर्ब खर्ब गर्ब घर्ब शर्ब षर्ब सर्ब चर्ब भर्ब नर्ब गतौ - पञ्चदशैते गत्यर्थाः। (क्षी.त.)

पर्प रफ **रफि** अर्ब पर्व लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः। परौ द्वावपि द्वियीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। (मा.धा.)

पर्प रफ **रफि** अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः। परौ

द्वावपि द्वितीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ रबि [रम्ब्] शब्दे (भ्वा०)

रबि लबि अवस्त्रंसने। (शा.आ.)

रबि लबि अबि शब्दे। (धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

रम्ब्, लम्ब्, अम्ब् (इ) सेट्, अक, आ। (धा.क.)

❖ रभ [रभ्] राभस्ये (भ्वा०)

रभ राभस्ये। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

राभस्यं कार्योपक्रमः। (क्षी.त.)

राभस्यमुपक्रमः। (मा.धा.) (धा.क.)

रभ, अनिट्, सक, आ। प्रायेण अयमाङ्पूर्वकमेव प्रयुज्यते। आ - आरम्भः। आरम्भणम्। परि - परीरम्भः, परिरम्भः - आलिङ्गनम्। सम् - संरम्भः - कोपः। (धा.क.)

❖ रम [रम्] क्रीडायाम् (भ्वा०)

रम क्रीडायाम् - अनुदात्तोऽनुदातेत्। अनिट् आत्मनेपदी च। (क्षी.त.)

रम [रमु] क्रीडायाम् - अनुदात्तोऽनुदात्तेत्।

रम्, अनिट्, अक, आ। अभि - अभिरामः। आ- आरामः। वि - विरामः - घञ्। उप - उपरमः - अप्। अति - रमतिः, स्वर्गः। (धा.क.)

❖ रमु [रम्] क्रीडायाम् (भ्वा०)

रमु क्रीडायाम्। (शा.आ.)(धा.प्र.)(मा.धा.)

अस्योदित्त्वं केचिदिच्छन्ति। (धा.प्र.)

अनुदात्तः अनुदात्तेत्। प्रकृतिग्रहणन्यायेन अनुदात्तोपदेशः। (मा.धा.)(धा.क.)

रम्, अनिट्, अक, आ। अभि - अभिरामः। आ - आरमः। वि - विरामः। उप - उपरमः - अप्। अति - रमतिः, स्वर्गः। (धा.क.)

❖ रय [रय्] गतौ (भ्वा०)

रय गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.(धा.क.)

रय, सेट्, सक, आ। (धा.क.)

❖ रवि [रण्व्] गत्यर्थः (भ्वा०)

रिवि रवि धवि गत्यर्थाः। (धा.प्र.) (मा.धा.)(धा.क.)

रिवि रवि दवि धवि गत्यर्थाः। (क्षी.त.)

रिन्व्, रन्व्, धन्व्, (इ) सेट्, सक, प। (धा.क.)

❖ रस [रस्] शब्दे (भ्वा०)

तुस ह्रस ह्लस **रस** शब्दे। (शा.आ.) (धा.प्र.)(मा.धा.)(धा.क.)

रसितं मेघगर्जनम्। (धा.प्र.)

तुस ह्रस ह्लस रस शब्दार्थाः - चुरादौ रस आस्वादने अदन्तः। (क्षी.त.)

रस इति रस आस्वादनस्नेहनयोरिति चौरादिकस्य ण्यन्तस्य। रसयतीतिहि तस्य व्युत्पत्तिः। (मा.धा.)

तुस्, ह्रस, ह्लस्, रस्, सेट्, अक, प। (धा.क.)

❖ रस [रस] आस्वादनस्नेहनयोः (चुरा०)

रस आस्वादनस्नेहनयोः। (धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

भ्वादौ रस शब्दे। (क्षी.त.)

रस, सक, प। (धा.क.)

❖ रह [रह्] त्यागे (भ्वा०)

रह त्यागे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

रह त्याग इति कथादौ मित्प्रकरणे च चुरादौ। (मा.धा.)

रह्, सेट्, सक, प। अयं कथादौ मित्प्रकरणे च चुरादौ। (धा.क.)

❖ रह [रह्] त्यागे (चुरा०)

रह त्यागे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

इतीह केचित्पठन्ति रहयति। कथादावयं पठिष्यते। तत एव सिद्धेरिह पाठो व्यर्थ इति स्वामी तन्न। (मा.धा.)

रह्, सक, उ। (धा.क.)

❖ रहि [रंह्] गतौ (भ्वा०)

रहि गतौ। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

रंह्, सेट्, सक, प। (धा.क.)

❖ रहि [रंह्] गतौ (चुरा०)

रहि गतौ। (क्षी.त.)

❖ रहि [रंह्] भाषार्थः (चुरा०)

रुठ लजि अजि दसि भृशि कशि रुसि शीक नट पुटि जुचि रघि अहि **रहि** महि भाषार्थाः - इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते रोठयति। (मा.धा.)

रुठ लजि अजि दसि भृशि रुशि रुसि शीक नट पुटि जुचि रघि अहि **रहि** महि इत्येते पञ्चदश स्वामिकाश्यपमतानुसारेण लिख्यन्ते। (धा.क.)

❖ रा [रा] दाने (अदा०)

रा दाने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

रा, अनिट्, सक, प। (धा.क.)

❖ राखृ [राख्] शोषणालमर्थयोः (भ्वा०)

ओखृ **राखृ** लाखृ द्राखृ ध्राखृ शोषणालमर्थयोः। (धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

शोषणं स्नेहराहित्यम्। अलमर्थः - भूषणम्, पर्याप्तिः, वारणं, सामर्थ्यञ्च। पञ्चैव ऋदनुबन्धाः, परस्मैपदिनः, सेटश्च। (धा.क.)

❖ राघृ [राघ्] सामर्थ्ये (भ्वा०)

राघृ लाघृ द्राघृ सामर्थ्ये। (धा.प्र.)

राघृ लाघृ द्राघृ ध्राघृ सामर्थ्ये - द्राघिमन्ये न पेठुः। (क्षी.त.)

राघृ लाघृ सामर्थ्ये। (मा.धा.)(धा.क.)

राघ् (ऋ) सेट्, अक, आ। (धा.क.)

❖ राजृ [राज्] दीप्तौ (भ्वा०)

राजृ दीप्तौ। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

उदात्तः स्वरितेत्। (क्षी.त.) (मा.धा.) (धा.क.)

राज् (ऋ) सेट्, अक, उ। (धा.क.)

❖ राध [राध्] वृद्धौ (दिवा०)

राध साध संसिद्धौ। राधोकर्मकाद्वृद्धावेव। हिंसायां तु राधो हिंसायाम्। (शा.आ.)

❖ राध [राध्] संसिद्धौ (स्वा०)

राध साध संसिद्धौ। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

राध षाध संसिद्धौ - संसिद्धिः फलसम्पत्तिः। (क्षी.त)

राध्, साध्, अनिट्, अक, प। (धा.क.)

❖ **राधोऽकर्मकाद्वृद्धावेव (दिवा०)**

राधोऽकर्मकाद्वृद्धावेव। (धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

वृद्धिग्रहणमकर्मकक्रियोपलक्षणम्। अत एव सकर्मकक्रियाव्यावृत्तयेऽकर्मादित्युक्तम्। एवकारेण च सकर्मकक्रियाव्यावृत्तिर्द्योत्यते। (धा.प्र.)

वृद्धिग्रहणं तु उदाहरणदर्शनार्थम्। यथा वृद्धावकर्मक इति एवकारश्च एवमर्थात्सिद्धायाः सकर्मकक्रियाव्यावृत्तेरनुवादमात्रम्। काश्यपः तु यथाश्रुतमेवान्वयं वदन् अथावधारणार्थेन एवकारेण अन्यत्रार्थनिर्देशेष्वनियमो ज्ञाप्यते इति। तत् कर्मवत् सूत्रभाष्ये राध्यति। माघप्रयोगश्चोपपद्यते।

नू दूये सात्वतीसूनुर्यन्मह्यमपराध्यति।
क्रियासमभिहारेण विराध्यन्तं क्षमेत कः।

इत्यत्र हि द्रोहोऽर्थः। राधे हिंसायाम् इत्येत्वाभ्यासलोपौ दैवादिकस्य। यतः हिंसार्थस्य सकर्मत्वाद् दैवादिकत्वमेव न भवति अयं स्वादिश्चुरादिश्च। (मा.धा.)

राध्, अनिट्, अक, प। **न दूये सात्वतीसूनुः यन्मह्यमपराध्यतीति माघे द्रोहोऽर्थः।** (धा.क.)

❖ **रासृ [रास्] शब्दे (भ्वा०)**

रासृ शब्दे। (क्षी.त.)।

णासृ रासृ शब्दे (धा.प्र.) (मा.धा.)(धा.क.)

नास्, रास् (ऋ) सेट्, अक, आ। रासः क्रीडाविशेषः। (धा.क.)

❖ **रासृ [रास्] दीप्तौ (भ्वा०)**

रासृ दीप्तौ। (शा.आ.)

❖ **रि [रि] हिंसायाम् (स्वा०)**

रि क्षि चिरि जिरि दाश दृ हिंसायाम्।
(धा.प्र.)(मा.धा.)

अयं भाषायामपीत्यात्रेयमैत्रेयादयः प्रयुज्यते च। शाकटायनादयस्तु छान्दसत्वमेवाहुः। दुर्गः तिक तिग षघ रि क्षि चिरि जिरि दाश् दृ दुङ् हिंसायां। छान्दसाश्चामी परस्मैभाषा उदात्ता इति। (मा.धा.)

रि क्षि चिरि जिरि दाशृ दृ हिंसायाम् - रि, क्षि, चिरि, जिरि, दाश्, दृ, सेट्, अनिट्, सक, प। अयं भाषायामपि। (धा.क.)

❖ **रि [रि] गतौ (तुदा०)**

रि पि गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

रि, पि, अनिट्, सक, प। (धा.क.)

❖ **रिगि [रिङ्ग्] गत्यर्थः (भ्वा०)**

उख नख वख मख रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि **रिगि** लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि **रिगि** लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख

रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश। तृतीयान्तास्त्रयोदश। एवम् एकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ **रिच [रिच्] वियोजनसम्पर्चनयोः(चुरा०)**

रिच वियोजनसम्पर्चनयोः। (धा.प्र.)

(क्षी.त.)(मा.धा.)(धा.क.)

रिच्, सक, उ। (धा.क.)

❖ **रिचिर् [रिच्] विरेचने (रुधा०)**

रिचिर् विरेचने। (शा.आ.)(धा.प्र.)

(क्षी.त.)(मा.धा.) (धा.क.)

रिणक्ति आत्मानम्। रिणक्ति यजमानम्।

(शा.आ.)

विरेचनं निःसारणम्। चुरादौ रिच वियोजनसम्पर्चनयोः। (क्षी.त.)

पृषोदरादयः रिच विरेनसम्पर्चनयोः इति चुरादौ। (मा.धा.)

रिच् (इर्) अनिट्, अक, उ। वि - विरेकः। अति - अतिरेकः। व्यति - व्यतिरेकः, अतिशयः। उद् - उद्रेकः। (धा.क.)

❖ **रिफ [रिफ्] कत्थनयुद्धनिन्दाहिंसादानेषु (तुदा०)**

रिफ कत्थनयुद्धहिंसादानेषु। (धा.प्र.)

रिफ कत्थनयुद्धनिन्दाहिंसादानेषु - रिहीति द्रमिडा इति स्वामी। **शिशुं न विप्रामतिभीरिहन्ति** इति। (मा.धा.)

रिफ कत्थनयुद्धनिन्दाहिंसादानेषु - युद्धेति भावे निष्ठा। कत्थनं श्लाघा। रिफ्, सेट्, [सक/अक] प। अत्र रिह इति द्रविडाः पठन्ति । शिशु न विप्रामतिभीरिहन्तीति। (धा.क.)

❖ **रिवि [रिण्व्] गत्यर्थः (भ्वा०)**

रिवि रवि धवि गत्यर्थाः। (धा.प्र.)

(मा.धा.)(धा.क.)

रिवि रवि दवि धवि गत्यर्थाः। (क्षी.त.)

रिन्व्, रन्व्, धन्व्, (इ) सेट्, सक, प। (धा.क.)

❖ **रिश [रिश्] हिंसायाम् (तुदा०)**

रुश रिश हिंसायाम्। (धा.प्र.)(क्षी.त.)

(मा.धा.)(धा.क.)

भ्वादौ मूर्धन्यान्तौ - दिवादौ रुष रोषे। (क्षी.त.)

रुश, रिश, अनिट् सक, प। (धा.क.)

❖ **रिष [रिष्] हिंसार्थः (भ्वा०)**

कष शिष जष झष शष वष मष रुष रिष हिंसार्थाः। (धा.प्र.)

कष शिष जष झष शष वष मष मुष रुष रिष

हिंसार्थाः - चुरादौ शिष असर्वोपयोगे। (क्षी.त.)

कष खष शिष जष झष शष वष मष रुष **रिष** हिंसार्थाः - तृतीयषष्ठौ तालव्योष्मादी। सप्तमो दन्त्योष्ठ्यादिः। हिंसार्थत्वे यदि दृश्यते तदा धातूनाम् अनेकार्थत्वाद् भविष्यति। (मा.धा.)

कष खष शिष जष झष शष वष मष रुष **रिष** हिंसार्थाः - तृतीयषष्ठो तालव्योष्मादी। सप्तमो दन्त्योष्ठादिः। सर्वे सकर्मकाः परस्मैपदिनश्च। हिंसार्थत्वं यदि दृश्यते, तदा धातुनामनेकार्थत्वात् भविष्यति। (धा.क.)

❖ **री [री] गतिरेषणयोः** **(क्र्या०)**

री गतिरेषणयोः। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

रेषणं हिंसा। दिवादौ रीङ् स्रवणे। (क्षी.त.)

रेषणं वृकशब्दः। (मा.धा.)(धा.क.)

री, अनिट्, सक प। (धा.क.)

❖ **रीङ् [री] श्रवणे** **(दिवा०)**

रीङ् स्रवणे। (शा.आ.)(क्षी.त.)(धा.क.)

रीङ् श्रवणे। (धा.प्र.)(मा.धा.)

क्र्यादौ री गतिरेषणयोः । (क्षी.त.)

रीणशब्दः कर्णपर्यायः कथितः। भट्टिकाव्ये च **वृन्दयमेके नारीणामपनुनुदुर्न देहखेदान् नारीणामलसलिलाहिरण्यवाप्यः** इत्यत्र अरीणमश्रुतममलं सलिलमिति श्रवणे व्युत्पादितम्। री गतिरेषणयोः इति क्र्यादौ। (मा.धा.)

री (ङ्) अनिट्, सक, आ। (धा.क.)

❖ **रु [रु] शब्दे** **(अदा०)**

रु शब्दे। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

तुरुस्तुशम्यमः इत्यत्र तु इति सौत्रो धातुरिति। अत्र न्यासे वृद्ध्यर्थ इत्येके। हिंसार्थ इत्यपरे। वर्द्धमानश्च तु वृद्धिहिंसयोरदादौ स्मर्यते। हरदत्तस्तु वृद्ध्यर्थत्वमभिधाय गत्यर्थ इत्येके, हिंसार्थ इत्यपरे इति। त्रिष्वपीति बोधिन्यासे। आपिशलास्तु - तुरुस्तुशम्यमः सार्वधातुके छन्दसि इति पठन्तः सर्वत्रेदं छान्दसमाहुः। रवत इति गतिरेषणयोः शपि। (मा.धा.)

रु, सेट्, अक, प। (धा.क.)

❖ **रुक्ष [रुक्ष्] पारुष्ये** **(चुरा०)**

रुक्ष पारुष्ये। (मा.धा.) (धा.क.)

रुक्ष, अक, प। (धा.क.)

❖ **रुगि [रुङ्ग्] वर्जने** **(भ्वा०)**

युगि जुगि **रुगि** वर्जने। (धा.प्र.)

❖ **रुङ् [रु] गतिरेषणयोः** **(भ्वा०)**

रुङ् गतिरेषणयोः। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

रेषणं हिंसाशब्दः। अदादौ रु शब्दे । (क्षी.त.)

रु (ङ्) अनिट्, सक, आ। (धा.क.)

❖ **रुच [रुच्] दीप्तावभिप्रीतौ च** **(भ्वा०)**

रुच दीप्तौ प्रीत्यां च। (शा.आ.)

रुच दीप्तौ अभिप्रीत्याञ्च। (धा.प्र.)

रुच दीप्तावभिप्रीतौ च। (क्षी.त.) (मा.धा.)(धा.क.)

अभिप्रीतिरभिलाषः। अस्त्यर्थे रुचिरम्। (क्षी.त.)

द्युत, शुभ, रुच, दीप्ताविति दुर्गः पठति। रुच्, सेट्, अक, आ। (धा.क.)

❖ रुज [रुज्] हिंसायाम् (चुरा०)

रुज हिंसायाम्। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तुदादौ रुजो भङ्गे। (क्षी.त.)

रुज्, सक, उ। (धा.क.)

❖ रुजो [रुज्] भङ्गे (तुदा०)

रुजो भङ्गे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चोरस्य रुजति रोगः। हिंसार्थोऽयं चुरादौ। (मा.धा.)

रुज्, (ओ) अनिट्, सक, प। निष्पूर्वोऽयं व्याधिप्रशमने। (धा.क.)

❖ रुट [रुट्] प्रतिघाते (भ्वा०)

रुट लुट लुठ प्रतीघाते। (धा.प्र.)(मा.धा.)(धा.क.)

आद्यौ प्रथमान्तौ। अन्त्यो द्वितीयान्तः। अयं पाठो देवमैत्रेयादीनाम्। हरियोगिनस्तु द्वावेव। कैयटे द्वितीयान्तो पठितौ। क्षीरस्वामी त्वेवं पठित्वा आह। रुट लुट इत्येके। (मा.धा.)

आदौ, प्रथमान्तौ, अन्त्यो द्वितीयान्तः। रुट्, लुट्, लुठ्, सेट्, अक, आ। (धा.क.)

❖ रुट [रुट्] दीप्तौ (भ्वा०)

रुट लुट दीप्तौ। (शा.आ.)

रुट दीप्तौ। (क्षी.त.)

❖ रुट [रुट्] रोषे (चुरा०)

रुट रोषे - रुषेत्येनञ्चन्द्रो मत्वा भ्वादिदिवादिभ्यां सिद्धमाह रुट उपघाते। रुठ इत्येके। (क्षी.त.)

❖ रुट [रुट्] भासार्थः (चुरा०)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः - एते सकर्मका भासार्था णिचम् उत्पादयन्ति। (क्षी.त.)

❖ रुटि [रुण्ट्] स्तेये (भ्वा०)

रुटि लुटि स्तेयकरणे। (शा.आ.)

रुटि लुटि स्तेये। (धा.प्र.)(क्षी.त.)

रुठि लुठि इत्येके। (क्षी.त.)

❖ रुठ [रुठ्] उपघाते (भ्वा०)

रुठ लुठ उपतापे। (शा.आ.)

रुठ लुठ उपघाते। (धा.प्र.)

रुठ लुठ प्रतीघाते - रुट लुट इत्येके। (क्षी.त.)

रुठ लुठ उठ उपघाते - अत्र मैत्रेयः उठेत्यप्येक इति। धनपालशाकटायनौ तु रुठलुठेत्येव पेठतुः। क्षीरस्वामी तु उठि पठित्वा रुठ लुठ इत्यपि दौर्गा इत्याह।अयं श्लेषणे तुदादिः। रुठि लुठि गतावित्यग्रे इदितौ। (मा.धा.)

रुठ लुठ उठ उपघाते - रुठ्, लुठ्, उठ्, सेट्, सक, प। अत्र मैत्रेयः। उठेत्यप्येक इति।

धनपालशाकटायनौ तु रुठलुठेत्येव पेठतुः। क्षीरस्वामी तु उठिं पठित्वा रुठ लुठ इत्यपि दुर्गादय इत्याह। रुठि, लुठि गतावित्यग्रे इदितौ। (धा.क.)

❖ रुठ [रुठ्] प्रतीघाते (भ्वा०)

रुठ लुठ प्रतीघाते। (शा.आ.)(क्षी.त.)

रुट लुट इत्येके, बाधृ रोटने इति लिङ्गात्। (क्षी.त.)

❖ रुठ [रुठ्] भाषार्थः (चुरा०)

रुठ लजि अजि दसि भृशि कशि रुसि शीक नट पुटि जुचि रघि अहि रहि महि भाषार्थाः। इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते रोठयति। (मा.धा.)

रुठ लजि अजि दसि भृशि रुशि रुसि शीक नट पुटि जुचि रघि अहि रहि महि इत्येते पञ्चदश स्वामिकाश्यपमतानुसारेण लिख्यन्ते। (धा.क.)

❖ रुठि [रुण्ठ्] स्तेये (भ्वा०)

रुठि लुठि स्तेये। (मा.धा.)(धा.क.)

रुठि लुठीत्येक इति क्षीरस्वामी। शाकटायनः तृतीयान्तौ पपाठ। रुठ रोषण इति चुरादौ। तत्र रुठेत्येके। (मा.धा.)

रुण्ठ् (इ) लुण्ठ् (इ) सेट्, सक, प। रुठ रोषण इति चुरादौ। (धा.क.)

❖ रुठि [रुण्ठ्] गतौ (भ्वा०)

रुठि लुठि गतौ। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

चुरादौ स्तेये । (क्षी.त.)

अर्थभेदात्पुनः पाठः। (मा.धा.) (धा.क.)

रुण्ठ्, लुण्ठ् (इ) सेट्, सक, प। (धा.क.)

❖ रुठि [रुण्ठ्] आलस्ये गतिप्रतिघाते च (भ्वा०)

रुठि आलस्ये गतिप्रतिघाते च। (क्षी.त.)

❖ रुदिर् [रुद्] अश्रुविमोचने (अदा०)

रुदिर् अश्रुविमोचने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

रुद्, (इर्) सेट्, अक, प। शतं रुद्रा देवता अस्य शतरुद्रियम्, शतरुद्रीयम्। (धा.क.)

❖ रुधिर् [रुध्] आवरणे (रुधा०)

रुधिर् आवरणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

आवरणं व्याप्तिः। (क्षी.त.)

अयं द्विकर्मकः। व्रजं गां रुणद्धि। केचिद् उपशब्दस्य पीडयति नैव सम्बन्धम् आहुः। भट्टिकारस्य तूपोपसर्गग्रहणम् अतन्त्रम् इति प्रागेवोक्तम् रोधः। (मा.धा.)

रुध्, (इर्), अनिट्, सक, उ। अयं द्विकर्म्मकोऽपि। अव अवरोधः। वि - विरोधः। आ - आवरणम्। उप - निव, निविरणम्, निषेधः, आच्छादनम्। नि - निरोधः, निरसनद्। अनुरुध्यत इति दिवादौ। (धा.क.)

❖ रुप [रुप्] विमोहने (दिवा०)

युप रुप लुप विमोहने। (धा.प्र.)(क्षी.त.) (मा.धा.)(मा.धा.)

तुदादौ लुप्लृ छेदने । (क्षी.त.)

युप्, रुप्, लुप्, अक, प। (धा.क.)

❖ **रुश [रुश्] हिंसायाम्** **(तुदा०)**

रुश रिश हिंसायाम्। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तालव्यान्तौ, प्रस्तावाद् भ्वादौ मूर्धन्यान्तौ। दिवादौ रुष रोषे । (क्षी.त.)

रुश्, रिश्, अनिट् सक, प। (धा.क.)

❖ **रुशि [रुंश्] भाषार्थः** **(चुरा०)**

रुठ लजि अजि दसि भृशि **रुशि** रुसि शीक नट पुटि जुचि रघि अहि रहि महि इत्येते पञ्चदश स्वामिकाश्यपमतानुसारेण लिख्यन्ते। (धा.क.)

❖ **रुष [रुष्] हिंसार्थः** **(भ्वा०)**

कष शिष जिष झष वष **रुष** ऋष हिंसार्थाः। (शा.आ.)

कष शिष जष झष शष वष मष **रुष** रिष हिंसार्थाः। (धा.प्र.)

कष शिष जष झष शष वष मष मुष **रुष** रिष हिंसार्थाः। (क्षी.त.)

कष खष शिष जष झष शष वष मष **रुष** रिष हिंसार्थाः - तृतीयषष्ठौ तालव्योष्मादी। सप्तमो दन्त्योष्ठ्यादिः। हिंसार्थत्वे यदि दृश्यते तदा धातूनामनेकार्थत्वाद्भविष्यति। (मा.धा.)

कष खष शिष जष झष शष वष मष **रुष** रिष हिंसार्थाः - तृतीयषष्ठो तालव्योष्मादी। सप्तमो दन्त्योष्ठादिः। सर्वे सकर्मकाः परस्मैपदिनः च। रुष् (तादौ वेट्)- रुष रोष इति दिवादौ चुरादौ च। रेषत इति शब्दे गतः। हिंसार्थत्वं यदि दृश्यते, तदा धातुनामनेकार्थत्वाद्भविष्यति। (धा.क.)

❖ **रुष [रुष्] हिंसायाम्** **(दिवा०)**

रुष ऋष हिंसायाम्। (शा.आ.)

❖ **रुष [रुष्] रोषे** **(दिवा०)**

रुष रोषे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भ्वादौ रुष हिंसायाम्। (क्षी.त.)

केचित् रिष हिंसायां चेति पठन्ति। न रिष्यति न व्यथते इत्यादयश्च प्रयोगा दृश्यन्ते आत्रेय-मैत्रेयादयस्तु न पेठुः। (मा.धा.)

रुष्, सेट्, अक प। (धा.क.)

❖ **रुष [रुष्] गतौ** **(दिवा०)**

रुष गतौ। (शा.आ.)

❖ **रुष [रुष्] रोषे** **(चुरा०)**

रुष रोषे। (धा.प्र.)(धा.प्र.)(मा.धा.)(धा.क.)

रुट इत्येके। (धा.प्र.)

रुड् इत्येक इति मैत्रेये रक्षितः। (मा.धा.)

रुष्, अक, उ। (धा.क.)

❖ **रुसि [रुंस्] भाषार्थः** **(चुरा०)**

रुठ लजि अजि दसि भृशि कशि **रुसि** शीक नट पुटि जुचि रघि अहि रहि महि भाषार्थाः - इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते रोठयति। (मा.धा.)

रुठ लजि अजि दसि भृशि रुशि **रुसि** शीक नट पुटि जुचि रघि अहि रहि महि इत्येते पञ्चदश स्वामिकाश्यपमतानुसारेण लिख्यन्ते। (धा.क.)

❖ **रुह [रुह्] बीजजन्मनि प्रादुर्भावे च** **(भ्वा०)**

रुह बीजजन्मनि। (शा.आ.)(क्षी.त.)

रुह जन्मनि प्रादुर्भावे। (धा.प्र.)

बीजस्य जन्माङ्कुरोत्पत्तिः। (क्षी.त.)

अनुदात्ता उदात्तेतः। (मा.धा.) (धा.क.)

रुह जन्मनि प्रादुर्भाव इति दुर्गः पठति। रुह्, अनिट्, अक, प। । आरूढो वृक्षम्, आरूढो वृक्षः। अधि - अधिरोहणम्। आ- आरोहणम्। अव - अवरोहणम्। प्र - प्ररोहणम्- उत्पत्तिः। (धा.क.)

❖ **रूक्ष [रूक्ष] पारुष्ये** **(चुरा०)**

रूक्ष पारुष्ये। (धा.प्र.)(क्षी.त.)

❖ **रूप [रूप] रूपक्रियायाम्** **(चुरा०)**

रूप रूपक्रियायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

रूपक्रिया राजमुद्रादिरूपस्य करणम्। (क्षी.त.)

रूपस्य दर्शनं करणं वा रूपक्रियेति स्वामी। निरूपयति इति अनेकार्थत्वाद्विचारणे। (मा.धा.) (धा.क.)

रूप, अक, प। (धा.क.)

❖ **रेकृ [रेक्] शङ्कायाम्** **(भ्वा०)**

रेकृ शङ्कायाम्। (धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

शङ्कात्र संशयः। आरेकं संशयं प्राहुः। (क्षी.त.)

आङ्पूर्वः संशये आरेकं संशयं प्राहुरिति वचनात् रेकते इत्यादि। (मा.धा.)

रेकृ शकि शङ्कायामिति। भयं संशयश्च शङ्का इति रमानाथः। रेफादिरयम् आङ् पूर्वः संशये आरेकं संशयं प्राहुरिति वचनात्। रेक्, (ऋ) सेट्, अक, आ। (धा.क.)

❖ **रेजृ [रेज्] दीप्तौ** **(भ्वा०)**

एजृ रेजृ भाजृ दीप्तौ। (शा.आ.)

❖ **रेटृ [रेट्] परिभाषणे** **(भ्वा०)**

रेटृ परिभाषणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

रेट, (ऋ) सेट्, सक, उ। अनेनैव कर्क्करेटुकरेटू व्युत्पादितावमरटीकायाम्। (धा.क.)

❖ **रेपृ [रेप्] गतौ शब्दे च।** **(भ्वा०)**

मेपृ रेपृ लेपृ गतौ। (मा.धा.)(धा.क.)

मेपृ रेपृ लेपृ गतौ। रेपृ शब्दे च। (क्षी.त.)

अयं पाठः स्वामिनः मैत्रेयस्तु मेपृ लेपृ सेवने। रेपृ प्लवगतावित्याह मेषते। क्वचित्पठ्येते हेपृ धेपृ इति च। (मा.धा.)

अयं पाठः स्वामिनः। मैत्रेयस्तु मेपृ, लेपृ सेवने, रेपृ प्लवगतावित्याह। मेप्, रेप्, लेप् (ऋ) सेट् सक, आ। क्वचित् पठ्यते - हेपृ रेपृ इति च। (धा.क.)

❖ **रेबृ [रेब्] गतौ** **(भ्वा०)**

रेबृ प्लेबृ गतौ। (धा.प्र.)

❖ **रेभृ [रेभ्] शब्दे** **(भ्वा०)**

रेभृ शब्दे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अभि रभि शब्द इति दुर्गः। करम्भो दधिसक्तवः। (क्षी.त.)

अभिरभी च क्वचित्पठ्येते। (मा.धा.) (धा.क.)

रेभ् (ऋ) सेट्, अक, आ। (धा.क.)

❖ रेवृ [रेव्] गतौ (भ्वा०)

रेवृ प्लेवृ गतौ - रेबृ प्लेबृ पवर्गे पठितौ स्पर्शान्तौ, इमौ तु यरलवान्तवर्गे पठितौ। ईषत्स्पृष्टौ वेदितव्यौ। (धा.प्र.)

❖ रेवृ [रेव्] प्लवगतौ (भ्वा०)

रेवृ प्लुतिगतौ (क्षी.त.)(मा.धा.)(धा.क.)

प्लुतिभिर्गतौ। (क्षी.त.)

प्लवगतिः प्लुतिगतिः। अत्र मैत्रेयः प्लव इति धात्वतरमाह। प्लव इत्येके। (मा.धा.)

रेव् (ऋ) सेट्, अक, आ। प्लवगतिः प्लुतगतिः। (धा.क.)

❖ रेषृ [रेष्] अव्यक्ते शब्दे (भ्वा०)

रेषृ हेषृ अव्यक्ते शब्दे। (धा.प्र.) (मा.धा.)(धा.क.)

रेष्, हेष् (ऋ) सेट्, अक, आ। (धा.क.)

❖ रेषृ [रेष्] गतौ (भ्वा०)

रेषृ णेषृ एषृ प्रेषृ गतौ - सर्वे ऋदनुबन्धाः, सेटः, सकर्मकाः, आत्मनेपदिनः च। (धा.क.)

❖ रै [रै] शब्दे (भ्वा०)

कै गै रै शब्दे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

अदादौ रा दाने। (क्षी.त.)

रा दान इत्यदादौ। (मा.धा.)

रै (रा) अनिट्, अक, प। रा दान इत्यदादौ। (धा.क.)

❖ रोडृ [रोड्] उन्मादे (भ्वा०)

रोडृ लोडृ उन्मादने। (धा.प्र.)

रोडृ लोडृ - उन्मादने उन्मादे। (मा.धा.)

रोडृ लोडृ उन्मादे - रोड्, लोड् (ऋ) सेट्, अक, प। (धा.क.)

❖ रौडृ [रौड्] अनादरे (भ्वा०)

रौडृ अनादरे। (धा.प्र.)(क्षी.त.)

❖ लक [लक्] आस्वादने (चुरा०)

रक **लक** आस्वादने - रघ लग इत्येके। (धा.प्र.)

❖ लक्ष [लक्ष्] दर्शनाङ्कनयोः (चुरा०)

लक्ष दर्शनाङ्कनयोः। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

लक्ष्मीत्यपि केचित्। स्वरितेत्त्वमस्य केचित् प्रतिपद्यन्ते। (धा.प्र.)

शम लक्ष आलोचने इत्याकुस्माद् आत्मनेपदार्थः पाठः। (क्षी.त.)

शम लक्ष आलोचन इत्याकुस्मीयो भविष्यति। (मा.धा.)

लक्ष, सक, उ। लक्ष्यमधीते वेद वा लाक्षिकः, लाक्षणिकोऽप्येवम्। शम लक्षेत्यग्रे। (धा.क.)

❖ लक्ष [लक्ष्] आलोचने (चुरा०)

शम **लक्ष** आलोचने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

शम्, लक्ष, सक, आ। (धा.क.)

❖ लख [लख्] गत्यर्थः (भ्वा०)

उख नख वख मख रख **लख** वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि **लख** लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि **लख** लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश। तृतीयान्ताः त्रयोदश। एवमेकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि **लख** लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ लखि [लङ्ख्] गत्यर्थः (भ्वा०)

उख नख वख मख रख लख वखि **लखि** इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख **लखि** इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख **लखि** इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश। तृतीयान्ताः त्रयोदश। एवमेकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख **लखि** इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ लग [लग्] आस्वादने (चुरा०)

रग **लग** आस्वादने (क्षी.त.)(मा.धा.)(धा.क.)

अन्यत्रार्थे घटादी रगे शङ्कायाम्, लगे सङ्गे। रक लकेति चन्द्रः, आसादने इति दुर्गः। (क्षी.त.)

रघ लग इत्येक इति मैत्रेयः। अपरे त्वाद्यमपि रगेति तृतीयान्तं पठन्ति। (मा.धा.)

रक्, लग्, सक, उ। रघ लग इत्येक इति मैत्रेयः। अपरे त्वाद्यमपि रगेति तृतीयान्तमपि पठन्ति। शङ्कायाम्, सङ्गे च घटादिः। (धा.क.)

❖ लगि [लङ्ग्] गत्यर्थः (भ्वा०)

उख नख वख मख रख लख वखि लखि इखि

ईखि वल्ग रगि वगि **लगि** अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि **लगि** अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि **लगि** अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश। तृतीयान्ताः त्रयोदश। एवमेकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि **लगि** अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि वल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ लगे [लग्] सङ्गे (भ्वा०)

लगे सङ्गे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

लग्नं लगितम् संसक्तमित्यर्थः। (धा.प्र.)

सक्ते लग्नः साधुः, लगितोऽन्यः। (क्षी.त.)

रगे शङ्कायां, लगे सङ्गे च इति दुर्गः पठति। लग् (ए) सेट्, प। (धा.क.)

❖ लघि [लङ्घ्] शोषणे (भ्वा०)

लघि शोषणे - गत्यर्थस्य आत्मनेपदिनः। अस्यापि गतौ वृत्तिर्दृश्यते। तथा च भट्टिः अन्ये चालङ्घिषुः शैलान् गुहास्वन्ये न्यनेषत। (धा.प्र.)

❖ लघि [लङ्घ्] गत्यर्थः भोजननिवृत्तौ (भ्वा०)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वक्क वस्क मस्क तिकृ टिकृ टीकृ रघि **लघि** गत्यर्थाः। (धा.प्र.)

ढौकृ त्रौकृ ककि श्वकि त्रकि ष्वष्क मस्क टिकृ टीकृ रघि **लघि** गत्यर्थाः। (शा.आ.)

ककि श्वकि त्रकि ढौकृ त्रौकृ ष्वक्क वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। लघि भोजननिवृत्तौ च। चुरादौ भासार्थौ। चाद् गत्यर्थः - नवज्वरो लङ्घनीयः। (क्षी.त.)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ रघि **लघि** गत्यर्थाः - सम्मतायां दन्त्यादिः पठ्यते। लघि भोजननिवृत्तौ चेति स्वाम्यादयः। लघि शोषण इत्यग्रे भाषार्थोयं चुरादौ। (मा.धा.)

ककि वकि [मकि] श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ [सेकृ श्रेकृ श्रकृ श्लकि] रघि **लघि** गत्यर्थाः - सम्मतायां दन्त्यादिः पठ्यते। लघि भोजननिवृत्तौ चेति स्वाम्यादयः।

लघि शोषण इत्यग्रे। भाषार्थोऽयं चुरादौ। (धा.क.)

❖ **लघि [लङ्घ्] भाषार्थः** **(चुरा०)**

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि **लघि** त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। ते अपि अत्र इत्येके। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि **लघि** अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचम् उत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि **लघि** त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि **लघि** त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ **लछ [लछ्] लक्षणे** **(भ्वा०)**

लछ लाछि लक्षणे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

लक्षणं चिह्नम्। (क्षी.त.)

लछ्, लाञ्छ् (इ) सक, सेट्, प। (धा.क.)

❖ **लज [लज्] भर्जने** **(भ्वा०)**

लज लजि भर्जने। (धा.प्र.)(मा.धा.)

लज लजि भर्त्सने - भासार्थश्चुरादौ । (क्षी.त.)

चकारो भिन्नक्रमः। एतावपि भर्जन इति मैत्रेयः। भर्त्सनग्रहणं भर्जनस्य अप्युपलक्षणम् इति पुरुषकारः। ओलजी ओलस्जी व्रीडन इति तुदादौ लज प्रकाशन इति कथादौ लजिति दण्डके भाषार्थः। (मा.धा.)

लज, लजि भर्त्सने (भर्जने) - लज लाजि लाज लजि तर्ज्ज भर्त्सने इति दुर्गः पठति। लज्, लञ्ज् (इ) सेट्, सक, प। (धा.क.)

❖ **लज [लज्] प्राणने** **(चुरा०)**

लज प्राणने। (धा.प्र.)

❖ **लज [लज] प्रकाशने** **(चुरा०)**

लज प्रकाशे। (मा.धा.)(धा.क.)

अत्र मैत्रेयः वटेः पुनः पाठोऽर्थभेदात् वटि लजि इत्येके। अदन्तेषु पाठबलाददन्तत्त्वे वृद्धिः इति अपरे। (मा.धा.)

लज, सक, प। पुनः पुनः पाठोऽर्थभेदात्। वटि, लजि इत्येके। (धा.क.)

❖ **लजि [लञ्ज्] भर्जने (भ्वा०)**

लज **लजि** भर्जने। (धा.प्र.)(मा.धा.)

लज **लजि** भर्त्सने - भासार्थश्चुरादौ । (क्षी.त.)

चकारो भिन्नक्रमः एतावपि भर्जन इति मैत्रेयः। भर्त्सनग्रहणं भर्जनस्य अपि उपलक्षणम् इति पुरुषकारः। ओलजी ओलस्जी व्रीडन इति तुदादौ लज प्रकाशन इति कथादौ। लजिति दण्डके भाषार्थः। (मा.धा.)

लज, **लजि** भर्त्सने (भर्जने) - लज लाजि लाज लजि तर्ज्ज भर्त्सने इति दुर्गः पठति। लज्, लञ्ज् (इ) सेट्, सक, प। (धा.क.)

❖ **लजि [लञ्ज्] प्राणने (चुरा०)**

वटि **लजि** इत्येके - अदन्तेषु पाठबलाददन्तत्वे वृद्धिरित्यपरे। (धा.प्र.)

❖ **लजि [लञ्ज्] भाषार्थः (चुरा०)**

पट पुट रुट लुट तुजि पिजि **लजि** लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

रुठ **लजि** अजि दसि भृशि कशि रुसि शीक नट पुटि जुचि रघि अहि रहि महि भाषार्थाः इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते। (मा.धा.)

रुठ **लजि** अजि दसि भृशि रुशि रुसि शीक नट पुटि जुचि रघि अहि रहि महि इत्येते पञ्चदश स्वामिकाश्यपमतानुसारेण लिख्यन्ते। (धा.क.)

❖ **लजि [लञ्ज] प्रकाशने (चुरा०)**

लजि प्रकाशने - भासार्थोऽपि दृष्टः। भ्वादौ लज लजि भर्त्सने । (क्षी.त.)

❖ **लट [लट्] बाल्ये (भ्वा०)**

लट बाल्ये। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

बाल्यं बालक्रिया। (क्षी.त.)

लट, सेट्, अक, प। (धा.क.)

❖ **लट [लट्] भाषार्थः (चुरा०)**

पट पुट **लट** लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

❖ **लड [लड्] विलासे (भ्वा०)**

लड विकाशे। (धा.प्र.)

लड विलासे। (क्षी.त.)(मा.धा.)(धा.क.)

लल ईप्सायाम् वा। जिह्वोन्मथनयोः इति मित्। चुरादौ लड उपसेवायाम्। (क्षी.त.)

लडतीत्यादि जिह्वोन्मथने घटादौ। अनन्तरे लल ईप्सायामिति क्वचित्पठ्यते। तत् क्षीरस्वामिपुरुषकारादयो न अनुमन्यते। यत् रलयोः डलयोः च एकत्वस्मरणात् ललयति ललनेत्याहुः। लड उपसेवायामिति चुरादौ। (मा.धा.)

लड्, सेट्, अक, प। जिह्वोन्मथने घटादौ।

अनन्तरं लल ईप्सायामिति क्वचित्। तत् क्षीरस्वामिपुरुषकारादयो नानुमन्यन्ते। यतः रलयोश्चैकत्वस्मरणात् ललयति ललनेत्याहुः। लड उपसेवायां चुरादौ। (धा.क.)

❖ लड [लड्] जिह्वोन्मथने (भ्वा०)

जिह्वानुबन्धने **लडिः**। छदिलडी चौरादिकौ। (शा.आ.)

जिह्वोन्मथने **लडिः**। (धा.प्र.)(मा.धा.)

लड विलासे इत्ययं जिह्वयोन्मथने मित्। लडयति जिह्वया। जिह्वोन्मथनादन्यत्र लाडयति बालकम्। उन्मथनमुत्क्षेपणम्। डलयोरैक्याद् लालयेत् पञ्चवर्षाणीत्यादि साधु। (धा.प्र.)

लड विलास इति पठितस्य मित्त्वार्थोयमनुवादः। उन्मथनं ज्ञापनम्। अत्र मैत्रेयस्य जिह्वाया उन्मथने इति मतम्। यदाह लडयति जिह्वामिति। अयमेवपक्षो गुप्तस्यापि। पुरुषकार तु जिह्वया उन्मथने लडयति जिह्वयेत्युक्तं भवति। अपरे तु जिह्वा चोन्मथनमिति समाहारद्वन्द्वं व्याचक्षते। जिह्वाशब्देन तद्विषयो व्यापार उच्यते। अत्र चोन्मथने चेति लडयति शत्रुम्। लडयति दधि चेति भवति। धनपालस्त्वेवं पठित्वा आर्याणां जिह्वोन्मथनयोः इति पाठ इति स्वामी तु जिह्वोन्मथनयोः लडीति। मन्थनमेव मथनम्। (मा.धा.)

❖ लड [लड्] उपसेवायाम् (चुरा०)

लड उपसेवायाम्। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

भ्वादौ लुड विलासे तु अनेकार्थत्वात्। जिह्वोन्मथनयोः लडिः इति मित्। (क्षी.त.)

लड्, सेट्, सक, उ। (धा.क.)

❖ लप [लप्] व्यक्तायां वाचि (भ्वा०)

रप **लप** व्यक्तायां वाचि। (शा.आ.)
(धा.प्र.)(क्षी.त.)(धा.क.)

रप, लप, सेट्, अक, प। अनु - मुहुर्भाषणम्, अनुलापः। अप - अपह्नवः, अपलापः। आ - आलापः। प्र - प्रलापः। सं - सल्लापः, मिथोभाषणम्। विप्रलापो विरोधोक्ति, सल्लापो भाषणं मिथः। वि - विलापः। रिपुः - रपेरिच्च उपधाया इति उप्रत्यय उपधाया इकारः। (धा.क.)

❖ लबि [लम्ब्] शब्दे अवस्रंसने च (भ्वा०)

रबि **लबि** अवस्रंसने। (शा.आ.)

रबि **लबि** अबि शब्दे। लबि अवस्रंसने च
(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

प्रभातकल्पां रजनीं व्यडम्बयत् डलयोः ऐक्यात्। (धा.प्र.)

त्रयाणां लोकानामम्बः पितेत्यागमविदः द्यौः भूमिरापस्तिस्त्रः अम्बा अस्य इति भारतम्। शब्दा अकारोकाराः प्रतिपादका अस्य एव इति भट्टभास्करः। स एव सृष्टिस्थितिसंहारविषयाः तिस्रो वा शक्तयोऽस्येति चाम्बरीषम्। (मा.धा.)

रम्ब्, लम्ब्, अम्ब् (इ) सेट्, अक, आ। लम्ब् (इ) सेट्, अक, आ। आ - आश्रयः। ग्रहणम् - आललम्बे महास्त्राणि। अवलम्बनम्। अव - अवलम्बनम्। आलम्बितः। आलम्ब्य। वि -

विलम्बः। विलम्बते। विडम्बयन्तं शितिवाससः तनुम् (माघ) अत्रानुकरणमर्थः। अवस्त्रंसनम्, अवलम्बनम् इति गोविन्दभट्टः। (धा.क.)

❖ लर्ब [लर्ब्] गतौ (भ्वा०)

पर्प रफ रफि अर्ब पर्ब **लर्ब** बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः परौ। द्वावपि द्वियीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः अर्वादयो नोपधा इति कौशिकः। (मा.धा.)

पर्प रफ रफि अर्ब पर्ब **लर्ब** बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः। परौ द्वावपि द्वितीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ लल [लल्] ईप्सायाम् (भ्वा०)

लल ईप्सायाम् वा - जिह्वोन्मथनयोः इति मित्। चुरादौ लड उपसेवायाम्। (क्षी.त.)

❖ लल [लल्] ईप्सायाम् (चुरा०)

लल ईप्सायाम्। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

भ्वादौ लड विलासे। (क्षी.त.)

लल्, सक, आ। (धा.क.)

❖ लष [लष्] कान्तौ (भ्वा०)

लष कान्तौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

कान्तिरिच्छा वा। (क्षी.त.)

कान्तिरिच्छा। (मा.धा.) (धा.क.)

प्रायेणायमभिपूर्वकः। लष्, सेट्, अक, उ। (धा.क.)

❖ लष [लष्] शिल्पोपयोगे (चुरा०)

लष शिल्पोपयोगे-तालव्यान्त इति कौशिकः। (क्षी.त.)

❖ लस [लस्] दीप्तौ (भ्वा०)

लस दीप्तौ। (शा.आ.)

❖ लस [लस्] श्लेषणक्रीडनयोः (भ्वा०)

लस श्लेषक्रीडनयोः। (शा.आ.)

लस श्लेषणक्रीडनयोः। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

लस शिल्पयोग इति चुरादौ। (मा.धा.)

लस्, सेट्, अक, प। लस शिल्पयोग इति चुरादौ। (धा.क.)

❖ लस [लस्] शिल्पयोगे (चुरा०)

लस शिल्पयोगे। (धा.प्र.)(मा.धा.)(धा.क.)

अत्र स्वामी शिल्पोपयोग इति पठित्त्वा केचिन्मूर्धन्यान्तं पठन्ति इति आह। लासयति। श्लेषणक्रीडनयोः लसतीति शपि। (मा.धा.)

अत्र स्वामी शिल्पोपयोगे इति पठित्वा केचित् मूर्द्धन्यान्तं पठन्तीत्याह। लस्, अक, उ। (धा.क.)

❖ ला [ला] आदाने (अदा०)

ला आदाने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

स्नेहविपातनादन्यत्र पुगेव। कृपाम् आदत्त इति कृपालुः। मितद्र्वादित्वाड्डुः इति आत्रेयः व्यालः।

रातिलाती द्वावपि दानार्थौ इति चान्द्राः। (मा.धा.)

ला, अनिट्, सक, प। रातिलाती द्वावपि दानार्थाविति चान्द्राः। दुर्गोऽपि रा ला दाने इति। (धा.क.)

❖ लाखृ [लाख्] शोषणालमर्थयोः (भ्वा०)

ओखृ राखृ **लाखृ** द्राखृ ध्राखृ शोषणालमर्थयोः। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

शोषणं स्नेहराहित्यम्। अलमर्थः - भूषणम्, पर्याप्तिः, वारणं, सामर्थ्यञ्च। पञ्चैव ऋदनुबन्धाः, परस्मैपदिनः, सेटश्च। (धा.क.)

❖ लाघृ [लाघ्] सामर्थ्ये (भ्वा०)

राघृ **लाघृ** सामर्थ्ये। (मा.धा.)(धा.क.)

राघृ **लाघृ** द्राघृ सामर्थ्ये। (धा.प्र.)

राघृ लाघृ द्राघृ ध्राघृ सामर्थ्ये - द्राघिमन्ये न पेठुः। (क्षी.त.)

द्राघृ आयामे च आयामो दैर्घ्यक्रिया इति कौशिकः। कदर्थनमिति स्वामी। (मा.धा.) (धा.क.)

राघ् (ऋ) सेट्, अक, आ। (धा.क.)

❖ लाछि [लाञ्छ्] लक्षणे (भ्वा०)

लछ **लाछि** लक्षणे। (धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

लक्षणं चिह्नम्। (क्षी.त.)

लछ्, लाञ्छ् (इ) सक, सेट्, प। (धा.क.)

❖ लाज [लाज्] भर्जने भर्त्सने च (भ्वा०)

लाज लाजि भर्त्सने। (धा.प्र.) (धा.क.)(मा.धा.)

चकारो भिन्नक्रमः। एतावपि भर्जने पठ्येते इत्यर्थः। (धा.प्र.)

लाज लाजि भर्जने च। चत्वारो भर्त्सन इति चन्द्रः। (क्षी.त.)

चकारो भिन्नक्रमः एतावपि भर्जन इति मैत्रेयः। भर्त्सनग्रहणं भर्जनस्य अपि उपलक्षणम् इति पुरुषकारः। (मा.धा.)(धा.क.)

लाज्, लाञ्ज् (इ) सेट्, सक, प। (धा.क.)

❖ लाजि [लाञ्ज्] भर्जने भर्त्सने च (भ्वा०)

लाज **लाजि** भर्त्सने च। (धा.प्र.) (धा.क.)(मा.धा.)

चकारो भिन्नक्रमः। एतावपि भर्जने पठ्येते इत्यर्थः। (धा.प्र.)

लाज **लाजि** भर्जने च। चत्वारो भर्त्सन इति चन्द्रः। (क्षी.त.)

चकारो भिन्नक्रमः एतावपि भर्जन इति मैत्रेयः। भर्त्सनग्रहणं भर्जनस्य अपि उपलक्षणम् इति पुरुषकारः। ओलजी ओलस्जी व्रीडन इति तुदादौ। अज प्रकाशन इति कथादौ। लजिति दण्डके भाषार्थः। (धा.क.)(मा.धा.)

लाज्, लाञ्ज् (इ) सेट्, सक, प। (धा.क.)

❖ लाभ [लाभ] प्रेरणे (चुरा०)

लाभ प्रेरणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

लभेति सभ्याः । (क्षी.त.)

लाभ, सक, प। (धा.क.)

❖ लिख [लिख्] अक्षरविन्यासे (तुदा०)

लिख अक्षरविन्यासे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

लिख्, सेट्, अक, प। कैश्चिदस्यापि कुटादित्वमिष्यते। अभि आ - कर्षणम्, चित्रीकरणम्। उत् - उल्लेखः, कर्षणम् भेदनम्, अभिलापः। वि - विलेखनम्, कर्षणम् चित्रीकरणम्। (धा.क.)

❖ लिगि [लिङ्ग्] गत्यर्थः (भ्वा०)

उख नख वख मख रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि **लिगि** गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि **लिगि** गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि **लगि** अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश। तृतीयान्ताः त्रयोदश। एवमेकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि **लगि** अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि वल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ लिगि [लिङ्ग्] चित्रीकरणे (चुरा०)

लिगि चित्रीकरणे। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

भ्वादौ लिगि गत्यर्थः । (क्षी.त.)

लिङ्ग्, (इ, वा णिच्) सक, उ। (धा.क.)

❖ लिप [लिप्] उपदेहे (तुदा०)

लिप उपदेहे। (शा.आ.)(क्षी.त.) (मा.धा.) (धा.क.)

लिप उपदाहे। (धा.प्र.)

उपदेहो वृद्धिः। (क्षी.त.)

उपदेहः उपचयः। लिप्, अनिट्, सक, उ। (धा.क.)

❖ लिश [लिश्] अल्पीभावे (दिवा०)

लिश अल्पीभावे। (शा.आ.)(धा.प्र.) (क्षी.त.)(धा.क.)

अन्तस्थतृतीयादिस्तालव्यान्तोऽयम्। लिश्, अनिट्, अक, आ। (धा.क.)

❖ लिश [लिश्] अल्पीभावे (तुदा०)

लिश अल्पीभावे। (शा.आ.)

❖ लिश [लिश्] गतौ (तुदा०)

लिश गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

लिश्, अनिट्, सक, प। (धा.क.)

❖ लिह [लिह्] आस्वादने (अदा०)

लिह आस्वादने। (शा.आ.)(धा.प्र) (क्षी.त.)(मा.धा.)(धा.क.)

लिह, अनिट्, सक, उ। (धा.क.)

❖ **ली [ली] श्लेषणे** **(क्र्या०)**

ली श्लेषणे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ ली द्रवीकरणे। घृतं विलीनयति। (क्षी.त.)

ली, अनिट्, सक, प। (धा.क.)

❖ **ली [ली] द्रवीकरणे** **(चुरा०)**

ली द्रवीकरणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

दिवादौ लीङ् श्लेषणे। (क्षी.त.)

ली, सक, उ। (धा.क.)

❖ **लीङ् [ली] श्लेषणे** **(दिवा०)**

लीङ् श्लेषणे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

ली श्लेषण इति क्र्यादौ। ली द्रवीकरणे इति चुरादौ। (मा.धा.)

ली (ङ्), अनिट्, सक, आ। (धा.क.)

❖ **लुजि [लुञ्ज्] हिंसाबलादाननिकेतनेषु** **(चुरा०)**

तुजि पिजि **लुजि** हिंसाबलादाननिकेतनेषु-निकेतनमावसथः। (क्षी.त.)

❖ **लुजि [लुञ्ज्] भाषार्थः** **(चुरा०)**

पट पुट लट लुट तुजि पिजि मिजि **लुजि** भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि **लुजि** अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि **लुजि** भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थौ येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि **लुजि** भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थौ येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ **लुञ्च [लुञ्च्] अपनयने** **(भ्वा०)**

लुञ्च अपनयने। (धा.प्र.)(मा.धा.)

❖ **लुट [लुट्] विलोडने** **(भ्वा०)**

लुट विलोडने। (धा.प्र.) (मा.धा.)(धा.क.)

दिवादिष्वप्ययं पठ्यते। (धा.प्र.)

लुट विलोटने - विलोडन इति दुर्गः। लुट भासार्थः। लुड इति द्रमिडाः। (क्षी.त.)

एतदादयः पाठत्यन्ताष्टवर्गतृतीयान्ता इति कौशिककाश्पनन्दिद्रविडाः। ते चास्मादनन्तरे पिटहटी च पेठुः। लुल विलोडन इति लान्तोऽपि दृश्यते। **लीलल्लुजाकारबृहत्तरङ्गम्** इति माघः। डलयोः एकत्वस्मरणम् इति वा प्रतिविधेयम् इति अयं दिवादावपि। भाषार्थश्चुरादौ। प्रतिघाते द्युतादौ इदित्। स्तेयार्थः परस्मैपदिषु लुण्टेति चुरादौ। (मा.धा.)

लुट्, सेट्, सक, प। लूसूत्रे सुधाकरः। लुल विलोडन इति लान्तोऽपि दृश्यते। **लीलल्लुजाकारबृहत्तरङ्गम्** इति माघः। डलयोरेकत्वस्मरणमिति वा प्रतिविधेयमिति। अयं दिवादावपि। भाषार्थश्चुरादौ। प्रतिघाते द्युतादौ। स्तेयार्थः परस्मैपदिषु। (धा.क.)

❖ लुट [लुट्] विलोडने (दिवा०)

लुट विलोडने। (धा.प्र.)(मा.धा.)(धा.क.)

लुट विलोटने - चुरादौ भासार्थः। (क्षी.त.)

लुट्, सेट्, अक, प। (धा.क.)

❖ लुट [लुट्] प्रतिघाते (भ्वा०)

रुट **लुट** लुठ प्रतीघाते। (धा.प्र.)

(मा.धा.) (धा.क.)

आद्यौ प्रथमान्तौ। अन्त्यो द्वितीयान्तः अयं पाठो देवमैत्रेयादीनाम्। हरियोगिनस्तु द्वावेव। धातोः कर्मणः इत्यत्र कैयटे द्वितीयान्तौ पठितौ। क्षीरस्वामी त्वेवं पठित्वा आह - रुट लुटेत्येके। लुट इति तु शाकटायनः। सुधाकरस्तु भूवादिसूत्रे लुठतिः द्वितीयान्तः अपि लुटितो लोठमान इति प्रयोगदर्शनाद् इत्याह रोठते लोटते। इत्यादि पूर्ववत् लोठतीति लोठने गतम्। रुण्ठति लुण्ठति स्तेये। रोठति लोठतीत्युपघाते। लुण्ठतीत्यालस्यप्रतिघातयोः रुण्ठति लुण्ठतीति। द्वयं गत्यर्थे। (मा.धा.)

आदौ, प्रथमान्तौ, अन्त्यो द्वितीयान्तः। रुट्, लुट्, लुठ्, सेट्, अक, आ। (धा.क.)

❖ लुट [लुट्] दीप्तौ (भ्वा०)

रुट **लुट** दीप्तौ। (शा.आ.)

❖ लुट [लुट्] संश्लेषणे (तुदा०)

लुट संश्लेषणे। (मा.धा.)(धा.क.)

लुड इत्येके। (मा.धा.) (धा.क.)

लुट्, सेट्, अक, प। (धा.क.)

❖ लुट [लुट्] भाषार्थः (चुरा०)

पट पुट लट **लुट** तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट **लुट** तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट **लुट** तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद

कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थौ येषान्ते भासार्थाः। (मा.धा.)

पट पुट **लुट** तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थौ येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ लुटि [लुण्ट्] स्तेये (भ्वा०)

रुटि **लुटि** स्तेयकरणे। (शा.आ.)

रुटि **लुटि** स्तेये। (धा.प्र.)(क्षी.त.)

रुठि लुठि इत्येके। (क्षी.त.)

❖ लुठ [लुठ्] उपघाते (भ्वा०)

रुठ **लुठ** उपतापे। (शा.आ.)

रुठ **लुठ** उपघाते। (धा.प्र.)

रुठ **लुठ** प्रतीघाते। रुट लुट इत्येके, बाधृ रोटने इति लिङ्गात्। (क्षी.त.)

रुट लुट **लुठ** प्रतिघाते - आद्यौ प्रथमान्तौ अन्त्यो द्वितीयान्तः। अयं पाठो देव-मैत्रेयादीनाम्। हरियोगिनस्तु द्वावेव। धातोः कर्मणः इत्यत्र कैयटे द्वितीयान्तो पठितौ क्षीरस्वामी त्वेवं पठित्वा आह। रुट लुटेत्येके। लुठ दीप्तावित्यप्यसावाह। लुट इति तु शाकटायनः सुधाकरस्तु भूवादिसूत्रे लुठतिः द्वितीयान्तः अपि लुटितो लोठमान इति प्रयोगदर्शनाद् इत्याह। रोठते लोटते। अत्र मैत्रेयः उठ इत्यप्येक इति धनपालशाकटायनौ तु रुठलुठ इत्येव पेठतुः। क्षीरस्वामी तु उठि पठित्वा रुठ लुठ इत्यपि दौर्गा इत्याह। अयं श्लेषणे तुदादिः। लुठि आलेख्ये प्रतिघाते च। रुठि लुठि गतावित्यग्रे इदितौ। लुठ श्लेषण इति तुदादौ। असौ डान्त इत्येक इति मैत्रेयः। तथा च स्वामी लुठतीति लक्ष्यदर्शनात् तुदादौ पाठ इति। लुठ प्रतिघात इति द्युतादौ। (मा.धा.)

रुठ्, लुठ्, उठ्, सेट्, सक, प। अत्र मैत्रेयः। उठेत्यप्येक इति। धनपालशाकटायनौ तु रुठलुठेत्येव पेठतुः। क्षीरस्वामी तु उठि पठित्वा रुठ लुठ इत्यपि दुर्गादय इत्याह। लुठि आलेख्ये प्रतिघाते च। रुठि, लुठि गतावित्यग्रे इदितौ। लुठ श्लेषण इति तुदादौ। असौ डान्त इत्येक इति मैत्रेयः। लुठ प्रतिघात इति द्युतादौ। (धा.क.)

❖ लुठ [लुठ्] प्रतिघाते (भ्वा०)

रुठ **लुठ** प्रतीघाते। (शा.आ.)

रुट लुट **लुठ** प्रतीघाते। (धा.प्र.)

रुठ **लुठ** प्रतीघाते - रुट लुट इत्येके। (क्षी.त.)

रुट लुट **लुठ** प्रतीघाते। आदौ, प्रथमान्तौ, अन्त्यो द्वितीयान्तः। रुट्, लुट्, लुठ्, सेट्, अक, आ। (धा.क.)

❖ लुठ [लुठ्] संश्लेषणे (तुदा०)

लुठ संश्लेषणे। (धा.प्र.)

❖ लुठि [लुण्ठ्] स्तेये (भ्वा०)

रुठि, लुठि स्तेये - रुण्ठ् (इ) लुण्ठ् (इ) सेट्, सक, प। शाकटायनस्तृतीयन्तौ पपाठ। लुठ प्रतिघात इति युजादौ। (धा.क.)

❖ लुठि [लुण्ठ्] आलस्ये प्रतिघाते च (भ्वा०)

लुठि आलस्ये प्रतिघाते च। (मा.धा.)(धा.क.)

लुठि आलस्ये। गतौ प्रतिघातेऽपि वृत्तिरस्य। (धा.प्र.)

लुण्ठ् (इ) सेट्, अक, प। (धा.क.)

❖ लुठि [लुण्ठ्] गतौ (भ्वा०)

रुठि **लुठि** गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ स्तेये । (क्षी.त.)।

अर्थभेदात्पुनः पाठो लुण्ठेरित्याहुः। (मा.धा.)(धा.क.)

रुण्ठ्, लुण्ठ् (इ) सेट्, सक, प। (धा.क.)

❖ लुड [लुड्] संश्लेषणे (तुदा०)

लुड संश्लेषणे। (शा.आ.)

लुड इत्येके। (धा.प्र.)

❖ लुण्ठ [लुण्ठ्] स्तेये (चुरा०)

लुण्ठ स्तेये।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

भ्वादेः लुटि इत्यादि दर्शनात् लुण्ट इत्येके। (क्षी.त.)

न्यासे कुट्ट छेदे लुण्ठ स्तेये चौरादिकौ एतौ इत्युक्तम् । (मा.धा.)

लुण्ठ, सक, उ। (धा.क.)

❖ लुथि [लुन्थ्] हिंसासङ्क्लेशनयोः(भ्वा०)

कुथि पुथि नुथि **लुथि** मथ मथि हिंसासंक्लेशनयोः। (शा.आ.)

कुथि पुथि लुथि मथि हिंसासंक्लेशनयोः - कुन्थ संक्लेश इति क्र्यादौ (धा.प्र.)

कुथि पुथि **लुथि** मन्थ हिंसासंक्लेशयोः - हिंसा प्राण्युपघातः, संक्लेशो बाधा। (क्षी.त.)

कुथि पुथि **लुथि** मथि हिंसासंक्लेशनयोः। (मा.धा.)

कुथि पुथि **लुथि** मथि हिंसासंक्लेशयोः - प्राणवियोगफलकव्यापारो हिंसा। दुःखं क्लेशः। सर्वे इदनुबन्धाः। कुन्थ्, पुन्थ्, लुन्थ्, मुन्थ (इ) सेट्, प। (धा.क.)

❖ लुन्च [लुञ्च्] अपनयने (भ्वा०)

लुन्च अपनयने। (क्षी.त.)(धा.क.)

अनुपयुक्तोपासने। (क्षी.त.)

अपनयनं छेदनमित्यर्थः। लुञ्चति केशान् शोकार्त्त इति रमानाथः। अलुञ्चीत् कर्णनासिकम् इति - भट्टिः। लुन्च, सेट्, सक, प। केचिद् अमुम् उदितं पठन्ति, तदनार्षं भृष्टलुचितमिति, राजन्तादिषु लुचितमिति पाठात्। (धा.क.)

❖ लुप [लुप्] विमोहने (दिवा०)

युप रुप **लुप** विमोहने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तुदादौ लुप्लृ छेदने। (क्षी.त.)

अनिड्कारिकायां तौदादिकेन लिपिना साहचर्यात्

तौदादिकस्य लुप्लृ छेदन इत्यस्यैव ग्रहणादयं सेडेव। (मा.धा.)

युप्, रुप्, लुप्, अक, प। (धा.क.)

❖ लुप्लृ [लुप्] छेदने (तुदा०)

लुप्लृ छेदने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

लुप्, (लृ) अनिट्, सक, उ। (धा.क.)

❖ लुबि [लुम्ब्] अर्दने (भ्वा०)

लुबि तुबि अर्दने। (धा.प्र.)(मा.धा.)(धा.क.)

अर्दनमिह हिंसा, याचनमित्यपरे इति रमानाथः।

लुन्ब्, तुन्ब्, (इ) सेट्, सक, प। (धा.क.)

❖ लुबि [लुम्ब्] अदर्शने अर्दने च (चुरा०)

लुबि तुबि तुपि अर्दने। (धा.प्र.)

लुबि तुबि अर्दने - प्रवासफललुम्बिभिः। तुपि इति दौर्गाः। चान्द्रे त्रयोऽपि भ्वादौ सिद्धाः। (क्षी.त.)

लुबि तुबि अदर्शने - अर्दन इति मैत्रेयः। अनयोरिदित्त्वादेव अर्दनेऽर्थे भ्वादौ पाठो व्यर्थः स्यात्। (मा.धा.)

लुबि तुबि अदर्शने - अर्दन इति मैत्रेयः। लुम्ब्, तुम्ब्, (इ) अक, उ। (धा.क.)

❖ लुभ [लुभ्] गार्ध्ये (दिवा०)

लुभ गार्द्धे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

गार्ध्यम् अभिकाङ्क्षा। लुभो विमोहने इट् विलुभिताः केशाः, लुब्धोऽन्यः। (क्षी.त.)।

गार्ध्यमाकाङ्क्षा। (मा.धा.)(धा.क.)

लुभ, सक, प। भ्वादौ तुदादौ चायं धातुः। (धा.क.)

❖ लुभ [लुभ] विमोहने (तुदा०)

लुभ विमोहने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

विमोहनं व्याकुलीकरणम्। दिवादौ लुभ गार्ध्ये। (क्षी.त.)

विमोहनमाकुलीकरणम्। केशाः लुभो विमोहन इति त्त्वानिष्ठयोर्नित्यमिट् गार्ध्ये तु गतम्। (मा.धा.)

विमोहनमाकुलीकरणम्। लुभ्, सेट्, सक [अक] प। (धा.क.)

❖ लूञ् [लू] छेदने (क्र्या०)

लूञ् छेदने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

लू, (ञ) सेट्, सक, उ। (धा.क.)

❖ लूष [लूष्] हिंसायाम् (चुरा०)

लूष हिंसायाम्। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

लूष्, सक, उ। (धा.क.)

❖ लेपृ [लेप्] गतौ (भ्वा०)

मेपृ रेपृ लेपृ गतौ। (क्षी.त.)(मा.धा.)(धा.क.)

तुदादौ लिप उपदेहे। (क्षी.त.)

अयं पाठः स्वामिनः। मैत्रेयस्तु मेपृ लेपृ सेवने। रेपृ प्लवगतावित्याह। क्वचित्पठ्येते हेपृ धेपृ इति च। (मा.धा.)(धा.क.)

मेप्, रेप्, लेप् (ऋ) सेट् सक, आ। (धा.क.)

❖ लोकृ [लोक्] दर्शने (भ्वा०)

लोकृ दर्शने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ लोकृ भासार्थः। (क्षी.त.)

भाषार्थोयं चुरादौ। (मा.धा.)(धा.क.)

लोक्, (ऋ) सक, सेट्, आ। लोकृदीप्ताविति वोपदेवः। (धा.क.)

❖ लोकृ [लोक्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ **लोकृ** णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ **लोकृ** लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ **लोकृ** लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थौ येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुप् धूप विच्छ ची पुथ **लोकृ** लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थौ येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ लोचृ [लोच्] दर्शने (भ्वा०)

लोचृ दर्शने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

लोकृ **लोचृ** णद कुप तर्क वृतु वृधु भाषार्था इति चौरादिकात्। (धा.प्र.)

चुरादौ भाषार्थः । (क्षी.त.)

भाषार्थोऽयं चुरादौ। (मा.धा.) (धा.क.)

लोच्, (ऋ) सेट्, सक, आ। आ - आलोचनम्। **आलोचते सदा नीतिमालोच्यति सत्क्रियाम्** (कवि.) सम् - समालोचनम्। (धा.क.)

❖ लोचृ [लोच्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ **लोचृ** लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ **लोचृ** णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ **लोचृ** णद कुप तर्क वृतु वृधु भाषार्थाः। (मा.धा.)

मैत्रेयानुरोधेनायं पाठो दण्डकस्य भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.) (धा.क.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुप् धूप विच्छ ची पुथ लोकृ **लोचृ** णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ **लोडृ [लोड्] उन्मादे (भ्वा०)**

रोडृ **लोडृ** उन्मादे। (मा.धा.)(धा.क.)

रोडृ लोडृ उन्मादने। डलयोरेकत्वस्मरणात् लोलः। (धा.प्र.)

रोड्, लोड् (ऋ) सेट्, अक, प। (धा.क.)

❖ **लोष्ट [लोष्ट्] सङ्घाते (भ्वा०)**

गोष्ट **लोष्ट** सङ्घाते। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

गोष्ट्, लोष्ट्, सेट्, अक, आ। गोष्ट, लोष्ट, हुडि, पिडि, सङ्घाते इति दुर्गः पठति। (धा.क.)

❖ **लौडृ [लौड्] उन्मादे (भ्वा०)**

लौडृ उन्मादे। (क्षी.त.)

❖ **ल्वी [ल्वी] गतौ (क्र्या०)**

ल्वी गतौ। (क्षी.त.)

❖ **वकि [वङ्क्] कौटिल्ये (भ्वा०)**

वकि कौटिल्ये। धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

अयं गत्यर्थः पठिष्यते। (मा.धा.)

ग्रथि(वकि) कौटिल्ये - कौटिल्यं शाठ्यं, वक्रता वा। वकिरयं दन्त्योष्ठ्यादिरिति वोपदेवः। दुर्गोऽत्र ग्रथिना सह वकिं पठति। (धा.क.)

❖ **वकि [वङ्क्] गत्यर्थः (भ्वा०)**

ककि **वकि** श्वकि त्रकि ढौकृ त्रौकृ ष्वक्क वस्क मस्क तिकृ टिकृ टीकृ रघि लघि गत्यर्थाः। (धा.प्र.)

ककि **वकि** श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (मा.धा.)

ककि **वकि** [मकि] श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ [सेकृ श्रेकृ श्रकृ श्लकि] रघि लघि गत्यर्थाः। (धा.क.)

❖ **वक्ष [वक्ष्] रोषे सङ्घाते च (भ्वा०)**

वक्ष रोषे। (धा.प्र.)(मा.धा.)(धा.क.)

वक्ष सङ्घाते। (क्षी.त.)

सङ्घात इत्येके। (मा.धा.)(धा.क.)

वक्ष, सेट्, अक, प। (धा.क.)

❖ वख [वख्] गत्यर्थः (भ्वा०)

उख नख **वख** मख रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि **वख** वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि **वख** वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश। तृतीयान्तः त्रयोदश। एवमेकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि **वख** वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि बल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ वखि [वङ्ख्] गत्यर्थः (भ्वा०)

उख नख वख मख रख लख **वखि** लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख **वखि** मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख **वखि** मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश। तृतीयान्तास्त्रयोदश। एवमेकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख **वखि** मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ वगि [वङ्ग्] गत्यर्थः (भ्वा०)

उख नख वख मख रख लख वखि लखि इखि ईखि वल्ग रगि **वगि** लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि **वगि** मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि **वगि** मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश। तृतीयान्ताः त्रयोदश। एवमेकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि **वगि** मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि वल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ वघि [वङ्घ्] गत्याक्षेपे (भ्वा०)

अघि **वघि** मघि गत्याक्षेपे। (धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

गत्याक्षेपो वेगगतिर्गमनारम्भो वा। अङ्घिः इत्येके। (क्षी.त.)

आक्षेपो निन्दा। गतौ गमनारम्भे चेति स्वामी। (मा.धा.)(धा.क.)

अङ्घ् (इ) सेट्, आ। (धा.क.)

❖ वच [वच्] परिभाषणे (अदा०)

वच परिभाषणे। (शा.आ.)(मा.धा.)(धा.क.)

वच भाषणे। (धा.प्र.)(क्षी.त.)

अनुदात्त उदात्तेत् - पारायणिकैर्नाधीतोऽयम्। (क्षी.त.)

अत्र पुरुषकारे वृत्तौ परिभाषणे पठ्यते; तदपि परेरनधिकारार्थत्वाद् भाषणमेवार्थ इति। एतच्च क्वचिद्वृत्तावेवं पाठदर्शनादुक्तम्। पारायणिकैरयं धातुर्नापाठीत् इत्येतावतानार्शता नासङ्क्या। वृत्त्यादौ वच परिभाषणे, ब्रूञ् आदेशो वा इत्युक्तत्वात्। (मा.धा.)

वच्, सक, अनिट्, प। (धा.क.)

❖ वच [वच्] परिभाषणे (चुरा०)

वच भाषणे। (धा.प्र.)(क्षी.त.)

वच परिभाषणे। (मा.धा.)(धा.क.)

चन्द्रः सन्देशे चुरादिमाह। (क्षी.त.)

पारायणेऽयं नाधीयते। (मा.धा.)

वच्, सक, उ। (धा.क.)

❖ वज [वज्] गतौ (भ्वा०)

वज व्रज गतौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ वज मार्गसंस्कारगत्योः। (क्षी.त.)

एतौ चुरादावपि। (मा.धा.)

वज्, व्रज्, सेट्, सक, प। एतौ चुरादौ च। (धा.क.)

❖ वज [वज्] मार्गसंस्कारगत्योः (चुरा०)

वज मार्गसंस्कारगत्योः- मार्गसंस्कारे गतौ च। मार्ग गतौ संस्कारगतौ चेत्येके द्वौ धातू इत्यन्ये। व्रजेति चन्द्रः। अत एव भ्वादिना सिद्धेर्नापाठि। वज मार्गणसंस्कारे इति दुर्गः। (क्षी.त.)

❖ वञ्चु [वञ्च्] गत्यर्थः (भ्वा०)

वञ्चु चञ्चु तञ्चु त्वञ्चु म्रुञ्चु म्लुञ्चु म्रुचु म्लुचु गत्यर्थाः। (धा.प्र.)

वञ्चु चञ्चु तञ्चु त्वञ्चु ग्रुञ्चु ग्लुञ्चु स्रुञ्चु म्रुचु म्लुचु गत्यर्थाः - ग्लुचु स्तेये। ग्लुञ्चु गतौ। (शा.आ.)

वञ्चु चञ्चु तञ्चु त्वञ्चु म्रुञ्चु म्लुञ्चु म्रुचु म्लुचु गत्यर्थाः। (मा.धा.)

❖ वञ्चु [वञ्च्] प्रलम्भने (चुरा०)

वञ्चु प्रलम्भने। (क्षी.त.)(मा.धा.)(धा.क.)

प्रलम्भनं मिथ्याफलाख्यानम्। एवम् आदीनाम् अनुबन्धः प्रत्यभिज्ञानार्थम्, स एव अयमर्थान्तरे चुरादिरिति। भ्वादौ वञ्चु गतौ। (क्षी.त.)

अत्र सूत्रे वञ्चु गताविति भौवादिकस्य चास्य ग्रहणमाह हरदत्तः। तत्र च तेन चौरादिक ऊदित्पठितः। वृत्तौ वञ्चु गताविति भौवादिक एवोपात्तः। (मा.धा.)

वञ्च् (उ) वा णिच्, सक, आ। (धा.क.)

❖ वट [वट्] वेष्टने (भ्वा०)

वट वेष्टने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

वट भट परिभाषणे मित्। पट वट ग्रन्थे अदन्तः। (क्षी.त.)

घटादावयं परिभाषणार्थः। पट वट ग्रन्थ इति कथादौ। **वट** वेष्टन इति क्षीरस्वामी। यस्तु तत्र विभाजनार्थः। तं वटीति शाकटायनादयः पठन्ति। वटि विभाजन इति इहैवाग्रे चुरादौ चादन्तेषु। (मा.धा.)

वट्, सेट्, सक, प। घटादावयं परिभाषणार्थः। पट वट ग्रन्थ इति कथादौ। वट वेष्टन इति क्षीरस्वामी। यस्तु तत्र विभाजनार्थः तं वदति शाकटायनादयः पठन्ति। वटी विभाजन इति इहैवाग्रे चुरादौ चादन्तेषु। (धा.क.)

❖ वट [वट्] परिभाषणे (भ्वा०)

वट तट परिभाषणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

वट वेष्टने, भट भृतौ। (धा.प्र.)(क्षी.त.)

वट वेष्टने। भट भृताविति पठितयोः परिभाषणे मित्त्वार्थोऽयमनुवादः। अत्र पुरुषकारे वटेत्यादि बहुषु दृश्यते इति। (मा.धा.)

❖ वट [वट] ग्रन्थे (चुरा०)

पट वट ग्रन्थे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

ग्रन्थो वेष्टनम्। भ्वादौ अट पट गतौ वट वेष्टने। (क्षी.त.)

वट वेष्टन इति क्षीरस्वामी ओष्ठ्यादिं बहवः पठन्तीति तत्रैवोक्तम्। (मा.धा.)

वट वेष्टने इति क्षीरस्वामी। पट, वट, अक, उ। (धा.क.)

❖ वट [वट] विभाजने (चुरा०)

वट विभाजने। (धा.प्र.)(मा.धा.)(धा.क.)

वटेः पुनः पाठोऽर्थभेदात्। (धा.प्र.)(मा.धा.)

वट, स, प। (धा.क.)

❖ वटि [वण्ट्] विभाजने (भ्वा०)

वटि विभाजने। (धा.प्र.)(क्षी.त.)

❖ वटि [वण्ट्] विभाजने (चुरा०)

वटि विभाजने। (धा.प्र.)(क्षी.त.)(मा.धा.)

वटि विभाजन इति भ्वादौ पठ्यते। ततो हेतुव्यापारे णिचि विभाजनेऽर्थे। (धा.प्र.)

वडीति शाकटायनः । (मा.धा.)(धा.क.)

वण्ट्, [वण्ड] (इ, वा णिच्) सक, उ। (धा.क.)

❖ वटि [वण्ट] प्राणने (चुरा०)

वटि लजि इत्येके - अदन्तेषु पाठबलाद् अदन्तत्वे वृद्धिरित्यपरे। (धा.प्र.)

❖ वठ [वठ्] स्थौल्ये (भ्वा०)

वठ स्थौल्ये।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वठरोऽतीक्ष्णधीः। (क्षी.त.)

वठि एकचर्यायामात्मनेपदी गतः। (मा.धा.)
(धा.क.)

वठ्, सेट्, अक, प। (धा.क.)

❖ वठि [वण्ठ्] एकचर्यायाम् (भ्वा०)

वठि एकचर्यायाम्। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

एकस्य चर्या सहायत्वेनागमनम्। वण्ठो दत्तद्रव्यो योद्धा। (क्षी.त.)

एकचर्या सहायगमनम्। अयम् अनिदित् स्थौल्यार्थः परस्मैपदिषु। (मा.धा.)(धा.क.)

वण्ठ् (इ) सेट्, अक, आ। (धा.क.)

❖ वडि [वण्ड्] वेष्टने (भ्वा०)

वडि वेष्टने। (धा.प्र.)

❖ वडि [वण्ड्] विभाजने (भ्वा०)

वडि विभाजने। (क्षी.त.)(मा.धा.)(धा.क.)

विभाजनं भागीकरणं चरमाभावश्च। वटि इत्येके परस्मैपदी। नन्दी तु वटि विभाजने वडि वेष्टने। (क्षी.त.)

अत्र स्वामी वडि विभाजने मडि चेति पृथक् सूत्रेणादर्थान्तरेपि। नन्दी तु वडि विभाजने। मडि वेष्टन इति। (मा.धा.)

वण्ड् (इ) सेट्, सक, आ। दुर्गस्तु वडि मडि वेष्ट वेष्टने इति पठति। (धा.क.)

❖ वडि [वण्ड्] विभाजने (चुरा०)

वडि विभाजने। टान्त इत्येके । (क्षी.त.)

❖ वण [वण्] शब्दार्थः (भ्वा०)

वण भण शब्दे। (शा.आ.)

अण रण **वण** भण मण कण क्वण व्रण भ्रण शब्दार्थाः। (धा.प्र.)

अण रण **वण** मण कण क्वण व्रण भ्रण ध्वण शब्दार्थाः - एते शब्दनक्रियार्थाः। (क्षी.त.)

अण रण **वण** मण कण क्वण व्रण व्रण भ्रण ध्वण शब्दार्थाः। अयं निमीलनार्थः चुरादौ। (मा.धा.)

अन रण **वण** भण मण कण क्वण व्रण भ्रण ध्वण शब्दार्थाः। अण, रण, वण, भण, मण, कण, क्वण, ष्टण, वन, ध्वन, शब्दे, इति दुर्गः। सर्वे सेटः, अकर्म्मकाः, सकर्म्मकाश्च, परस्मैपदिनः। अयं वसादिः क्वचित् पठ्यते। दन्त्योष्ठ्यादिरेव सर्वत्र, तथा च यादवः।(धा.क.)

❖ वण [वण्] दाने (भ्वा०)

वण श्रण दाने। (शा.आ.)

❖ वद [वद्] स्थैर्ये हिंसायां च (भ्वा०)

वद खद स्थैर्ये। हिंसायां च वर्तते। (शा.आ.)

❖ वद [वद्] व्यक्तायां वाचि (भ्वा०)

वद व्यक्तायां वाचि। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

उदात्त उदात्तेत्। वदते चार्वी लोकायते, भातीत्यर्थः, गेहे वदते, यतत इत्यर्थः, क्षेत्रे विवदन्ते, नाना वदन्तीत्यर्थः, परदारानुपवदते, रहस्युपच्छन्दयति इत्यर्थः। व्यक्तवाचां समुच्चारणे सम्प्रवदन्ते द्विजाः। विभाषा विप्रलापे विप्रवदन्ते मौहूर्तिकाः, विप्रवदन्ति वा। अनोरकर्मकात् अनुवदते कठः कलापस्य। आत्मनेपदं णिचि - वादयते वीणाम्। अवद्यपण्यवर्यागर्ह्य इत्यवद्यं गर्ह्यं साधु। (क्षी.त.)

वद्, सेट्, सक, प। अप - अपवादः - निन्दा। परिवादः। णिच् - अभिवादनम् - पादग्रहणम्। प्र - प्रवादः, कथनम्। वि - विवादः। सम् - संवादः। वि - सम् - विसंवादः। अनु - अनुवादः। (धा.क.)

❖ वद [वद्] सन्देशवचने (चुरा०)

वद सन्देशने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

चन्द्रो वचेत्यपाठीत्। (क्षी.त.)

शाकटायनस्य त्वात्मनेपदी। (मा.धा.)

स्वरितेत्, शाकटायनस्य मते त्वात्मनेपदी। वद्, सक, उ। (धा.क.)

❖ वदि [वन्द्] अभिवादनस्तुत्योः (भ्वा०)

वदि अभिवादनस्तुत्योः। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

गुरून् वन्दन्ते - अभिवादयते। देवान् वन्दते-स्तौति। (क्षी.त.)

प्रणतिपूर्वमाशिषो वाचनमभिवादनम्। तथा च प्रयोगः - अभिवदति नाभिवादये अभिवादयते अपि आचार्य श्वशुरं राजामिति। अयं बशादिरपभ्रंशः। यदाह राजानकः सन्दिग्धस्योदाहरणे -

आलिङ्गितस्तत्रभावान्सम्पराये जयश्रिया।
आशीः परम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु।

अत्र वन्द्यामिति किं हठहृतमहिलायामुत नमस्यामिति सन्देह इति। (मा.धा.)

प्रणतिपूर्वमाशिषो याचनमभिवादनम्, तथा च प्रयोगः। अभिवदति नाभिवादयतेऽप्याचार्यं श्वशुरं राजनमिति अभिवादनं नमस्कारः। स्तुतिर्गुणकथनमिति रमानाथः। वन्द्, (इ) सेट्, आ, सक। (धा.क.)

❖ वन [वन्] शब्दे (भ्वा०)

स्तन **वन** मन शब्दे। (शा.आ.)

ष्टन **वन** शब्दे। (धा.प्र.)(मा.धा.)(धा.क.)

वन भण धण शब्दे । (क्षी.त.)

स्तन्, वन्, सेट्, अक, प। (धा.क.)

❖ वन [वन्] सम्भक्तौ (भ्वा०)

वन षण सम्भक्तौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

भक्तिर्भजनम्। तनादौ वनु याचने। (क्षी.त.)

वनेरर्थभेदात्पुनः पाठ इति मैत्रेयः। वन पाने षणु दान इति द्वयं तनादौ। (मा.धा.)(धा.क.)

वन्, सन्, सेट्, सक, प। (धा.क.)

❖ **वन [वन्] नोच्यते** **(भ्वा०)**

चण **वन** च नोच्यते। (शा.आ.)

❖ **वनु [वन्] नोच्यते** **(भ्वा०)**

वनु च नोच्यते। (धा.प्र.)(क्षी.त.)(मा.धा.)

तथा अनुकर्षणार्थश्चकारः। यद्वा न केवलं कगे, यावद् वनु च नोच्यते क्रियासामान्यवाचित्वात्।

वन षण भक्तौ। (क्षी.त.)

नोपलभ्यते न केवलं कगे यावता वनु च नोच्यत इति स्वामिनोच्यत इति गतौ व्याख्यातम्। उदित्करणसामर्थ्यादयमन्यो धातुः। न तानादिकस्य अयमनुवादः। क्रियासामान्ये मित्त्वमत्रार्थे हि अनुवादात् इति तानादिकण्वानुवाद्यः। (मा.धा.)

वनु च नोपलभ्यते [नोच्यते] - वन् (उ) सेट्, प। क्रियासामान्ये वनति इत्यादि। (धा.क.)

❖ **वनु [वन्] याचने** **(तना०)**

वनु याचने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

दन्त्योष्ठ्यादिरयम्। (धा.प्र.)

भ्वादौ वनु च नोच्यते। (क्षी.त.)

दन्त्योष्ठ्यादिः। (मा.धा.)

वन् (उ) सेट्, सक, आ। मित्त्वविकल्पे वनु च नोच्यते इति घटादिकस्याग्रह इत्येके। अन्ये अनन्तरस्य विधिरिति न्यायेन घटादिकस्य वनतेरेव एते चान्द्रास्त्विमं परस्मैपदिनमाहुः। (धा.क.)

❖ **वन्चु [वञ्च्] गत्यर्थः** **(भ्वा०)**

वन्चु चन्चु तन्चु त्वन्चु म्रुचु म्लुचु गत्यर्थाः। (क्षी.त.)

वन्चु चन्चु तन्चु त्वन्चु म्रन्चु म्लुन्चु ग्रुन्चु ग्लुन्चु म्रुचु म्लुचु गत्यर्थाः - सर्वे उदनुबन्धाः, सेटः, सकर्म्मकाश्च। गत्यर्था इत्यत्र गतौ इति दुर्गः पठति। (धा.क.)

❖ **वन्चु [वञ्च्] प्रलम्भने** **(चुरा०)**

वन्चु प्रलम्भने। (धा.प्र.)

❖ **वभ्र [वभ्र्] गत्यर्थः** **(भ्वा०)**

अभ्र वभ्र मभ्र चर गत्यर्थाः। (धा.प्र.) (मा.धा.)(धा.क.)

सर्वे सेटः सकर्मकाः परस्मैपदिनश्च। (धा.क.)

❖ **वमु [वम्] अदने** **(भ्वा०)**

वमु छमु जमु झमु अदने। (शा.आ.)(मा.धा.)

❖ **वय [वय्] गतौ** **(भ्वा०)**

अय **वय** षय मय चय दय तय नय गतौ। (शा.आ.)

अय **वय** यय मय चय तय णय गतौ। (धा.प्र.)

अय **वय** पय मय चय तय नय गतौ। (क्षी.त.)

अय **वय** पय मय चय तय णय गतौ। (मा.धा.)

अय **वय** पय मय चय तय णय गतौ - सर्वे सेटः, सकर्मकाः, आत्मनेपदिनश्च। (धा.क.)

❖ **वर [वर] ईप्सायाम्** **(चुरा०)**

वर ईप्सायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

कन्यां वरयति, वरः चुरादिवृञो वारयति, वरति, वरते, स्वादौ वरणे - वृणोति, वृणुते, क्र्यादौ वृङ् सम्भक्तौ वृणीते। (क्षी.त.)

वर, सक, उ। (धा.क.)

❖ वर्च [वर्च्] दीप्तौ (भ्वा०)

वर्च दीप्तौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

सेटः आत्मनेपदिनश्च। (क्षी.त.)

वकारोऽयं दन्त्योष्ठ्यः। वर्च, सेट्, अक, आ। (धा.क.)

❖ वर्ण [वर्ण्] प्रेरणे वर्णने (चुरा०)

वर्ण चूर्ण प्रेरणे। (धा.प्र.)(मा.धा.)(धा.क.)

वर्ण वर्णने। पक्ष परिग्रह इत्येके । (क्षी.त.)

वर्ण वर्णने। एवं मैत्रेयः अन्ये तु वर्ण वर्णने चूर्ण प्रेरण इति। (मा.धा.)(धा.क.)

वर्ण, सक, उ। (धा.क.)

❖ वर्ण [वर्ण्] वर्णक्रियाविस्तारगुणवचनेषु (चुरा०)

वर्ण वर्णक्रियाविस्तारगुणवचनेषु। (धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

वर्णक्रिया - वर्णनं वर्णकरणं वा। कथां वर्णयति, सुवर्णं वर्णयति। विस्तारे वर्णनेयम्। गुणवचनं स्तुतिः शुक्लाद्युक्तिर्वा - राजानमुपवर्णयति, वर्णकः। (क्षी.त.)

वर्णक्रिया वर्णकरणम्। सुवर्णं वर्णयति। कथां वर्णयति। विस्तृणाति इत्यर्थः। राजानं वर्णयति। स्तौति इत्यर्थः। वर्णं गृह्णाति वर्णयति। (मा.धा.)(धा.क.)

वर्ण, सक, प। (धा.क.)

❖ वर्ध [वर्ध्] छेदनपूरणयोः (चुरा०)

वर्ध छेदनपूरणयोः। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

वर्ध, सक, उ। (धा.क.)

❖ वर्फ [वर्फ्] गतौ (भ्वा०)

वर्फ रफ रफि अर्ब वर्ब कर्ब खर्ब गर्ब घर्ब शर्ब षर्ब सर्ब चर्ब भर्ब नर्ब गतौ- पञ्चदशैते गत्यर्थाः। (क्षी.त.)

❖ वर्ब [वर्ब्] गतौ (भ्वा०)

पर्प रफ रफि अर्ब पर्ब **वर्ब** मर्ब षर्ब कर्ब खर्ब गर्ब शर्ब चर्ब गतौ। (धा.प्र.)

वर्फ रफ रफि अर्ब **वर्ब** कर्ब खर्ब गर्ब घर्ब शर्ब षर्ब सर्ब चर्ब भर्ब नर्ब गतौ- पञ्चदशैते गत्यर्थाः। (क्षी.त.)

❖ वर्ष [वर्ष्] स्नेहने (भ्वा०)

पर्ष **वर्ष** स्नेहने। (धा.प्र.)

वर्ष स्नेहने। (मा.धा.)(धा.क.)

दन्त्योष्ठ्यादिः। वृषु सेचन इत्यग्रे परस्मैपदी। शक्त्यर्थश्चुरादौ। (मा.धा.)(धा.क.)

वर्ष, सेट्, सक, आ। (धा.क.)

❖ वर्ह [वर्ह्] परिभाषणहिंसादानेषु (भ्वा०)

वर्ह वल्ह परिभाषणहिंसादानेषु। (धा.प्र.)
(धा.क.)

वर्ह परिभाषणहिंसादानेषु। (क्षी.त.)

दन्त्योष्ठ्यादी। वर्ह, वल्ह, सेट्, सक् आ। (धा.क.)

❖ वर्ह [वर्ह्] हिंसायाम् (चुरा०)

ब्रूस, **वर्ह** हिंसायाम्। (धा.क.)

❖ वर्ह [वर्ह्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट

घटि वृहि **वर्ह** वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः-भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

❖ वर्ह [वर्ह्] परिभाषणहिंसाच्छादनेषु (भ्वा०)

वर्ह वल्ह परिभाषणहिंसाच्छादनेषु। (मा.धा.) (धा.क.)

वर्ह वल्ह प्राधान्ये। (शा.आ.)

वर्ह वल्ह परिभाषणहिंसादानेषु। (धा.प्र.)

दन्त्यौष्ठ्यादी। अत्र धनपालमैत्रेयौ परिभाषणादौ ओष्ठ्यादित्वं वाहतुः छादयति अनेनेति बर्हः। घञिति वदन् शाकटायनः अपि अत्र एव अनुकूलः। यथा वयं तथा स्वामी यदाह बर्ह बल्ह प्राधान्ये। मुनिबर्हणमिति एवं मुनिप्रबर्हा इति प्राधान्ये प्रयोग उपपद्यते। प्रवल्हिकेति च भाषार्थे। तदुक्तं पुरुषकारे प्रवल्हिका प्रहेलिकेति चात्रैवानुकुलं भाषाविशेषत्वात् प्रवल्हेति। वृह उद्यमने चुरादौ। (मा.धा.)

दन्त्योष्ठ्यादी। वर्ह, वल्ह, सेट्, सक् आ। (धा.क.)

❖ वल्ह [वल्ह्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह **वल्ह** गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः-भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

❖ वल [वल्] संवरणे सञ्चरणे च (भ्वा०)

वल वल्ल संवरणे सञ्चरणे। (शा.आ.)

वल वल्ल संवरणे सञ्चरणे च। (मा.धा.)(धा.क.)

वल वल्ल संवरणे। (धा.प्र.)

वल संवरणे - ज्वलादौ वल प्राणने। (क्षी.त.)

वल्, वल्ल, सेट्, सक, प। (धा.क.)

❖ वल्क [वल्क्] परिभाषणे (चुरा०)

श्वल्क **वल्क** परिभाषणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

श्वल्क्, वल्क्, (कुत्सितभाषणे) सक, सेट्, उ। (धा.क.)

❖ वल्ग [वल्ग्] गत्यर्थः (भ्वा०)

उख नख वख मख रख लख वखि लखि इखि ईखि **वल्ग** रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि **वल्ग** रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि **वल्ग** रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश। तृतीयान्ताः त्रयोदश। एवमेकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि **वल्ग** रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि

रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। दुर्गसम्मतः पाठो यथा - उख णख वख मख रख लख रखि लखि इखि ईखि वल्ग रगि लगि अगि वगि मगि स्वगि इगि रिगि लिगि गत्यर्थाः इति। एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ **वल्भ [वल्भ्] भोजने (भ्वा०)**

वल्भ भोजने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)

दन्त्योष्ठ्यादिः। वल्भते णौ निगरणार्थत्वात् नित्यं परस्मैपदम्। (मा.धा.)

❖ **वल्ल [वल्ल्] संवरणे सञ्चरणे च (भ्वा०)**

वल **वल्ल** संवरणे सञ्चरणे। (शा.आ.)

वल **वल्ल** संवरणे। (धा.प्र.)

वल **वल्ल** संवरणे सञ्चरणे च। (मा.धा.)
(धा.क.)

वल्, वल्ल, सेट्, सक, प। (धा.क.)

❖ **वल्ह [वल्ह्] प्राधान्ये (भ्वा०)**

वर्ह **वल्ह** प्राधान्ये। (शा.आ.)

वल्ह प्राधान्ये। (धा.प्र.)

❖ **वल्ह [वल्ह्] परिभाषणहिंसाच्छादनेषु (भ्वा०)**

वर्ह **वल्ह** परिभाषणहिंसाच्छादनेषु। (धा.क.)

वर्ह **वल्ह** परिभाषणहिंसादानेषु। (धा.प्र.)
(मा.धा.)

दन्त्यौष्ठ्यादी। अत्र धनपालमैत्रेयौ परिभाषणादौ ओष्ठ्यादित्वं, वृद्धौ दन्त्यौष्ठ्यादित्वं चाहतुः। छादयति अनेनेति बर्हः घञिति वदन् शाकटायनः अप्यत्रैवानुकूलः। यथा वयं तथा स्वामी। यदाह बर्ह बल्ह प्राधान्ये। मुनिप्रवर्हा इति प्राधान्ये प्रयोग उपपद्यते। प्रवल्हिकेति च भाषार्थे। तदुक्तं पुरुषकारे - प्रवल्हिका प्रहेलिकेति, तच्चात्रैवानुकुलम्। भाषाविशेषत्वात् प्रवल्हेति। वृहू उद्यमने इति चुरादौ। (मा.धा.)

दन्त्योष्ठ्यादी। वर्ह, वल्ह, सेट्, सक आ। (धा.क.)

❖ **वश [वश्] कान्तौ (अदा०)**

वश कान्तौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

कान्तिरिच्छा। (क्षी.त.)(धा.क.)

वश्, सेट्, सक, प। (धा.क.)

❖ **वष [वष्] वृद्धौ (भ्वा०)**

वष पुष वृद्धौ। (शा.आ.)

❖ **वष [वष्] हिंसार्थः (भ्वा०)**

कष शिष जिष झष **वष** रुष ऋष हिंसार्थाः। (शा.आ.)

कष शिष जष झष शष **वष** मष रुष रिष हिंसार्थाः। (धा.प्र.)

कष शिष जष झष शष **वष** मष मुष रुष रिष हिंसार्थाः। (क्षी.त.)

कष खष शिष जष झष शष **वष** मष रुष रिष हिंसार्थाः - तृतीयषष्ठौ तालव्योष्मादी सप्तमो दन्त्योष्ठ्यादिः। हिंसार्थत्वे यदि दृश्यते तदा धातूनामनेकार्थत्वाद् भविष्यति। (मा.धा.)

कष खष शिष जष झष शष **वष** मष रुष रिष

हिंसार्थाः - तृतीयषष्ठो तालव्योष्मादी। सप्तमो दन्त्योष्ठादिः। सर्वे सकर्मकाः परस्मैपदिनश्च। हिंसार्थत्वं यदि दृश्यते, तदा धातुनामनेकार्थत्वात् भविष्यति। (धा.क.)

❖ वस [वस्] निवासे (भ्वा०)

वस निवासे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

अनुदात्त उदात्तेत्। अदादौ वस आच्छादने। दिवादौ वसु स्तम्भे। चुरादौ वस स्नेहच्छेदापहरणेषु , वास उपसेवायाम् । (क्षी.त.)

अनुदात्त उदात्तेत्। आच्छादनेऽयमदादिः। स्तम्भने दिवादिः। स्नेहनादौ कथादिश्चुरादिश्च। वस उपसेवायामाच्छादन इति च कथादिः। (मा.धा.)

अनुदात्त उदात्तेत्। वस्, अनिट्, अक, प। अधि-अधिवासः। उप-उपवासः। नि-निवासः। निर् - णिच् - निर्वासनम्। प्र - प्रवासः। आ-आवासः। आच्छादनेऽयमदादिः, स्तम्भने दिवादिः, स्नेहनादौ कथादिश्चुरादिश्च। वस उपसेवायामाच्छादन इति च कथादिः। (धा.क.)

❖ वस [वस्] आच्छादने (अदा०)

वस आच्छादने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वस, सेट्, सक, आ। (धा.क.)

❖ वस [वस्] स्नेहमोहच्छेदापहरणेषु(चुरा०)

वस स्नेहनच्छेदापहरणेषु। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वासना। अवहरणे च। प्रवासयति अपराधिनम्। अन्यत्र वसति। (धा.प्र.)

छेदोपहरणयोः इत्येके। स्तम्भने वास उपसेवायाम् इति दीर्घोपधश्च कथादौ। (मा.धा.)

छेदोपहरणयोरिति केचित्। वस, सक, उ। अयं निवासे कथादिर्भौवादिकः च। वस्ते इति आच्छादने। वस्यतीति स्तम्भने। वास उपसेवायामिति दीर्घोपधः कथादौ। (धा.क.)

❖ वस [वस] निवासे (चुरा०)

वस निवासे। (धा.प्र.)(मा.धा.)(धा.क.)

वस, अक, प। भ्वाद्यदादिक्र्यादिषु अपि अयम्। (धा.क.)

❖ वसु [वस्] स्तम्भे (दिवा०)

वसु स्तम्भे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अयं दन्त्योष्ठ्यादिः इत्यात्रेयादयः। तथैव दैव-पुरुषकारयोः। अपरे बकारादिमाहुः। (मा.धा.)

वस्, (उ) सेट्, अक, प। (धा.क.)

❖ वस्क [वस्क्] गत्यर्थः (भ्वा०)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वक्क **वस्क** मस्क तिकृ टिकृ टीकृ रघि लघि गत्यर्थाः। (धा.प्र.)

ककि श्वकि त्रकि ढौकृ त्रौकृ ष्वक्क **वस्क** मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (क्षी.त.)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क **वस्क** मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (मा.धा.)

ककि वकि [मकि] श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क

वस्क मस्क टिकृ टीकृ [सेकृ श्रेकृ श्रकृ श्लकि] रघि लघि गत्यर्थाः। (धा.क.)

❖ **वस्त [वस्त्] अर्दने (चुरा०)**

वस्त गन्ध अर्दने - वस्त्, गन्ध, सक, आ। (धा.क.)

❖ **वह [वह्] प्रापणे (भ्वा०)**

वह प्रापणे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वह अनिट्, सक, उ। अयं द्वकर्मकः। सम् णिच्- संवाहनम्। अति - वाहनम्। उद् - उदाहः। वि - विवाहः। निर - निर्वाहः। प्र - प्रवाहः। (धा.क.)

❖ **वहि [वंह] वृद्धौ (भ्वा०)**

वहि महि वृद्धौ। (धा.प्र.)

❖ **वा [वा] गतिगन्धनयोः (अदा०)**

वा गतिगन्धनयोः। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वा, अनिट्, प। (धा.क.)

❖ **वा [वा] गतिसुखसेवनयोः (चुरा०)**

वा गतिसुखसेवनयोः। (क्षी.त.)

❖ **वाक्षि [वाङ्क्ष्] काङ्क्षायाम् (भ्वा०)**

काक्षि **वाक्षि** माक्षि काङ्क्षायाम्। (शा.आ.)(धा.प्र.) (मा.धा.)(धा.क.)

काक्षि **वाक्षि** माक्षि द्राक्षि ध्राक्षि ध्वाक्षि काङ्क्षायाम्। (क्षी.त.)

काङ्क्ष्, वाङ्क्ष्, माङ्क्ष्, (इ) सेट्, सक, प। (धा.क.)

❖ **वाछि [वाञ्छ्] इच्छायाम् (भ्वा०)**

वाछि इच्छायाम्। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वाञ्छ् (इ) सेट्, सक, प। (धा.क.)

❖ **वाडृ [वाड्] आप्लाव्ये (भ्वा०)**

वाडृ अप्लाव्ये। (धा.प्र.)(क्षी.त.)

वाडृ आप्लाव्ये। (मा.धा.)

आप्लाव्यमाप्लावनम्। (क्षी.त.)

वशादिः। आप्लवनमाप्लवः। (मा.धा.)

❖ **वात [वात] सुखसेवनयोः (चुरा०)**

वात सुखसेवनयोः। (धा.प्र.)(मा.धा.)(धा.क.)

गतिसुखसेवनेष्वित्येके। (मा.धा.)(धा.क.)

वात, अक, उ। (धा.क.)

❖ **वावृतु [वावृत्] वरणे (दिवा०)**

वावृतु वरणे - ततो वावृत्यमाना सा रामशालामविक्षत इति भट्टिः। अन्ये भ्वादेरेव वरणे दिवादित्वं वा मन्यन्ते। तेन वरणे द्युतादि कार्यं न भवति। (क्षी.त.)

❖ **वाशृ [वाश्] शब्दे (भ्वा०)**

वाशृ शब्दे। (शा.आ.)

❖ **वाशृ [वाश्] शब्दे (दिवा०)**

वाशृ शब्दे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वाश, (ऋ) सेट्, अक, आ। (धा.क.)

❖ **वास [वास] उपसेवायाम् (चुरा०)**

वास उपसेवायाम्। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अयं कथादौ अपि इति दैवपुरुषकारयोः। वस्त

इति आच्छादने। (मा.धा.)

वास, सक, उ। वस निवासे। अयं कथादावपि। (धा.क.)

❖ **वाहृ [वाह्] प्रयत्ने (भ्वा०)**

वेहृ जेहृ **वाहृ** प्रयत्ने। (शा.आ.)

(धा.प्र.)(मा.धा.)

आद्यो दन्त्यौष्ठ्यादी। अन्त्यः केवलोष्ठ्यादिः। उभावपि केवलौष्ठ्यादी इत्येके। दन्त्यौष्ठ्यादी इत्यन्ये। (मा.धा.)

❖ **विचिर् [विच्] पृथग्भावे (रुधा०)**

विचिर् पृथग्भावे। (शा.आ.)

(धा.प्र.)(क्षी.त.)

❖ **विचिर् [विच्] पृथग्भावे (जुहो०)**

विचिर् पृथग्भावे। (शा.आ.)

❖ **विच्छ [विच्छ्] भाषार्थः (चुरा०)**

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप **विच्छ** चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप **विच्छ** चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप **विच्छ** चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुप् धूप **विच्छ** ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ **विच्छ [विच्छ्] गतौ (तुदा०)**

विच्छ गतौ। (शा.आ.)(धा.प्र.)

(क्षी.त.)(मा.धा.)(धा.क.)

उदात्तेत्। अयं भासार्थे चुरादौ। (मा.धा.)

विच्छ्, सेट्, सक, प। (धा.क.)

❖ **विजिर् [विज्] पृथग्भावे (जुहो०)**

विजिर् पृथग्भावे। (धा.प्र.)(क्षी.त.)

(मा.धा.)(धा.क.)

विचिर् इति सभ्याः। (क्षी.त.)

निजिविजी द्वौ रुधादौ च। ओविजी भयचलनयोरिति तुदादौ। (मा.धा.) (धा.क.)

विज्, (इर्) अनिट्, अक उ। (धा.क.)

❖ विजिर् [विज्] पृथग्भावे (रुधा०)

विजिर् पृथग्भावे। (मा.धा.)(धा.क.)

विज्, (इर्) अनिट्, अक, उ। (धा.क.)

❖ विट [विट्] शब्दे (भ्वा०)

विट शब्दे। (धा.प्र.)(मा.धा.)(धा.क.)

विट्, अक, सेट्, प। (धा.क.)

❖ विट [विट्] आक्रोशे (भ्वा०)

विट आक्रोशे - डान्तः अयमिति नन्दी - विडालः, विड शब्दे, पिट आक्रोशे इति मल्लः पर्यट्टकान्तरे विभज्याह। (क्षी.त.)

❖ वित्त [वित्त्] समुत्सर्गे (चुरा०)

वित्त समुत्सर्गे - समुत्सर्गस्त्यागः। व्यय वित्तसमुत्सर्गे इति सभ्याः। (क्षी.त.)

❖ विथृ [विथ्] याचने (भ्वा०)

विथृ वेधृ याचने। (शा.आ.)

विथृ वेथृ याचने। (धा.प्र.)(क्षी.त.)(मा.धा.)

कौशिकस्तु अविथुरसिद्धये यातन इत्याह। (क्षी.त.)

द्वितीयान्तौ आद्यो धान्त इति कौशिकः। क्षीरस्वामिना त्वयं पक्षो दूषितः। (मा.धा.)

तवर्गद्वितीयान्तौ। आद्यो धान्त इति कौशिकः। क्षीरस्वामिना त्वयं पक्षो दूषितः। विथ्, (ऋ) सेट्, सक, आ। वेथ, (ऋ) सेट्, सक, आ। इमौ द्विकर्मकौ। (धा.क.)

❖ विद [विद्] ज्ञाने (अदा०)

विद ज्ञाने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.) (धा.क.)

इतश्चत्वारः सेटः परस्मैपदिनश्च। दिवादौ विद सत्तायाम्। तुदादौ विद्लृ लाभे। रुधादौ विद विचारणे। चुरादौ विद चेतनाख्यानविवादेषु। (क्षी.त.)

अयं सत्तायां दिवादौ। विचारणे रुदादौ। चेतनाख्याननिवासेषु चुरादौ। विद्लृ लाभे तुदादौ। (मा.धा.)

विद्, सेट्, सक, प।

वेत्तिरूपं विद ज्ञाने, विन्ते विद विचारणे।
विद्यते विद सत्तायां लाभे विन्दति विन्दते॥ (धा.क.)

❖ विद [विद्] सत्तायाम् (दिवा०)

विद् सत्तायाम्। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

सत्ता भावः। अदादौ विद ज्ञाने । तुदादौ विद्लृ लाभे । रुधादौ विद विचारणे । चुरादौ विद चेतनादिषु । (क्षी.त.)

विद्, अनिट्, सक, आ। अदादौ विशेषो द्रष्टव्यः। (धा.क.)

❖ विद [विद्] विचारणे (रुधा०)

विद विचारणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

दिवादौ दुर्गमते। (क्षी.त.)

विद्, अनिट्, सक, आ। (धा.क.)

❖ विद [विद्] चेतनाख्याननिवासेषु(चुरा०)

विद चेदनाख्याननिवासेषु। (धा.प्र.)
(मा.धा.)(धा.क.)

विद चेतनाख्यानविवादेषु। (क्षी.त.)

विद् चेतन इत्येके। विद चेतनाख्यानपरिवादेषु इत्यपरे।

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे।
विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेषु च क्रमात्।
(मा.धा.)

विदु चेतन इत्युदनुबन्ध इत्येके, विद चेतनाख्यानपरिवादेष्वित्यपरे। विद्, अक, आ। वेदयते। अत्र कारिका -

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे।
विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेषु च क्रमात्।
(धा.क.)

❖ विद्लृ [विद्] लाभे (तुदा०)

विद्लृ लाभे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

अयं सेडपि मुचादिकार्यानुरोधार्थमिह पठितः (मा.धा.)

व्याघ्रभूत्यादिमते विदधातुः अयं सेट्, कलापादिमते अनिट्, मतान्तरे वेट्, विद् (लृ) सक, उ। (धा.क.)

❖ विध [विध्] विधाने (तुदा०)

विध विधाने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

विधिशब्दम् अस्मात् मैत्रेय आह। समर्थसूत्रे भाष्यं विधिरिति कोऽयं शब्दः। विपूर्वाद्धञः कर्मसाधन इकार इति। अत्र कैयटे विध विधानइत्यस्यौणादिक इन् प्रत्ययान्तस्य निवृत्त्यर्थं विपूर्वाद् घञ् इत्युक्तं। स्वरे चानयोर्भेदः। (मा.धा.)

विध्, सेट्, सक, प। (धा.क.)

❖ विल [विल्] भेदने (तुदा०)

विल भेदने। (शा.आ.)

❖ विल [विल्] संवरणे (तुदा०)

विल वरणे। (शा.आ.)

विल संवरणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

दन्त्योष्ठ्यादिः। (क्षी.त.) (मा.धा.)

कल विल क्षेप इति चुरादौ। (मा.धा.)

संवरणमाच्छादनम्। विल्, सेट्, सक, प। अयं दन्त्यौष्ठ्यादिः। (धा.क.)

❖ विल [विल्] क्षेपे (चुरा०)

कल **विल** क्षेपे। (मा.धा.)(धा.क.)

मैत्रेयादिभिस्तु न पठ्यते। (मा.धा.)

कल्, विल्, सक, उ। क्विचित् किलेत्यप्यत्र तत् पठ्यते, मैत्रेयादीनामसम्मतम्। (धा.क.)

❖ विश [विश्] प्रवेशने (तुदा०)

विश प्रवेशने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

विश्, अनिट्, सक, प। (धा.क.)

❖ विष [विष्] विप्रयोगे (क्र्या०)

विष विप्रयोगे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

ह्वादौ विष्लृ व्याप्तौ। (क्षी.त.)

अनिड्कारिकायां विशिग्रहणेन जौहोत्यादिकः अयं च गृह्यते इति न्यासे। (मा.धा.)

विप्रयोगः विश्लेषः। विष्, अनिट्, सक प। (धा.क.)

❖ विषु [विष्] सेचने (भ्वा०)

जिषु विषु मिषु सेवने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

ह्वादौ विष्लृ व्याप्तौ। तुदादौ मिष स्पर्धायाम्। मिश मश शब्दे तालव्यान्तौ। (क्षी.त.)

विष्लृ व्याप्तौ जुहोत्यादौ। विष विप्रयोग इति च क्र्यादौ। अयं स्पर्द्धायां तुदादौ। (मा.धा.)

सर्वे उदनुबन्धाः, सकर्मकाः परस्मैपदिनश्च। विष्लृ व्याप्तौ जुहोत्यादौ। विष विप्रयोगे इति च क्र्यादौ। अयं स्पर्द्धायां तुदादौ। (धा.क.)

❖ विष्क [विष्क्] हिंसायाम् (चुरा०)

विष्क हिंसायाम्। (मा.धा.)(धा.क.)

क्वचित्कोशे हिष्केति पठ्यते। (मा.धा.)

विष्क्, सक, आ। (धा.क.)

❖ विष्क [विष्क] दर्शने (चुरा०)

विष्क दर्शने। (धा.प्र.)(मा.धा.)(धा.क.)

विष्क, सक, प। (धा.क.)

❖ विष्लृ [विष्] व्याप्तौ (जुहो०)

विष्लृ व्याप्तौ। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

उदिदित्येके। (क्षी.त.)

विष् (लृ) अनिट्, सक, उ, (आ - वोप)। प्रणिच् - परिवेषणम् - अन्नाद्युपसर्पणम्। उपनीय मांसानि परिवेषयेत् (मनु.)। (धा.क.)

❖ विस [विस्] प्रेरणे (दिवा०)

विस प्रेरणे। (धा.प्र.)(धा.क.)

विस्, सेट्, सक, प। (धा.क.)

❖ वी [वी] गतिव्याप्तिप्रजनकान्त्यसनखादनेषु (अदा०)

वी गतिप्रजनकान्त्यशनखदनेषु। (शा.आ.)

वी गतिप्रजनकान्त्यसनखादनेषु। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

प्रजनः प्रथमगर्भग्रहणम्, असनं क्षेपः, अशनं व्याप्तिरित्येके। (क्षी.त.)

जनो जन्म। प्रजनो जन्मन उपक्रमो गर्भग्रहणम्। (मा.धा.)

वी, अनिट्, सक, प। (धा.क.)

❖ वीर [वीर] विक्रान्तौ (चुरा०)

शूर वीर विक्रान्तौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

शूर, वीर, अक, आ। (धा.क.)

❖ वुगि [वुङ्ग्] वर्जने (भ्वा०)

युगि जुगि वुगि वर्जने - भुगि भर्जन इत्येके। (क्षी.त.)

युगि जुगि वुगि [रुगि] वर्ज्जने - युङ्ग्, जुङ्ग्, वुङ्ग्, (इ) सेट्, सक, प। (धा.क.)

❖ वुड [वुड्] संवरणे (तुदा०)

स्फुड वुड संवरणे। (धा.प्र.)

❖ वुण [वु] क्षेदने (दिवा०)

वुण क्षेदने। (शा.आ.)

❖ **वुस [वुस्] उत्सर्गे (दिवा०)**

वुस उत्सर्गे। (धा.प्र.)

❖ **वृक [वृक्] आदाने (भ्वा०)**

कुक वृक आदाने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

आदानं ग्रहणम्। कुक्, सक, सेट्, आ। वृक्, सेट्, अक, आ। (धा.क.)

❖ **वृक्ष [वृक्ष्] वरणे (भ्वा०)**

वृक्ष आवरणे। (शा.आ.)

वृक्ष वरणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वृक्ष, सेट्, सक, आ। (धा.क.)

❖ **वृङ् [वृ] सम्भक्तौ (क्र्या०)**

वृङ् सम्भक्तौ। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

उदात्तः। संभक्तिः संसेवा। स्वादौ वृञ् वरणे। (क्षी.त.)

उदात्त आत्मनेपदी। (मा.धा.)

वृ, (ङ्) सेट्, सक, आ। (धा.क.)

❖ **वृङ् [वृ] व्यायामे (तुदा०)**

वृङ् व्यायामे। (शा.आ.)

❖ **वृङ् [वृ] वरणे (दिवा०)**

वृङ् वरणे। (शा.आ.)

❖ **वृहि [वृंह्] वृद्धौ (भ्वा०)**

तृह तृहि दृह दृहि वृह वृहि वृद्धौ। (धा.प्र.)

❖ **वृहि [वृंह्] भाषार्थः (चुरा०)**

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि **वृहि** वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि **वृहि** वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि **वृहि** बर्ह बल्ह गुपू धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ **वृज [वृज्] गतौ (भ्वा०)**

वृज ध्रजि ध्रज ध्वजि गतौ- ध्वजेत्येके। (क्षी.त.)

❖ **वृजि [वृञ्ज्] वर्जने (अदा०)**

वृजि वर्जने। (शा.आ.)

❖ **वृजि [वृञ्ज्] वर्जने (रुधा०)**

वृजि वर्जने। (शा.आ.)

❖ **वृजी [वृज्] वर्जने (अदा०)**

वृजी वर्जने। (धा.प्र.)(मा.धा.)(धा.क.)

दन्त्योष्ठ्यादिः। इदिदित्यात्रेयादयो दौर्गाश्च ।

अयं रुधादौ युजादौ च। अयमिदिदिति मैत्रेयः। तथा च स्वामी वृज इति दौर्गाः। शाकटायनस्य अपि इदित्वमेवेष्टम् - यदाह पिजु वृजु पृचै सम्पर्चन इति। तन्मते पूर्वोऽयं वक्ष्यमाणास्त्रयश्च सम्पर्चनार्थः। (मा.धा.)

इदिदित्यात्रेयादयः। वृज्, (ई) सेट्, सक, आ। (धा.क.)

❖ **वृजी [वृज्] वर्जने** **(रुधा०)**

वृजी वर्जने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वृची वरण इति दौर्गाः। अदादौ दुर्गमते। (क्षी.त.)

अत्र वृची वरणे इति दुर्गादयः पठन्ति। (मा.धा.)

वृज्, (ई) सेट्, सक, प। अत्र वृची वरण इति दुर्गादयः पठन्ति इति माधवः। तस्यापि वृजिवद्रूपम्। अदादौ चुरादौ चायम्। (धा.क.)

❖ **वृजी [वृज्] वर्जने** **(चुरा०)**

वृजी वर्जने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वृज् (ई) सक, उ। (धा.क.)

❖ **वृञ् [वृ] वरणे** **(भ्वा०)**

वृञ् वरणे। (शा.आ.)

❖ **वृञ् [वृ] वरणे** **(स्वा०)**

वृञ् वरणे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

उदात्तः। वृङ् सम्भक्ताविति क्र्यादौ। तथा दीर्घान्तो ञिदश्चिच्च। वरणार्थस्तत्र वृञ् आवरण इति चुरादौ। (मा.धा.)

वृ, (ञ्) सेट्, सक, उ। वृङ् सम्भक्ताविति क्र्यादौ। तथा दीर्घान्तो वरणार्थस्तत्र। वृञ्, आवरण इति चुरादौ। (धा.क.)

❖ **वृञ् [वृ] वरणे** **(क्र्या०)**

वृञ् वरणे। (शा.आ.)

वृञ्, वरणे [भरणे च] - वरणं - प्रार्थनं भरणञ्च। ह्रस्वान्तोऽयमिति दुर्गः। वृ (ञ्) सेट्, सक, उ। (धा.क.)

❖ **वृञ् [वृ] आवरणे** **(चुरा०)**

वृञ् आवरणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

क्र्यादौ वृङ् सम्भक्तौ । (क्षी.त.)

वृ (ञ्) सक, उ। (धा.क.)

❖ **वृतु [वृत्] वर्तने** **(भ्वा०)**

वृतु वर्तने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अयं सकर्मकोऽकर्मकश्च। (शा.आ.)

वर्तनं स्थितिः। दिवादौ वृतु वरणे इत्येके। चुरादौ भासार्थः। (क्षी.त.)

अयं भाषार्थश्चुरादौ। (मा.धा.)(धा.क.)

वृत्, (उ) सेट्, अक, आ। अति - अतिवर्त्तनम्-अतिक्रमः, उल्लङ्घनम्। अनु - अनुवर्त्तनम्, अनुगमनम्, सेवा, सहगमनम्, अनुरोधः। अप- अपवर्त्तनम् - सङ्क्षिप्तीकरणम्, व्यवकलनम्। प्रतिनिवृत्तिः। व्यपनिवृत्तिः। अभि - अभिमुखागमनम्, आगमनम्। आ - आवर्त्तनम्, आगमनम्। आवृत्तिः। आ, णिच्- आवर्त्तनम्, दुग्धादिपाकः। आवृत्तिः, पाठः।

पुस्तकावृत्तिः। वि - आ - व्यावृत्तिः। उद् - उद्वर्त्तनम् - अतिरेकः, विलेपनम्। अप्, उपा, नि - निवृत्तिः। निर् - निर्वृत्तिः - निष्पत्तिः, समाप्तिः। प्र - प्रवर्त्तनम्। विवर्त्तनम्, घूर्णनम्, भ्रमणम्। परिवर्त्तनम्। संवृतः। प्रवृत्तः। उद्वृतः। अयं भाषार्थश्चुरादौ। (धा.क.)

❖ वृतु [वृतु] वरणे (दिवा०)

वृतु वरणे। (धा.प्र.)(मा.धा.)(धा.क.)

वृतु [वा वृतु] वरणे - वृत् (उ) सेट्, सक, आ। इष्णुज् विधौ वृधुना साहचर्य्यात् वर्त्तनार्थस्य भौवादिकस्य ग्रहणम्। (धा.क.)

❖ वृतु [वृत्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क **वृतु** वृधु भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क **वृतु** वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क **वृतु** वृधु भाषार्थाः- मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी। भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुप् धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क **वृतु** वृधु भासार्थाः [भाषार्थाः]- मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच् पक्षे परस्मैपदम्। (धा.क.)

❖ वृधु [वृध्] वृद्धौ (भ्वा०)

वृधु वृद्धौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ वृधु भासार्थः। तत्रैव वर्ध छेदनपूरणयोः। (क्षी.त.)

अयं भाषार्थश्चुरादौ। (मा.धा.)

वृध् (उ) सेट्, अक, आ। वृतधातुप्रयोगानुसारेण विस्तरो ज्ञातव्यः। भाषार्थश्चुरादौ। (धा.क.)

❖ वृधु [वृध्] भाषार्थः (चुरा०)

पट पुट लट लुट तुजि पिजि मिजि लुजि भजि भुजि लघि त्रसि पिसि दशि कुसि कुशि दसि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोचृ लोकृ णद कुप तर्क वृतु **वृधु** भाषार्थाः- भासार्था इत्येके। भासार्था दीप्त्यर्थाः। (धा.प्र.)

पट पुट रुट लुट तुजि पिजि लजि लुजि अजि कुसि कुशि त्रसि दसि दशि घटि रघि लघि अहि

बहि महि गुपू धूप विच्छ चीव बर्ह बल्ह पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः- एते सकर्मका भासार्था णिचमुत्पादयन्ति। (क्षी.त.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि वर्ह वल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी भासा दीप्तिरर्थो येषान्ते भासार्थाः। (मा.धा.)

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि वृहि बर्ह बल्ह गुप् धूप विच्छ ची पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भासार्थाः [भाषार्थाः] - मैत्रेयानुरोधेनायं पाठो दण्डकस्य। भासार्था इत्येक - इति मैत्रेयः। तथा च क्षीरस्वामी - भासा दीप्तिरर्थो येषां ते भासार्थाः। सर्वे अकर्मकाः। एषु इदनुबन्धा उदनुबन्धाश्च वाणिचः। तत्र अणिच्पक्षे परस्मैपदम्। (धा.क.)

❖ वृश [वृश्] वरणे (दिवा०)

वृश वरणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

इत्यत्र र ऋत इति रत्वं न भवति-

पृथुं मृदुं भृशं चैव कृशं च दृढमेव च।
परिपूर्वं वृढं चैव षडेतान् रविधौ स्मरेत्।

इति परिगणनात्। (मा.धा.)

वृश, सेट्, सक, प। (धा.क.)

❖ वृष [वृष्] वरणे (दिवा०)

वृष वरणे। (शा.आ.)

❖ वृष [वृष्] शक्तिबन्धने (चुरा०)

वृष शक्तिबन्धने। (क्षी.त.)(मा.धा.)(धा.क.)

शक्तिबन्धनं प्रजननसामर्थ्यम्। भ्वादौ वृषु। तवर्गचतुर्थादिः सामर्थ्यधारणार्थ इत्येके। वर्षयते अरिम्। (क्षी.त.)

शक्तिबन्धनं प्रजननसामर्थ्यम् इति केशवस्वामी। शक्तिसम्बन्ध इति मैत्रेयः वर्षयते। वर्षतीति वृष सेचन इत्यस्य शपि। वर्षत इति वर्ष स्नेहन इत्यस्य। (मा.धा.)

शक्तिबन्धनं प्रजननसामर्थ्यम् इति केशवस्वामी। शक्तिसम्बन्ध इति मैत्रेयः। वृष, अक, आ। वर्षयते। वर्षतीति वृष स्नेहने, वर्षत इति वर्ष स्नेहने। (धा.क.)

❖ वृषु [वृष्] सेचने (भ्वा०)

पृषु **वृषु** मृषु सेचने। (शा.आ.)(धा.प्र.)(क्षी.त.)

पृषु **वृषु** मृषु सेचने। मृषु सहने च। (मा.धा.)
(धा.क.)

वृषभो वर्षणादिति। भाष्यलेखनाद् वर्षणमिति च। (धा.प्र.)

इतरौ हिसासंक्लेशनयोश्च। अत्र काश्यपः पृषु हृषु वृषु हिंसासंक्लेशनदानेष्वित्यादि पपाठ। (मा.धा.)

इतरौ हिसासंक्लेशनयोश्च। अत्र काश्यपः - पृषु, हृषु, वृषु, हिंसासंक्लेशणदानेष्वित्यादि पपाठ। सर्वे उदनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनः च। (धा.क.)

❖ वृषु [वृष्] शक्तिसम्बन्धे (चुरा०)

वृषु शक्तिसम्बन्धे। (धा.प्र.)

❖ वृह [वृह्] वृद्धौ (भ्वा०)

तृह तृहि दृह दृहि **वृह** वृहि वृद्धौ। (धा.प्र.)

❖ वृहू [वृह्] उद्यमने (तुदा०)

वृहू उद्यमे। (धा.प्र.)

वृहू उद्यमने। (मा.धा.)(धा.क.)

दन्त्योष्ठ्यादिरयम्। तथा हि मूलमस्यावर्हिं, सक्थ्याऽवृंहत्, मा मे बलं विवृंहः इति प्रयुज्यते। अन्ये तु बकरादिं पठन्ति। प्राधान्ये त्रय एते ओष्ठ्यादयः। (मा.धा.)

वृह्, (ऊ) वेट्, सक, प। (धा.क.)

❖ वॄ [वॄ] वरणे भरणे (क्र्या०)

वॄ वरणे। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

वॄ भॄ भरणे। (क्षी.त.)

स्वामिशाकटायनौ अपि एवं पठित्वा भरणम् अर्थम् आहतुः। (मा.धा.)

व्ली, वॄ वरणे इति दुर्गः पठति। वॄ, सेट्, सक, प। आद्यं पवर्गतृतीयादि बसवः पठन्ति इति पुरुषकारेणोक्तम्। स्वामिशाकटायनौ अपि एवं पठित्वा भरणार्थमाहतुः। अयं भरणे न पठ्यते, न वरणे इत्यन्ये इति। (धा.क.)

❖ वॄञ् [वॄ] वरणे (क्र्या०)

वॄञ् वरणे। (धा.प्र.)(क्षी.त.)(मा.धा.)

वॄञ् इति नन्दी। (क्षी.त.)

वॄञ्, वरणे [भरणे च] - वरणं - प्रार्थनं भरणञ्च। ह्रस्वान्तोऽयमिति दुर्गः। वृ (ञ्) सेट्, सक, उ। (धा.क.)

❖ वेञ् [वे] तन्तुसन्ताने (भ्वा०)

वेञ् तन्तुसन्ताने। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

वे(ञ्)। अनिट्, सक, उ। (धा.क.)

❖ वेणृ [वेण्] गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु (भ्वा०)

वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वादित्रं वाद्यभाण्डम्, तस्य वादनार्थं ग्रहणम्। (क्षी.त.)

वादित्रग्रहणं नाम वादित्रस्य वाद्यभाण्डस्य वादनार्थं ग्रहणमिति क्षीरस्वामी। भाष्यकाराः तवर्गपञ्चमान्तममुं पेठुः। (मा.धा.)

वादित्रग्रहणं नाम वादित्रस्य वाद्यभाण्डस्य वादनार्थं ग्रहणमिति क्षीरस्वामी। वेण् (ऋ) सेट्, उ। (धा.क.)

❖ वेथृ [वेथ्] याचने (भ्वा०)

विथृ वेथृ याचने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

द्वितीयान्तौ आद्यो धान्त इति कौशिकः। क्षीरस्वामिना त्वयं पक्षो दूषितः। (मा.धा.)

तवर्गद्वितीयान्तौ। आद्यो धान्त इति कौशिकः। क्षीरस्वामिना त्वयं पक्षो दूषितः। विथ्, (ऋ) सेट्, सक, आ। वेथ, (ऋ) सेट्, सक, आ। वि इमौ द्विकर्मकौ। दुह्यादित्वादप्रधाने कर्मणि प्रत्ययः। (धा.क.)

❖ वेधृ [वेधृ] याचने (भ्वा०)

विथृ **वेधृ** याचने। (शा.आ.)

❖ वेल [वेल] कालोपेदेशे (चुरा०)

वेल कालोपदेशे। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

काल इत्यपि धातुरित्येके। (धा.प्र.)

तेनात्रैनं चन्द्रो नाध्यैष्ट। (क्षी.त.)

काल इत्यपि धातुरित्यात्रेयः। (मा.धा.)(धा.क.)

वेल, अक, उ। (धा.क.)

❖ वेलृ [वेल्] चलने (भ्वा०)

वेलृ चेलृ केलृ खेलृ क्ष्वेलृ वेल्ल चेल्ल चलने। (धा.प्र.)

वेलृ चेलृ खेलृ क्ष्वेलृ वेल्ल चलने। (मा.धा.)

वेलृ चेलृ केलृ खेलृ क्ष्वेलृ वेल्ल चलने। दुर्गादयस्त्वन्यथा पठन्ति। सर्वे सेटः, अकर्मकाः, परस्मैपदिनश्च। वेलादीनां पञ्चानामृदित्वात् ह्रस्वाभावादविवेलदित्यादि भवति। (धा.क.)

❖ वेल्ल [वेल्ल्] चलने (भ्वा०)

वेलृ चेलृ केलृ खेलृ क्ष्वेलृ **वेल्ल** चेल्ल चलने। (धा.प्र.)

वेलृ चेलृ खेलृ क्ष्वेलृ **वेल्ल** चलने। (मा.धा.)

वेलृ चेलृ केलृ खेलृ क्ष्वेलृ **वेल्ल** चलने - दुर्गादयस्त्वन्यथा पठन्ति। सर्वे सेटः, अकर्मकाः, परस्मैपदिनश्च। वेलादीनां पञ्चानामृदित्वात् ह्रस्वाभावादविवेलदित्यादि भवति। (धा.क.)

❖ वेल्लृ [वेल्ल्] चलने (भ्वा०)

वेल्लृ चेलृ केलृ खेलृ क्ष्वेलृ चलने। (क्षी.त.)

❖ वेवीङ् [वेवी] वेतिना तुल्ये (अदा०)

वेवीङ् वेतिना तुल्ये। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

तुल्यः प्रोच्यते। (शा.आ.)

एतौ छान्दसाविति भाष्यकृदिच्छति। (धा.प्र.)

वी गत्यादौ, तत्तुल्याऽर्थे। वेतनातुल्य इत्यपाठः। (क्षी.त.)

वी गतीत्यनेन तुल्येऽर्थे वर्तत इत्यर्थः। पूर्ववद् उदाहरणादीनि सेटौ आत्मनेभाषौ इमौ छान्दसौ इति भाष्यवार्तिकयोः स्थितम् दृष्टानुविधिः छन्दसि। अस्माभिः तु कलापमतानुसारेण उदाहरणप्रदर्शनं कृतम्। (मा.धा.)

वी गतीत्यादिना तुल्यार्थे वर्त्तते। वेवी, (ङ्) सेट् सक, आ। (धा.क.)

❖ वेष्ट [वेष्ट्] वेष्टने (भ्वा०)

वेष्ट वेष्टने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

वेष्टनं ग्रन्थनं लोटनं परिहाणिश्च। (क्षी.त.)

वेष्ट, सेट्, सक, आ। (धा.क.)

❖ वेहृ [वेह्] प्रयत्ने (भ्वा०)

वेहृ जेहृ वाहृ प्रयत्ने। (शा.आ.)(धा.प्र.)

वेहृ जेहृ बाहृ प्रयत्ने। (क्षी.त.)(मा.धा.)(धा.क.)

आद्यो दन्त्यौष्ठ्यादिः। अन्त्यः केवलोष्ठ्यादिः। उभावपि केवलौष्ठ्यादी इत्येके। दन्त्यौष्ठ्यादी इत्यन्ये। (मा.धा.)

आद्यो दन्त्योष्ठ्यादिः। अन्त्यः केवलोष्ठ्यादिः। उभावपि केवलौष्ठ्यादिः इत्येके। दन्त्योष्ठ्यादी

इत्यन्ये। वेहृ, जेहृ, बाहृ, (ऋ) सेट्, अक, आ। (धा.क.)

❖ **वै [वै] शोषणे** **(भ्वा०)**

पै। ओवै वै शोषणे। (शा.आ.)

❖ **व्यच [व्यच्] सम्भवे** **(तुदा०)**

व्यच सम्भवे। (क्षी.त.)

❖ **व्यच [व्यच्] व्याजीकरणे** **(तुदा०)**

व्यच व्याजीकरणे। (शा.आ.)(धा.प्र.) (मा.धा.)(धा.क.)

व्याजीकरणं छलनम्। व्यच्, सेट्, सक, प। (धा.क.)

❖ **व्यज [व्यज्] व्याजीकरणे** **(तुदा०)**

व्यज व्याजीकरणे। (क्षी.त.)

❖ **व्यथ [व्यथ्] भयसञ्चलनयोः** **(भ्वा०)**

व्यथ भयचलनयोः। (शा.आ.)(धा.प्र.) (क्षी.त.)

व्यथ भयसञ्चलनयोः। (मा.धा.) (धा.क.)

दुःखचलनयोरिति दुर्गः। (क्षी.त.)

व्यथ दुःखचलनयोरिति दुर्गः। भयचलनयोरिति प्रकाशः। तवर्गचतुर्थान्तोयं दिवादौ। (मा.धा.) (धा.क.)

व्यथ्, सेट्, अक, आ। (धा.क.)

❖ **व्यध [व्यध्] ताडने** **(दिवा०)**

व्यध ताडने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

ताडनं - पीडनम्, वेधनम्। व्यध्, अनिट्, सक, प। (धा.क.)

❖ **व्यय [व्यय्] गतौ** **(भ्वा०)**

व्यय गतौ। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

वित्तत्यागे नित्यम् आत्मनेपदी अयं चुरादावदन्तः। (मा.धा.)

व्यय्, सेट्, सक, उ। वित्तत्यागे नित्यम् आत्मनेपदी। व्यय अयं चुरादावदन्तः। (धा.क.)

❖ **व्यय [व्यय] क्षये** **(चुरा०)**

व्यय क्षये - चन्द्रो व्येञा सिद्धिं मन्यते। व्यप व्यय इति कौशिकः, व्युदि व्यय इति नन्दी। (क्षी.त.)

❖ **व्यय [व्यय] गतौ** **(चुरा०)**

व्यय गतौ। (क्षी.त.)

❖ **व्यय [व्यय] वित्तसमुत्सर्गे** **(चुरा०)**

व्यय वित्तसमुत्सर्गे। (धा.प्र.)(मा.धा.)(धा.क.)

व्यय, सक, प। (धा.क.)

❖ **व्युष [व्युष्] दाहे** **(दिवा०)**

व्युष दाहे। (धा.प्र.)(मा.धा.)

दन्त्योष्ठ्यादिः मूर्धन्यान्तश्च। तथा च वैद्यके त्रिकटुकपर्याये व्योषशब्दः पठ्यते। अयमग्रे पुषादौ विभागे पठिष्यते। क्वचिद् उभयत्र विभागार्थो दन्त्यान्त ओष्ठ्यादिश्च पठ्यते। तत्र पुनः पाठे फलमेकत्रैवार्थे रूपद्वयसिद्धिः। (मा.धा.)

व्युष दाहे [विभागे च] - व्युष्, सेट्, सक, प। (धा.क.)

❖ **व्युष [व्युष्] विभागे** **(दिवा०)**

व्युष विभागे। (धा.प्र.)(मा.धा.)(धा.क.)

अयं दाहे पूर्वं पठितः उदाहृतश्च। इह तु विभागे अव्युषद् इत्यङर्थः पाठः। केचिदमुमोष्ठ्यादिं दन्त्यान्तमिच्छन्ति ब्युसेति। अपरे त्वयकारं बुसेति। (मा.धा.)

अयं दाहे पूर्वं पठितः, उदाहृतश्च, इह तु विभागे अव्युषदित्यङर्थः पाठः। केचिदमुं पकारादिं दन्त्यान्तमिच्छन्ति प्युष इति। अपरेत्ययकारं बुसेति पठन्ति। व्युष्, सेट्, सक, प। (धा.क.)

❖ **व्येञ् [व्ये] संवरणे** **(भ्वा०)**

व्येञ् संवरणे। (शा.आ.)(धा.प्र.)
(क्षी.त.) (मा.धा.)(धा.क.)

संवरणमाच्छादनम्। (क्षी.त.)

व्ये (ञ्) अनिट्, सक, उ। (धा.क.)

❖ **व्रज [व्रज्] गतौ** **(भ्वा०)**

वज **व्रज** गतौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ वज मार्गसंस्कारगत्योः। (क्षी.त.)

एतौ चुरादावपि। (मा.धा.)

वज्, व्रज्, सेट्, सक, प। एतौ चुरादौ च।
(धा.क.)

❖ **व्रज [व्रज्] मार्गसंस्कारगत्योः** **(चुरा०)**

व्रज मार्गसंस्कारयोः गतौ च। (धा.प्र.)

व्रज मार्गसंस्कारगत्योः। (मा.धा.)(धा.क.)

व्रजि मार्गसंस्कारयोर्गतौ चेति मैत्रेयादयः। अत्र धनपालो मार्गे चेति पठति। स्वामी तु व्रजस्थाने वजिं पठित्वा मार्गेति द्वितीयं धातुमाह। तन्त्रान्तरे तु वजिव्रजी द्वौ पठित्वा मार्गसंस्कारगतौ अर्थौ उक्तौ। (मा.धा.)

व्रज्, मार्ग, सक, उ। व्रजि मार्ग संस्कारयोर्गतौ चेति मैत्रेयादयः। अत्र धनपालो मार्गे चेति पठति। स्वामी तु व्रजस्थाने वजिं पठित्वा मार्गेति द्वितीयं धातुमाह। तन्त्रान्तरे वजिव्रजी द्वौ पठित्वा मार्गसंस्कारगतौ अर्थौ उक्तौ।
(धा.क.)

❖ **व्रण [व्रण्] शब्दार्थः** **(भ्वा०)**

अण रण वण भण मण कण क्वण **व्रण** भ्रण शब्दार्थाः। (धा.प्र.)

अण रण वण मण कण क्वण **व्रण** भ्रण ध्वण शब्दार्थाः - एते शब्दनक्रियार्थाः। चुरादौ व्रण गात्रविचूर्णने। (क्षी.त.)

अन रण वण भण मण कण क्वण **व्रण** भ्रण ध्वण शब्दार्थाः - इतः क्रम्यन्ता उदात्ता उदात्तेतः। अण, रण, वण, भण, मण, कण, क्वण, ष्टण, वन, ध्वन, शब्दे, इति दुर्गः। सर्वे सेटः, अकर्म्मकाः, सकर्म्मकाश्च, परस्मैपदिनः। अयं निमीलनार्थश्चुरादौ। व्रणेः शब्दार्थविषये, व्रणगात्रचूर्णन इति गात्रचूर्णनार्थोऽयं कथादिः। (धा.क.)

❖ **व्रण [व्रण] गात्रचूर्णने** **(चुरा०)**

व्रण गात्रविचूर्णने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

व्रण, अक, प। (धा.क.)

❖ **व्रश्चू [व्रश्च्] छेदने** **(तुदा०)**

व्रश्चू च्छेदने। (शा.आ.)

❖ व्री [व्री] वरणे (क्र्या०)

व्री वरणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

व्री, अनिट्, सक, प। (धा.क.)

❖ व्रीङ् [व्री] वृणोत्यर्थे (दिवा०)

व्रीङ् वृणोत्यर्थे। (धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

वृणोत्यर्थो वरणम्। क्र्यादौ व्री वरणे। (क्षी.त.)

दन्त्योष्ठ्यादिः। (मा.धा.)(धा.क.)

व्री (ङ्), अनिट्, सक, आ। (धा.क.)

❖ व्रीड [व्रीड्] चोदने लज्जायाञ्च(दिवा०)

व्रीड चोदने लज्जायां च। (शा.आ.)

व्रीड चोदने।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

लज्जायाञ्चाभिधीयते। (धा.प्र.)

चोदनं लज्जा। बाहुलकादव्रीडाद् अमु देवम् अवीक्ष्य इति। (क्षी.त.)

चोदनं लज्जेतिस्वामी। लज्जायामप्यधीयत इति मैत्रेयः। आत्रेयस्तु व्रीड चोदने लज्जायामिति। (मा.धा.)

चोदनमिह लज्जेति स्वामी। व्रीड्, सेट्, अक, प। (धा.क.)

❖ व्रुड [व्रुड्] संवरणे (तुदा०)

व्रुड सङ्घाते। (शा.आ.)

व्रुड भ्रुड संवरणे। (क्षी.त.)

स्फुड चुड व्रुड संवरणे - मैत्रेयेण एते न पठ्यन्ते। आत्रेयादयस्तु पठन्ति ।अत्र क्रुड भृडनिमज्जन इत्येके इत्यात्रेयः। (मा.धा.)

स्फुड चुड व्रुड संवरणे - स्फुड्, चुड्, व्रुड्, सेट्, सक, प। (धा.क.)

❖ व्ली [व्ली] वरणे (क्र्या०)

व्ली वरणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

नैनं दक्षिणा ह्लीनाति। इत्यादौ दीर्घश्छान्दसः। (मा.धा.)

ह्ली, अनिट्, सक, प। (धा.क.)

❖ शंसु [शंस्] स्तुतौ (भ्वा०)

शंसु स्तुतौ।(शा.आ.)(क्षी.त.)(मा.धा.)(धा.क.)

शंसु स्तुतौ कथने च। (धा.प्र.)

अत एव शंसु स्तुतौ च इति दुर्गः। (क्षी.त.)

अयं दुर्गः द्वावपि तालव्योष्मादी। (मा.धा.)

अयं दुर्गत्यामपीति दुर्ग इति माधवः। द्वावपि तालव्योष्मादी। शन्स्, सेट्, सक, प। (धा.क.)

❖ शक [शक्] विभाषितो मर्षणे (दिवा०)

शक विभाषितो मर्षणे। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.) (धा.क.)

कश विभाषित इति क्वचित् पाठः। (शा.आ.)

मर्षणं क्षमा। विभाषितेष्वयं न पठ्यते। शक्त्यर्थस्य तु कर्त्रभिप्राये अकर्त्रभिप्राये अपि अशकदिति। (धा.प्र.)

अयं मर्षणे दिवादिः विभाषित इत्युभयपदी। तन्त्रान्तरप्रसिद्ध उच्यते। क्षीरस्वामी तु सहने अर्थे शकि धातुर्विभाषितः। विकल्पितः पक्षे दिवादिः। पक्षे स्वादिरित्यर्थः। शाकटायनः च अमुम् एव विभाषितार्थम् अङ्गीकृत्य अस्य चोभयत्र पाठमात्रादेव सिद्धत्वाद्वैय्यर्थमेवं नूनं मत्वा शक मर्षणे इत्येव पपाठ। अतः स्वाम्युक्तम् अनेन एव प्रत्युक्तम्। शाकटायनोक्तमपि

विभाषितपदस्य मैत्रेयादिभिः तन्त्रान्तरप्रसिद्धार्थस्याभिधानात् सार्थकत्वात् यत्किञ्चित्। तथा स्वामिशाकटायनपक्षौ उक्त्वा उक्तं च पुरुषकारे - तच्चैतदुभयमपि बहुसम्मते यथोक्ते अर्थे सम्भवत्ययुक्तमेव इति। (मा.धा.)

अयं मर्षणे दिवादिः। विभाषित इत्युभयपदी तन्त्रान्तरे प्रसिद्धः। शक्, अनिट्, सक, उ। (धा.क.)

❖ शकि [शङ्क्] शङ्कायाम् (भ्वा०)

शकि शङ्कायाम्। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

शङ्का परत्रासः। (क्षी.त.)

शक्लृ शक्ताविति स्वादौ। शकविभाषितो मर्षण इति दिवादौ। (मा.धा.)

शङ्का त्रासः भयं संशयश्च। संशयारोप इति वोपदेवः। शङ्क्, (इ) सेट्, सक, अक, आ। (धा.क.)

❖ शक्लृ [शक्] शक्तौ (स्वा०)

शक्लृ शक्तौ। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

शक्, (लृ) अनिट्, सक, प। (धा.क.)

❖ शच [शच्] व्यक्तायां वाचि (भ्वा०)

शच व्यक्तायां वाचि। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

तालव्यादिः। (क्षी.त.)

शच्, सेट्, सक, आ। (धा.क.)

❖ शट [शट्] रुजाविशरणगत्यवसादनेषु (भ्वा०)

शट रुजाविशरणगत्यवसादनेषु। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चतुर्ष्वर्थेषु। (क्षी.त.)

रुजा च विशरणञ्च गतिश्च अवसादनञ्च तेषु। शट्, सेट्, प। (धा.क.)

❖ शठ [शठ्] हिंसासंक्लेशनयोः कैतवे च (भ्वा०)

शठ कैतवे च। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ शठ श्वठ असंस्कारगत्योः। (क्षी.त.)

चकारात् हिंसासंक्लेशनयोश्च। स्वाम्यादयः पुनश्चकारं नैव पेठुः। गत्यसंस्कारकारयोरयं चुरादौ। तत्रैव श्लाघायाम् आत्मनेपदिषु। सम्यगवभाषणे कथादौ। (मा.धा.)

चकारात् हिंसासंक्लेशनयोश्च। स्वाम्यादयः पुनश्चकारं नैव पेठुः। शठ्, सेट्, प (कैतवे अक अन्यत्र सक)। अयं चुरादौ च। (धा.क.)

❖ शठ [शठ्] असंस्कारगत्योः (चुरा०)

शठ श्वठ संस्कारगत्योः। (धा.प्र.)

शठ श्वठ असंस्कारगत्योः। (क्षी.त.)

(मा.धा.) (धा.क.)

भ्वादौ शठ कैतवे , श्वठि इति दौर्गाः ।(क्षी.त.)

इदिद् द्वितीय इति दुर्गः मैत्रेयोऽपि श्वठीत्येके। (मा.धा.)

शठ्, श्वठ्, सक, उ। इदित् श्वण्ठ दुर्गः। मैत्रेयोऽपि श्वठीत्येक इति। (धा.क.)

❖ शठ [शठ्] श्लाघायाम् (चुरा०)

शठ श्लाघायाम्। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

शट इति नन्दी, शल इति कौशिकः। (क्षी.त.)

शठ्, सक, आ। (धा.क.)

❖ शठ [शठ] सम्यगवभाषणे (चुरा०)

शठ श्वठ सम्यगाभाषणे। (धा.प्र.)

शठ श्वठ सम्यगवभाषणे। (मा.धा.)(धा.क.)

शठ श्वठ असम्यगाभाषणे। भ्वादौ शठ कैतवे, श्वठ गतौ। (क्षी.त.)

आभाषण इति केचित्। शठ, श्वठ, सक, उ। (धा.क.)

❖ शडि [शण्ड्] रुजायां सङ्घाते च (भ्वा०)

शडि रुजायां सङ्घाते च। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

तालव्योष्मादिः। (मा.धा.)(धा.क.)

शण्ड् (इ) सेट्, अक, आ। (धा.क.)

❖ शण [शण्] गतौ दाने च (भ्वा०)

चण **शण** श्रण दाने - गतावित्येके। (धा.प्र.)

क्षण **शण** श्रण दाने च - शण गतावित्यन्ये। अन्त्यौ तालव्यादी। (मा.धा.)

चण **शण** श्रण दाने च - चण्, शण्, श्रण्, सेट्, सक, प। शण गतावित्यन्ये। अन्तौ तालव्यादी। (धा.क.)

❖ शद्लृ [शद्] शातने (भ्वा०)

शद्लृ शातने। (शा.आ.)(धा.प्र.)
(क्षी.त.) (मा.धा.)(धा.क.)

शद्लृ शातन इति विशीर्णतायां वर्त्तते। शातनं विषयभावेन निर्दिश्यते प्रसिद्धिवशात्। (धा.प्र.)

शातनं तनूकरणम्। (क्षी.त.)

अत्र मैत्रेयः शद्लृ विशातने विशीर्णतायां वर्त्तते। शातनं विषयभावेन निर्दिश्यते प्रसिद्धत्वादिति। (मा.धा.)(धा.क.)

शद् (लृ) अनिट्, अक, प। (धा.क.)

❖ शद्लृ [शद्] शातने (तुदा०)

शद्लृ शातने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

भ्वादिष्वयं पठितः, स्वरार्थं पुनरत्र पठ्यते। (धा.प्र.)

पुनः पाठे प्रयोजनं पूर्ववत्स्वरभेदः। (मा.धा.)

शातनमिह पातनम्। शद्, (लृ) अनिट्, सक प। भौवादिकोऽयं द्रष्टव्यः। (धा.क.)

❖ शप [शप्] आक्रोशे (भ्वा०)

शप आक्रोशे। (शा.आ.)(धा.प्र.)
(धा.प्र.)(क्षी.त.)(मा.धा.)

उपलम्भनार्थौ। शप उपालम्भन इत्युपसङ्ख्यानाद् आत्मनेपदम्। (शा.आ.)

रञ्जिशपी दिवादावपि पठ्येते। उभयपदिनौ। (धा.प्र.)

आक्रोशो विरुद्धानुध्यानम्। (क्षी.त.)
(मा.धा.)(धा.क.)

वाचा शरीरस्पर्शने चानेकार्थत्वात्। (क्षी.त.)

अयं दिवादावपि। (मा.धा.)(धा.क.)

शप्, अनिट्, सक, उ। (धा.क.)

❖ शप [शप्] आक्रोशे (दिवा०)

शप् आक्रोशे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अयमपि भौवादिकवत्। (मा.धा.)

शप्, अनिट्, सक, उ। शेषं भौवादिकवत्। (धा.क.)

❖ शब [शब्] गतौ (भ्वा०)

शब गतौ। (शा.आ.)

❖ शब्द [शब्द्] शब्दक्रियायाम् (चुरा०)

शब्द शब्दक्रियायाम् - भाषणेऽपि शब्दविशेषे अस्य वृत्तिं स्मरन्ति। शब्दायमान इति तु शब्दं करोतीति व्युत्पत्त्या उपसर्गादाविष्कारे प्रशब्दयति। विशब्दयति। (धा.प्र.)

❖ शब्द [शब्द्] उपसर्गादाविष्कारे च (चुरा०)

शब्द उपसर्गादाविष्कारे - प्रतिशब्दयति गिरिः प्रतिश्रुत्कामा आविष्करोति इत्यर्थः। योगविभागादाविष्कारे चेत्यनुपसर्गादपीति नन्दी। दौर्गाणां शब्द इत्येकं सूत्रम्, शब्दक्रियायामित्यर्थः, तत उपसर्गादाविष्कार इति चन्द्रः। प्रातिपदिकाद्धात्वर्थे इत्यनेनैव साधयति। (क्षी.त.)

❖ शम [शम्] आलोचने (चुरा०)

शम लक्ष आलोचने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

शमोऽदर्शने इति मित्त्वम्। (क्षी.त.)

शम्, लक्ष, सक, आ। (धा.क.)

❖ शमु [शम्] उपशमे (दिवा०)

शमु उपशमने। (शा.आ.)(मा.धा.)(धा.क.)

शमु उपशमे - शाम्यति रोगः। स्वरादिपाठाद् अव्ययम् प्रशानिति। (धा.प्र.)

शम् (उ) सेट्, अक, प। (धा.क.)

❖ शमोऽदर्शने (भ्वा०)

शमोऽदर्शने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

शमु उपशमे। इत्यस्य दर्शनाद् अन्यत्रार्थे मित्सञ्ज्ञा। अमन्तत्वात् सिद्धौ नियमार्थं वचः। (क्षी.त.)

शम उपशमने दिवादिः। अयं च दर्शने न मिदमन्तोपि। शम लक्ष आलोचन इति चौरादिकः। अत्र स्वामी नेत्यनपेक्ष्य अदर्शन इति पदं दर्शनादन्यत्र मिदिति संव्याचष्ट एवमप्यत्र न फलभेदः। (मा.धा.)

शम उपशमने दिवादिः, अयञ्च दर्शनेन मित्, अमन्तोऽपि निशामयति रूपम्। अत्युत्कृष्टमिदं तीर्थं भारद्वाज निशामयेति। शम लक्ष, आलोचन इति चौरादिकः। अत्र स्वामी न इत्यनपेक्ष्य अदर्शन इति पदम् दर्शनादन्यत्र मित् इति संव्याचष्टे, एवमन्यत्र न फलभेदः। (धा.क.)

❖ शम्ब [शम्ब्] सम्बन्धने (चुरा०)

शम्ब च। (धा.प्र.)

❖ शर्ब [शर्ब्] गतौ (भ्वा०)

पर्प रफ रफि अर्ब पर्ब वर्ब मर्ब षर्ब कर्ब खर्ब गर्ब शर्ब चर्ब गतौ। (धा.प्र.)

वर्फ रफ रफि अर्ब वर्ब कर्ब खर्ब गर्ब घर्ब शर्ब षर्ब सर्ब चर्ब भर्ब नर्ब गतौ - पञ्चदशैते गत्यर्थाः। एकः शर्बस्तालव्यादिः, अपरः षोपदेशः, अन्यो दन्त्यादिः। (क्षी.त.)

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः। परौ द्वावपि द्वियीयान्तौ। एकादश परे तृतीयान्ताः द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। (मा.धा.)

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ - आद्यः प्रथमान्तः। परौ द्वावपि द्वितीयान्तौ। एकादश परे तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ शर्व [शर्व्] हिंसायाम् (भ्वा०)

अर्व शर्व षर्व हिंसायाम्। (धा.प्र.) (मा.धा.)(धा.क.)

अर्व शर्व हिंसायाम्। (क्षी.त.)

अर्व, शर्व्, षर्व्, सेट्, सक, प। (धा.क.)

❖ शल [शल्] चलनसंवरणयोः (भ्वा०)

शल चलनसंवरणयोः। (धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

अयं गत्यर्थे ज्वलादौ परस्मैपदी। (मा.धा.) (धा.क.)

शल्, सेट्, सक, आ। (धा.क.)

❖ शल [शल्] गतौ (भ्वा०)

शल ह्वल गतौ। (शा.आ.)

शल हुल पत्लृ गतौ। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

शल चलनसंवरणयोः इत्यस्यैव ज्वलादिकार्यार्थः पाठः। (क्षी.त.)

अत्र मैत्रेयः चकारो अत्रान्वाचये गतावस्य तावत् प्रयोगः। क्वचित्तु हिंसासंवरणयोश्चेति। क्वचित्तु पठ्यते शल ह्वल ह्मल पद्लृ गतौ हुल हिंसासंवरणयोश्चेति। अत्र पाठे चकाराद्गतौ चेति व्याख्येयम्। शल इति चलनसंवरणयोः गतः। (मा.धा.)

पल शल पत्लृ पथे च गताविति दुर्गः पठति। हुल हिंसासंवरणयोश्चेति कश्चित्। अत्र मैत्रेयः चकारोऽत्रान्वाचये गतावस्य तावत्प्रयोगः। क्वचित्तु हिंसासंवरणयोश्चेति। क्वचित् पठ्यते - शल ह्वल ह्मल पत्लृ गतौ हुल हिंसासंवरणयोः चेति। शल्, हुल्, पत् (लृ) सेट्, अक, प। अयं कथादावपि। (धा.क.)

❖ शल्भ [शल्भ्] कत्थने (भ्वा०)

शल्भ कत्थने। (धा.प्र.)(क्षी.त.)(मा.धा.)

शल्भ्, सेट्, अक, आ। (धा.क.)

❖ शव [शव्] गतौ (भ्वा०)

शव गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

शकारवत्प्रकरणादयमत्र निर्दिश्यते। (धा.प्र.)

शवतिर्गतिकर्मा कम्बोजेषु भाष्यते, विकार एनमार्या आहुः। (क्षी.त.)

दन्त्योष्ठ्यान्तः शवति शवम्। (मा.धा.)

दन्त्योष्ठ्यान्तः। शव्, सेट्, सक, प। (धा.क.)

❖ शश [शश्] प्लुतगतौ (भ्वा०)

शश प्लुतगतौ। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

शशः मृगभेदः तद्योगात् शशी चन्द्रः।(धा.प्र.)

प्लुतिभिर्गमने। (क्षी.त.)

तालव्योष्माद्यन्तः। अत्र कश गताविति क्वचित् पठ्यते। (मा.धा.)(धा.क.)

शश्, सेट्, प। (धा.क.)

❖ शष [शष्] हिंसार्थः (भ्वा०)

कष शिष जष झष **शष** वष मष रुष रिष हिंसार्थाः। (धा.प्र.)

कष शिष जष झष **शष** वष मष मुष रुष रिष हिंसार्थाः। चुरादौ शिष असर्वोपयोगे। खेषेत्यपीति कण्ठ। (क्षी.त.)

कष खष शिष जष झष **शष** वष मष रुष रिष हिंसार्थाः - तृतीयषष्ठौ तालव्योष्मादी। सप्तमो दन्त्योष्ठ्यादिः। शिषि पिषि श्लिष्यतिपुष्यती त्विषिमिति व्याघ्रभूतिवचनात्। तदुक्तं पुरुषकारे शिषेरसर्वोपयोगे। हिंसार्थत्वे यदि दृश्यते तदा धातूनामनेकार्थत्वाद्भविष्यति। (मा.धा.)

कष खष शिष जष झष **शष** वष मष रुष रिष हिंसार्थाः। तृतीयषष्ठो तालव्योष्मादी। सप्तमो दन्त्योष्ठादिः। सर्वे सकर्मकाः परस्मैपदिनश्च। शष आदानसंवरणयोरिति स्वरितेदग्रे। हिंसार्थत्वं यदि दृश्यते, तदा धातुनामनेकार्थत्वात् भविष्यति। (धा.क.)

❖ शस [शस्] प्रसवे (भ्वा०)

शस प्रसवे। (शा.आ.)

❖ शसु [शस्] हिंसायाम् (भ्वा०)

शसु हिंसायाम्। (शा.आ.)(धा.प्र.) (मा.धा.)(धा.क.)

दन्त्योष्मान्तः। (मा.धा.) (धा.क.)

शस् (उ) सेट्, सक, प। (धा.क.)

❖ शाखृ [शाख्] व्याप्तौ (भ्वा०)

शाखृ श्लाखृ व्याप्तौ। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

शाख्, श्लाख्, (ऋ) सेट्, सक, प। (धा.क.)

❖ शाडृ [शाड्] श्लाघायाम् (भ्वा०)

शाडृ श्लाघायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

तालव्यादिरयम्। शाड् (ऋ) सक, सेट, आ। (धा.क.)

❖ शान [शान्] तेजने (भ्वा०)

शान तेजने। (शा.आ.)(धा.प्र.)(क्षी.त.)

दान अवखण्डने। **शान** तेजने। इमावपि नित्यसनन्तौ स्वरितेतौ। (मा.धा.)

दान खण्डने [अवखण्डने] **शान** तेजने - इमौ अपि नित्यसन्नन्तौ स्वरितेतौ। दान्, शान्, सेट्, सक, उ। दानेरार्जवे शानेर्निशाने सन् स्यादिति वृत्तिः। (धा.क.)

❖ शार [शार] दौर्बल्ये (चुरा०)

शार कृप श्रथ दौर्बल्ये - श्रथ प्रतिहर्षे। (क्षी.त.)

❖ शासु [शास्] अनुशिष्टौ (अदा०)

शासु अनुशिष्टौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

अनुशिष्टिर्नियोगः। (क्षी.त.)

अनुशिष्टिर्विविच्य ज्ञापनम्। अयं द्विकर्मकः। माणवकं धर्मे शास्तीति। (मा.धा.)

शास्, (उ) सेट्, सक, प। (धा.क.)

❖ **शास्ति [शास्] शासने (अदा०)**
शास्ति शासने। (शा.आ.)

❖ **शिक्ष [शिक्ष्] विद्योपादाने (भ्वा०)**
शिक्ष विद्योपादाने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

शिक्षेर्जिज्ञासायाम्। (क्षी.त.)

अत्र तरङ्गिणीकारादयः शिक्षेर्जिज्ञासायाम् इति वचनं नियमार्थमिति व्याचक्षाणा जिज्ञासाया अन्यत्र परस्मैपदम् आहुः। तदयुक्तम् शकेः सङ्गतस्य विध्यर्थसम्भवात्। न च विधिसम्भवे नियमो युज्यते। एवमेव समर्थितः न्यासकैयटपदमञ्जर्यादिषु। (मा.धा.)

शिक्ष्, सेट्, सक, आ। (धा.क.)

❖ **शिक्ष [शिक्ष्] जिज्ञासायाम् (स्वा०)**
शिक्षेर्जिज्ञासायाम् इति वचनादात्मनेपदं शिष्यते शिष्यति। (शा.आ.)

❖ **शिघि [शिङ्घ्] आघ्राणे (भ्वा०)**
शिघि आघ्राणे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

आघ्राणं गन्धोपादानम्। (क्षी.त.)

शिङ्घ्, (इ) सेट्, सक, प। (धा.क.)

❖ **शिजि [शिञ्ज्] अव्यक्ते शब्दे (अदा०)**
शिजि अव्यक्ते शब्दे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

शिजि पिजि इति कौशिकः। (क्षी.त.)

तालैः शिञ्जद् इति आत्मनेपदानित्यत्वज्ञापनाद् इति चष्टावुक्तम्। (मा.धा.)

शिन्ज्, (इ) सेट्, अक, आ। (धा.क.)

❖ **शिञ् [शि] निशाने (स्वा०)**
शिञ् निशामने। (शा.आ.)
शिञ् निशाने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

निशानं तनूकरणम्। (क्षी.त.)

तालव्यादिरयम् निशानम्। (मा.धा.)

निशानं तीक्ष्णीकरणम्। शि (ञ्) अनिट्, सक, उ। (धा.क.)

❖ **शिट [शिट्] अनादरे (भ्वा०)**
शिट षिट अनादरे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

एतौ तालव्यमूर्धन्यादी। (क्षी.त.)

आद्यस्तालव्यादिः। अपरो मूर्द्धन्यादिः।
(मा.धा.)(धा.क.)

शिट्, षिट्, सेट्, सक, प। (धा.क.)

❖ **शिल [शिल्] उञ्छे (तुदा०)**
शिल षिल उञ्छे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

आद्यस्तालव्यादिरितरो मूर्द्धन्यादिः। (मा.धा.)

शिल्, सिल्, सेट्, अक, प। (धा.क.)

❖ **शिष [शिष्] हिंसार्थः (भ्वा०)**
कष **शिष** जिष झष वष रुष ऋष हिंसार्थाः।
(शा.आ.)

कष **शिष** जष झष शष वष मष रुष रिष हिंसार्थाः। (धा.प्र.)

कष **शिष** जष झष शष वष मष मुष रुष रिष हिंसार्थाः- रुधादौ शिष्लृ विशेषणे। चुरादौ शिष असर्वोपयोगे। (क्षी.त.)

कष खष **शिष** जष झष शष वष मष रुष रिष हिंसार्थाः - तृतीयषष्ठौ तालव्योष्मादी। सप्तमो दन्त्योष्ठ्यादिः। शिषि पिषि श्लिष्यतिपुष्पती त्विषिमिति व्याघ्रभूतिवचनात्। तदुक्तं पुरुषकारे शिषेरसर्वोपयोगे। हिंसार्थत्वे यदि दृश्यते तदा धातूनामनेकार्थत्वाद्भविष्यति। (मा.धा.)

कष खष **शिष** जष झष शष वष मष रुष रिष हिंसार्थाः - तृतीयषष्ठो तालव्योष्मादी। सप्तमो दन्त्योष्ठादिः। सर्वे सकर्मकाः परस्मैपदिनश्च। शष आदानसंवरणयोरिति स्वरितेदग्रे। हिंसार्थत्वं यदि दृश्यते, तदा धातुनाम् अनेकार्थत्वाद्भविष्यति। (धा.क.)

❖ शिष [शिष्] असर्वोपयोगे (चुरा०)

शिष असर्वोपयोगे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

विपूर्वोऽतिशये। (धा.प्र.) (क्षी.त.)

सर्वोपयोगोऽनुपयुक्तत्त्वम्। अतिशय उत्कर्षः। रुधादौ शिष्लृ विशेषणे । (क्षी.त.)

शिष्, सक, उ। विपूर्वोऽतिशये । (धा.क.)

❖ शिष्लृ [शिष्] विशेषणे (रुधा०)

शिष्लृ विशेषणे। (शा.आ.) (क्षी.त.) (मा.धा.) (धा.क.)

शिष्लृ विशरणे। (धा.प्र.)

विशेषणं गुणान्तरोत्पादनम्। चुरादौ शिष असर्वोपयोगे । (क्षी.त.)

विशेषणं विशेषकरणम्। विशेषणमुपरञ्जनम्। यथास्थितस्य वस्तुनो गुणान्तराधानमिति धातुप्रदीपः। आद्यस्तालव्यः अन्त्यो मूर्द्धन्यः। शिष्, (लृ) अनिट्, सक, प। (धा.क.)

❖ शीक [शीक्] भाषार्थः (चुरा०)

रुठ लजि अजि दसि भृशि कशि रुसि **शीक** नट पुटि जुचि रघि अहि रहि महि भाषार्थाः - इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते। (मा.धा.)

रुठ लजि अजि दसि भृशि रुशि रुसि **शीक** नट पुटि जुचि रघि अहि रहि महि इत्येते पञ्चदश स्वामिकाश्यपमतानुसारेण लिख्यन्ते। (धा.क.)

❖ शीक [शीक्] मर्षणे (चुरा०)

शीक मर्षणे। (धा.प्र.)(मा.धा.)(धा.क.)

शीक आमर्षणे - भ्वादौ शीकृ सेचने। (क्षी.त.)

शीक्, सक, उ। (धा.क.)

❖ शीकृ [शीक्] गत्यर्थः (भ्वा०)

शीकृ सेकृ स्रेकृ [स्रकि] श्रकि श्लकि गत्यर्थाः - शीकेरर्थभेदात् पुनः पाठः। अत एव चन्द्रो न एनमध्यैष्ट, अन्ये षेकृ इति विकल्पेन षोपदेशकार्यार्थं पेठुः । अत्रान्त्यौ तालव्यादी। (क्षी.त.)

❖ शीकृ [शीक्] सेचने (भ्वा०)

शीकृ सेचने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

चुरादौ शीक आमर्षणे। (क्षी.त.)

तालव्यादिः। दन्त्यादिरिति धनपालकाश्यपौ। अत एव षोपदेशलक्षणे सृपिसृजिस्तृस्त्यासीकृसेकृसृवर्जमिति पेठतुः। यदाह सीकृ इत्यार्यो इति धनपालः। तत्र चायं पक्षः शीकर इति

प्रयोगाननुगुणः। योऽपि षोपदेशलक्षणे सीकृपाठः। सोऽप्येवं प्रत्युक्त इति। मर्षणार्थोऽयं युजादौ। (मा.धा.)

तालव्यादिरयं शिशीके शोणितं व्योम इत्यादि भट्टिकाव्ये तालव्यानुप्रासे पाठात्। दन्त्यादिरिति धनपालकाश्यपौ, तौ षोपदेशलक्षणे सृपिसृजि स्तृस्त्यासीकृसेकृसृवर्ज्जमिति पेठतुः। पुरुषकारः तु तन्न। यदाह - सीकृ इत्यार्या इति धनपालः। तत्र चायं पक्षः शीकर इति प्रयोगाननुगुणः। योऽपि षोपदेशलक्षणे सीकृपाठः सोऽप्येवं प्रत्युक्त इति। शीकृ, (ऋ) सेट्, सक, आ। अयमपि पाठस्तालव्यादित्वे प्रमाणम्। मर्षणार्थोऽयं युजादौ। (धा.क.)

❖ शीङ् [शी] स्वप्ने (अदा०)

शीङ् स्वप्ने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

शी, (ङ्) सेट्, अक, आ। अति - अतिक्रमः, अतिशेते, अतिशयितः - कर्त्तृकर्म्मणोः क्तः। अधि - अधिष्ठानम्। शय्यामधिशेते। अनु - अनुशयः, द्वेषः। सम् - संशयः। (धा.क.)

❖ शीभृ [शीभ्] कत्थने (भ्वा०)

शीभृ कत्थने। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

शीभ् (ऋ) सेट्, अक, आ। (धा.क.)

❖ शील [शील्] समाधौ (भ्वा०)

शील समाधौ। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

शील उपधारणे चुरादौ। (धा.प्र.)

समाधिरैकाग्र्यम्। (क्षी.त.)

शील उपधारण इति चुरादौ। शिल उञ्छ इति ह्रस्वोपधस्तुदादौ। (मा.धा.)

शील्, सेट्, अक, प। शीले समाधाने भवा वृत्तिः शैली। अयं चुरादौ। ह्रस्वोपधस्तुदादौ। (धा.क.)

❖ शील [शील] उपधारणे (चुरा०)

शील उपधारणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

उपधारणमभ्यासः। परिचय इत्येके। भ्वादौ शील समाधौ। (क्षी.त.)

उपधारणमभ्यासः। (मा.धा.)(धा.क.)

शील, सक, उ। (धा.क.)

❖ शु [शु] गतौ (भ्वा०)

शु श्रु गतौ। (क्षी.त.)

❖ शुक [शुक्] गतौ (भ्वा०)

शुक गतौ। (धा.प्र.)(क्षी.त.)

शुक्रो देवतास्य शुक्रियं हविः। (धा.प्र.)

❖ शुक्ल [शुक्ल्] अतिस्पर्शने (चुरा०)

शुक्ल अतिस्पर्शने। (मा.धा.)

❖ शुच [शुच्] शोके (भ्वा०)

शुच शोके शौचे च। (शा.आ.)

शुच शोके। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

शुक्रो मासः। तथा शुचिः। (धा.प्र.)

शोचिर्दीप्तिः। (क्षी.त.)

शुचिर् पूतीभाव इति दिवादौ। (मा.धा.)(धा.क.)

शुच्, सेट्, अक, प। (धा.क.)

❖ शुच [शुच्] शौचे (दिवा०)

शुच शौचे। (शा.आ.)

❖ शुच्य [शुच्य्] अभिषवे (भ्वा०)

शुच्य अभिषवे - चुच्य इत्यपि पठन्ति। (धा.प्र.)(मा.धा.)(धा.क.)

अवययानां शिथिलीकरणं सुरायाः संधानं वा अभिषवः। तथा सोममभिषुणोत्यृजीषम् अभिषुणोति इति। सुराप्रकरणे च सन्धानं स्यादभिषव इति। अभिषवः स्नानमिति चन्द्रः। चुच्य इत्यपि पठन्तीति मैत्रेयः। (मा.धा.)

अवयवानां शिथिलीकरणं सुरायाः सन्धानं वाभिषवस्तथा सोममभिषुणीत्यृजीषम्, सुराप्रकरणे च सन्धानं स्यादभिषव इति। अभिषवः स्नानमिति चन्द्रः। शुच्य्, सेट्, अक, प। चुच्य इत्यपि पठन्तीति मैत्रेयः। (धा.क.)

❖ शुच्यी [शुच्य्] अभिषवे (भ्वा०)

शुच्यी अभिषवे - अभिषवो द्रवेनाद्रवणम्, परिवासनम्। स्नानमिति चान्द्राः। चुच्यी इति दुर्गः। (क्षी.त.)

❖ शुठ [शुठ्] प्रतिघाते (भ्वा०)

शुठ गतिप्रतीघाते। (धा.प्र.)(मा.धा.)(धा.क.)

प्रतिघात इत्येव धनपालः। शुठीति क्षीरस्वामी आलाप इति चुरादौ। शुठि शोषण इत्यत्रैवाग्रे। (मा.धा.)

प्रतिघात इत्येव धनपालः। तथा च कुठि इत्युत्तरधातौ प्रतिहतिमात्रं प्रतीयते इत्यर्थः इति स एवाह। शुठ् सेट् अक प। शुठीति क्षीरस्वामी। आलाप इति चुरादौ। शोषणेऽग्रे। (धा.क.)

❖ शुठ [शुठ्] आलस्ये (चुरा०)

शुठ आलस्ये। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

शठ इत्येके। (क्षी.त.)

शुठ, सक, उ। (धा.क.)

❖ शुठि [शुण्ठ्] गतिप्रतिघाते (भ्वा०)

शुठि गतिप्रतिघाते - शुठ इति दुर्गः। (क्षी.त.)

❖ शुठि [शुण्ठ्] शोषणे (भ्वा०)

शुठि शोषणे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

कौशिको नाध्यैष्ट चुरादौ। (क्षी.त.)

गतिप्रतिघाते गतः। (मा.धा.)

शुण्ठ् (इ) सेट्, सक, प। (धा.क.)

❖ शुठि [शुण्ठ्] शोषणे (चुरा०)

शुठि शोषणे।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

केचिदेनमकारान्तं पठन्ति, लक्ष्यतस्तदपि प्रमाणम्। चन्द्रो भ्वादिना साधयति। (क्षी.त.)

अत्र क्षीरस्वामी केचिदेनमकारान्तं पठन्ति। लक्ष्यतस्तदपि प्रमाणमिति। एवं तु आलस्ये इति। पूर्वत्रैव शोषणमपि निर्दिशेत् शोषणे शोठयति इति प्रयोगो दृष्टश्चेत् शोठयतेः अनेकार्थत्त्वेन निर्वाह्यः। तस्माच्छुठि शोषण इति युक्तः पाठः। अस्य इदित्त्वादेव शुण्ठतीति सिद्धे भ्वादौ शुण्ठेः पाठः प्रपञ्चार्थः। (मा.धा.)

शुण्ठ्, (इ, णिच् वा) सक, उ। अस्येदित्त्वादेव शुण्ठति इति सिद्धे शुण्ठेः पाठः प्रपञ्चार्थः। (धा.क.)

❖ शुध [शुध्] शौचे (दिवा०)

शुध शौचे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

शौचं नैर्मल्यम्। (क्षी.त.)

शुध्, अनिट्, अक, प। (धा.क.)

❖ शुन [शुन्] गतौ (तुदा०)

शुन गतौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

शुन्, सेट्, सक, प। (धा.क.)

❖ शुन्ध [शुन्ध्] शुद्धौ (भ्वा०)

शुन्ध शुद्धौ। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

संयोगान्तप्रकरणानुरोधेन पूर्वं धकारान्तप्रकरणे नायं निर्दिष्टः। (धा.प्र.)

दिवादौ शुध शौचे । चुरादौ शुन्ध शौचकरणे । (क्षी.त.)

अयं शौचकर्मणि युजादौ। शुधिर्शौच इति दिवादौ। (मा.धा.)

शुन्ध्, सेट्, अक, प। वोपदेवमतेऽयमुभयपदी । अयं शौचकर्मणि युजादौ। शुध शौच इति दिवादौ। (धा.क.)

❖ शुन्ध [शुन्ध्] शौचकर्मणि (चुरा०)

शुन्ध शौचकर्मणि। (धा.प्र.)(मा.धा.)(धा.क.)

शुद्धावकर्मकः। (मा.धा.)

शुन्ध्, सक, उ। शुद्धावकर्म्मकोऽयम्। (धा.क.)

❖ शुन्भ [शुन्भ्] भाषणे (भ्वा०)

शुन्भ भाषणे हिंसायां च। भासन इति दुर्गः। शुभ शुन्भ शोभार्थौ। षोपदेशोऽयमिति गुप्तः, **सावष्टम्भनिषुम्भनेनमद्धूगोले** (मालतीमाधव) इत्यादि दर्शनात् । (क्षी.त.)

शुभ **शुन्भ** भाषणे। हिंसायां द्वाविमौ देवमैत्रेयादयः पठन्ति। स्वामी तु निरनुषङ्गेण पपाठ। इदम् एव आत्रेयस्य अपि मतम्। तुदादौ शोभत इति शपीति वचनात्। दुर्गस्तु भासन इत्यस्य अर्थमाह। एवं धनपालशाकटायनौ। गुप्तस्तु **सावष्टाम्भनिषुम्भसम्भमनमद्धूगोल** इत्यादि दर्शनात् मूर्द्धन्यादित्वमाह। शुभ्, शुन्भ्, सेट्, सक, प। इमौ शोभार्थौ तुदादौ। निरनुषङ्गस्त्वग्रे। (धा.क.)

❖ शुन्भ [शुन्भ्] शोभार्थे (तुदा०)

शुभ **शुन्भ** शोभार्थे। (धा.प्र.)(क्षी.त.)(धा.क.)

अत एव निपातनात् शोभा साधुः। भ्वादौ शुन्भ भाषणे हिंसायां च इत्यर्थभेदात् पाठः। तत्र षोपदेशः, सुम्भति सुम्भनाद्यर्थं इत्येके। (क्षी.त.)

शुभ्, शुन्भ्, अक, सेट्, प। (धा.क.)

❖ शुभ [शुभ्] भाषणे भासने हिंसायाम् (भ्वा०)

शुभ शुम्भ भाषणे हिंसायाञ्च। (धा.प्र.)(मा.धा.)

दुर्गस्तु भासन इत्यस्यार्थमाह एवं धनपालशाकटायनौ। गुप्तस्तु **सावष्टाम्भनिषुम्भसम्भमनमद्धूगोल** इत्यादि दर्शनात् मूर्द्धन्यादित्वमाह। शोभार्थौ तुदादी निरनुषङ्गः तु अग्रे। (मा.धा.)

शुभ शुन्भ भाषणे। हिंसायां द्वाविमौ देवमैत्रेयादयः पठन्ति। स्वामी तु निरनुषङ्गेण पपाठ। इदमेवात्रेयस्यापि मतम्। तुदादौ शोभत

इति शपीति वचनात्। दुर्गस्तु भासन इत्यस्यार्थमाह। एवं धनपालशाकटायनौ। गुप्तस्तु सावष्टाम्भनिषुम्भसम्भमनमद्गूगोल इत्यादि दर्शनान्मूर्द्धन्यादित्वमाह। शुभ्, शुन्भ्, सेट्, सक, प। इमौ शोभार्थौ तुदादौ। निरनुषङ्गस्त्वग्रे। (धा.क.)

❖ शुभ [शुभ्] दीप्तौ (भ्वा०)

शुभ दीप्तौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

तुदादौ शुभ शुन्भ शोभार्थे। (क्षी.त.)

शुभ, सेट्, अक, आ। (धा.क.)

❖ शुभ [शुभ्] शोभार्थे (भ्वा०)

शुभ शुम्भ शोभार्थे। (शा.आ.)

❖ शुभ [शुभ्] शोभार्थे (तुदा०)

शुभ शुम्भ शोभार्थे। (शा.आ.)(मा.धा.)

शुभ शुन्भ शोभार्थे। (धा.प्र.)(क्षी.त.)(धा.क.)

अत एव निपातनात् शोभा साधुः। भ्वादौ शुन्भ भाषणे हिंसायां च इत्यर्थभेदात् पाठः। तत्र षोपदेशः, सुम्भति सुम्भनाद्यर्थ इत्येके। (क्षी.त.)

शुभ्, शुन्भ्, अक, सेट्, प। (धा.क.)

❖ शुम्भ [शुम्भ्] भाषणे भासन इत्येके हिंसायाम् इत्यन्ये (भ्वा०)

शुभ **शुम्भ** भाषणे हिंसायाञ्च। (धा.प्र.)(मा.धा.)

द्वाविमौ शोभत इति शपीतिवचनात्। दुर्गस्तु भासन इत्यस्यार्थमाह एवं धनपालशाकटायनौ। गुप्तस्तु सावष्टाम्भनिषुम्भसम्भमनमद्गूगोल इत्यादि दर्शनान्मूर्धन्यादित्वमाह। शोभार्थौ तुदादी निरनुषङ्गस्त्वग्रे। (मा.धा.)

❖ शुम्भ [शुम्भ्] शोभार्थे (भ्वा०)

शुभ **शुम्भ** शोभार्थे। (शा.आ.)

❖ शुम्भ [शुम्भ्] शोभार्थे (तुदा०)

शुभ **शुम्भ** शोभार्थे। (शा.आ.)(मा.धा.)

❖ शुल्क [शुल्क्] अतिस्पर्शने (चुरा०)

शुल्क अतिस्पर्शने। (शा.आ.)(धा.क.)

शुल्क्, अक, उ। (धा.क.)

❖ शुल्क [शुल्क्] सर्जने (चुरा०)

शुल्क सर्जने। शुल्क असर्जने इत्येके। (क्षी.त.)

❖ शुल्ब [शुल्ब्] माने (चुरा०)

शुल्ब माने। (क्षी.त.)(मा.धा.)(धा.क.)

शूर्प माने इति चन्द्रः। (क्षी.त.)

शूर्प मान इति श्रीमद्रमैत्रेयादयः। (मा.धा.)
(धा.क.)

शुल्ब, सक, उ। (धा.क.)

❖ शुष [शुष्] शोषणे (दिवा०)

शुष शोषणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

कषादित्वाद्यथाविध्यनुप्रयोगः। (मा.धा.)

शुष्, अनिट्, सक, प। (धा.क.)

❖ शूर [शूर] विक्रान्तौ (चुरा०)

शूर वीर विक्रान्तौ। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

दिवादौ शूरी हिंसायाम् । (क्षी.त.)

शूर, वीर, अक, आ। (धा.क.)

❖ शूरी [शूर्] हिंसास्तम्भनयोः (दिवा०)

शूरी हिंसास्तम्भनयोः। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

लघूपधस्तुदादौ जन्यादय ईदित्त्वात् निष्ठायाम् अनिटः। (मा.धा.)

ईदनुबन्धः, सेट्, सकर्मकः। (धा.क.)

❖ शूर्प [शूर्प्] माने (चुरा०)

शूर्प माने। (धा.प्र.)

❖ शूल [शूल्] रुजायां सङ्घाते च (भ्वा०)

शूल रुजायां सङ्घाते। (धा.प्र.)(मा.धा.)(धा.क.)

शूल रूजायाम्। (क्षी.त.)

संस्कृतं शूल्यम्। अयं शूलशब्देन क्रूराकार उच्यते। (मा.धा.)

शूल्, सेट्, अक, प। (धा.क.)

❖ शूष [शूष्] प्रसवे (भ्वा०)

शूष प्रसवे। (मा.धा.)(धा.क.)

तालव्योष्मादिरिति पारायणिका इति स्वामी। दृश्यते च तैत्तिरीयके अक्षशूषा इति। केचित् दन्त्यादिं पठन्ति तदनार्षम्। षोपदेशलक्षण-विरोधात् शूषतीत्यादि। (मा.धा.) (धा.क.)

शूष्, सेट्, सक, प। (धा.क.)

❖ शृधु [शृध्] शब्दकुत्सायाम् (भ्वा०)

शृधु शब्दकुत्सायाम्। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

शब्दकुत्सा पायुशब्दत्वात्। (क्षी.त.)

अयं प्रहसने चुरादिः। (मा.धा.) (धा.क.)

शृध् (उ) सेट्, अक, आ। (धा.क.)

❖ शृधु [शृध्] उन्दने (भ्वा०)

शृधु षृधु मृधु उन्दे। (धा.प्र.)

शृधु मृधु उन्दे। उन्दः क्लेदनम्। शृधु शब्दकुत्सायाम्। (क्षी.त.)

शृधु मृधु उन्दने। (मा.धा.)(धा.क.)

उन्दनं क्लेदनम्। (मा.धा.)

शृध्, मृध् (उ) सेट्, सक, उ। (धा.क.)

❖ शृधु [शृध्] प्रसहने (चुरा०)

शृधु प्रसहने। (धा.प्र.)(मा.धा.)(धा.क.)

शृधु अप्रसहने। अप्रसहनम् अमर्षः। प्रसहने अभिभवे इत्येके। भ्वादौ शृधु शब्दकुत्सायाम्।

शृधु मृधु उन्दे। (क्षी.त.)

शब्दकुत्सायां तुदादिः। (मा.धा.)(धा.क.)

शृध्, (उ, वा णिच्) अक, उ। (धा.क.)

❖ शृधृ [शृध्] उन्दे (भ्वा०)

शृधृ मृदृ उन्दे। (शा.आ.)

❖ शॄ [शॄ] हिंसायाम् (क्र्या०)

शॄ हिंसायाम्। (धा.प्र.)(मा.धा.)(धा.क.)

शॄ, सेट्, सक, प। (धा.क.)

❖ शॄ [शॄ] पाके (क्र्या०)

शॄ पाके। (शा.आ.)

❖ शॄञ् [शॄ] हिंसायाम् (क्र्या०)

शॄञ् हिंसायाम्। (क्षी.त.)

❖ शेलृ [शेल्] गतौ (भ्वा०)

पेलृ फेलृ **शेलृ** गतौ। (धा.प्र.)(क्षी.त.)

पेलृ **शेलृ** फेलृ गतौ। (मा.धा.)(धा.क.)

पेलं वृषणः। पेलवं तनु। (क्षी.त.)

अत्र क्वचित् खेलृ षेलृ सेलृ इत्यपि त्रयः पठ्यन्ते। सेलतेस्तु दन्त्यादेः पाठः। षोपदेशपर्युदासवाक्ये अनुपादानादनार्षः।

मूर्द्धन्यादिस्तु सेलुः श्लेष्मान्तक इत्यादि दर्शनाद्ग्राह्यः। (मा.धा.) (धा.क.)

सर्वे ऋदनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ शेवृ [शेव्] सेवने (भ्वा०)

शेवृ षेवृ गेवृ ग्लेवृ पेवृ मेवृ म्लेवृ सेचने - सेवृ खेवृ प्लेवृ इत्येके। (धा.प्र.)

एवृ **शेवृ** षेवृ सेवृ केवृ खेवृ ग्लेवृ पेवृ प्लेवृ मेवृ म्लेवृ सेवने। (क्षी.त.)

❖ शै [शै] पाके (भ्वा०)

शै श्रै पाके। (मा.धा.)(धा.क.)

इह पाको विक्लित्तिः। तथा श्रतं पाक इत्यत्र वृत्त्यादावुक्तम्। (मा.धा.) (धा.क.)

शै, श्रै, अनिट्, सक, प। (धा.क.)

❖ शो [शो] तनूकरणे (दिवा०)

शो तनूकरणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

शो, अनिट्, सक, प। नि - निशानं, तेजनं तमुद्यतनिशातासिम् (भट्टिः)। (धा.क.)

❖ शोणृ [शोण्] वर्णगत्योः (भ्वा०)

शोणृ वर्णगत्योः। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

वर्ण इह लोहितभावः। शोण् (ऋ) सेट्, अक, प। (धा.क.)

❖ शौटृ [शौट्] गर्वे (भ्वा०)

शौटृ गर्वे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

शौट् (ऋ) सेट्, अक, प। (धा.क.)

❖ श्च्युतिर् [श्च्युत्] क्षरणे (भ्वा०)

श्च्युतिर् क्षरणे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

दन्त्यादिरयमुपदेश इष्यते। मधुश्च्योततीति मधुश्च्युत्। तमाचक्षाणो मधुगिति यथा स्यादिति। श्चुतिरित्यप्येके पठन्ति। चुतिर् हसन इति च। (धा.प्र.)

क्षरणं स्रवणम्। द्रमिडाश्चुतिरित्यप्याहुः। कौशिकस्तु श्चुतिमयोपधं मन्यते। (क्षी.त.)

क्षरणं सूतिः। अत्र श्चुतिरित्ययकारमपि पठन्ति। तथा च मधुश्चुतं घृतमिव सुपूतं श्चोतन्ति ते इत्यादौ भट्टभास्करः। अत्र मैत्रेयः अपि श्चुतिरित्यप्येके पठन्ति। चुतिर् हसन इति च। (मा.धा.)

क्षरणं स्रुतिः। श्च्युत् (इर्) सेट्, प। (धा.क.)

❖ श्मील [श्मील्] निमेषणे (भ्वा०)

मील **श्मील** क्ष्मील निमेषणे। (मा.धा.)(धा.क.)

मील **श्मील** निमेषणे - निमेषणं सङ्कोचः। श्मील स्थाने क्ष्मीलेति चान्द्राः। (क्षी.त.)

निमेषणं सङ्कोचः द्वितीयस्तालव्यादि। तृतीयो दन्त्यादिः। (मा.धा.)

सर्वे सेटः, अकर्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ श्यैङ् [श्यै] गतौ (भ्वा०)

श्यैङ् गतौ। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

शीतं भेदः। शीतो वायुः। द्रवमूर्त्तिस्पर्शयोः श्यः इति द्रवस्य मूर्त्तौ काठिन्ये स्पर्शगुणे च। (मा.धा.)

श्यै(ङ्) अनिट्, सक आ। (धा.क.)

❖ **श्रकि [श्रङ्क्] गतौ** **(भ्वा०)**

सेकृ स्रेकृ श्रेकृ स्रकि **श्रकि** श्लकि गत्यर्थाः। (धा.प्र.)

शीकृ सेकृ स्रेकृ [स्रकि] **श्रकि** श्लकि गत्यर्थाः। (क्षी.त.)

सेकृ स्रेकृ स्रकि **श्रकि** श्लकि गत्यर्थाः। अन्त्यौ तालव्यादी। अन्ये दन्त्यादयः। (मा.धा.)

सेकृ स्रेकृ स्रकि **श्रकि** श्लकि गत्यर्थाः - अन्त्यौ तालव्यादी, अन्ये दन्त्यादयः। सेक्, स्रेक्, (ऋ) स्रङ्क्, श्रङ्क्, श्लङ्क्, (इ) सेट्, सक, आ। (धा.क.)

❖ **श्रगि [श्रङ्ग्] गत्यर्थः** **(भ्वा०)**

उख नख वख मख रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि **श्रगि** श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि **श्रगि** श्लगि इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि **श्रगि** श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयन्ताः पञ्चदश। तृतीयान्ताः त्रयोदश। एवमेकोनविंशतिः खान्ताः। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि **श्रगि** श्लगि इगि रिगि लिगि गत्यर्थाः - द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ **श्रण [श्रण्] गतौ दाने** **(भ्वा०)**

वण **श्रण** दाने। (शा.आ.)

क्षण शण **श्रण** दाने च। (मा.धा.)(धा.क.)

चण शण **श्रण** दाने - गतावित्येके। (धा.प्र.)

चण **श्रण** दाने - भज विश्राणने विश्राणनाद् अन्यपयस्विनीनाम् (रघु.) शण इत्यपि दुर्गः। (क्षी.त.)

शण गतावित्यन्ये अन्त्यौ तालव्यादी। (मा.धा.) (धा.क.)

चण्, शण्, श्रण्, सेट्, सक, प। (धा.क.)

❖ **श्रण [श्रण्] दाने** **(चुरा०)**

श्रण दाने (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

प्रायेणायं विपूर्वः। (मा.धा.) (धा.क.)

श्रण् (उ) सक, उ। (धा.क.)

❖ **श्रथ [श्रथ्] हिंसार्थः** **(भ्वा०)**

श्रथ श्लथ क्लथ क्रथ हिंसार्थाः। अन्ये तु क्रथ हिंसायामिति चुरादौ पठित्वा तस्यैतद्रूपमिति वर्णयन्ति। (धा.प्र.)

श्रथ क्रथ क्लथ हिंसार्थाः। (क्षी.त.) (मा.धा.)(धा.क.)

श्रथ्, क्रथ्, क्लथ्, सेट्, सक, प। (धा.क.)

❖ श्रथ [श्रथ्] प्रतियत्ने (चुरा०)

श्रथ प्रतियत्ने। (धा.प्र.)

❖ श्रथ [श्रथ्] प्रयत्ने प्रस्थाने (चुरा०)

सार कृप **श्रथ** दौर्बल्ये। (धा.प्र.)

श्रथ प्रयत्ने। (मा.धा.)(धा.क.)

श्रथ प्रतिहर्षे - आधृषाद्वा इत्यत्र श्रथ हिंसायाम् इति सिद्धिः, इह पाठाद् रूपान्यत्वम्। (क्षी.त.)

प्रस्थान इति मैत्रेयः। अतिहर्ष इति बहवः श्राथयति। क्रथिमपिकेचिदत्र पठन्ति। मैत्रेयादौ न दृश्यते। तथा क्रथश्रथौ हिंसायाम्। क्राथयेत्। क्रथते। क्रथेत। इति घटादिम्। । युजादीमिति पुस्तकान्तरे अधिकम् च पठता देवेनापि न पठितः। (मा.धा.)

प्रस्थान इति मैत्रेयः। अति हर्ष इति बहवः। श्रथ, सक, उ। (धा.क.)

❖ श्रथ [श्रथ्] मोक्षणे हिंसायामित्येके (चुरा०)

श्रथ मोक्षणे। (धा.प्र.)(मा.धा.)(धा.क.)

श्रथ हिंसायाम्। श्रन्थेत्येके। (क्षी.त.)

हिंसायामित्यपर इति पुरुषकारे श्राथयति श्रथति। श्राथयतीति प्रयत्नेऽपि गतः। श्रथयतीति कथादौ दौर्बल्ये। (मा.धा.)

हिंसायामित्यपर इति पुरुषकारे। श्रथ, सक, उ। श्राथयतीति प्रयत्नेऽपि गतम्। श्रथतीति कथादौ दौर्बल्ये। (धा.क.)

❖ श्रथ [श्रथ] दौर्बल्ये (चुरा०)

शार कृप **श्रथ** दौर्बल्ये। श्रथ प्रतिहर्षे। (क्षी.त.)

सार कृप **श्रथ** दौर्बल्ये। (मा.धा.)(धा.क.)

सार, कृप, श्रथ। अक, उ। (धा.क.)

❖ श्रथि [श्रन्थ्] शैथिल्ये (भ्वा०)

श्रथि शैथिल्ये। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

शैथिल्यमगाढता। (क्षी.त.)

शैथिल्यं विश्लिष्टता गाधता च । श्रन्थ विमोचनप्रतिहर्षयोरिति क्रयादिः। श्रन्थ ग्रन्थ सन्दर्भे इति च। इमावाधृषीयावपि। श्रथ प्रयत्न इति चुरादिः दौर्बल्ये कथादिराघृषीयो मोक्षणे। (मा.धा.)

शैथिल्य विश्लिष्टता, गाधता च। शिथिलीभावः तत्करणश्चेति रमानाथः। श्रन्थ, (इ) सेट्, अक, आ। क्र्यादौ चुरादौ च श्रन्थ इति। (धा.क.)

❖ श्रन्थ [श्रन्थ्]विमोचनप्रतिहर्षयोः

(भ्वा०) **श्रन्थ** मोचनप्रतिहर्षणयोः। श्रन्थ ग्रन्थ सन्दर्भे इति चुरादौ। (धा.प्र.)

❖ श्रन्थ[श्रन्थ्]विमोचनप्रतिहर्षयोः(क्र्या०)

श्रन्थ मोचनप्रतिहर्षयोः। (शा.आ.)

श्रन्थ मोचनहर्षणयोः। (धा.प्र.)

श्रन्थ विमोचनहर्षयोः। चुरादौ श्रन्थ ग्रन्थ सन्दर्भे वा। भ्वादौ श्रथि शैथिल्ये, ग्रथि कौटिल्ये। (क्षी.त.)

श्रन्थ विमोचनप्रतिहर्षयोः। (मा.धा.)(धा.क.)

श्रन्थ, सेट्, सक, प। (धा.क.)

❖ श्रन्थ [श्रन्थ्] सन्दर्भे (क्र्या०)

श्रन्थ ग्रन्थ सन्दर्भे। (शा.आ.)(धा.प्र.)

अर्थभेदात् श्रन्थेः पुनः पाठः। (धा.प्र.)

❖ **श्रन्थ [श्रन्थ्] सन्दर्भे** **(चुरा०)**

श्रन्थ ग्रन्थ सन्दर्भे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

सन्दर्भो बन्धनम्। भ्वादौ श्रथि शैथिल्ये, ग्रथि कौटिल्ये। (क्षी.त.)

श्रन्थ्, ग्रन्थ् सक, उ। (धा.क.)

❖ **श्रन्भु [श्रम्भ] प्रमादे** **(भ्वा०)**

श्रन्भु प्रमादे। तालव्योष्मादिः। श्रन्भ् (उ) सेट्, अक, आ। दन्त्यादिरिति चन्द्रः। (धा.क.)

❖ **श्रमु [श्रम्] तपसि खेदे च** **(दिवा०)**

श्रमु तपसि खेदे च। (शा.आ.)(धा.प्र.) (मा.धा.)(धा.क.)

विश्राम इति चान्द्राः। (धा.प्र.)

विश्रामः, विश्रमोऽपीष्टः। (क्षी.त.)

श्रम् (उ) अक, अनिट्, प। धूर्यान्। विश्रामयेति सः इति रघुः। (धा.क.)

❖ **श्रम्भु [श्रम्भ्] प्रमादे** **(भ्वा०)**

श्रम्भु प्रमादे। तालव्योष्मादिः। एवं काश्यपः दन्त्यादिति चन्द्रः। स्वामी चैवं पठित्वा मातन्तरेण स्त्रन्सेति दन्त्यान्तमप्याह। मैत्रेयस्य त्वयमेव पक्षः। यदाह स संयोगात् साधर्म्येण सान्तोप्यत्र निर्दिश्यते। द्युतादावप्ययं पठिष्यते। (मा.धा.)

❖ **श्रा [श्रा] पाके** **(भ्वा०)**

श्रा पाके। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

अदादावुदाहरिष्यामः। इह पाठो मित्सञ्ज्ञार्थः। (शा.आ.)

श्रातिश्रायत्योः सामान्यानुकरणमिदम्। (धा.प्र.)

अदादेः श्रै पाके इत्यस्य वेह मित्त्वार्थः पाठ। (क्षी.त.)

श्रातिश्रायत्योः अदादिभ्वादिपठितयोः इह मित्त्वार्थः पाठः। अत्र सर्वत्र पाको विक्लित्तिरिति। श्रपयति यवागूं सूपकारेण गृही। श्रा, अनिट्, सक, प। (धा.क.)

❖ **श्रा [श्रा] पाके** **(अदा०)**

श्रा पाके। (शा.आ.)(धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

इह पाको विक्लित्तिरिति कैयटादौ। श्रै पाके इत्यत्र प्रपञ्चितम्। (मा.धा.)

श्रा, अनिट्, सक, प। पाको विक्लित्तिः। (धा.क.)

❖ **श्रिञ् [श्रि] सेवायाम्** **(भ्वा०)**

श्रिञ् सेवायाम्। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

उदात्तः। श्रि (ञ्) सेट्, सक, उ। प्र - प्रश्रयः। सम् आ - समाश्रयः। आ - आश्रयः। अधि - अधिश्रयणम्। (धा.क.)

❖ **श्रिषु [श्रिष्] दाहे** **(भ्वा०)**

श्रिषु श्लिषु प्रुषु प्लुषु दाहे। (धा.प्र.)(क्षी.त.) (धा.क.)

श्रिषु श्लिषु प्रुषु दाहे। (मा.धा.)

सर्वे उदनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनः च। आलिङ्गने दिवादिः। श्लेषणे चुरादिः। (धा.क.)

❖ **श्रीञ् [श्री] पाके** **(क्र्या०)**

श्रीञ् पाके। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

श्री (ञ्) अनिट्, सक, उ। (धा.क.)

❖ श्रु [श्रु] श्रवणे (भ्वा०)

श्रु श्रवणे। (धा.प्र.)(मा.धा.)(धा.क.)

शु श्रु गतौ। (क्षी.त.)

श्रु, अनिट्, सक, प। (धा.क.)

❖ श्रु [श्रु] श्रवणे (स्वा०)

श्रु श्रवणे। (शा.आ.)

❖ श्रेकृ [श्रेक्] गत्यर्थः (भ्वा०)

सेकृ स्रेकृ **श्रेकृ** स्रकि श्रकि श्लकि गत्यर्थाः। (धा.प्र.)

❖ श्रै [श्रै] पाके (भ्वा०)

श्रै स्रै पाके। (शा.आ.)(धा.प्र.)

स्रै श्रै पाके। (क्षी.त.)

शै श्रै पाके। (मा.धा.) (धा.क.)

इह पाको विक्लित्तिः। (मा.धा.) (धा.क.)

तथा च श्तं पाके इत्यत्र वृत्त्यादावुक्तम्। शै, श्रै, अनिट्, सक, प। (धा.क.)

❖ श्रोणृ [श्रोण्] सङ्घाते (भ्वा०)

श्रोणृ सङ्घाते। (धा.प्र.)(क्षी.त.)(धा.क.)

श्रोणृ गतिप्रतिघाते। (मा.धा.)

श्रोणृ (ऋ) सेट्, अक, प। (धा.क.)

❖ श्लकि [श्लङ्क्] गतौ (भ्वा०)

सेकृ स्रेकृ श्रेकृ स्रकि श्रकि **श्लकि** गत्यर्थाः। (धा.प्र.)

शीकृ सेकृ स्रेकृ [स्रकि] श्रकि **श्लकि** गत्यर्थाः। (क्षी.त.)

सेकृ स्रेकृ स्रकि श्रकि **श्लकि** गत्यर्थाः - अन्त्यौ तालव्यादी। अन्ये दन्त्यादयः। (मा.धा.)

सेकृ स्रेकृ स्रकि श्रकि **श्लकि** गत्यर्थाः - अन्त्यौ तालव्यादी, अन्ये दन्त्यादयः। सेक्, स्रेक्, (ऋ) स्रङ्क्, श्रङ्क, श्लङ्क, (इ) सेट्, सक, आ। (धा.क.)

❖ श्लगि [श्लङ्ग्] गत्यर्थः (भ्वा०)

उख नख वख मख रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि **श्लगि** इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि **श्लगि** इगि रिगि लिगि गत्यर्थाः। (क्षी.त.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि **श्लगि** इगि रिगि लिगि गत्यर्थाः। द्वितीयन्ताः पञ्चदश। तृतीयान्ताः त्रयोदश। (मा.धा.)

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि **श्लगि** इगि रिगि लिगि गत्यर्थाः। द्वितीयान्ताः पञ्चदश, तृतीयान्तास्त्रयोदश, सर्वे सेटः, परस्मैपदिनश्च। एवमेकोनविंशतिः खान्ताः। (धा.क.)

❖ श्लथ [श्लथ्] हिंसार्थः (भ्वा०)

श्लथ शैथिल्ये। (शा.आ.)

श्रथ **श्लथ** क्लथ क्रथ हिंसार्थाः। (धा.प्र.)

❖ श्लाखृ [श्लाख्] व्याप्तौ (भ्वा०)

शाखृ **श्लाखृ** व्याप्तौ। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

शाख्, श्लाख्, (ऋ) सेट्, सक, प। (धा.क.)

❖ श्लाघृ [श्लाघ्] कत्थने (भ्वा०)

श्लाघृ कत्थने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

कत्थनमुत्कर्षाख्यानम्। (क्षी.त.)

कत्थनं श्लाघनम् केचिदाहुः। आत्मानं परं वा स्तुवन् तां स्तुतिं बोधयितुमिच्छतीत्यर्थ इति तथा च भट्टिः - **श्लाघमानः परस्त्रीभ्यः तत्र अगाद्राक्षसेश्वर** इति । (मा.धा.)

कत्थनं श्लाघनम्, प्रशंसेति यावत्। आत्मानं परं वा स्तुवन् तां स्तुतिं बोधयितुमिच्छतीत्यर्थ इति। तथा च भट्टिः - **श्लाघमानः परस्त्रीभ्यः तत्र अगाद्राक्षसेश्वर** इति। देवदत्तं श्लाघत इति ज्ञीप्स्यमानत्वाविवक्षायां कर्मत्वम्। श्लाघ् (ऋ) सेट्, सक, आ। (धा.क.)

❖ श्लिषु [श्लिष्] दाहे (भ्वा०)

श्रिषु **श्लिषु** प्रुषु प्लुषु दाहे। (धा.प्र.) (क्षी.त.)(धा.क.)

श्लिष आलिङ्गने दिवादौ। चुरादौ श्लिष श्लेषणे। (क्षी.त.)

श्रिषु **श्लिषु** प्रुषु दाहे- प्रुषिप्लुषी द्वौ स्नेहने क्र्यादौ। (मा.धा.)

सर्वे उदनुबन्धाः, सेटः, सकर्मकाः, परस्मैपदिनः च। अयमपि मत्वर्थे श्लेष्मणः शमनं कोपनं वा श्लैष्मिकम्। आचारश्लक्ष्णः। आलिङ्गने दिवादिः। श्लेषणे चुरादिः। (धा.क.)

❖ श्लिष [श्लिष्] आलिङ्गने (दिवा०)

श्लिष आलिङ्गने। (शा.आ.)(धा.प्र.) (क्षी.त.) (मा.धा.)(धा.क.)

भ्वादौ दाहार्थः। चुरादौ श्लिष श्लेषणे। (क्षी.त.)

श्लिष्, अनिट्, सक, प। (धा.क.)

❖ श्लिष [श्लिष्] श्लेषणे (चुरा०)

श्लिष श्लेषणे। (क्षी.त.)(मा.धा.) (धा.क.)

श्लिष्, सक, उ। (धा.क.)

❖ श्लिष [श्लिष्] आलिङ्गने (चुरा०)

श्लिष आलिङ्गने। (धा.प्र.)

❖ श्लोकृ [श्लोक्] सङ्घाते (भ्वा०)

श्लोकृ सङ्घाते। (धा.प्र.) (मा.धा.)(धा.क.)

श्लोकृ सङ्घाते संहनने, संहन्यमाने च। श्लोकः। श्लोकः पद्ये यशसि च। (क्षी.त.)

सङ्घातो ग्रन्थः। स चेदं पठ्यमानव्यापार इति स्वाम्यादयः। काश्यपादयस्तु ग्रन्थितृव्यापार इति। श्लोकैः उपस्तौति। (मा.धा.)

श्लोक्, (ऋ) सेट्, सक, आ। (धा.क.)

❖ श्लोणृ [श्लोण्] सङ्घाते (भ्वा०)

श्लोणृ च। (धा.प्र.)(क्षी.त.)(धा.क.)

श्लोणृ गतिप्रतिघाते च। (मा.धा.)

श्लोण् (ऋ) सेट्, अक, प। (धा.क.)

❖ श्वकि [श्वङ्क्] गत्यर्थः (भ्वा०)

ककि वकि **श्वकि** त्रकि ढौकृ त्रौकृ ष्वक्क वस्क मस्क तिकृ टिकृ टीकृ रघि लघि गत्यर्थाः। (धा.प्र.)

ढौकृ त्रौकृ ककि **श्वकि** त्रकि ष्वष्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (शा.आ.)

ककि **श्वकि** त्रकि ढौकृ त्रौकृ ष्वक्क वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। श्वङ्किः तालव्यादिः। (क्षी.त.)

ककि वकि **श्वकि** त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः।(मा.धा.)

ककि वकि [मकि] **श्वकि** त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ [सेकृ श्रेकृ श्रकृ श्लकि] रघि लघि गत्यर्थाः। (धा.क.)

❖ श्वगि [श्वङ्ग्] गत्यर्थः (चुरा०)

उख नख वख मख रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि **श्वगि** श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। (धा.प्र.)

❖ श्वच [श्वच्] गतौ (भ्वा०)

श्वच श्वचि गतौ। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

श्वच्, श्वञ्च, (इ) सेट्, सक, आ। (धा.क.)

❖ श्वचि [श्वञ्च्] गतौ (भ्वा०)

श्वच **श्वचि** गतौ। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

श्वच्, श्वञ्च, (इ) सेट्, सक, आ। (धा.क.)

❖ श्वठ [श्वठ्] असंस्कारगत्योः (चुरा०)

शठ **श्वठ** संस्कारगत्योः। (धा.प्र.)

शठ **श्वठ** असंस्कारगत्योः। (क्षी.त.) (मा.धा.)(धा.क.)

श्वठि इति दौर्गाः। (क्षी.त.) इदिद् द्वितीय इति दुर्गः। मैत्रेयोऽपि श्वठीत्येके इति। (मा.धा.)

शठ्, श्वठ्, सक, उ। इदित् श्वण्ठ दुर्गः। मैत्रेयोऽपि श्वठीत्येक इति। (धा.क.)

❖ श्वठ [श्वठ] सम्यगवभाषणे (चुरा०)

शठ **श्वठ** असम्यगाभाषणे- भ्वादौ शठ कैतवे श्वठ गतौ । (क्षी.त.)

शठ **श्वठ** सम्यगवभाषणे। (मा.धा.) (धा.क.)

अभाषण इति केचित् । (मा.धा.) (धा.क.)

शठ श्वठ सक, उ। (धा.क.)

❖ श्वठि [श्वण्ठ्] असंस्कारगत्योः (चुरा०)

श्वठि इत्येके। (धा.प्र.)

❖ श्वभ्र [श्वभ्र्] गत्याम् (चुरा०)

श्वभ्र च। (मा.धा.) (धा.क.)

चकारेण पूर्वोऽर्थः उक्तः। श्वभ्र्, सक, उ। (धा.क.)

❖ श्वर्त [श्वर्त्] गत्याम् (चुरा०)

श्वर्त्त गत्याम्। (धा.प्र.)(मा.धा.)(धा.क.)

श्वर्त्त्, सक, उ। (धा.क.)

❖ श्वल [श्वल्] आशुगमने (भ्वा०)

श्वल श्वल्ल आशुगमने। (धा.प्र.) (मा.धा.)(धा.क.)

शल **श्वल्ल** आशुगमने। (क्षी.त.)

श्वल्, श्वल्ल्, सेट्, सक, प। (धा.क.)

❖ श्वल्क [श्वल्क्] परिभाषणे (चुरा०)

श्वल्क वल्क परिभाषणे। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

श्वल्क्, वल्क्, (कुत्सितभाषणे) सक, सेट्, उ। (धा.क.)

❖ श्वल्ल [श्वल्ल्] आशुगमने (भ्वा०)

श्वल श्वल्ल आशुगमने। (धा.प्र.) (मा.धा.)(धा.क.)

शल श्वल्ल आशुगमने। (क्षी.त.)

श्वल्, श्वल्ल्, सेट्, सक, प। (धा.क.)

❖ श्वस [श्वस्] प्राणने (अदा०)

श्वस प्राणने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

भट्टिकाव्ये च प्रयोगः दृश्यते - आश्वसेयुः निशाचराः इति। (धा.प्र.)

प्राणनं जीवनम्। काशकृत्स्ना अस्य निष्ठायाम् अनिड्वमाहुः। (क्षी.त.)

प्राणनं - जीवनं, श्वासः। इतः प्रभृति शासस्यन्ता उदात्ता उदात्तेतः। श्वस्, सेट्, वि - विश्वासः। सम् आ - समाश्वासः, सान्त्वना। नि - श्वासः, निर् - निश्वासः, बहिर्मुखश्वासः। दीर्घं निश्वस्य - शकुन्तला। श्वसन्। श्वसती स्त्री। (धा.क.)

❖ श्विता [श्वित्] वर्णे (भ्वा०)

श्विता वर्णे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

श्वित् (आ), सेट्, अक, आ। (धा.क.)

❖ श्विदि [श्विन्द्] श्वैत्ये (भ्वा०)

श्विदि श्वैत्ये। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

शैत्य इत्येके। (धा.प्र.)

श्वेतगुणक्रियायाम्। श्वेतगुणः सिद्धोऽपि आख्यातेन साध्यैकरूप उच्यते, कृता तु साध्योऽपि धात्वर्थः सिद्धतया पाकादिवत्, शब्दशक्तिस्वाभाव्यात्। (क्षी.त.)

अकर्मकः श्वेतस्य गुणस्यापि धातुना साध्यतया क्रमिकतया वाभिधानात् क्रियात्वम् यदाह -

श्वेतते: श्वेत इत्येतत् श्वेतत्वेन प्रकाश्यते।
आश्रितक्रमरूपत्वादभिधानं प्रवर्त्तते।

(मा.धा.)

अकर्म्मकः। पूर्ववच्चागमः। श्वेतस्य भावः श्वैत्यं धावल्यम्। श्वेतस्य गुणस्यापि धातुना साध्यतया क्रमिकतया वाभिधानात् क्रियात्वम्। यदाह -

श्वेतते: श्वेत इत्येतत् श्वेतत्वेन प्रकाश्यते।
आश्रितक्रमरूपत्वादभिधानं प्रवर्त्तते॥

इति। श्विन्द्, (इ) सेट्, आ। (धा.क.)

❖ षगे [सग्] संवरणे (भ्वा०)

ह्गे ह्लगे षगे छगे संवरणे। (धा.प्र.) (धा.क.)(मा.धा.)

ह्ग्, ह्लग्, सग्, स्थग् (ए) सेट्, सक, प। (धा.क.)

❖ षघ [सघ्] हिंसायाम् (स्वा०)

षघ हिंसायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

दुर्गस्याषोपदेशोऽयम्। तिक तिघ च षघ हिंसायामित्येके। (क्षी.त.)

सघ्, सेट्, सक, प। (धा.क.)

❖ षच [सच्] सेचने (भ्वा०)

षच सेचने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

अयं सेवनार्थोपि। अयं समवाये स्वरितेदग्रे। (मा.धा.)

सच्, सेट्, सक, आ। अयं समवाये स्वरितेदग्रे। (धा.क.)

❖ षच [सच्] समवाये **(भ्वा०)**

षच समवाये। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

षच सेचन इति अनुदात्तेत् प्रागुक्तः क्रियाफले अकर्त्रभिप्रायेऽप्यात्मनेपदार्थः। (धा.प्र.)

केचिदमुं न पठन्ति। ते ब्रुविशासिगुणेन च यत्सचत इति भाष्यप्रयोगं न ऋतूदरेण संख्या सचेय इत्यादिप्रयोगं च। षच सेचने इत्यस्य अनुदात्तेतः धातूनामनेकार्थत्वात् समवायार्थस्य सम्बध्यमानकर्तृके व्यापारे वर्त्तमानस्य समर्थयन्ते। षच समवाये स्वरितेत्। केचित्तु परस्मैपदिषु धातुमेनं पठन्ति। षच समवाये रपलप व्यक्तायां वाचीति इति आहुः। षच सेचनने इत्यस्य अनुदात्तेतः अनेकार्थत्वात् धातूनां समवाये वृत्तिरिति। (मा.धा.)

सच्, सेट्, अक, उ। (धा.क.)

❖ षञ्ज [सञ्ज्] सङ्गे **(भ्वा०)**

षञ्ज सङ्गे। (क्षी.त.)(मा.धा.)

❖ षट [सट्] अवयवे **(भ्वा०)**

षट अवयवे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

सट्, अक, सेट्, प। । (धा.क.)

❖ षट्ट [सट्ट्] हिंसायाम् **(चुरा०)**

षट्ट स्फिट चुबि हिंसायाम्। (धा.प्र.)(मा.धा.)(धा.क.)

केचिद् द्वितीयं षुट्ट इति उकारवन्तमनोष्ठ्यं च पठन्ति। अस्माभिस्तु मैत्रेयादीनामनुसारेण पूर्वमेव षुट्टिः पठितः इतीह न लिखितः। (मा.धा.)

सट्ट, स्फिट्ट, चुम्ब (इ, वा णिच्) सक, उ। (धा.क.)

❖ षण [सण्] सम्भक्तौ **(भ्वा०)**

वन **षण** सम्भक्तौ। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अर्थभेदात् पुनः पठ्यते। (धा.प्र.)

भक्तिर्भजनम्। (क्षी.त.)

वनु, षनु इति इयं तनादौ। (धा.क.)

❖ षणु [सन्] दाने **(तना०)**

षणु दाने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

सन् (उ) सेट्, सक, उ। (धा.क.)

❖ षद्लृ [सद्] विशरणगत्यवसादनेषु **(भ्वा०)**

षद्लृ विशरणगत्यवसादनेषु। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

विशरणम् शातनम्, अवसादः अनुत्साहः। (क्षी.त.)

अयं तुदादावपि। उभयत्र पाठे प्रयोजनं उञ्छतिवन्नेयम् चुरादौ चायम्। (मा.धा.)

❖ षद्लृ [सद्] विशरणगत्यवसादनेषु (तुदा०)

षद्लृ विशरणे। सादः सद इति ज्वलादिपाठात्। (धा.प्र.)

षद्लृ विशरणगत्यवसादनेषु। (क्षी.त.) (मा.धा.)(धा.क.)

एवं धनपालः विसरण इत्यात्रेयमैत्रेयौ दुर्गश्च। (मा.धा.)

सद्, (लृ) अनिट्, सक, प। (धा.क.)

❖ षन्ज [सञ्ज्] सङ्गे (भ्वा०)

षन्ज सङ्गे। (धा.प्र.) (धा.क.)

सन्ज, अनिट्, अक, प। (धा.क.)

❖ षप [सप्] समवाये (भ्वा०)

षप समवाये। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

सचेति चन्द्रः। (क्षी.त.)

समवायः सम्बन्धः सम्यगवबोधो वा। (मा.धा.) (धा.क.)

❖ षम [सम्] अवैकल्ये (भ्वा०)

षम ष्टम वैक्लव्ये। (धा.प्र.)(मा.धा.)(धा.क.)

षम ष्टम अवैक्लव्ये। (क्षी.त.)

सम्, स्तम्, सेट्, अक, प। अत्र स्वाम्यादयः - केचिदेतदन्ता घटादय इति। (धा.क.)

❖ षम्ब [सम्ब्] सम्बन्धने (चुरा०)

षम्ब सम्बन्धे। (धा.प्र.)

षम्ब सम्बन्धने। (मा.धा.)(धा.क.)

शम्ब चेति मैत्रेयः। शम्बतेत्येक इति स्वामी। साम्ब इति केचिद्दन्त्यादिं दीर्घवन्तं च पठन्ति। (मा.धा.)(धा.क.)

सम्ब्, सक, उ। स्वामिमैत्रेयमते तालव्यादिः अयम्। (धा.क.)

❖ षय [सय] गतौ (भ्वा०)

अय वय **षय** मय चय दय तय नय गतौ। तय रक्षणे। दय दानगतिरक्षणेषु। (शा.आ.)

❖ षर्ज [सर्ज्] अर्जने (भ्वा०)

अर्ज **षर्ज** अर्जने। (धा.प्र.)(मा.धा.)(धा.क.)

अर्ज, सर्ज, सेट्, सक, प। (धा.क.)

❖ षर्ब [सर्ब्] गतौ (भ्वा०)

पर्प रफ रफि अर्ब पर्ब वर्ब मर्ब **षर्ब** कर्ब खर्ब गर्ब शर्ब चर्ब गतौ। (धा.प्र.)

वर्फ रफ रफि अर्ब वर्ब कर्ब खर्ब गर्ब घर्ब शर्ब **षर्ब** सर्ब चर्ब भर्ब नर्ब गतौ- पञ्चदशैते गत्यर्थाः। एकः शर्बस्तालव्यादिः, अपरः षोपदेशः, अन्यो दन्त्यादिः। (क्षी.त.)

पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब **षर्ब** चर्ब गतौ। (मा.धा.)(धा.क.)

आद्यः प्रथमान्तः परौ द्वावसापि द्वियीयान्तौ एकादश परे तृतीयान्ताः द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। (मा.धा.) (धा.क.)

सर्वे सेटः, सकर्म्मकाः, परस्मैपदिनश्च। (धा.क.)

❖ षर्व [सर्व्] गतौ (भ्वा०)

षर्व गतौ। (धा.क.)

❖ षर्व [सर्व्] हिंसायाम् (भ्वा०)

अर्व शर्व **षर्व** हिंसायाम्। (धा.प्र.) (मा.धा.)(धा.क)

अर्व, शर्व्, षर्व्, सेट्, सक, प। (धा.क)

❖ षल [सल्] गतौ (भ्वा०)

षल गतौ। (मा.धा.)(धा.क.)

षल्, सेट्, सक, प। (धा.क.)

❖ षस [सस्] स्वप्ने (अदा०)

षस षस्ति स्वप्ने। (धा.प्र.) (मा.धा.)

षस स्वप्ने। (क्षी.त.)(धा.क.)

सस्ति ससने इति चैके पेठुः। (क्षी.त.)

अयं पाठो मैत्रेयात्रेयादीनाम्। अत्र केचित् षस्ति इति न पृथग्धातुः। किन्तु षसेरेव शितपा निर्देशः अर्थभेदात्पुनः कृतः इति। स्वामी तु षस षसने इत्याद्यमेव पपाठ। षसनं च स्वप्नः। हरदत्तः - षसषस्ती छान्दसौ, वशिरपि। तस्यापि भाषायां न प्रयोगस्साधुः, भाष्यवार्त्तिककारौ चेत्प्रमाणम् इति। तथा च भाष्यमपि षसिवशी इति षस षस्ति स्वप्ने इति ये न पठन्ति केवलं षस स्वप्ने वश कान्तौ इति तन्मतेन एवदुक्तम्। अन्ये तु आहुः - षस्तीति धातुपाठ इव शितपा निर्देशः कृतः। अर्थभेदात्तु द्विः पठितः। अन्ये तु षस स्वप्ने इति न पठन्ति इति। अत्र सुधाकरः षस षसने वश कान्तौ छान्दसौ। (मा.धा.)

सस्, सेट्, अक, प। (धा.क.)

❖ षस्ज [सस्ज्] गतौ (भ्वा०)

ग्लुञ्चु **षस्ज** गतौ। (धा.प्र.) (मा.धा.)

ग्लुन्चु **षस्ज** गतौ। (क्षी.त.)(धा.क.)

प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु। (गीता) **सज्जमानमकार्येष्विति** (का नीति.)। चान्तः अयमिति शिवः। (क्षी.त.)

❖ षस्ति [षस्] स्वप्ने (अदा०)

षस **षस्ति** स्वप्ने। (धा.प्र.)(मा.धा.)

अयं पाठो मैत्रेयात्रेयादीनाम्। अत्र केचित् षस्ति इति न पृथग्धातुः। किन्तु षसेरेव शितपा निर्देशः अर्थभेदात्पुनः कृतः इति। स्वामी तु षस षसने इत्याद्यमेव पपाठ। षसनं च स्वप्नः। हरदत्तः - षसषस्ती छान्दसौ, वशिरपि। तस्यापि भाषायां न प्रयोगस्साधुः, भाष्यवार्त्तिककारौ चेत्प्रमाणम् इति। तथा च भाष्यमपि षसिवशी इति षस षस्ति स्वप्ने इति ये न पठन्ति केवलं षस स्वप्ने वश कान्तौ इति तन्मतेन एवदुक्तम्। अन्ये तु आहुः - षस्तीति धातुपाठ इव शितपा निर्देशः कृतः। अर्थभेदात्तु द्विः पठितः। अन्ये तु षस स्वप्ने इति न पठन्ति इति। अत्र सुधाकरः षस षसने वश कान्तौ छान्दसौ। (मा.धा.)

❖ षह [षह्] मर्षणे (भ्वा०)

षह मर्षणे। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

उदात्तोऽनुदात्तेत्। (मा.धा.)(धा.क.)

सह्, सेट्, सक, आ। (धा.क.)

❖ षह [सह्] चक्यर्थे (दिवा०)

षह षुह शक्यार्थे। (धा.प्र.)

❖ षह [सह्] मर्षणे (चुरा०)

षह मर्षणे (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

स एवायं नागः सहति कलभेभ्यः परिभवम्। सहति प्रतिभटम्। ततः प्रोदसहन् सर्वे।(धा.प्र.)

यथा-स एवायं नागः सहति कलभेभ्यः परिभवम् (सुभाषित) भ्वादौ सहते। (क्षी.त.)

सह्, सक, उ। (धा.क.)

❖ षाध [साध्] संसिद्धौ (स्वा०)

राध **षाध** संसिद्धौ। संसिद्धिः फलसम्पत्तिः। (क्षी.त)

❖ षान्त्व [सान्त्व्] सामप्रयोगे (चुरा०)

षान्त्व सामप्रयोगे। (धा.प्र.)(मा.धा.)(धा.क.)

सान्त्व्, अक, उ। (धा.क.)

❖ षिच [सिच्] क्षरणे (तुदा०)

षिच क्षरणे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

क्षरणमिह सेचनम्। सिच्, अनिट्, सक, उ। अभि-अभिषेचनम्, तर्पणम्। अभिषेकः। उद् - उत्सेकः, गर्वः। **न तस्योत्सिषिचे मनः**। इति (रघु.) नि-निषेकः, क्षरणम्, गर्भाधानम्। (धा.क.)

❖ षिञ् [सि] बन्धने (स्वा०)

षिञ् बन्धने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

सिनो ग्रासः स्वयमेव। सिता पाशेन शूकरी। (धा.प्र.)

सि (ञ्) अनिट्, सक, उ। (धा.क.)

❖ षिञ् [सि] बन्धने (क्र्या०)

षिञ् बन्धने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

सि (ञ्) अनिट्, सक, उ। (धा.क.)

❖ षिट [सिट्] अनादरे (भ्वा०)

शिट षिट अनादरे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

एतौ तालव्यमूर्धन्यादी। (क्षी.त.)

आद्यस्तालव्यादिः अपरो मूर्द्धन्यादिः। (मा.धा.) (धा.क.)

शिट्, षिट्, सेट्, सक, प। (धा.क.)

❖ षिध [सिध्] गत्याम् (भ्वा०)

षिध्र गत्याम्। केचिदुदितं पठन्ति। (मा.धा.) (धा.क.)

षिधु गत्यामिति दुर्गः। यदाह काश्यपः - उकार उदितो वेति विशेषणार्थ इति। तरङ्गिणी चायमुदिदिति, तद्वृत्तिविरोधादुपेक्ष्यं, यदाह - ततः परं सिध्यतिरेव नेतरे। अत एव क्षीररस्वामी सिद्धमित्युदाहृत्य निरनुबन्धपाठे तु सिधित इत्यपरितुष्यन्नुदाहजार। सिध्, सेट् प। प्रति, नि - प्रतिषेधः - निवारणं सक। शिष्यमकार्य्यात् प्रतिषेधति। परि - वेष्टनम्। **द्विषो घ्नन् प्रतिषेधतः** इति भट्टिः। (धा.क.)

❖ षिधु [सिध्] गत्याम् (भ्वा०)

षिधु गत्याम्। (शा.आ.)(धा.प्र.)(क्षी.त.)

उकार उदितो वा इति विशेषणार्थः। (शा.आ.)

केचिदस्योकारमनार्षमिच्छन्ति। (धा.प्र.)

❖ षिधु [सिध्] संराद्धौ (दिवा०)

षिधु संराद्धौ। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

केचिदूदितं पठन्ति तदसत्। (मा.धा.)

सिध्(उ) अनिट्, अक, प। केचिदूदितं पठन्ति, तदसत, अनुदात्तोपदेशवैयर्थ्यात्। (धा.क.)

❖ **षिधू [सिध्] संराद्धौ** **(दिवा०)**

षिधू संराधौ। (शा.आ.)

❖ **षिधू [सिध्] शास्त्रे माङ्गल्ये च** **(भ्वा०)**

षिधू शास्त्रे माङ्गल्ये च। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

शासनं शास्त्रम्। (धा.प्र.)

शास्त्रं शात्रविषयं शासनम्। माङ्गल्यं मङ्गलविषया क्रिया। अत्रैवायमूदित्, अर्थान्तरे पुनरूदित्। (क्षी.त.)

शास्त्रं शासनमिति मैत्रेयशाकटायनौ। शिष्टौ इत्येव चन्द्रः। शास्त्रं शास्त्रविषयं शासनम्। माङ्गल्यं मङ्गलक्रिया इति क्षीरस्वामी एवं तरङ्गिण्यामपि। (मा.धा.)(धा.क.)

अयमनूदित्। संराध्यर्थे दिवादौ। (मा.धा.)

सिध् (ऊ) वेट, प। अप - खण्डनम्। पापमपसेधति (मनु.)। आ - अवरोधः। उद् - उत्सेधः उच्चता। नि, प्रति-निषेधः। निवारणम्। भूतगणान्यषेधीत् भट्टिः। (धा.क.)

❖ **षिल [सिल्] उञ्छे** **(तुदा०)**

शिल षिल उञ्छे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

आद्यस्तालव्यादिरितरो मूर्द्धन्यादिः। आदेश-प्रत्यययोः इति प्रकृतेः षत्वम्। सेलति इति शपीत्यात्रेयः। (मा.धा.)

शिल्, सिल्, सेट्, अक, प। (धा.क.)

❖ **षिवु [सिव्] तन्तुसन्ताने** **(दिवा०)**

षिवु तन्तुसन्ताने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अभ्यासार्थं तन्तुः। (मा.धा.)

सिव् (उ) सेट्, सक, प। आत्रेयमते अभ्यासे षत्वं नास्ति, सहधातुर्द्रष्टव्यः। (धा.क.)

❖ **षु [सु] गतौ** **(भ्वा०)**

षु स्रु गतौ। (धा.प्र.)

❖ **षु [सु] प्रसवैश्वर्ययोः** **(भ्वा०)**

षु प्रसवैश्वर्य्ययोः। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

स्वादौ षुञ् अभिषवे । (क्षी.त.)

प्रसवोऽभ्यनुज्ञा इति पुरुषकारे। (मा.धा.) (धा.क.)

सु, अनिट्, प। (धा.क.)

❖ **षु [सु] प्रसवैश्वर्ययोः** **(अदा०)**

षु प्रसवैश्वर्य्ययोः। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

प्रसवोऽभ्यनुज्ञानमिति। (मा.धा.)

सु, अनिट्, सक, प। (धा.क.)

❖ **षुञ् [सु] अभिषवे** **(स्वा०)**

षुञ् अभिषवे। (शा.आ.)(धा.प्र.)
(क्षी.त.) (मा.धा.)(धा.क.)

अभिषवः सुरासन्धानं स्नपनं पीडनं स्नानं मन्थनं तेजनं वा। (धा.प्र.)

अभिषवः क्लेदनं, सन्धानाख्यम्। (क्षी.त.)

अभिषवः स्नपनपीडनस्नानसुरासन्धानादिः। तत्र स्नानेऽयमकर्मकः। (मा.धा.) (धा.क.)

सु, (ञ्) अनिट्, सक, उ। (धा.क.)

❖ **षुञ् [सु] आप्लवे** **(क्र्या०)**

षुञ् आप्लवे। (शा.आ.)

❖ षुट्ट [सुट्ट्] अनादरे (चुरा०)

अट्ट **षुट्ट** अनादरे। (धा.प्र.)(मा.धा.)(धा.क.)

अट्ट, सुट्ट, सक, उ। (धा.क.)

❖ षुर [सुर्] ऐश्वर्यदीप्त्योः (तुदा०)

षुर ऐश्वर्य्यदीप्त्योः। (धा.प्र.)(मा.धा.)(धा.क.)

सुर्, सेट्, अक, प। (धा.क.)

❖ षुह [सुह्] चक्यर्थे (दिवा०)

षह **षुह** शक्यार्थे। (धा.प्र.)

षुह शक्यर्थे। (क्षी.त.)(मा.धा.)(धा.क.)

शक्यर्थस्तृप्तिः। षह् षुह् सम्भक्तौ इति दुर्गः। (क्षी.त.)

चक्यर्थस्तृप्तिरिति स्वामिधनपालशाकटायनाः। आत्रेयमैत्रेयदुर्गाः षह षुह इति द्वौ धातू पेठुः। (मा.धा.)

चक्यर्थस्तृप्त्यर्थः। अत्र षह षुह इति द्वौ धातू आत्रेयमैत्रेयदुर्गाः पेठुः। सुह्, सेट्, अक, प। (धा.क.)

❖ षू [सू] प्रेरणे (तुदा०)

षू प्रेरणे। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

सू, सेट्, सक प। सौरी मन्त्र इति प्रयोगः सूरशब्दादणि द्रष्टव्यः। सम्प्रदायभेदः सूरस्य उपासकः इति अदादिदिवाद्योः। (धा.क.)

❖ षूङ् [सू] प्राणिगर्भविमोचने (अदा०)

षूङ् प्राणिगर्भविमोचने। (शा.आ.)(धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

दिवादौ षूङ् प्राणिप्रसवे। तुदादौ षू प्रेरणे। (क्षी.त.)

सू, वेट्, सक, आ। (धा.क.)

❖ षूङ् [सू] प्राणिप्रसवे (दिवा०)

षूङ् प्राणिप्रसवे। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

प्राणिग्रहणमतन्त्रम्। अप्राणिप्रसवेऽपि वर्तते- सूनं धान्यम्। (धा.प्र.)

प्रसूनं पुष्पम्, अत एवायम् अप्राणिप्रसव इत्यन्ये। तुदादौ षू प्रेरणे। (क्षी.त.)

अत्र प्राणिग्रहणमतन्त्रम्। तेन प्रसूनास्तरव इति भवति। (मा.धा.) (धा.क.)

प्रसूनं कुसुमं समम् इत्यत्र सुभूतिचन्द्रः षूङः प्राणिप्रसवे। क्षपणकमतेन वृक्षस्य अपि प्राणित्वमिति अनुक्तं सूतिवत्। (मा.धा.)

सू (ङ्), वेट्, सक, आ। (धा.क.)

❖ षूद [सूद्] क्षरणे (भ्वा०)

षूद क्षरणे हिंसायां च। (शा.आ.)

षूद क्षरणे। (धा.प्र.)(क्षी.त.)(मा.धा.)

क्षरणं निरसनम्। चुरादौ षूद निःस्रावणे। (क्षी.त.)

क्षरणं निःसारणम्। अत्रायमकर्मकः। हिंसायाम् अपि वर्त्तते। मधुसूदनः इति अत्रायं सकर्मकः। ण्यन्तोऽयं संस्कारेपि वर्त्तते। अग्निर्हव्यं शमिता सूदयति इति हव्यं हवनार्हपशोर्हृदयादि अयं चुरादावपि। (मा.धा.)

षूद क्षरणे (क्षणने)। क्षरणं निःसरणम्। अत्रायम् अकर्म्मकः। हिंसायामपि वर्त्तते, मधुसूदन इति। अत्रायं सकर्म्मकः, दुर्गस्तु षूद क्षणने इत्येव पठति। ण्यन्तोऽयं संस्कारेऽपि

वर्त्तते। अग्निर्हव्य शमिता सूदयतीति। क्षरण-स्वादुकरणनाशनार्थत्वम् अहोरात्राणि मरुतो विलिष्टं सूदयन्तु इत्यत्राह भट्टभास्करः। तथाहि अहोरात्राणि मरुतश्च तद् विलिष्टं विनाशितं विष्टपं वा सदयन्तु क्षारयन्तु यद्विलिष्टं स्वादु कुर्वन्तु वा। यद्वा यद्विलिष्टं यागयोग्यं यद्विरूपं विशसितं तद्विनाशयन्त्विति। क्षरे तु तव विलिष्टं न्यूनं पूरयन्त्विति पुराणार्थत्वं दृश्यते। सूद्, सेट्, आ। अयं चुरादवपि। (धा.क.)

❖ षूद [सूद्] क्षरणे (चुरा०)

षूद क्षरणे। (धा.प्र.)(मा.धा.)(धा.क.)

षूद आस्रवणे। घाते च केचित्। भ्वादौ क्षरणे। (क्षी.त.)

केचिदाश्रवण इति पठन्ति । (मा.धा.)(धा.क.)

सूद्, सक, उ। (धा.क.)

❖ षूर्क्ष [सूर्क्ष्] अनादरे (भ्वा०)

षूर्क्ष अनादरे। (धा.प्र.)

❖ षूर्क्ष्य [सूर्क्ष्य्] ईर्ष्यार्थः (भ्वा०)

षूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः। (धा.प्र.)

❖ षूष [सूष] प्रसवे (भ्वा०)

षूष प्रसवे। (शा.आ.)(धा.प्र.) (क्षी.त.)

तालव्यादिरिति चरकः। (क्षी.त.)

❖ षृधु [सृध्] उन्दे (भ्वा०)

शृधु षृधु मृधु उन्दे। (धा.प्र.)

❖ षृभु [सृभ्] हिंसार्थः (भ्वा०)

षृभु षृम्भु हिंसार्थौ। (धा.प्र.)(मा.धा.)(धा.क.)

षिभु षिम्भु इत्येके। (धा.प्र.)

अत्र मैत्रय एवं पठित्वा षिभु षिम्भु इत्येक इति ऋकारस्य स्थाने इकारमप्याह। तरङ्गिण्यां तु ऋकारवन्तौ दन्त्यादौ पठित्वा षोपदेशपर्युदासे सृग्रहणेन अनर्थकस्य अपि ग्रहणमित्युक्तम्।

(मा.धा.)(धा.क.)

षृभु षृन्भु हिंसार्थौ सृभ, सृन्भ् (उ) सेट्, सक, प। दुर्गमते तुपेत्यादि दण्डके पठितम्। (धा.क.)

❖ षृन्भु [सृम्भ्] हिंसार्थः (भ्वा०)

षृभु षृन्भु हिंसार्थौ। अत्र मैत्रेय एवं पठित्वा षिभु षिम्भु इत्येक इति ऋकारस्य स्थाने इकारमप्याह। तरङ्गिण्यान्तु ऋकारवन्तौ दन्त्यादौ पठित्वा षोपदेशपर्युदासे सृग्रहनेन अनर्थकस्यापि ग्रहणमित्युक्तम्। सृभ, सृन्भ् (उ) सेट्, सक, प। (धा.क.)

❖ षृम्भु [सृम्भ्] हिंसार्थः (भ्वा०)

षृभु षृम्भु हिंसार्थौ। (धा.प्र.)(मा.धा.)

षिभु षिम्भु इत्येके। (धा.प्र.)

अत्र मैत्रय एवं पठित्वा षिभु षिम्भु इत्येक इति ऋकारस्य स्थाने इकारमप्याह। तरङ्गिण्यां तु ऋकारवन्तौ दन्त्यादौ पठित्वा षोपदेशपर्युदासे सृग्रहणेन अनर्थकस्य अपि ग्रहणमित्युक्तम्।

(मा.धा.)(धा.क.)

सृभ, सृन्भ् (उ) सेट्, सक, प। दुर्गमते तुपेत्यादि दण्डके पठितम्। (धा.क.)

❖ षेबृ [सेब्] सेवने (भ्वा०)

पेबृ षेबृ सेवने। (धा.प्र.)

❖ षेवृ [सेव्] सेवने (भ्वा०)

शेवृ **षेवृ** गेवृ ग्लेवृ पेवृ मेवृ म्लेवृ सेचने- सेवृ खेवृ प्लेवृ इत्येके। (धा.प्र.)

एवृ शेवृ **षेवृ** सेवृ केवृ खेवृ ग्लेवृ पेवृ प्लेवृ मेवृ म्लेवृ सेवने। (क्षी.त.)

षेवृ गेवृ ग्लेवृ म्लेवृ सेचने। शेवृ खेवृ मेवृ इत्यपि एके इति मैत्रेयः। (मा.धा.)

षेवृ गेवृ ग्लेवृ पेवृ म्लेवृ सेवने। सेव्, गेव्, ग्लेव्, पेव्, म्लेव्, (ऋ) सेट्, सक, आ। (धा.क.)

❖ षै [सै] क्षये (भ्वा०)

क्षै जै **षै** क्षये। (धा.प्र.)(मा.धा.)(धा.क.)

केचिदमुं दन्त्यादिं पठन्ति। तत् षोपदेशलक्षण-विरोधाद् उपेक्ष्यम्। (मा.धा.)

क्षै, जै, सै, अनिट्, अक, प। (धा.क.)

❖ षो [सो] अन्तकर्मणि (दिवा०)

षो अन्तकर्मणि। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

अन्तकर्म विनाशः। (क्षी.त.)

अन्तकर्म विनाशनम्। सो, अनिट्, सक, प। अव-अवसानम्, समाप्तिः। **अवसेयाः कार्याणि धर्मेण पुरवासिनम्** - (भट्टिः)। **आर्ये ! यदि नेपथ्यविधानम् अवसितम्** (शकु.)। अध्यव - अध्यवसायः पर्यव - पर्यवसानम्। परिणामः। प्रत्यव - प्रत्यवसानम्, भोजनम्। (धा.क.)

❖ ष्कभि [स्कम्भ्] प्रतिबन्धे (भ्वा०)

ष्टभि **ष्कभि** प्रतिबन्धे। विष्टभ्यते इति स्तभ्नातेः सौत्रधातो रूपम्। टकारपरः षकारोऽयमित्येके-उपष्टम्भते। (धा.प्र.)

❖ ष्टक [स्तक्] प्रतीघाते (भ्वा०)

ष्टक प्रतिघाते। (शा.आ.)(धा.प्र.)
(मा.धा.)धा.क.)

ष्टक स्तक प्रतिघाते। (क्षी.त.)

अत्र दन्त्यादिरपि क्वचित्पठ्यते। तत् षोपदेश-लक्षणविरुद्धम्। (मा.धा.)

स्तक्, सेट्, अक, प। अत्र दन्त्यादिरपि क्वचित्, पठ्यते। तत् षोपदेशलक्षणविरुद्धम्। (धा.क.)

❖ ष्टन [स्तन्] शब्दे (भ्वा०)

ष्टन वन शब्दे। (धा.प्र.)(मा.धा.)(धा.क.)

स्तन्, वन्, सेट्, अक, प। (धा.क.)

❖ ष्टभि [स्तम्भ्] प्रतिबन्धे (भ्वा०)

ष्टभि स्तभि प्रतिबन्धे। (शा.आ.)

ष्टभि ष्कभि प्रतिबन्धे। विष्टभ्यते इति स्तभ्नातेः सौत्रधातो रूपम्। टकारपरः षकारोऽयम् इत्येके। (धा.प्र.)

ष्टभि स्कभि प्रतिबन्धे। (क्षी.त.)
(मा.धा.)(धा.क.)

प्रतिबन्धः क्रियानिरोधः। (क्षी.त.)

स्तन्भ्, स्कन्भ् (इ) सेट्, अक, आ। अत्र स्वामिमैत्रेयौ ष्टम्भ इष्टकरम् एकीयमतेन उपदेशिकम् आहतुः। (धा.क.)

❖ ष्टम [स्तम्] अवैकल्ये (भ्वा०)

षम **ष्टम** वैक्लव्ये। (धा.प्र.)(मा.धा.)(धा.क.)

षम ष्टम अवैक्लव्ये। (क्षी.त.)

सम्, स्तम्, सेट्, अक, प। (धा.क.)

❖ ष्टिघ [स्तिघ्] आस्कन्दने (स्वा०)

ष्टिघ आस्कन्दने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

कवर्गचतुर्थान्तः। (मा.धा.)

स्तिघ्, सेट्, सक, आ। (धा.क.)

❖ ष्टिपृ [स्तिप्] क्षरणार्थः (भ्वा०)

तिपृ तेपृ **ष्टिपृ** ष्टेपृ क्षरणार्थाः। (धा.प्र.)(क्षी.त.)(मा.धा.)

तिपृ तेपृ **ष्टिपृ** क्षरणार्थाः। तिप् (ऋ) अनिट्, तेप् (ऋ), ष्टिप् (ऋ) सेट्, सक, आ। ऋदित् - पवर्गान्तात्मनेपदित्वसाम्यात् चेह पाठः। क्षीरस्वमिना त्वयं सेडुदाहृतः। (धा.क.)

❖ ष्टिम [स्तिम्] आर्द्रीभावे (दिवा०)

तिम तीम **ष्टिम** ष्टीम आर्द्रभावे। (शा.आ.)

तिम तीम **ष्टिम** ष्टीम आर्द्रीभावे। (क्षी.त.)

तिम **ष्टिम** ष्टीम आर्द्रीभावे। (धा.प्र.) (मा.धा.)

अत्र केचिदसंयोगादि तीम इति दीर्घान्तं चतुर्थमपिधातुं पठन्तीत्यात्रेयः। (मा.धा.)

❖ ष्टीम [स्तीम्] आर्द्रीभावे (दिवा०)

तिम तीम ष्टिम **ष्टीम** आर्द्रभावे। (शा.आ.)

तिम ष्टिम **ष्टीम** आर्द्रीभावे। (धा.प्र.) (मा.धा.)

तिम तीम ष्टिम **ष्टीम** आर्द्रीभावे। (क्षी.त.)

अत्र केचिदसंयोगादि तीम इति दीर्घान्तं चतुर्थमपिधातुं पठन्तीत्यात्रेयः। (मा.धा.)

तिम स्तिम **ष्टीम** आर्द्रीभावे। तिम्, स्तिम्, स्तीम् - सेट्, अक, प। (धा.क.)

❖ ष्टु [स्तु] स्तुतौ (स्वा०)

ष्टु स्तुतौ। (शा.आ.)

❖ ष्टुच [स्तुच्] प्रसादे (भ्वा०)

ष्टुच प्रसादे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

संस्तोज इति वर्णविकाराभ्युपगमाद् इति मैत्रेयः। (मा.धा.)(धा.क.)

स्तुच्, सेट्, अक, आ। (धा.क.)

❖ ष्टुञ् [स्तु] स्तुतौ (अदा०)

ष्टुञ् स्तुतौ। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

संस्तावश्छन्दोगानाम्। तु इति सौत्रो धातुः वृद्ध्यर्थः। हिंसार्थ इत्येके। छान्दसः अयम् इत्यापिशलिः। (धा.प्र.)

अनुदात्तः। स्तु, (ञ्) अनिट्, सक, उ। (धा.क.)

❖ ष्टुप [स्तुप्] समुच्छ्राये (चुरा०)

ष्टुप समुच्छ्राये। (मा.धा.) (धा.क.)

ष्टूप्, अक, उ। केचिदिदं न पठन्ति। (धा.क.)

❖ ष्टूप [स्तूप्] समुच्छ्राये (चुरा०)

ष्टूप समुच्छ्राये। (धा.प्र.)(धा.क.)

ष्टूप्, अक, उ। केचिदिदं न पठन्ति। (धा.क.)

❖ ष्टुभु [स्तुभ्] स्तम्भे (भ्वा०)

ष्टुभु स्तम्भे।(धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

स्तम्भः क्रियानिरोधः। स्तोभो दोषवृद्ध्याख्यार्थ इति दुर्गः। (क्षी.त.)

स्तुभ् (उ) सेट्, अक, आ। अनुष्टुप्, त्रिष्टुप्, सुषामादित्वात् षत्वम्। (धा.क.)

❖ ष्टृक्ष [स्तृक्ष्] गतौ (भ्वा०)

तृक्ष **ष्टृक्ष** णक्ष गतौ। (धा.प्र.)(धा.क.)

तृक्ष्, स्तृक्ष्, नक्ष्, सेट्, सक, प। (धा.क.)

❖ ष्टेपृ [स्तेप्] क्षरणार्थः (भ्वा०)

तिपृ तेपृ ष्टिपृ **ष्टेपृ** क्षरणार्थाः। (धा.प्र.) (क्षी.त.)(मा.धा.)

❖ ष्टै [स्तै] वेष्टने (भ्वा०)

ष्टै वेष्टने। (धा.प्र.)(मा.धा.) (धा.क.)

अयं च पाठो मैत्रेयस्य भट्टभास्कारः अप्यत्रैव अनुकूलः। यदाह **स्तायूनां पतये नमः** इत्यत्र छद्मना वस्तादीनपहरन्ति ते स्तायवः। ष्टै वेष्टने इत्यस्माद्बाहुलकादुण् इति। (मा.धा.)

स्तै, अनिट्, सक, प। (धा.क.)

❖ ष्ट्यै [स्त्यै] शब्दसङ्घातयोः (भ्वा०)

स्त्यै **ष्ट्यै** सङ्घातशब्दयोः। (शा.आ.)

स्त्यै **ष्ट्यै** शब्दसङ्घातयोः। (धा.प्र.) (मा.धा.)(धा.क.)

ष्ट्यै स्त्यै शब्दसङ्घातयोः। (क्षी.त.)

द्विष्पाठसामर्थ्यादेकस्य षोपदेशत्वम्। (धा.प्र.)

एको दन्त्यादिः परो मूर्द्धन्यादिः षोपदेशलक्षणपर्युदास एक एव गृह्यते। उभयोः पाठवैयर्थ्यप्रसङ्गात् अत्रार्थयोर्यथासङ्ख्यं न भवति। (मा.धा.)

एको दन्त्यादिः, परो मूर्द्धन्यादिः। स्त्यै, स्त्यै, अनिट्, अक, प। (धा.क.)

❖ ष्टगे [स्थग्] संवरणे (भ्वा०)

ह्गे ह्लगे षगे **ष्टगे** संवरणे। (धा.प्र.)

ह्गे ह्लगे **ष्टगे** स्थगे संवरणे। संवरणमाच्छादनम्। षगे स्थगे इति दुर्गः। (क्षी.त.)

ह्गे ह्लगे षगे **ष्टगे** संवरणे। (मा.धा.) (धा.क.)

क्वचित्कोशे स्थगे इति दन्त्यादिरपि पठ्यते। (मा.धा.)

ह्ग्, ह्लग्, सग्, स्थग् (ए) सेट्, सक, प। क्वचित् कोषे स्थगे इति दन्त्यादिरपि पठ्यते, तत् षोपदेशलक्षणविरुद्धम्। (धा.क.)

❖ ष्टुड [स्थुड्] संवरणे (तुदा०)

थुड **ष्टुड** संवरणे। (धा.प्र.)

❖ ष्ठल [स्थल्] स्थाने (भ्वा०)

ष्ठल स्थाने। (धा.प्र.)(मा.धा.)(धा.क.)

स्थानं प्रतिष्ठा। (मा.धा.) (धा.क.)

स्थल्, सेट्, अक, प। (धा.क.)

❖ ष्ठा [स्था] गतिनिवृत्तौ (भ्वा०)

ष्ठा गतिनिवृत्तौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

स्था, अक, अनिट्, प। (धा.क.)

❖ ष्ठिवु [ष्ठिव्] निरसने (भ्वा०)

ष्ठिवु निरसने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

षकारात् परस्वकारोऽयमित्येके तिष्ठेव। (क्षी.त.)

अयं दिवादावपि। (मा.धा.)(धा.क.)

ष्ठिव् (उ) सेट्, सक, प। (धा.क.)

❖ ष्ठिवु [ष्ठिव्] निरसने (दिवा०)

ष्ठिवु निरसने। (शा.आ.)(धा.प्र.) (मा.धा.)(धा.क.)

अमुं धातुमात्रेयादयः पठन्ति। अन्ये तु न पठन्ति। यदाह धात्वादेष्षस्स इत्यत्र न्यासकारः ष्ठिवुं दिवादिष्वपि केचिदधीयते इति। (मा.धा.)

ष्ठिव् (उ) सेट्, सक, प। (धा.क.)

❖ ष्णसु [स्नस्] निरसने (दिवा०)

ष्णसु निरसने। मिदित्येके । ष्णुस अदर्शने इति द्रमिडाः। (क्षी.त.)

❖ ष्णा [स्ना] शौचे (अदा०)

ष्णा शौचे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

भ्वादौ ष्णै वेष्टने । (क्षी.त.)

स्ना, अनिट् अक्, प। (धा.क.)

❖ ष्णिह [स्निह्] उद्गिरणे (दिवा०)

ष्णिह उद्गिरणे। (क्षी.त.)

❖ ष्णिह [स्निह्] प्रीतौ (दिवा०)

ष्णिह प्रीतौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

स्निह्, वेट्, अक, प। **न च स्निह्यति कस्यचित्** इति भट्टिः। (धा.क.)

❖ ष्णिह [स्निह्] स्नेहने (चुरा०)

ष्णिह स्नेहने। (धा.प्र.)(मा.धा.)(धा.क.)

षोपदेशः प्रीतौ दिवादिः। अत्र स्फिट स्नेहन इति क्वचित्कोशे दृश्यते। तद्धनपालशाकटायनमैत्रेयदेवादिभिः चिरन्तनैः व्याख्यातृभिः न लिख्यते। (मा.धा.)

स्निह्, सक, उ। प्रीतौ दिवादिः। अत्र स्फिट इत्येके। (धा.क.)

❖ ष्णु [स्नु] प्रस्रवणे (अदा०)

ष्णु प्रस्रवणे।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

स्नु, सेट्, सक, प। (धा.क.)

❖ ष्णुसु [स्नुस्] निरसने (दिवा०)

ष्णुस निरसन इत्येके। (धा.प्र.)

❖ ष्णुसु [स्नुस्] अदने आदान अदर्शने (दिवा०)

ष्णुसु अदने। (धा.प्र.)(मा.धा.)(धा.क.)

आदान इत्येके। अदर्शन इत्यपरे। औणादिकः इति आत्रेयः। ष्णुस निरसने इत्येके। मिच्चेत्यात्रेयमैत्रेयौ उदुपधं चाहतुः। स्वामिकाश्यपौ तु अदुपधममुमेव पठित्वा ष्णुस अदर्शन इति द्रमिडाः इत्युकारोपधं पक्षान्तरमाहतुः। (मा.धा.)

स्नुस् (उ) सेट्, सक, प। (धा.क.)

❖ ष्णुह [स्नुह्] उद्गिरणे (दिवा०)

ष्णुह उद्गिरणे। (शा.आ.)(धा.प्र.) (मा.धा.) (धा.क.)

स्नुह्, वेट्, सक, प। (धा.क.)

❖ ष्णै [स्नै] वेष्टने शोभायां चेत्येके (भ्वा०)

ष्णै वेष्टने। (धा.प्र.) (क्षी.त.)

अदादौ ष्णा शौचे। (क्षी.त.)

❖ ष्मिङ् [स्मि] ईषद्धसने (भ्वा०)

ष्मिङ् ईषद्धसने। (शा.आ.)(धा.प्र.) (मा.धा.) (धा.क.)

अनादरे चायं वर्तते। (शा.आ.)

अयमनादरे चुरादिः। (मा.धा.) (धा.क.)

स्मि (ङ्) अनिट्, अक, आ। (धा.क.)

❖ ष्वक्क [स्वक्क्] गत्यर्थः (भ्वा०)

ककि श्वकि त्रकि ढौकृ त्रौकृ **ष्वक्क** वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (धा.प्र.)

❖ **ष्वक्क [स्वक्क्] गत्यर्थः** (भ्वा०)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ **ष्वक्क** वस्क मस्क तिकृ टिकृ टीकृ रघि लघि गत्यर्थाः। (धा.प्र.)

❖ **ष्वञ्ज [स्वञ्ज्] परिष्वङ्गे** (भ्वा०)

ष्वञ्ज परिष्वङ्गे। (शा.आ.)(मा.धा.)

❖ **ष्वद [स्वद्] आस्वादने** (भ्वा०)

ष्वद स्वर्द आस्वादने। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

आद्यः षोपदेशः नेतरः। (धा.प्र.)

आस्वादनं जिह्वाया लेहः। चुरादौ ष्वद संवरणे स्वादयति। (क्षी.त.)

संवरण इति क्षीरस्वामी। आस्वादनमनुभवः। अत्रायं सकर्मकः। स्वदन्ति देवा उपा निहव्येति दर्शनात्। छान्दसं परस्मैपदम् तथा स्वादन इति। स्वाद आस्वादन इत्यत्रैवाग्रे। (मा.धा.)

ष्वद स्वर्द आस्वादने इति धातुवृत्तिकारः। संवरण इति क्षीरस्वामी। आस्वादनमनुभवः। अत्रायं सकर्मकः। स्वदन्ति देवा उपा निहव्येति दर्शनात्। छान्दसं परस्मैपदम्। आस्वादनमिह रसापादानं प्रीणनञ्चेति रमानाथः। तथा स्वादन इति ण्यन्तेनार्थनिर्देशाच्च सकर्म्मकोऽयम्। यद्वक्ष्यते चुरादावास्वादने सकर्म्मक इति, अस्यार्थस्तत्र प्रपञ्चयिष्यते। यदायमनेकार्था धातव इति रुचौ वर्तते, तदाऽकर्म्मकः। आद्यः षोपदेशः। प्रायेणायमाङ् पूर्वः। स्वद्, सेट्, आ। स्वाद्, सेट्, आ। स्वर्द्, सेट्, आ। (धा.क.)

❖ **ष्वद [स्वद्] संवरणे** (चुरा०)

ष्वद संवरणे। भ्वादौ ष्वद आस्वादने। (क्षी.त.)

❖ **ष्वद [स्वद्] आस्वादने** (चुरा०)

ष्वद आस्वादने। (धा.प्र.)(मा.धा.)(धा.क.)

स्वाद इत्येके। संवरण इति क्षीरस्वामिधनपाल-शाकटायनाः। (मा.धा.)

स्वाद् इत्येके। संवरण इति क्षीरस्वामिप्रभृतयः। स्वद्, सक, उ। (धा.क.)

❖ **ष्वन्ज [स्वञ्ज्] परिष्वङ्गे** (भ्वा०)

ष्वन्ज परिष्वङ्गे। (क्षी.त.)

❖ **ष्वन्ज [स्वञ्ज्] आस्वादने** (चुरा०)

ष्वन्ज परिष्वङ्गे - स्वन्ज्, अनिट्, अक, आ। (धा.क.)

❖ **ष्वष्क [ष्वष्क्] गत्यर्थः** (भ्वा०)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ **ष्वक** वस्क मस्क तिकृ टिकृ टीकृ रघि लघि गत्यर्थाः - बालमूललघ्वङ्गुलीनां वा लो रत्वमापद्यत इति रपक्षे रघुः। (धा.प्र.)

ढौकृ त्रौकृ ककि श्वकि त्रकि **ष्वष्क** मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (शा.आ.)

ककि श्वकि त्रकि ढौकृ त्रौकृ **ष्वस्क** वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः। (क्षी.त.)

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ **ष्वष्क** वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः - सम्मतायां दन्त्यादिः पठ्यते। (मा.धा.)

ककि वकि [मकि] श्वकि त्रकि ढौकृ त्रौकृ **ष्वष्क** वस्क मस्क टिकृ टीकृ [सेकृ श्रेकृ श्रकृ श्लकि]

रघि लघि गत्यर्थाः - सम्मतायां दन्त्यादिः पठ्यते। (धा.क.)

❖ **ष्विदा [स्विद्] गात्रप्रक्षरणे** **(दिवा०)**

ष्विदा गात्रप्रक्षरणे। (क्षी.त.) (मा.धा.)(धा.क.)

गात्रप्रक्षरणं घर्मस्रुतिः। (क्षी.त.)(मा.धा.)(धा.क.)

ञिष्विदेति मैत्रेयादयः। (मा.धा.)(धा.क.)

स्विद्, (आ) अनिट्, अक, प। (धा.क.)

❖ **संकेत [संकेत] आमन्त्रणे** **(चुरा०)**

सङ्केत ग्राम कुण गुण चामन्त्रणे। (मा.धा.)(धा.क.)

चकारेण कूट इत्यपेक्षत इति मैत्रेयः। (मा.धा.)

चकारेण कूट इत्यपीति मैत्रेयः। (धा.क.)

❖ **सङ्ग्राम [सङ्ग्राम] युद्धे** **(चुरा०)**

सङ्ग्राम युद्धे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

तस्थौ सिसङ्ग्रामयिषुः शितेषुः इति भट्टिः। (धा.प्र.)

सिद्धे ग्रामयतेरेव सोपसर्गान् नियमार्थं सूत्रम्। (क्षी.त.)

अयमनुदात्तेत्। तथा च तृतीयादिभ्य इत्यत्र कैयटे, सङ्ग्रामयतिरनुदात्तेद्बोद्धव्य इति। पदमञ्जर्य्याञ्च अनुदात्तेदयं सङ्ग्रामयतिरिष्यत इति। असङ्ग्रामयत शूर इति भाष्ये च प्रयोगः। सङ्ग्राम, अक, आ। वोपदेवमते सङ्ग्राम ङ ञ त क युद्धे इति गणपाठः। ञ - सङ्ग्रामयति - ते। ञित्वेनैवोभयपदसिद्धौ ङित्करणमफलवत् कर्त्तरि आत्मनेपदार्थम्। एवं सर्वत्रेति दुर्गादासः सङ्ग्रामयतीति दुर्गः। (धा.क.)

❖ **सञ्ज [सञ्ज्] सङ्गे** **(भ्वा०)**

सञ्ज सङ्गे। (शा.आ.)

❖ **सट्ट [सट्ट्] हिंसायाम्** **(चुरा०)**

सट्ट हिंसायाम्। (क्षी.त.)

❖ **सत्र [सत्र] सन्तानक्रियायाम्** **(चुरा०)**

सत्र सन्तानक्रियायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

सत्र, सक, आ। सत्रम् - यज्ञविशेषः। (धा.क.)

❖ **सभाज [सभाज] प्रीतिदर्शनयोः** **(चुरा०)**

सभाज प्रीतिदर्शनयोः। (धा.प्र.) (मा.धा.)(धा.क.)

सभाज प्रीतिदर्शने। (क्षी.त.)

प्रीतिसेवनयोरित्यन्ये। (मा.धा.) (धा.क.)

सभाज, सक, प। (धा.क.)

❖ **सर्ज [सर्ज्] अर्जने** **(भ्वा०)**

अर्ज **सर्ज** अर्जने। (शा.आ.)(क्षी.त.)

❖ **सर्ब [सर्ब्] गतौ** **(भ्वा०)**

वर्फ रफ रफि अर्ब वर्ब कर्ब खर्ब गर्ब घर्ब शर्ब षर्ब **सर्ब** चर्ब भर्ब नर्ब गतौ- पञ्चदशैते गत्यर्थाः। एकः शर्बस्तालव्यादिः, अपरः षोपदेशः, अन्यो दन्त्यादिः। (क्षी.त.)

❖ **सल [सल्] गतौ** **(भ्वा०)**

सल गतौ। (धा.प्र.)(क्षी.त.)

❖ **सल [सल्] विकरणे** **(तुदा०)**

सल विकरणे। (शा.आ.)

❖ **सस [सस्] स्वप्ने** **(अदा०)**

सस स्वप्ने। (शा.आ.)

❖ **साध [साध्] संसिद्धौ** **(स्वा०)**

राध **साध** संसिद्धौ। (शा.आ.)(धा.प्र.)(मा.धा.)

राध्, साध्, अनिट्, अक, प। कालापास्तु अषोपदेशं पठन्ति, तत् षोपदेशलक्षणविरुद्धम् इति माधवः। मातरि साधुः - साधुर्देवदत्तो मातरं प्रति। (धा.क.)

❖ **साध [साध्] संसिद्धौ** **(दिवा०)**

राध **साध** संसिद्धौ। (शा.आ.)

❖ **सान्त्व [सान्त्व्] सामप्रयोगे** **(चुरा०)**

सान्त्व सामप्रयोगे। साम सान्त्वेति चन्द्रः। (क्षी.त.)

❖ **साम [साम] सान्त्वप्रयोगे** **(चुरा०)**

साम सान्त्वने। (धा.प्र.)

साम सान्त्वप्रयोगे (मा.धा.)(धा.क.)

साम सान्तने। सान्तनं प्रीणनम्। साम सान्त्वप्रयोगे इति चान्द्रमते। (क्षी.त.)

साम सान्त्वन इति पठितस्येह पाठोऽग्लोपित्त्वाद् अससामदिति। (मा.धा.)(धा.क.)

साम, सक, उ। (धा.क.)

❖ **साम्ब [साम्ब] सम्बन्धने** **(चुरा०)**

साम्ब सम्बन्धे। चन्द्रः शम्ब इत्याह। (क्षी.त.)

❖ **सार [सार] दौर्बल्ये** **(चुरा०)**

सार कृप श्रथ दौर्बल्ये। (धा.प्र.) (मा.धा.)(धा.क.)

सार, कृप, श्रथ। अक, उ। (धा.क.)

❖ **सिट्ट [सिट्] कुत्सासन्निकर्षयोः** **(भ्वा०)**

सिट्ट सेट्ट कुत्सासन्निकर्षयोः। (शा.आ.)

❖ **सिवु [सिव्] गतिशोषणयोः** **(दिवा०)**

सिवु गतिशोषणयोः। (शा.आ.)

❖ **सिल [सिल] उञ्छे** **(दिवा०)**

मिल **सिल** उञ्छे। (शा.आ.)

❖ **सीकृ [सीक्] सेचने** **(भ्वा०)**

सीकृ सेचने। (शा.आ.)

❖ **सु [सु] गतौ** **(भ्वा०)**

सु स्रु गतौ। (शा.आ.)

❖ **सु [सु] ऐश्वर्यदीप्त्योः** **(अदा०)**

सु ऐश्वर्यदीप्त्योः। (शा.आ.)

❖ **सुख [सुख] तत्क्रियायाम्** **(चुरा०)**

सुख दुःख तत्क्रियायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

तदिति सुखदुःखप्रातिपदिकार्थौ निर्दिश्यते। (धा.प्र.)

सुखनं दुःखनं च तत्क्रिया। (क्षी.त.)

तच्छब्देन सुखदुःखे प्रातिपदिकार्थौ निर्दिश्येते। (मा.धा.) (धा.क.)

प्रातिपदिकाद्धात्वर्थे इति सिद्ध इहानयोः पाठः सोपसर्गात् प्रत्ययार्थ इति मैत्रेयः। सुख, दुःख, अक, प। (धा.क.)

❖ **सुट्ट [सुट्ट्] अनादरे** **(चुरा०)**

सुट्ट अनादरे। चन्द्र दुर्गौ षोपदेशान् सुट्टादीन् मन्येते। (क्षी.त.)

❖ **सुर [सुर्]ऐश्वर्यदीप्त्योः** **(चुरा०)**

सुर ऐश्वर्यदीप्त्योः। (शा.आ.)(क्षी.त.)

षोपदेशोऽयमिति दुर्गः। (क्षी.त.)

❖ **सूच [सूच] पैशुन्ये** **(चुरा०)**

सूच पैशुन्ये। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

सूच, अक, उ। (धा.क.)

❖ **सूत्र [सूत्र] वेष्टने** **(चुरा०)**

सूत्र वेष्टने। (धा.प्र.) (मा.धा.) (धा.क.)

सूत्र विमोचने। विमोचनं मोचनाभावः।(क्षी.त.)

अन्ये तु विमोचन इति पठन्तो विमोचनं मोचनाभाव इति। ग्रन्थनमित्यपरे। (मा.धा.)

अन्ये तु विमोचन इति पठन्तो विमोचनं मोचनाभाव इति व्याचक्षते। ग्रहणमित्यपरे।

सूत्र, सक, प। (धा.क.)

❖ **सूरी [सूर्] दाहे** **(दिवा०)**

सूरी दाहे। (शा.आ.)

❖ **सूर्क्ष [सूर्क्ष्] आदरे** **(भ्वा०)**

सूर्क्ष आदरे। (मा.धा.)(धा.क.)

अनादर इति क्वचित्पठ्यते।। (मा.धा.)

सूर्क्ष्, सेट्, सक, प। (धा.क.)

❖ **सूर्क्ष्य [सूर्क्ष्य्] अनादरे** **(भ्वा०)**

सूर्क्ष्य अनादरे। षान्तोऽयमिति चन्द्रः।(क्षी.त.)

❖ **सूर्क्ष्य [सूर्क्ष्य्] ईर्ष्यार्थः** **(भ्वा०)**

सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः। (शा.आ.)(क्षी.त.) (मा.धा.)(धा.क.)

ईर्ष्या कामजमसहनम्। (क्षी.त.)

त्रय एव सेटः, अकर्मकाः, परस्मैपदिनश्च। सूर्क्ष आदरे इत्यग्रे। (धा.क.)

❖ **सृ [सृ] गतौ** **(भ्वा०)**

सृ गतौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.) (धा.क.)

ऋ सृ गतौ। (धा.प्र.)

सृ, अनिट्, सक, प। प्र-प्रसारः। अप-अपसरणम्। अति-अतिसारः, अतीसारः-रोगः। अभि-अभिसारः। निर् - निःसरणम्, निष्क्रमणम्। (धा.क.)

❖ **सृ [सृ] गतौ** **(जुहो०)**

ऋ सृ गतौ। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

ऋच्छति सरतीति भ्वादिपाठात्। (धा.प्र.)

सृधातुश्छान्दसः। (धा.क.)

❖ **सृज [सृज्] विसर्गे** **(दिवा०)**

सृज विसर्गे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

अयमकर्मकः प्रयुज्यते। (मा.धा.)

विसर्गः - त्यागः, सृष्टिः, निर्म्माणम्, करणम्। तत्र व्युद्भ्यां परस्त्यागार्थः, अन्यत्र करोत्यर्थः।

सृज्, अनिट्, अक, आ। (धा.क.)

❖ **सृज [सृज्] विसर्गे** **(तुदा०)**

सृज विसर्गे। (शा.आ.)(धा.प्र.) (क्षी.त.)(धा.क.)

विसर्गः - त्यागः, सृष्टिः, निर्म्माणम्, करणम्। तत्र व्युद्भ्यां परस्त्यागार्थः, अन्यत्र करोत्यर्थः।

सृज्, अनिट्, सक, प। (धा.क.)

❖ **सृन्भु [सृन्भ्] हिंसार्थः** **(भ्वा०)**

सृभु सृन्भु हिंसार्थौ। (क्षी.त.),।

❖ सृप्लृ [सृप्] गतौ **(भ्वा०)**

सृपेः खल्वपि। (शा.आ.)

गम्लृ सृप्लृ गतौ। (धा.प्र.)(क्षी.त.)

(मा.धा.)(धा.क.)

गम्, सृप् (लृ) अनिट्, सक, प। (धा.क.)

❖ सृभु [सृभ्] हिंसार्थः **(भ्वा०)**

सृभु सृन्भु हिंसार्थौ। (क्षी.त.)

❖ सृहू [सृह] हिंसायाम् **(तुदा०)**

तृहू स्तृहू सृहू हिंसायाम्। (शा.आ.)

❖ सेकृ [सेक्] गतौ **(भ्वा०)**

सेकृ स्रेकृ श्रेकृ स्रकि श्रकि श्लकि गत्यर्थाः।

(धा.प्र.)

शीकृ **सेकृ** स्रेकृ [स्रकि] श्रकि श्लकि गत्यर्थाः। शीकेरर्थभेदात् पुनः पाठः। अत एव चन्द्रो नैनमध्यैष्ट, अन्ये षेकृ इति विकल्पेन षोपदेशकार्यार्थं पेठुः - सेकते, असिसेकत्, असिषेकत्। अत्रान्त्यौ तालव्यादी। (क्षी.त.)

सेकृ स्रेकृ स्रकि श्रकि श्लकि गत्यर्थाः - अन्त्यौ तालव्यादी। अन्ये दन्त्यादयः । अत्र क्षीरस्वामी अत्र दन्त्यादेः स्थाने तालव्यादिं पठित्वाऽर्थभेदात्पुनः पाठ इत्युक्त्वा षेकृ इत्यन्ये विकल्पेन षोपदेशं कार्यार्थे पेठुरिति। (मा.धा.)

सेकृ स्रेकृ स्रकि श्रकि श्लकि गत्यर्थाः - अन्त्यौ तालव्यादी, अन्ये दन्त्यादयः। सेक्, स्रेक्, (ऋ) स्रङ्क्, श्रङ्क्, श्लङ्क्, (इ) सेट्, सक, आ।

(धा.क.)

❖ सेदृ [सेद्] कुत्सासन्निकर्षयोः **(भ्वा०)**

सिदृ **सेदृ** कुत्सासन्निकर्षयोः। (शा.आ.)

❖ सेवृ [सेव्] सेवने **(भ्वा०)**

एवृ शेवृ षेवृ **सेवृ** केवृ खेवृ ग्लेवृ पेवृ प्लेवृ मेवृ म्लेवृ सेवने। (क्षी.त.)

❖ सै [सै] क्षये **(भ्वा०)**

क्षै जै **सै** क्षये। (क्षी.त.)

❖ स्कन्दिर् [स्कन्द्] गतिशोषणयोः **(भ्वा०)**

स्कन्दिर् गतिशोषणयोः। (शा.आ.)

(धा.प्र.)(मा.धा.)(धा.क.)

स्कन्दिर् शोषणे। (क्षी.त.)

स्कन्द्, (इर्) अनिट्, सक, प। गेहावस्कन्दम्, गेहंगेहम्अवस्कन्दम्, गेहमवस्कन्दमकस्कन्दम् आस्ते। अव - अवस्कन्दः - अवरोधः। आ - आस्कन्दः - अश्वगतिविशेषः। अभि - पीडनम्। परि - परिभ्रमणम्। प्रपतनम्। वि-परिभ्रमणम्। (धा.क.)

❖ स्कभि [स्कम्भ्] प्रतिबन्धे **(भ्वा०)**

ष्टभि **स्कभि** प्रतिबन्धे। (धा.प्र.)(क्षी.त.)

(मा.धा.)(धा.क.)

प्रतिबन्धः क्रियानिरोधः। षकारोऽमित्येके।

(क्षी.त.)

स्तन्भ्, स्कन्भ् (इ) सेट्, अक, आ। अत्र स्वामिमैत्रेयौ ष्टम्भेः टकारमेकीयमतेन उपदेशिकम् आहतुः। (धा.क.)

❖ स्कुञ् [स्कु] आप्रवणे **(क्र्या०)**

स्कुञ् आप्लवने। (धा.प्र.)

स्कुञ् आप्रवणे। (क्षी.त.)(मा.धा.)(धा.क.)

आप्रवणमुद्धरणम्। सौत्रोऽयम् इत्याचार्याः।

(क्षी.त.)

स्कुञ् आप्रवणे क्र्यादिरिति। (मा.धा.)

सौत्रोऽयमिति आचार्याः। केचित् आप्लवने इति पठन्ति। स्कु (ञ्) अनिट्, सक, उ। (धा.क.)

❖ स्कुदि [स्कुन्द्] आप्रवणे **(भ्वा०)**

स्कुदि आप्रवणे। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

आप्रवणम् उत्प्लुत्य गमनम्, आस्कन्दनं वा। उद्धरणमिति तु श्रीभोजः। (क्षी.त.)

आप्रवणम् उत्प्लवनम्। उत्प्लुत्य गमनं वेति तरङ्गिणी। उद्धरणमिति भोजः अत्र सकर्मकः। (मा.धा.)(धा.क.)

आप्लवने इति दुर्गः - इ इत् (अनुबन्धः) उपदेशावस्थायां नकारागमात् स्कुन्द् इति प्रकृतिः। स्कुन्द्, (इ) सेट्, सक, आ। (धा.क.)

❖ स्खद [स्खद्] स्खदने **(भ्वा०)**

स्खद खदने। (शा.आ.)(क्षी.त.)

स्खद स्खदने। (धा.प्र.)(मा.धा.)(धा.क.)

खदनं विदारणम्। (क्षी.त.)

स्खदनं विद्रावणमिति स्वामी। (मा.धा.)(धा.क.)

स्खद्, सेट्, सक, आ। (धा.क.)

❖ स्खल [स्खल्] चलने **(भ्वा०)**

स्खल चलने। (शा.आ.)(क्षी.त.)(धा.क.)

स्खल सञ्चाने (मा.धा.)

खल **स्खल** सञ्चलने। खल संशये च। (धा.प्र.)

स्खल, सेट्, अक, प। वोपदेवमते सञ्चयार्थे च। (धा.क.)

❖ स्खदिरवपरिभ्याञ्च **(भ्वा०)**

स्खदिरवपरिभ्याञ्च (धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

अपस्खादयति। परिस्खादयति आभ्याम् अन्यत्र स्खदयति। प्रस्खदयति। (धा.प्र.)

आभ्यामेवोपसर्गाभ्यां स्खदिः मित्। अपस्खदयति परिस्खदयति। अवेति - श्रीभोजः अवस्खदयति। अन्योपसर्गपूर्वान्नास्ति - प्रस्खादयति। (क्षी.त.)

अपावपरिभ्य इति बोधिन्यासे। अत्रापि स्वाम्यादयो नेत्यनपेक्ष्य। स्खादेः पूर्ववाठात् सामान्येन प्राप्तं मित्वमुपसृष्टाद्यदि भवति। अवाद्युपसृष्टादेवेति व्याचक्षाणाः प्रस्खादयति इत्यादौ मित्त्वं नेच्छन्ति। इदं वृत्तिकारादीनाम् अनभिमतम्। यतस्तैः सर्वत्र नेत्यपेक्ष्यते। एवं हि निषेधानन्तरं पाठ उपपद्यते। अन्यथा स्खद खदन इत्यस्यानन्तरमेवावपरिभ्यां चेति पठेत्। द्विःस्खदिग्रहणं न कर्त्तव्यं भवति। (मा.धा.)

❖ स्तक [स्तक्] प्रतिघाते **(भ्वा०)**

ष्टक **स्तक** प्रतिघाते। (क्षी.त.)

❖ स्तन [स्तन] शब्दे **(भ्वा०)**

स्यमु स्वन **स्तन** ध्वन शब्दे। चुरादावदन्तः स्तनगदी देवशब्दे। (क्षी.त.)

❖ स्तन [स्तन] देवशब्दे **(चुरा०)**

स्तन गदी देवशब्दे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

देवो मेघे सुरे राज्ञि इति मननाद् देवशब्दे मेघध्वनावित्यर्थः। प्रथमाद्विवचननिर्देशो वैचित्र्यार्थः। (धा.प्र.)

देवोऽभ्रम्। (क्षी.त.)

द्विवचनिर्देशो वैचित्र्यार्थ इति मैत्रेयः। (मा.धा.)

स्तन, गद्, (ई) अक, उ। स्तन गदी इति द्विवचननिर्देशो वैचित्र्यार्थ इति मैत्रेयः। (धा.क.)

❖ **स्तभि [स्तम्भ्] प्रतिबन्धे** **(भ्वा०)**

ष्टभि **स्तभि** प्रतिबन्धे। (शा.आ.)

❖ **स्तिप [स्तिप्] क्षेपे** **(चुरा०)**

दभ दिभि तिप टिप डिप **स्तिप** क्षेपे - दभि इति नन्दी। (क्षी.त.)

❖ **स्तिम [स्तिम्] आर्द्रीभावे** **(दिवा०)**

तिम **स्तिम** ष्टीम आर्द्रीभावे (मा.धा.)(धा.क.)

अत्र केचिदसंयोगादि तीम इति दीर्घान्तं चतुर्थम्। (मा.धा.)

तिम्, स्तिम्, स्तीम् - सेट्, अक, प। (धा.क.)

❖ **स्तु [स्तु] प्रस्रवने** **(अदा०)**

स्तु प्रस्रवणे। (शा.आ.)

❖ **स्तुच [स्तुच्] आवेशे** **(भ्वा०)**

स्तुच आवेशे। (शा.आ.)

❖ **स्तुप [स्तुप्] समुच्छ्राये** **(चुरा०)**

स्तुप समुच्छ्राये। चन्द्रः षोपदेशमाह। (क्षी.त.)

❖ **स्तुभ [स्तुभ्] आवेगे** **(भ्वा०)**

स्तुभ आवेगे। (शा.आ.)

❖ **स्तूप [स्तूप्] समुच्छ्राये** **(दिवा०)**

स्तूप समुच्छ्राये। स्तुप इति दुर्गः। (क्षी.त.)

❖ **स्तृक्ष [स्तृक्ष्] गतौ** **(भ्वा०)**

तृक्ष **स्तृक्ष** णक्ष गतौ (क्षी.त.) (मा.धा.)

षोपदेशो न्याय्यः, तथा च चान्द्राः तृक्ष ष्टृक्ष णक्ष इति पेठुः। (क्षी.त.)

❖ **स्तृञ् [स्तृ] आच्छादने** **(स्वा०)**

स्तृञ् आच्छादने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

दीर्घान्तः क्र्यादिः। (मा.धा.)

स्तृ (ञ्) अनिट्, सक, उ। (धा.क.)

❖ **स्तृञ् [स्तृ] आच्छादने** **(क्र्या०)**

स्तृञ् आच्छादने। (शा.आ.)

❖ **स्तृन्हू [स्तृन्ह्] हिंसार्थः** **(तुदा०)**

तृहू तृन्हू स्तृहू **स्तृन्हू** हिंसायाम्। षोपदेशौ इति दुर्गः। (क्षी.त.)

❖ **स्तृहू [स्तृह्] हिंसार्थः** **(तुदा०)**

तृहू **स्तृहू** सृहू हिंसायाम्। (शा.आ.)

तृहू **स्तृहू** तृंहू हिंसार्थाः। (धा.प्र.)

तृहू तृन्हू **स्तृहू** स्तृन्हू हिंसायाम्। षोपदेशाविति दुर्गः। (क्षी.त.)

तृहू **स्तृहू** तृन्हू हिंसार्थाः। अत्र सानुषङ्गं मूर्धन्यादिं चतुर्थमपि। ष्टृह इति धातुं केचित्पठन्ति। आत्रेयमैत्रेयादिभिरयं न पठ्यते। (मा.धा.)

तृहू, **स्तृहू**, तृन्हू हिंसार्थाः। तृह्, स्तृह्, तृन्ह्, (ऊ) वेट्, सक, प। (धा.क.)

❖ **स्तॄञ् [स्तॄ] आच्छादने** **(क्र्या०)**

स्तॄञ् आच्छादने। (धा.प्र.)(मा.धा.)(धा.क.)

स्तॄञ् छादने। (क्षी.त.)

स्तृ (ञ्) सेट्, सक, उ। (धा.क.)

❖ स्तृञ् [स्तृ] आच्छादने (स्वा०)

स्तृञ् आच्छादने। (शा.आ.)

❖ स्तेन [स्तेन] चौर्ये (चुरा०)

स्तेन चौर्ये। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

स्तेन, सक, उ। चुर इत्यारभ्य स्तेनेति पर्य्यन्तेभ्यो ञनुबन्धवर्जितेभ्यः यदुभयपदं लिखितं तद् मैत्रेयमात्रमतम् अनुसृत्य अपरेषां मते तु तत्र परस्मैपदं ज्ञातव्यम्। (धा.क.)

❖ स्तोम [स्तोम] श्लाघायाम् (चुरा०)

स्तोम श्लाघायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

स्तोम, अक, प। (धा.क.)

❖ स्त्यै [स्त्यै] शब्दसङ्घातयोः (भ्वा०)

स्त्यै ष्ट्यै सङ्घातशब्दयोः। (शा.आ.)

स्त्यै ष्ट्यै शब्दसङ्घातयोः। (धा.प्र.) (मा.धा.)(धा.क.)

ष्ट्यै स्त्यै शब्दसङ्घातयोः। (क्षी.त.)

द्विष्पाठसामर्थ्यादेकस्य षोपदेशत्वम्। (धा.प्र.)

एको दन्त्यादिः परो मूर्द्धन्यादिः षोपदेशलक्षणपर्युदास एक एव गृह्यते। उभयोः पाठवैय्यर्थ्यप्रसङ्गात्। (मा.धा.)

एको दन्त्यादिः, परो मूर्द्धन्यादिः। स्त्यै, स्त्यै, अनिट्, अक, प। (धा.क.)

❖ स्थगे [स्थग्] संवरणे (भ्वा०)

ह्गे ह्लगे ष्ठगे **स्थगे** संवरणे। संवरणम् आच्छादनम्। षगे स्थगे इति दुर्गः। (क्षी.त.)

❖ स्थुड [स्थुड्] संवरणे (तुदा०)

स्थुड थुड संवरणे। (क्षी.त.)

❖ स्थल [स्थल्] स्थाने (भ्वा०)

स्थल स्थाने। (शा.आ.)(क्षी.त.)

ष्ठल इति चन्द्रः। (क्षी.त.)

❖ स्थूल [स्थूल] परिबृंहणे (चुरा०)

स्थूल परिबृंहणे। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

परिबृंहणं पीनत्वम्। । (क्षी.त.)

स्थूल, अक, आ। (धा.क.)

❖ स्निट[स्निट्] स्नेहने (चुरा०)

स्निट स्नेहने। स्मिट इत्येके। (क्षी.त.)

❖ स्पदि [स्पन्द्] किञ्चिच्चलने (भ्वा०)

स्पदि किञ्चच्चलने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

चलनं कम्पनम्। अकर्मकः। (मा.धा.)(धा.क.)

❖ स्पर्ध [स्पर्ध्] सङ्घर्षे (भ्वा०)

स्पर्ध सङ्घर्षे। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

संघर्षः पराभिभवेच्छा। स्पर्धते भ्रातुः - भ्रात्रा सह स्पर्धां करोतीत्यर्थः। (क्षी.त.)

पराभिभवेच्छा स्पर्धालुप्रयोगः चिन्त्यः। (मा.धा.)

सङ्घर्षः पराभिभवेच्छा। पराभिभवस्य धात्वर्थेन उपसङ्ग्रहात् अकर्मकत्वम्। उक्तं च -

धातोरर्थान्तरे वृत्ते धात्वर्थेनोपसङ्ग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया।

स्पर्द्ध, आ, सेट्। (धा.क.)

❖ **स्पश [स्पश्] बाधनस्पर्शनयोः (भ्वा०)**

स्पश बाधनस्पर्शनयोः। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

स्पश बाधनस्पाशनयोः। स्पशनं ग्रन्थनम्। चुरादौ स्पश बाधने। पश बन्धने। पष इत्येके। (क्षी.त.)

स्पर्शनं ग्रथनमितिस्वामी। ग्रहणश्लेषणयोरयं चुरादौ। अत्र स्वामी पष इत्येक इति। तेन पाषण्डः। पाषाण इत्याह। दुर्गशाकटानयोः अप्यमेव पक्षः। (मा.धा.)

स्पर्शनं ग्रन्थनमितिस्वामी। स्पश्, सेट्, सक, उ। ग्रहणश्लेषयोरयं चुरादौ। (धा.क.)

❖ **स्पश [स्पश्] ग्रहणसंश्लेषणयोः (चुरा०)**

स्पश ग्रहणश्लेषणयोः। (धा.प्र.)(क्षी.त.)(मा.धा.)

भ्वादौ स्पश बाधने। (क्षी.त.)

स्पश्, सक, आ। (धा.क.)

❖ **स्पुडि [स्पुण्ड्] प्ररिहासे (चुरा०)**

स्पुडि परिहसे। स्फुटि इति दुर्गः। स्फुडि परिघात इति एके। (क्षी.त.)

❖ **स्पृ [स्पृ] प्रीतिपालनयोः प्रीतिचलनयोः (स्वा०)**

स्पृ प्रीतिपालनयोः। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

प्रीतिचलनयोरित्येके। (धा.प्र.)

प्रीतिचलनयोरित्यन्ये। चलनं जीवनम् इति। स्वामी इमौ छान्दसाविति पारायणे। इमौ पृणोतिः च त्रयश्छान्दसा इति स्वामिकाश्यपौ। (मा.धा.)

स्पृ, अनिट्, सक, प। स्मृ इत्येके। इमौ छान्दसाविति पारायणे। (धा.क.)

❖ **स्पृ [स्पृ] शब्दोपतापयोः (भ्वा०)**

स्पृ शब्दोपतापयोः। (शा.आ.)

❖ **स्पृश [स्पृश्] संस्पर्शने (तुदा०)**

स्पृश संस्पर्शने। (शा.आ.)(मा.धा.)(धा.क.)

स्पृश संस्पर्शे। (धा.प्र.)(क्षी.त.)

स्पृश्, अनिट्, सक, प। (धा.क.)

❖ **स्पृह [स्पृह] ईप्सायाम् (चुरा०)**

स्पृह ईप्सायाम्। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

स्पृह, सक, उ। (धा.क.)

❖ **स्पॄ [स्पॄ] हिंसायाम् (क्र्या०)**

स्पॄ हिंसायाम्। (मा.धा.)

❖ **स्फटि [स्फण्ट्] विशरणे (भ्वा०)**

स्फटि स्फुटिर् विशरणे। स्फट इति नन्दिस्वामिनौ। वस्त्रं स्फटति। कुटादौ स्फुट विकसने । चुरादौ चट स्फुट भेदे । (क्षी.त.)

❖ **स्फर [स्फर्] चलने (तुदा०)**

स्फर इत्येके। (धा.प्र.)

स्फर स्फुर स्फल स्फुल चलने। (क्षी.त.)

❖ **स्फल [स्फल्] चलने (तुदा०)**

स्फर स्फुर स्फल स्फुल चलने। (क्षी.त.)

❖ **स्फायी [स्फाय्] वृद्धौ (भ्वा०)**

स्फायी ओप्यायी वृद्धौ। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.) (धा.क.)

स्फाय् (ई) प्याय् (ई, ओ) अक सेट् आ। (धा.क.)

❖ **स्फिट [स्फिट्] स्नेहने** **(चुरा०)**

स्फिट अनादरे। (क्षी.त.)

❖ **स्फिट [स्फिट्] हिंसायाम्** **(चुरा०)**

षट्ट **स्फिट** चुबि हिंसायाम्। चुभि इत्येके। (धा.प्र.)

❖ **स्फिट्ट [स्फिट्ट्] हिंसायाम्** **(चुरा०)**

षट्ट **स्फिट्ट** चुबि हिंसायाम्। (मा.धा.)(धा.क.)

वक्रसंयोगे शपि केचिद्। (मा.धा.)

सट्ट, स्फिट्ट, चुम्ब (इ, वा णिच्) सक, उ। (धा.क.)

❖ **स्फुट [स्फुट्] विकसने** **(भ्वा०)**

स्फुट विकसने। (धा.प्र.)(मा.धा.)(धा.क.)

अयं तुदादावपि। विशरणार्थोग्रे परस्मैपदिषु। भेदनार्थश्चुरादौ। (मा.धा.) (धा.क.)

स्फुट्, सेट्, अक, आ। (धा.क.)

❖ **स्फुट [स्फुट्] विकसने** **(तुदा०)**

स्फुट विकसने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

भ्वादौ स्फुटिर् विशरणे । (क्षी.त.)

विशरणार्थः परस्मैपदी। तत्रैव भेदानार्थः चुरादौ। (मा.धा.) (धा.क.)

स्फुट्, सेट्, अक, प। (धा.क.)

❖ **स्फुट [स्फुट्] संवरणे** **(तुदा०)**

तुट **स्फुट** संवरणे। (शा.आ.)

❖ **स्फुट [स्फुट्] भेदने** **(चुरा०)**

चट **स्फुट** भेदने। (धा.प्र.)(मा.धा.)(धा.क.)

चट **स्फुट** भेदे। चट स्फुट घट च हन्त्यर्थाः- एते हन्त्यर्थे णिचमुत्पादयन्ति। केचित्तु हन्त्यर्थाः स्वार्थे चेत्याहुः। (क्षी.त.)

चट्, स्फुट्, सक, उ। (धा.क.)

❖ **स्फुटिर् [स्फुट्] विशरणे** **(भ्वा०)**

स्फुटिर् विशरणे। (धा.प्र.)(मा.धा.)(धा.क.)

स्फुट विकशन इति कुटादौ पठ्यते । (धा.प्र.)

स्फटि **स्फुटिर्** विशरणे। स्फट इति नन्दिस्वामिनौ - वस्त्रं स्फटति। कुटादौ स्फुट विकसने। चुरादौ चट स्फुट भेदे। (क्षी.त.)

अयं पाठो मैत्रेयादीनाम्। देवेत्यधिकं क्वचित्। (मा.धा.)

अयं पाठो मैत्रेयादीनाम्। स्फुट् (इर्) सेट्, अक, प। स्वामिकाश्यपौ तु स्फुट स्फुटि स्फूटिरिति त्रीन् धातून् पठतः। स्फुट विकसन इत्यात्मनेपदिषु टान्तः। (धा.क.)

❖ **स्फुड [स्फुड्] संवरणे** **(तुदा०)**

स्फुड वुड संवरणे। (धा.प्र.)

थुड **स्फुड** संवरणे। (मा.धा.) (धा.क.)

स्फुड चुड व्रुड संवरणे - मैत्रेयेणैते न पठ्यन्ते आत्रेयादयस्तु पठन्ति । (मा.धा.)

स्फुड्, चुड्, व्रुड्, सेट्, सक, प। अत्र क्रुड भृड निमज्जन इत्येक इत्यात्रेयः। (धा.क.)

❖ **स्फुडि [स्फुण्ड्] विकसने** **(भ्वा०)**

स्फुडि विकसने। (क्षी.त.)

❖ **स्फुडि [स्फुण्ड्] परिहासे** **(चुरा०)**

स्फुडि परिहासे। (धा.प्र.)(मा.धा.)(धा.क.)

स्फुण्ड (इ, वा णिच् पूर्ववत् उ, प) सक। केचित् स्फुटि परिहासे इति। (धा.क.)

❖ स्फुर [स्फुर्] सञ्चलने (तुदा०)

स्फुर स्फुरणे सञ्चलने दीप्तौ च। (धा.प्र.)

स्फर **स्फुर** स्फल स्फुल चलने। (क्षी.त.)

स्फुर स्फुल सञ्चलने। (मा.धा.)(धा.क.)

स्फुरतिस्फुलत्योरित्यत्र न्यासे स्फुर स्फुल चलने इत्यनुपसृष्टं पठ्यते। अत्र केवलं शब्दो भिन्नोऽर्थस्त्वेक एव। आत्रेयस्तु स्फुर स्फुरणे स्फुल सञ्चलने इति पपाठ। (मा.धा.)

स्फुर्, स्फुल्, सेट्, अक, प। (धा.क.)

❖ स्फुर [स्फुर्] स्फुरणे (तुदा०)

स्फुर स्फुरणे। (शा.आ.)

❖ स्फुर [स्फुर्] संवरणे (तुदा०)

स्फुर स्फुल संवरणे। (शा.आ.)

❖ स्फुर्छा [स्फुर्छ्] विस्तृतौ (भ्वा०)

स्फुर्छा विस्तृतौ। (धा.प्र.) (मा.धा.)(धा.क.)

विस्मृतौ इति कातन्त्रम्। स्फुर्च्छ् (आ) सेट्, सक, प। (धा.क.)

❖ स्फुल [स्फुल्] सञ्चलने (तुदा०)

स्फुल संवरणे सञ्चये च। (शा.आ.)

स्फुर **स्फुल** सञ्चलने। (मा.धा.)(धा.क.)

स्फुल सञ्चलने। (धा.प्र.)

स्फर स्फुर स्फल **स्फुल** चलने। **स्फुल** सञ्चये च। (क्षी.त.)

स्फुरतिस्फुलत्योरित्यत्र न्यासे स्फुर स्फुल चलने इत्यनुपसृष्टं पठ्यते। अत्र केवलं शब्दो भिन्नोऽर्थस्त्वेक एव। आत्रेयस्तु स्फुर स्फुरणे। स्फुल सञ्चलने इति पपाठ। मैत्रयस्तु स्फुर स्फुरणे इति पृथक् पठित्वा स्फर इत्येके। अदुपधः। (मा.धा.)

स्फुर्, स्फुल्, सेट्, अक, प। (धा.क.)

❖ स्मिङ् [स्मि] ईषद्धसने (भ्वा०)

स्मिङ् ईषद्धसने। (क्षी.त.)

❖ स्मिङ् [स्मि] अनादरे (चुरा०)

स्मिङ् इत्येके। (धा.प्र.)

❖ स्मिट [स्मिट्] अनादरे (चुरा०)

स्मिट अनादरे। (धा.प्र.)(मा.धा.)(धा.क.)

स्मिङ् इत्येक इति मैत्रेयः। शाकटायनः तु अत्र स्मिट गताविति टान्तप्रकरणे पपाठ। स्मयत इतीषद्धासे शपि। (मा.धा.)

स्मिट्, सेट्, सक, उ। अत्र स्मिङ् इत्येक इति आत्रेयः। (धा.क.)

❖ स्मील [स्मील्] निमेषणे (भ्वा०)

मील **स्मील** निमेषणे। (शा.आ.)

मील **स्मील** क्ष्मील निमेषणे। श्मील इत्येके। (धा.प्र.)

❖ स्मुर्छा [स्मूर्छ्] विस्मृतौ (भ्वा०)

स्मुर्छा विस्मृतौ। स्फुर्छा विस्मृताविति दुर्गः। (क्षी.त.)

❖ स्मृ [स्मृ] आद्ध्याने (भ्वा०)

स्मृ आध्याने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

स्मृ चिन्तायामित्युक्तम्। स च स्मरतिः

अनेकार्थः अभ्युपेयते। आध्याने स्मरणविशेषे मित्त्वार्थमिह पठ्यते। आध्यानम् उत्कण्ठास्मरणम्। अतः अन्यत्र स्मारयति। स्मारकः शब्दार्थ इति स्मरणसामान्यविवक्षायाम्।
(धा.प्र.)

अध्यानमुत्कण्ठा। अन्यत्र उक्तानाम् अर्थविशेषे मित्त्वार्थ इह पाठः। (क्षी.त.)

स्मृ चिन्तायामित्यस्याध्याने मित्त्वार्थोऽनुवादः। आध्यानमुत्कण्ठापूर्वकं स्मरणम्। मातुः स्मरति मातुः स्मरयति अस्मरि अस्मारि अनाध्याने स्मारयति। (मा.धा.)

स्मृ [ध्यै] चिन्तायामित्यास्याध्याने मित्वार्थः अयमनुवादः, आध्यानम् उत्कण्ठापूर्वकं स्मरणम्। स्मरणमिति चतुर्भुजः। आ समन्तात् ध्यानमिति कातन्त्रटीकाकारः। स्मरयति मातुः, मातरं वा। मुहुरनुस्मरयन्तलनुक्षणं त्रिपुरदाहम् उमापतिसेविनः इति किराते। अन्यत्र मित्वाभावात् न ह्रस्वः। अस्मारयद् उपगीतिं स्वर्गकुरङ्गीदृशां गीतिः इति गङ्गादासः।
(धा.क.)

❖ **स्मृ [स्मृ] चिन्तायाम्** **(भ्वा०)**

स्मृ चिन्तायाम्। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

स्मृ, अनिट्, सक, प। (धा.क.)

❖ **स्मृ [स्मृ] इत्येके प्रीतिपालनयोः** **(स्वा०)**

स्मृ इत्येके। (धा.प्र.)

स्मृ प्रीतिबलनयोः। बलनं जीवनम्। स्पृ इत्येके। ते तु छान्दसप्रायौ। (क्षी.त.)

❖ **स्यन्दू [स्यन्द्] प्रस्रवणे** **(भ्वा०)**

स्यन्दू प्रस्रवणे। (शा.आ.)(मा.धा.)(धा.क.)

स्यन्दू स्रवणे। (धा.प्र.)(क्षी.त.)

स्यन्द् (ऊ) वेट्, सक, आ। (धा.क.)

❖ **स्यम [स्यम्] वितर्के** **(चुरा०)**

स्यम वितर्के। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

भ्वादौ स्यमु स्वन इति मित्। (क्षी.त.)

स्यम्, सक, आ। (धा.क.)

❖ **स्यमु [स्यम्] शब्दे** **(भ्वा०)**

स्यमु स्वन ध्वन शब्दे। (शा.आ.)
(धा.प्र.)(मा.धा.) (धा.क.)

स्यमु स्वन स्तन ध्वन शब्दे। (क्षी.त.)

स्यम् (उ) स्वन्, ध्वन्, सेट्, अक, प। अयं चुरादौ वितर्कार्थः। केचिद्भूषार्थे घटादित्वं मन्यन्ते। (धा.क.)

❖ **स्रंसु [स्रंस्] अवस्रंसने** **(भ्वा०)**

स्रंसु ध्वंसु भ्रंसु अवस्रंसने। ध्वंसु गतौ च। अत्र देवमैत्रेयादिमते स्रसते इति प्रमादे गतः।
(मा.धा.)

❖ **स्रंसु [स्रंस्] प्रमादे** **(भ्वा०)**

स्रंसु प्रमादे। (शा.आ.)

❖ **स्रकि [स्रङ्क्] गतौ** **(भ्वा०)**

सेकृ स्रेकृ श्रेकृ **स्रकि** श्रकि श्लकि गत्यर्थाः।
(धा.प्र.)

शीकृ सेकृ स्रेकृ **[स्रकि]** श्रकि श्लकि गत्यर्थाः।
(क्षी.त.)

सेकृ स्रेकृ **स्रकि** श्रकि श्लकि गत्यर्थाः। अन्त्यौ तालव्यादी। अन्ये दन्त्यादयः। (मा.धा.)

सेकृ, स्रेकृ, **स्रकि**, श्रकि, श्लकि गत्यर्थाः। सेक्, स्रेक्, (ऋ) स्रङ्क्, श्रङ्क्, श्लङ्क्, (इ) सेट्, सक, आ। (धा.क.)

❖ **स्रञ्चु [स्रञ्च्] गत्यर्थः (भ्वा०)**

वञ्चु चञ्चु तञ्चु त्वञ्चु ग्रञ्चु ग्लञ्चु **स्रञ्चु** म्रुचु म्लुचु गत्यर्थाः। ग्लुचु स्तेये। ग्लुञ्चु गतौ। (शा.आ.)

❖ **स्रन्भु [स्रन्भ] प्रमादे (भ्वा०)**

स्रन्भु प्रमादे। प्रमादोऽवलेपः। स्रन्सु इत्येके। (क्षी.त.)

❖ **स्रन्भु [स्रन्भ] विश्वासे (भ्वा०)**

स्रम्भु विश्वासे। (धा.प्र.)(क्षी.त.)(धा.क.)

स्रन्हुः इति कौशिकः। (क्षी.त.)

प्रायेणायं विपूर्वः। स्रन्भ् (उ) सेट्, सक, आ। तालव्यादिः काश्यपादिमते प्रमादे गतः। (धा.क.)

❖ **स्रन्सु [स्रंस्] प्रमादे (भ्वा०)**

स्रन्सु प्रमादे। (धा.प्र.)

❖ **स्रन्सु [स्रंस्] विश्वासे (भ्वा०)**

स्रुन्सु विश्वासे। (शा.आ.)

स्रन्सु प्रमादे। (धा.प्र.)

स्रन्सु ध्वन्सु भ्रन्सु अवस्रंसने; ध्वन्सु, गतौ च। सर्वे उदनुबन्धाः सेटः, अकर्मकाः, आत्मनेपदिनः च। (धा.क.)

❖ **स्रन्सु [स्रंस्] अवस्रंसने (भ्वा०)**

स्रन्सु ध्वन्सु भ्रन्सु अवस्रंसने। (शा.आ.) (क्षी.त.)

स्रन्सु भ्रन्शु ध्वन्सु अधःपतने अवस्रंसने च। (धा.प्र.)

स्रन्सु ध्वन्सु भ्रन्शु अवस्रंसने। (क्षी.त.)

स्रन्सु, ध्वन्सु, भ्रन्सु अवस्रंसने। ध्वन्सु, गतौ च। सर्वे उदनुबन्धाः सेटः, अकर्मकाः, आत्मनेपदिनश्च। (धा.क.)

❖ **स्रम्भु [स्रम्भ्] विश्वासे (भ्वा०)**

स्रम्भु विश्वासे। (धा.प्र.)(मा.धा.)

❖ **स्रिवु [स्रिव्] गतिशोषणयोः (दिवा०)**

स्रिवु गतिशोषणयोः। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

स्रिव् (उ) सेट्, सक, प। (धा.क.)

❖ **स्रु [स्रु] गतौ (भ्वा०)**

सु **स्रु** गतौ। (शा.आ.)

षु **स्रु** गतौ। (धा.प्र.)

स्रु गतौ। (क्षी.त.)(मा.धा.)(धा.क.)

अत्र मैत्रेयः सु इत्यरेफमपि धातुं पठित्वा सवतीत्युदाजहार। वोपदेवः अपि अमुमेव पाठमाश्रित्याह। सु गतौ षु प्रसवैश्वर्ययोश्चेति चकारेणैव गतावगतावपि। सु गतौ षु प्रसवैश्वर्ययोरिति सवतेर्द्विः पाठो गत्यर्थस्य अषोपदेशत्वार्थ इति। शाकटायनेनापि शु प्रु द्रु स्रु गताविति पठ्यते। (मा.धा.)

स्रु, अनिट्, सक, प। (धा.क.)

❖ **स्रेकृ [स्रेक्] गतौ (भ्वा०)**

सेकृ **स्रेकृ** श्रेकृ स्रकि श्रकि श्लकि गत्यर्थाः। (धा.प्र.)

शीकृ सेकृ **स्रेकृ** [स्रकि] श्रकि श्लकि गत्यर्थाः - शीकेरर्थभेदात् पुनः पाठः। अत एव चन्द्रो नैनमध्यैष्ट, अन्ये षेकृ इति विकल्पेन षोपदेशकार्यार्थं पेठुः। अत्रान्त्यौ तालव्यादी। (क्षी.त.)

सेकृ **स्रेकृ** स्रकि श्रकि श्लकि गत्यर्थाः। अन्त्यौ तालव्यादी। अन्ये दन्त्यादयः अत्र क्षीरस्वामी अत्र दन्त्यादेः स्थाने तालव्यादिं पठित्वा अर्थभेदात् पुनः पाठ इत्युक्त्वा षेकृ इत्यन्ये विकल्पेन षोपदेशं कार्यार्थे पेठुरिति। (मा.धा.)

सेकृ **स्रेकृ** स्रकि श्रकि श्लकि गत्यर्थाः। अन्त्यौ तालव्यादी, अन्ये दन्त्यादयः। सेकृ, स्रेकृ, (ऋ)। (धा.क.)

❖ स्रै [स्रै] पाके (भ्वा०)

श्रै **स्रै** पाके। (शा.आ.)(धा.प्र.)

स्रै श्रै पाके। (क्षी.त.)

❖ स्वद [स्वद्] आस्वादने (भ्वा०)

स्वद स्वर्द आस्वादने। (शा.आ.)

❖ स्वद [स्वद्] स्वर्दने (भ्वा०)

स्वद स्वर्दने। (शा.आ.)

❖ स्वन [स्वन्] अवतंसने (भ्वा०)

स्वन अवतंसने। अयं शब्दार्थः पठिष्यते। अत्र मैत्रेयः ध्वन शब्दे स्वन अवतंसन इत्येक इति। (मा.धा.)

❖ स्वन [स्वन्] शब्दे (भ्वा०)

स्यमु **स्वन** ध्वन शब्दे। (शा.आ.)(धा.प्र.)

ध्वन **स्वन** शब्दे। **स्वन** अवतंसन इत्येके। (धा.प्र.)

स्यमु **स्वन** स्तन ध्वन शब्दे। (क्षी.त.)

स्यमु **स्वन** ध्वन शब्दे। (मा.धा.)

स्यमु **स्वन** ध्वन शब्दे। स्यम् (उ) स्वन्, ध्वन्, सेट्, अक, प। अयं चुरादौ वितर्कार्थः। (धा.क.)

❖ स्वन [स्वन्] शब्दे (भ्वा०)

स्वन ध्वन शब्दे। स्वनति। वेरुपसर्गात्परस्य 'वेश्च स्वनो भोजने' इति षत्वं 'रषाभ्यां नोणः समानपदे' इति णत्वं विष्वणति भुङ्क्ते इत्यर्थः। भोजनादन्यत्र विस्वनति 'अडभ्यासव्यवायेऽपि' व्यष्वणत् च। (शा.आ.)

स्यमु **स्वन** ध्वन शब्दे। (धा.प्र.)

❖ स्वर [स्वर] आक्षेपे (चुरा०)

स्वर आक्षेपे। (धा.प्र.)(क्षी.त.) (मा.धा.) (धा.क.)

भ्वादौ स्वृ शब्दोपतापयोः। (क्षी.त.)

स्वर, सक, उ। (धा.क.)

❖ स्वर्त [स्वर्त्] गत्याम् (चुरा०)

स्वर्त गत्यां च। चकाराद् कृच्छ्रजीवने च। गत्यामित्यसत्, स्वर्तशब्दस्यैव सम्भवात्। षोपदेश इति नन्दी । श्वभ्र गतौ च इति दौर्गाः। (क्षी.त.)

❖ स्वर्द [स्वर्द्] आस्वादने (भ्वा०)

स्वद **स्वर्द** आस्वादने। (शा.आ.)

ष्वद **स्वर्द** आस्वादने। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

आद्यः षोपदेशः नेतरः। (धा.प्र.)

आस्वादनं जिह्वाया लेहः। (क्षी.त.)

संवरण इति क्षीरस्वामी। आस्वादनम् अनुभवः अत्रायं सकर्मकः। (मा.धा.)

ष्वद स्वर्द आस्वादने इति धातुवृत्तिकारः। संवरण इति क्षीरस्वामी। आस्वादनमनुभवः। अत्रायं सकर्मकः। स्वदन्ति देवा उपा निहव्येति दर्शनात्। छान्दसं परस्मैपदम्। आस्वादनमिह रसापादानं प्रीणनश्चेति रमानाथः। तथा स्वादन इति ण्यन्तेनार्थनिर्देशाच्च सकर्म्मकोऽयम्। यदायमनेकार्था धातव इति रुचौ वर्तते, तदाऽकर्म्मकः। आद्यः षोपदेशः। तदुक्तं भाष्ये- अज् (स्वर) दन्त्यपराः। प्रायेणायमाङ् पूर्वः। स्वद्, सेट्, आ। स्वाद्, सेट्, आ। स्वर्द, सेट्, आ। (धा.क.)

❖ **स्वाद [स्वाद्] आस्वादने** (भ्वा०)

स्वाद आस्वादने। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)

ष्वद, **स्वाद**, स्वर्द आस्वादने। संवरण इति क्षीरस्वामी। आस्वादनमनुभवः। अत्र अयं सकर्मकः। स्वदन्ति देवा उपा निहव्येति दर्शनात्। छान्दसं परस्मैपदम्। आस्वादनमिह रसापादानं प्रीणनश्चेति रमानाथः। तथा स्वादन इति ण्यन्तेनार्थनिर्देशाच्च सकर्म्मकोऽयम्। यदक्ष्यते चुरादावास्वादने सकर्म्मक इति, अस्यार्थस्तत्र प्रपञ्चयिष्यते। यदायमनेकार्था धातव इति रुचौ वर्तते, तदाऽकर्म्मकः। आद्यः षोपदेशः। तदुक्तं भाष्ये - अज् (स्वर) दन्त्यपराः। प्रायेणायमाङ् पूर्वः। स्वद्, सेट्, आ। स्वाद्, सेट्, आ। स्वर्द, सेट्, आ। (धा.क.)

❖ **स्वृ [स्वृ] शब्दोपतापयोः** (भ्वा०)

स्वृ शब्दोपतापयोः। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

चुरादौ स्वर आक्षेपे। (क्षी.त.)

स्वृ, वेट्, अक, प। सम् - आत्मनेपदी। (धा.क.)

❖ **स्वॄ [स्वॄ] हिंसायाम्** (क्र्या०)

स्वॄ हिंसायाम्। पवर्गीयबकारात् परो न ॠकारोऽयमिति तत्प्रकरणानुरोधेन अन्यत्र शॄ हिंसायामित्यत्रापि नोपदिष्टः। (धा.प्र.)

❖ **हट [हट्] दीप्तौ** (भ्वा०)

हट दीप्तौ। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

हट्, सेट्, अक, प। (धा.क.)

❖ **हठ [हठ्] प्लुतिशठत्वयोः बलात्कारे च** (भ्वा०)

हठ प्लुतिशङ्कुबन्धनयोः (धा.प्र.)(क्षी.त.)

प्लवने कीलबन्धने चार्थे। हठ बलात्कारे इति तु चान्द्राः। (क्षी.त.)

हठ बलात्कार इति चन्द्रदुर्गौ। (मा.धा.)

हठ्, सेट्, अक, प। हठ बलात्कारे इति चन्द्रदुर्गौ। (धा.क.)

❖ **हद [हद्] पुरीषोत्सर्गे** (भ्वा०)

हद पुरीषोत्सर्गे। (धा.प्र.)(क्षी.त.)(मा.धा.)

हद्, अनिट्, सक, आ। (धा.क.)

❖ **हद [हद्] पुरीषोत्सर्गे** (तुदा०)

हद पुरीषोत्सर्गे। (शा.आ.)(शा.आ.)

❖ **हन [हन्] हिंसागत्योः** **(अदा०)**

हन हिंसागत्योः। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

हन्, अनिट्, सक, प। आ - आघातः, प्रहारः, वादनम्। वि - विघातः। सम् - सङ्घातः योगः। नि - निहननं, वादनम्। अभि - अभिघातः, वादनं, शब्दः। (धा.क.)

❖ **हम्म [हम्म्] गतौ** **(भ्वा०)**

द्रम **हम्म** मीमृ गतौ। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

अयं शब्दे चेति क्वचित्पठ्यते। (मा.धा.) (धा.क.)

द्रम्, हम्म्, मीम् (ऋ) सक, सेट्, प। (धा.क.)

❖ **हय [हय्] गतौ** **(भ्वा०)**

हय गतौ। (धा.प्र.) (मा.धा.) (धा.क.)

हय गतिकान्त्योः। (क्षी.त.)

भक्तिशब्दयोरपीति केचित्। (मा.धा.)(धा.क.)

हय्, सेट्, सक, प। (धा.क.)

❖ **हर्य [हर्य्] गतिकान्त्योः** **(भ्वा०)**

हर्य गतिकान्त्योः। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

हर्य्, सेट्, अक, प। (धा.क.)

❖ **हल [हल्] विलेखने** **(भ्वा०)**

हल विलेखने। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

विलेखनं कर्षणम्। (क्षी.त.)(धा.क.)

हल्, सेट्, सक, प। (धा.क.)

❖ **हसे [हस्] हसने** **(भ्वा०)**

हसे हसने। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

हस् (ए) सेट्, अक्, प। (धा.क.)

❖ **हि [हि] गतौ वृद्धौ च** **(स्वा०)**

हि गतौ वृद्धौ च। (शा.आ.)(धा.प्र.)
(क्षी.त.)(मा.धा.)(धा.क.)

हि, अनिट्, प। (धा.क.)

❖ **हिक्क [हिक्क्] अव्यक्ते शब्दे** **(भ्वा०)**

हिक्क् अव्यक्ते शब्दे। (शा.आ.)
(धा.प्र.)(क्षी.त.)

हिक्क अव्यक्तशब्दे। हिक्क्, सेट्, अक, उ।
(धा.क.)

❖ **हिडि [हिण्ड्] गत्यनादरयोः** **(भ्वा०)**

हिडि गत्यनादरयोः। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

हिण्ड् (इ) सेट्, आ, सक। (धा.क.)

❖ **हिल [हिल्] भावकरणे** **(तुदा०)**

हिल भावकरणे। (शा.आ.)

हिल हावकरणे। (धा.प्र.)(क्षी.त.)
(मा.धा.)(धा.क.)

भावकरणमभिप्रायसूचनम्। (मा.धा.)(धा.क.)

❖ **हिवि [हिन्व्] प्रीणनार्थः** **(भ्वा०)**

हिवि दिवि धिवि जिवि प्रीणनार्थाः। (धा.प्र.)
(मा.धा.)(धा.क.)

अत्र केचिद् आद्यमिकारादिं पठित्वा पुनः पाठोऽर्थभेदादिति। धातूनामनेकार्थत्वे तु न प्रयोजनमस्ति। तस्मात् मैत्रेयोक्त एव हिवीति पाठो ज्यायान्। (मा.धा.) (धा.क.)

सर्वे इदनुबन्धाः, सेटः, सकर्मकाः परस्मैपदिनश्च। (धा.क.)

❖ हिष्क [हिष्क्] हिंसायाम् (चुरा०)

हिष्क हिंसायाम्। (धा.प्र.)

❖ हिसि [हिंस्] हिंसायाम् (रुधा०)

हिसि हिंसायाम्। (शा.आ.)(मा.धा.)(धा.क.)

तृह **हिसि** हिंसायाम्। (धा.प्र.) (क्षी.त.)

हिन्स्, (इ) सेट्, सक, प। (धा.क.)

❖ हिसि [हिंस्] हिंसायाम् (चुरा०)

अर्द **हिसि** हिंसायाम्। (धा.प्र.)(क्षी.त.) (मा.धा.)

हिन्स् (इ) सक, उ। (धा.क.)

❖ हु [हु] दानादनयोः आदाने च (जुहो०)

हु दानादनयोः। (शा.आ.)(क्षी.त.)(मा.धा.)

हु दाने। (धा.प्र.)(धा.क.)

आदानेऽप्येके। (धा.प्र.)

दानमत्र हविः प्रक्षेपः, अदनं भक्षणम्। (क्षी.त.)

दानादानयोरित्यन्ये। आत्रेयस्तु हु दाने इति पठित्वा आदानेत्येके इति। (मा.धा.)

हु, अनिट्, सक, प। (धा.क.)

❖ हुड [हुड्] निमार्जने (तुदा०)

जुड **हुड** निमार्जने। (शा.आ.)

दुड **हुड** निमज्जने। क्रुड इत्येके। (क्षी.त.)

❖ हुड [हुड्] सङ्घाते (तुदा०)

हुड सङ्घाते। (शा.आ.)(धा.प्र.)

❖ हुड [हुड्] सहने (तुदा०)

हुड सहने। (धा.प्र.)

❖ हुडि [हुण्ड्] सङ्घाते (भ्वा०)

हुडि सङ्घाते। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

अत्र काश्यपः आर्यास्तु न पठन्ति द्रविडास्तु पठन्तीति। भाष्यादौ तु हुण्ड इति अविगीतम् उदाह्रियते। (मा.धा.)

हुण्ड्, (इ) सेट्, अक, आ। (धा.क.)

❖ हुडि [हुण्ड्] वरणे हरणे (भ्वा०)

हुडि हरणे। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

वरणं स्वीकारः। (क्षी.त.)

वरणं स्वीकारः। हरणम् इति मैत्रेयः। (मा.धा.)

सङ्घाते इति दुर्गः। वरणं स्वीकारः। हरणमिति मैत्रेयः। हुण्ड् (इ) सेट्, सक, आ। (धा.क.)

❖ हुडृ [हुड्] गतौ (भ्वा०)

हूडृ हुडृ हौडृ गतौ। (क्षी.त.)(मा.धा.)(धा.क.)

हुडृ हूडृ गताविति धनपालशाकटायनौ होडत इत्यनादरे गतः। (मा.धा.) (धा.क.)

हूड्, हुड्, होड् (ऋ) सेट्, सक, प। (धा.क.)

❖ हुर्छा [हुर्छ्] कौटिल्ये (भ्वा०)

हुर्च्छा कौटिल्ये। (धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

हूर्च्छति चौरः। कौटिल्यं करोति। अपसरति इत्यर्थः। (धा.प्र.)

इह कौटिल्यमपसरणमिति मैत्रेयस्य मतम्। (मा.धा.)(धा.क.)

हुर्च्छ् (आ) सेट्, अक, प। (धा.क.)

❖ हुल [हुल्] गतौ **(भ्वा०)**

शल हुल पत्लृ गतौ। हुल हिंसासंवरणयोश्च- (धा.प्र.)(क्षी.त.)(मा.धा.)

चकारोऽन्वाचये। गतावस्य प्रायः प्रयोगः। क्वचित् तु हिंसासंवरणयोः। (धा.प्र.)

अत्र मैत्रेयः चकारोत्रान्वाचये गतावस्य तावत्प्रयोगः। क्वचित्तु हिंसासंवरणयोश्चेति क्वचित्तु पठ्यते। शल ह्वल ह्मल पद्लृ गतौ हुल हिंसासंवरणयोश्चेति। (मा.धा.)

शल, हुल, पत्लृ गतौ। पल, शल, पत्लृ पथे च गताविति दुर्गः पठति। हुल हिंसासंवरणयोश्चेति कश्चित्। अत्र मैत्रेयः - चकारोऽत्रान्वाचये गतावस्य तावत्प्रयोगः। क्वचित्तु हिंसासंवरणयोः। क्वचित् पठ्यते - शल, ह्वल, ह्मल, पत्लृ, गतौ, हुल हिंसासंवरणयोश्चेति। शल्, हुल्, पत् (लृ) सेट्, अक, प। अनु - अनुपातः। अभि - अभिपतनम्। आ - आपतनम् - उपस्थितिः। उत् - उत्पतनम् - उड्डयनम्। उत्पातः। नि - निपातः। णिच् - निपातनम्। सम्पातः। प्रपातः- धारा, जलप्रपातः। निपतनम् - अधःपतनम्। प्रनि - प्रणिपातः। अयं कथादावपि। (धा.क.)

❖ हूडृ [हूड्] गतौ **(भ्वा०)**

हूडृ होडृ गतौ। (धा.प्र.)

हूडृ हुडृ हौडृ गतौ। (क्षी.त.)

हूडृ हुडृ होडृ गतौ। (मा.धा.)(धा.क.)

हुडृ हूडृ गताविति धनपालशाकटायनौ होडत इत्यनादरे गतः। (मा.धा.)

हूड्, हुड्, होड् (ऋ) सेट्, सक, प। हुडृ, हूडृ गताविति धनपालशाकटायनौ होडत इत्यनादरे गतः। (धा.क.)

❖ हृ [हृ] प्रसह्यकरणे **(जुहो०)**

हृ प्रसह्यकरणे। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

हृ प्रसह्यहरणे। बलात् मोषेऽर्थे। भ्वादौ हृञ् हरणे। (क्षी.त.)

'अयं स्त्रुवो अभिजिहर्ति होमान्' इत्यादि। हरतीति शपि। (मा.धा.)

हृ, अनिट्, सक, प। अयमपि छन्दोविषय इति। अयं स्तुवः अभिजिहर्त्ति होमान् इत्यादि। प्रसह्यकरणं - बलाद्धरणम्। जहर्त्ति धनं दस्युरिति रमानाथप्रयोगः। (धा.क.)

❖ हृञ् [हृ] हरणे **(भ्वा०)**

हृञ् हरणे। (शा.आ.)(धा.प्र.)(क्षी.त.) (मा.धा.)(धा.क.)

जलधिमनुहरते सरः। (धा.प्र.)

हरणं प्रापणं स्वीकारः स्तैन्यं नाशनं च। यथा भारं हरति ग्रामम्। अंशं हरति, सुवर्णं हरति चौरः। पापं हरतीति। विहाराहारप्रहारादौ अर्थान्तराभिधानं तु उपसर्गवशात्। तत्र यदा प्रापणमर्थस्तदा 'अकथितं च' इति द्विकर्मकः अयम्। (मा.धा.)

हृ (ञ्) अनिट्, सक, उ। वि - अति - व्यतिहारः, विपर्य्ययः। अनु - अनुहरणम्, अनुकरणम्। अप - अपहरणम्। अभि - अव - अभ्यवहारः,

भोजनम्। वि - अव - व्यवहारः। आ - आहरणम्, आनयनम्। उद् - आ - उदाहरणम्। प्रति-उद्-आ - प्रत्युदाहरणम्। वि - आ - व्यवहारः। उक्तिः। सम्-आ- समाहारः सङ्ग्रहः। उद् - उद्धारः। उप- उपहारः। निर् - निर्हरणम्। परि - परिहारः, त्यागः। प्र - प्रहारः। वि - विहारः। सम् - संहारः। उप - सम् - उपसंहारः, समापनम्। (धा.क.)

❖ **हृष [हृष्] तुष्टौ** **(दिवा०)**

हृष तुष्टौ। (शा.आ.)(धा.प्र.)(क्षी.त.)(धा.क.)

नन्दी अस्याप्युदित्वमाह। (क्षी.त.)

हृष्, अक, सेट्, प। अयमुदिदिति स्वामी। (धा.क.)

❖ **हृषु [हृष्] अलीके** **(भ्वा०)**

हृषु अलीके।(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

हृष तुष्टाविति दिवादौ। (धा.प्र.)

दिवादौ हृष तुष्टौ। (क्षी.त.)

दिवादौ हृष तुष्टाविति पठ्यते। (मा.धा.)

हृष् (उ) सेट्, अक, प। (धा.क.)

❖ **हेठ [हेठ्] विबाधायाम्** **(भ्वा०)**

हेठ विबाधायाम्। (धा.प्र.)(क्षी.त.) (धा.क.)

अमुं परस्मैपदिष्वपि केचित् पठन्ति। विबाधनं शाठ्यम्। (क्षी.त.)

अमुं परस्मैपदिष्वपि केचित् पठन्ति। विबाधा शाठ्यम्। हेठ्, सेट्, अक, आ। (धा.क.)

❖ **हेठ [हेठ्] भूतप्रादुर्भावे** **(क्र्या०)**

हेठ च खर्वार्थे। भ्वादौ हेठ विबाधायाम्। (क्षी.त.)

❖ **हेड [हेड्] विबाधायाम्** **(भ्वा०)**

हेड विबाधायाम्। कौशिकस्तु नैतानाह। (क्षी.त.)

❖ **हेड [हेड्] वेष्टने** **(भ्वा०)**

हेड वेष्टने। (धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

हेडृ अनादर इति आत्मनेपदिषु गतः। तस्य परस्मैपदिषु अनुवादसामर्थ्यात् परस्मैपदमपि भवति। (मा.धा.)

हेड्, सेट्, सक, प। (धा.क.)

❖ **हेडृ [हेड्] अनादरे** **(भ्वा०)**

हेडृ होडृ अनादरे। (धा.प्र.)(मा.धा.)(धा.क.)

हेड वेष्टन इति घटादौ पठ्यते। (धा.प्र.)

हेडृ अनादरे। घटादौ हेड वेष्टने। (क्षी.त.)

हेडृ वेष्टन इति। घटादौ होडृ गतावित्यग्रे परस्मैपदी। (मा.धा.)

अनादरः अवज्ञा। हेड् (ऋ) होड् (ऋ) सक, सेट्, आ। हेडृ वेष्टने घटादौ। (धा.क.)

❖ **हेल [हेल] वेष्टने** **(भ्वा०)**

हेल वेष्टने। (शा.आ.)

❖ **हेषृ [हेष्] अव्यक्ते शब्दे** **(भ्वा०)**

हेषृ ह्रेषृ अव्यक्ते शब्दे। हेषते ह्रेषते अश्वः। (शा.आ.)

रेषृ हेषृ अव्यक्ते शब्दे। (धा.प्र.)(मा.धा.)(धा.क.)

हेषा ह्रेषा च निःस्वन इत्यमरः। (धा.प्र.)

हेषृ अव्यक्ते शब्दे। रेषृ इत्यपि चन्द्रः। (क्षी.त.)

अयंस्वभावाद्वृकविषयः हेषते। अयमश्वविषयः। ह्रेषृ इति सेरेफश्चात्र द्रष्टव्यः। यदाह केशवस्वामी-

कौक्षे कर्दति पर्दते गुदरवे रेषेति वार्के भवेत्।
बुक्केति श्वरवे भषेति हयजे ह्रेषेति हेषेति च॥

इति। तथा हेषा ह्रेषा च निःस्वने इत्यमरः। (मा.धा.)

रेष्, हेष् (ऋ) सेट्, अक, आ। अयं वृकविषयः। हेषते इत्यादि। अयमश्वविषयः ह्रेषृ इति सरेफश्चात्र द्रष्टव्यः। यदाह केशवस्वामी -

कौक्षे कर्दति पर्दते गुदरवे रेषेति वार्के भवेत्।
बुक्केति श्वरवे भषेति हयजे ह्रेषेति हेषेति च॥

तथा च अमरः - हेषा ह्रेषा च निःस्वने। (धा.क.)

❖ **होडृ [होड्] अनादरे** **(भ्वा०)**

हेडृ होडृ अनादरे। (धा.प्र.)(मा.धा.)(धा.क.)

घटादौ होडृ गतावित्यग्रे परस्मैपदी। (मा.धा.)

अनादरः अवज्ञा। हेड् (ऋ) होड् (ऋ) सक, सेट्, आ। होडृ गतावित्यग्रे। (धा.क.)

❖ **होडृ [होड्] गतौ** **(भ्वा०)**

हूडृ होडृ गतौ। (धा.प्र.)

हूडृ हुडृ होडृ गतौ। (मा.धा.)(धा.क.)

हुडृ हूडृ गताविति धनपालशाकटायनौ। (मा.धा.)

हूड्, हुड्, होड् (ऋ) सेट्, सक, प। हुडृ, हूडृ गताविति धनपालशाकटायनौ । (धा.क.)

❖ **हौडृ [हौड्] गतौ** **(भ्वा०)**

हूडृ हुडृ हौडृ गतौ। (क्षी.त.)

❖ **ह्नुङ् [ह्नु] अपनयने** **(अदा०)**

ह्नुङ् अपनयने। (शा.आ.)(धा.प्र.)(क्षी.त.)(मा.धा.)(धा.क.)

अपनयम् अपलापः। (क्षी.त.)

अपनयनम् अपह्नवः, गोपनं; चौर्यमिति वोपः। ह्नु (ङ्) अनिट्, सक, आ। प्रायेण निपूर्वकः अपपूर्वकश्चायं प्रयुज्यते। (धा.क.)

❖ **ह्मल [ह्मल्] चलने** **(भ्वा०)**

ज्वल ह्वल **ह्मल** चलने। (शा.आ.)

ह्वल **ह्मल** चलने। (धा.प्र.)(क्षी.त.) (मा.धा.)

इमौ च सोपसर्गावेव नित्यं मित्वं प्रयोजयतः ज्वलतिवद् अनुपसृष्टयोः विकल्पस्य वक्ष्यमाणत्वात्। (मा.धा.) (धा.क.)

ह्वल्, ह्मल्, सेट्, सक, प। (धा.क.)

❖ **ह्रगे [ह्रग्] संवरणे** **(भ्वा०)**

ह्रगे ह्लगे षगे ष्ठगे संवरणे। (धा.प्र.)(मा.धा.)(धा.क.)

ह्रगे ह्लगे ष्ठगे स्थगे संवरणे। संवरणम् आच्छादनम्। (क्षी.त.)

ह्रग्, ह्लग्, सग्, स्थग् (ए) सेट्, सक, प। (धा.क.)

❖ **ह्रगे [ह्रग्] सङ्गे** **(भ्वा०)**

अगे **ह्रगे** ह्लगे सङ्गे। (शा.आ.)

❖ **ह्रप [ह्रप्] व्यक्तायां वाचि** **(चुरा०)**

ह्रप व्यक्तायां वाचि। (धा.प्र.)

❖ **ह्रस [ह्रस्] शब्दे** **(भ्वा०)**

तुस **ह्रस** ह्लस रस शब्दे। (शा.आ.)(धा.प्र.)(मा.धा.)(धा.क.)

तुस **ह्रस** ह्लस रस शब्दार्थाः। (क्षी.त.)

तुस्, ह्रस, ह्लस्, रस्, सेट्, अक, प। (धा.क.)

❖ **ह्राद [ह्राद्] अव्यक्ते शब्दे** **(भ्वा०)**

ह्राद अव्यक्ते शब्दे। (धा.प्र.)(मा.धा.)(धा.क.)

ह्रदो जलाशयविशेषः पृषोदरादित्वाद् ह्रस्वत्वम्। (धा.प्र.)

अव्यक्तेऽनतिस्फुटवर्णे। (क्षी.त.)

अव्यक्तशब्दो वाद्यादिघोषः। (मा.धा.)(धा.क.)

शब्दस्य गुणत्वेऽपि क्रियात्वम्। ह्राद्, सेट्, अक, आ। (धा.क.)

❖ ह्रादी [ह्राद्] अव्यक्ते शब्दे सुखे च (भ्वा०)

ह्रादी ह्लादी अव्यक्ते शब्दे ह्लादी सुखे च। (शा.आ.)

❖ ह्री [ह्री] लज्जायाम् (जुहो]

ह्री लज्जायाम्। (शा.आ.)(धा.प्र.) (क्षी.त.)(मा.धा.)(धा.क.)

ह्री, अनिट्, अक, प। (धा.क.)

❖ ह्रीच्छ [ह्रीच्छ्] लज्जायाम् (भ्वा०)

ह्रीच्छ लज्जायाम्। (धा.प्र.)(मा.धा.)(धा.क.)

ह्री लज्जायामिति जुहोत्यादौ। (मा.धा.)

ह्रीच्छ, सेट्, अक, प। ह्रीच्छति। ह्री लज्जायामपि जुहोत्यादौ। (धा.क.)

❖ ह्रीछ [ह्रीच्छ्] लज्जायाम् (भ्वा०)

ह्रीछ लज्जायाम्। (क्षी.त.)

❖ ह्रेषृ [ह्रेष्] अव्यक्ते शब्दे (भ्वा०)

